Scanned

DAS'OPANIṢAD-S

VOL. II

EDITED BY
THE PANDITS OF THE ADYAR LIBRARY
UNDER THE SUPERVISION OF
PROF. C. KUNHAN RAJA, M.A., D.PHIL. (OXON.)

ADYAR LIBRARY AND RESEARCH CENTRE

DAS'OPANISHADS

WITH THE COMMENTARY OF

SRI UPANISHAD-BRAHMA-YOGIN

VOLUME II

EDITED BY

THE PANDITS OF THE ADYAR LIBRARY

UNDER THE SUPERVISION OF

PROF. C. KUNHAN RAJA, M.A., D.PHIL. (OXON.)

PUBLISHED FOR THE ADYAR LIBRARY

(THE THEOSOPHICAL SOCIETY)

1936

दश-उपनिषदः

श्री उपनिषद्ब्रह्मयोगिविरचितव्याख्यायुताः

द्वितीयो भागः

अडयार्पुस्तकालयस्थपण्डितैः संपादिताः

चि-कुञ्जन्राजमहाशयैः प्रत्यवेक्षिताः

अडयार्पुस्तकालयार्थे

प्रकटीकृताश्च

१९३६

ॐ नमो
ब्रह्मादिभ्यो
ब्रह्मविद्यासंप्रदायकर्तृभ्यो
वंशऋषिभ्यो
नमो गुरुभ्यः

DEDICATED TO

Brahma and the Rishis,
The Great Teachers
Who handed down Brahmavidya
through Generations

FOREWORD

It was in 1920 that the late Pandit A. Mahadeva Sastri of revered memory, the then Director of The Adyar Library, published The Yoga Upanishads as the first Volume of the Upanishads series according to the plan which he had outlined in his preface to that volume. He carried on the work till the beginning of 1926 when he passed over. The subsequent progress of these publications till its completion with this volume is traced out in the Introduction to this Volume written by my learned colleague Dr. C. Kunhan Raja, the Honorary Curator of the Oriental Section of The Adyar Library. It is under his scholarly supervision that this volume has been brought out. In the main, it is the work of Pandit N. Ramanatha Sastri of The Adyar Library ably assisted by Pandit T. R. Seshadri Sarma, also a member on the staff of the Library. To all these I beg to tender my grateful thanks.

G. Srinivasa Murti,

Honorary Director.

INTRODUCTION

WITH this volume containing the Chāndogya and the Bṛhadāraṇyaka Upaniṣads, the one hundred and eight Upaniṣads with the commentary of Upaniṣad Brahma Yogin have been finished. The series of Upaniṣad publications now brought to a close with this volume was begun in the year 1920, in which year the late Pandit Mahadeva Sastri, then Director of the Adyar Library published the Yoga Upaniṣads with the commentary. In the following year he published the Sāmānya Vedānta Upaniṣads. The Vaiṣṇava Upaniṣads were published in 1923. The S'aiva and the S'ākta Upaniṣads were published in 1925. At this stage, the learned Director of the Library passed away. Of the 98 Minor Upaniṣads, there were the Saṃnyāsa Upaniṣads remaining. I came to the Adyar Library at this time, in April 1926.

In the Preface to the first volume of the Upaniṣads published by the late Pandit Mahadeva Sastri, he had written as follows: " Except for any unforeseen cause, there will be no occasion for delay in the publication of the succeeding volumes of the text and the commentary according to the present plan. One volume at least of the size of the present one may be issued

every year." Unfortunately, some unforeseen cause arose in the death of the learned Director, who could publish only four volumes (The S'aiva and the S'ākta being taken as a single volume). The remaining one volume containing the Saṃnyāsa Upaniṣads had to lie over for some time. I had to publish the two volumes of the catalogue of the manuscripts in the Library, as soon as I came to the Library (Pandit Mahadeva Sastri had begun the printing of this catalogue, but could finish only a small portion). In 1929, when Mr. T. R. Chintamani, M.A. was my colleague in the Library, this volume was taken up and published.

Upaniṣad Brahma Yogin has written a commentary on all the one hundred and eight Upaniṣads, and with these five volumes, only the ninety-eight Minor Upaniṣads were finished. The remaining ten Major Upaniṣads had to be taken up. We have already many editions of the commentary of S'ri S'aṅkarācārya for these ten Upaniṣads, and Upaniṣad Brahma Yogi was closely following this commentary. Yet the publication of this commentary for the ten Major Upaniṣads, it was found, will not be a duplication of material. For one thing, Upaniṣad Brahma Yogin is extremely lucid in his presentation of S'aṅkarācārya's position. With these ten Major Upaniṣads added, the whole set will be a fine edition of all the Upaniṣads with the commentary of a single author, very handy, uniform and well printed. So the Library decided to print the ten Major Upaniṣads also in the series.

The plan of a publication of the Upaniṣads from the Adyar Library was seriously taken up by Dr. Schrader, who became the Director of the Library in 1905. In 1908, he published a descriptive catalogue of the Upaniṣad Manuscripts in the Library. In this catalogue Dr. Schrader showed his ability as a critical scholar. This is the first volume of the complete descriptive catalogue of manuscripts in the Library. (It is regrettable that for various reasons his plan could not be proceeded with and no further volumes of this descriptive catalogue appeared. The matter will now be taken up soon.) In the year 1912, Dr. Schrader published the first volume of the text of the Minor Upaniṣads. This volume contained the Upaniṣads designated the Saṃnyāsa Upaniṣads. The volume contained a very scholarly Preface and also critical notes. All the variant readings collected from the manuscripts were incorporated in the form of foot-notes. This edition was meant for scholars who want to examine the Upaniṣad Texts for critical study. In the later volumes, this plan has not been very carefully followed. The size of the later Upaniṣad volumes published from the Library is different from that of Dr. Schrader's edition, and all the Saṃnyāsa Upaniṣads were later re-published with the commentary, uniform to the publications started by Pandit Mahadeva Sastri.

Apart from the 98 Minor Upaniṣads and the ten Major Upaniṣads, there are in the Adyar Library (also in Libraries like the Government Oriental Manuscripts

Library, Madras) manuscripts of various works that have come down to us under the name of Upaniṣads. I thought it worthwhile to publish all those works, and in 1932 I brought out a volume of Upaniṣads containing all those Un-published Upaniṣads. It is true that some of them had been published before. But this is the first time when all such works that are known as Upaniṣads, but that are not included among the well-known 108 Upaniṣads, have been published in a single volume. The size of the volume and the plan of publication are uniform with the volumes that had been started by Pandit Mahadeva Sastri. The matter had not been critically examined for publication. It is more or less a presentation in print of the material available in manuscripts. Since manuscripts are rare many scholars have no access to these works. The object of the Library in publishing the volume was only to make available to scholars the material that was confined to a few manuscripts till then.

After this volume was published the ten Major Upaniṣads with the commentary of Upaniṣad Brahma Yogin were taken up. They are published in two volumes. The first volume containing eight Upaniṣads (Īśa to Aitareyi) was published in 1935. The second volume containing the remaining two, namely the Chāndogya and the Bṛhadāraṇyaka Upaniṣads is now published in this volume.

Thus in eight handy volumes we have now all the 108 Upaniṣads with the commentary of a single author,

the Upaniṣad Brahma Yogin, and 71 other Upaniṣads, which bear this name but which are not included in the list of Upaniṣads according to traditional reckoning. These 108 Upaniṣads are enumerated in the Muktikopaniṣad, which is in this series published in the volume containing the Sāmānya Vedānta Upaniṣads, as No. 14 on pages 345 to 377, the enumeration itself appearing in stanzas 30 to 39 on pages 349 and 350. From the fact that the other 71 Upaniṣads are not enumerated here, one should not discard them as spurious. Many of the Upaniṣads enumerated in the list are very late ones, and many of the Upaniṣads outside of this list are comparatively early. For a critical scholar and for students of religion, all the Upaniṣads, whether included in the traditional list or not, are of great importance, and of equal importance. All of them deserve serious study.

The Upaniṣads do not belong to any specific time in the history of the development of Indian religion and Philosophy. Many of them grew up in later times and they belong to sectarian religions of later times. The Texts of these Upaniṣads are not uniform; they show considerable variations. It is necessary to edit these Upaniṣads giving all the variants in readings, so that scholars can know how the Upaniṣad Texts have fared in different parts of India and at different periods in the history of Indian religion and Philosophy. The publication of the eight volumes of Upaniṣads does not supersede the work started by Dr. Schrader, nor does it

mean the abandonment of his plan. His work has to be taken up and continued to its finish. But, in order to fulfil this object the Library must have the services of a scholar who can devote his entire time for the work, and the Library does not have that facility at present.

Side by side with this edition of the text of the Upaniṣads, it will be well if an English translation too could be given. Pandit Mahadeva Sastri says in his Preface to the Yoga Upaniṣads (the first volume published by him) as follows: "I can, however, make no promise at present as to when the first volume of the English Translation of these Upaniṣads will appear." This is a matter that must be taken up, and it will be taken up soon.

The Pandits of the Adyar Library have spared no pains to make the edition useful and reliable. The late Pandit Venkatrama Sastri was a good scholar and he was intimately connected with the publications of the Library as long as he was alive. He prepared the original copy for the first eight of the ten Major Upaniṣads. The press copy of the Chāndogya and the Bṛhadāraṇyaka Upaniṣads were prepared by Pandit N. Ramanatha Sastri. The press copy of all the ten Upaniṣads were corrected and made ready in the final form for the Press by Pandit T. R. Seshadri Sarma and Pandit N. Ramanatha Sastri. The proof reading of the two volumes too was done by these two Pandits. I have seen the press copy in its final form and I have also gone through the proofs after they were corrected by

the Pandits. All the credit for bringing out the Upaniṣad volumes (especially the later volumes after I came to the Library) goes to the Pandits of the Library.

In each of the volumes, the names of the Upaniṣads that appear in that particular volume are given, with the page number where it begins. At the end of the Saṃnyāsopaniṣad, there is given an alphabetical index of the ninety-eight Minor Upaniṣads with the volume and page where it occurs and also the serial number of the Upaniṣad in the list as given in the Muktikopaniṣad. In this volume I am giving the index of the one hundred and eight Upaniṣads in the order in which they are enumerated in the Muktikopaniṣad, and I have added also the particular Veda and S'ākhā to which the Upaniṣad belongs. In another list is also given the one hundred and eight Upaniṣads classified under the various Vedas and S'ākhās to which they belong. In each of the volumes are given indices of proper names and of important words that occur in the Upaniṣads published in that volume.

Adyar Library,
July, 1936.

C. Kunhan Raja

अष्टोत्तरशतोपनिषदां ईशादिक्रमसूची

संख्या	उपनिषन्नाम	वेदनाम	संपुटनाम	पुटसंख्या
१.	ईशावास्योपनिषत्	शुक्लयजुर्वेदः	दश-उ १	१
२.	केनोपनिषत्	सामवेदः	दश-उ १	२३
३.	कठवल्ल्युपनिषत्	कृष्णयजुर्वेदः	दश-उ १	५७
४.	प्रश्नोपनिषत्	अथर्वणवेदः	दश-उ १	१२९
५.	मुण्डकोपनिषत्	अथर्वणवेदः	दश-उ १	१६९
६.	माण्डूक्योपनिषत्	अथर्वणवेदः	दश-उ १	२१२
७.	तैत्तिरीयोपनिषत्	कृष्णयजुर्वेदः	दश-उ १	३२३
८.	ऐतरेयोपनिषत्	ऋग्वेदः	दश-उ १	३८६
९.	छान्दोग्योपनिषत्	सामवेदः	दश-उ २	१
१०.	बृहदारण्यकोपनिषत्	शुक्लयजुर्वेदः	दश-उ २	२२६
११.	ब्रह्मोपनिषत्	कृष्णयजुर्वेदः	संन्यास०	१७७
१२.	कैवल्योपनिषत्	कृष्णयजुर्वेदः	शैव०	४६
१३.	जाबालोपनिषत्	शुक्लयजुर्वेदः	संन्यास०	३८
१४.	श्वेताश्वतरोपनिषत्	कृष्णयजुर्वेदः	शैव०	१७५
१५.	हंसोपनिषत्	शुक्लयजुर्वेदः	योग०	५५९
१६.	आरुण्युपनिषत्	सामवेदः	संन्यास०	९
१७.	गर्भोपनिषत्	कृष्णयजुर्वेदः	सामान्यवे०	१६८
१८.	नारायणोपनिषत्	कृष्णयजुर्वेदः	वैष्णव०	१६७

संख्या	उपनिषन्नाम	वेदनाम	संपुटनाम	पुटसंख्या
१९.	परमहंसोपनिषत्	शुक्लयजुर्वेदः	संन्यास०	१७१
२०.	अमृतबिन्दूपनिषत्	कृष्णयजुर्वेदः	योग०	२६
२१.	अमृतनादोपनिषत्	कृष्णयजुर्वेदः	योग०	११
२२.	अथर्वशिरउपनिषत्	अथर्वणवेदः	शैव०	२०
२३.	अथर्वशिखोपनिषत्	अथर्वणवेदः	शैव०	१०
२४.	मैत्रायण्युपनिषत्	सामवेदः	सामान्यवे०	३८८
२५.	कौषीतकिब्राह्मणोपनिषत्	ऋग्वेदः	सामान्यवे०	१११
२६.	बृहज्जाबालोपनिषत्	अथर्वणवेदः	शैव०	८७
२७.	नृसिंहपूर्वतापिन्युपनिषत्	अथर्वणवेदः	वैष्णव०	१७४
	नृसिंहोत्तरतापिन्युपनिषत्	अथर्वणवेदः	वैष्णव०	२२३
२८.	कालाग्निरुद्रोपनिषत्	कृष्णयजुर्वेदः	शैव०	३९
२९.	मैत्रेय्युपनिषत्	सामवेदः	संन्यास०	१९३
३०.	सुबालोपनिषत्	शुक्लयजुर्वेदः	सामान्यवे०	४६०
३१.	क्षुरिकोपनिषत्	कृष्णयजुर्वेदः	योग०	३६
३२.	मन्त्रिकोपनिषत्	शुक्लयजुर्वेदः	सामान्यवे०	२२५
३३.	सर्वसारोपनिषत्	कृष्णयजुर्वेदः	सामान्यवे०	४४४
३४.	निरालम्बोपनिषत्	शुक्लयजुर्वेदः	सामान्यवे०	१८१
३५.	शुकरहस्योपनिषत्	कृष्णयजुर्वेदः	सामान्यवे०	४२९
३६.	वज्रसूचिकोपनिषत्	सामवेदः	सामान्यवे०	४१६
३७.	तेजोबिन्दूपनिषत्	कृष्णयजुर्वेदः	योग०	४५
३८.	नादबिन्दूपनिषत्	ऋग्वेदः	योग०	२१४
३९.	ध्यानबिन्दूपनिषत्	कृष्णयजुर्वेदः	योग०	१८६
४०.	ब्रह्मविद्योपनिषत्	कृष्णयजुर्वेदः	योग०	२४९
४१.	योगतत्त्वोपनिषत्	कृष्णयजुर्वेदः	योग०	३६३
४२.	आत्मबोधोपनिषत्	ऋग्वेदः	सामान्यवे०	९८
४३.	नारदपरिव्राजकोपनिषत्	अथर्वणवेदः	संन्यास०	५५

संख्या	उपनिषन्नाम	वेदनाम	संपुटनाम	पुटसंख्या
४४.	त्रिशिखिब्राह्मणोपनिषत्	शुक्लयजुर्वेदः	योग०	११६
४५.	सीतोपनिषत्	अथर्वणवेदः	शाक्त०	८९
४६.	योगचूडामण्युपनिषत्	सामवेदः	योग०	३३७
४७.	निर्वाणोपनिषत्	ऋग्वेदः	संन्यास०	१३४
४८.	मण्डलब्राह्मणोपनिषत्	शुक्लयजुर्वेदः	योग०	२७३
४९.	दक्षिणामूर्त्युपनिषत्	कृष्णयजुर्वेदः	शैव०	७०
५०.	शरभोपनिषत्	अथर्वणवेदः	शैव०	१६६
५१.	स्कन्दोपनिषत्	कृष्णयजुर्वेदः	सामान्यवे०	५०८
५२.	त्रिपाद्विभूतिमहानारायणोपनिषत्	अथर्वणवेदः	वैष्णव०	८६
५३.	अद्वयतारकोपनिषत्	शुक्लयजुर्वेदः	योग०	१
५४.	रामरहस्योपनिषत्	अथर्वणवेदः	वैष्णव०	३४४
५५.	रामपूर्वतापिन्युपनिषत्	अथर्वणवेदः	वैष्णव०	३०५
	रामोत्तरतापिन्युपनिषत्	अथर्वणवेदः	वैष्णव०	३२६
५६.	वासुदेवोपनिषत्	सामवेदः	वैष्णव०	३७५
५७.	मुद्गलोपनिषत्	ऋग्वेदः	सामान्यवे०	३७८
५८.	शाण्डिल्योपनिषत्	अथर्वणवेदः	योग०	५१८
५९.	पैङ्गलोपनिषत्	शुक्लयजुर्वेदः	सामान्यवे०	१९२
६०.	भिक्षुकोपनिषत्	शुक्लयजुर्वेदः	संन्यास०	१९०
६१.	महोपनिषत्	सामवेदः	सामान्यवे०	२३४
६२.	शारीरकोपनिषत्	कृष्णयजुर्वेदः	सामान्यवे०	४२३
६३.	योगशिखोपनिषत्	कृष्णयजुर्वेदः	योग०	३९०
६४.	तुरीयातीतावधूतोपनिषत्	शुक्लयजुर्वेदः	संन्यास०	५१
६५.	संन्यासोपनिषत्	सामवेदः	संन्यास०	२३६
६६.	परमहंसपरिव्राजकोपनिषत्	अथर्वणवेदः	संन्यास०	१६१
६७.	अक्षमालिकोपनिषत्	ऋग्वेदः	शैव०	१
६८.	अव्यक्तोपनिषत्	सामवेदः	वैष्णव०	१

संख्या	उपनिषन्नाम	वेदनाम	संपुटनाम	पुटसंख्या
६९.	एकाक्षरोपनिषत्	कृष्णयजुर्वेदः	सामान्यवे०	१०६
७०.	अन्नपूर्णोपनिषत्	अथर्वणवेदः	सामान्यवे०	२६
७१.	सूर्योपनिषत्	अथर्वणवेदः	सामान्यवे०	५०२
७२.	अक्ष्युपनिषत्	कृष्णयजुर्वेदः	सामान्यवे०	१
७३.	अध्यात्मोपनिषत्	शुक्लयजुर्वेदः	सामान्यवे०	१२
७४.	कुण्डिकोपनिषत्	सामवेदः	संन्यास०	२७
७५.	सावित्र्युपनिषत्	सामवेदः	सामान्यवे०	४५५
७६.	आत्मोपनिषत्	अथर्वणवेदः	सामान्यवे०	९०
७७.	पाशुपतब्रह्मोपनिषत्	अथर्वणवेदः	योग०	२२७
७८.	परब्रह्मोपनिषत्	अथर्वणवेदः	संन्यास०	१४९
७९.	अवधूतोपनिषत्	कृष्णयजुर्वेदः	संन्यास०	१
८०.	त्रिपुरातापिन्युपनिषत्	अथर्वणवेदः	शाक्त०	११
८१.	देव्युपनिषत्	अथर्वणवेदः	शाक्त०	५३
८२.	त्रिपुरोपनिषत्	ऋग्वेदः	शाक्त०	१
८३.	कठरुद्रोपनिषत्	कृष्णयजुर्वेदः	संन्यास०	१७
८४.	भावनोपनिषत्	अथर्वणवेदः	शाक्त०	६८
८५.	रुद्रहृदयोपनिषत्	कृष्णयजुर्वेदः	शैव०	१४८
८६.	योगकुण्डल्युपनिषत्	कृष्णयजुर्वेदः	योग०	३०७
८७.	भस्मजाबालोपनिषत्	अथर्वणवेदः	शैव०	१२९
८८.	रुद्राक्षजाबालोपनिषत्	सामवेदः	शैव०	१५६
८९.	गणपत्युपनिषत्	अथर्वणवेदः	शैव०	५८
९०.	दर्शनोपनिषत्	सामवेदः	योग०	१५२
९१.	तारसारोपनिषत्	शुक्लयजुर्वेदः	वैष्णव०	७८
९२.	महावाक्योपनिषत्	अथर्वणवेदः	योग०	३०१
९३.	पञ्चब्रह्मोपनिषत्	कृष्णयजुर्वेदः	शैव०	७९
९४.	प्राणाग्निहोत्रोपनिषत्	कृष्णयजुर्वेदः	सामान्यवे०	२१७

संख्या	उपनिषन्नाम	वेदनाम	संपुटनाम	पुटसंख्या
९५.	गोपालपूर्वतापिन्युपनिषत्	अथर्वणवेदः	वैष्णव०	४१
	गोपालोत्तरतापिन्युपनिषत्	अथर्वणवेदः	वैष्णव०	५८
९६.	कृष्णोपनिषत्	अथर्वणवेदः	वैष्णव०	२१
९७.	याज्ञवल्क्योपनिषत्	शुक्लयजुर्वेदः	संन्यास०	२१३
९८.	वराहोपनिषत्	कृष्णयजुर्वेदः	योग०	४६४
९९.	शाट्यायनीयोपनिषत्	शुक्लयजुर्वेदः	संन्यास०	२२२
१००.	हयग्रीवोपनिषत्	अथर्वणवेदः	वैष्णव०	३८३
१०१.	दत्तात्रेयोपनिषत्	अथर्वणवेदः	वैष्णव०	१५९
१०२.	गरुडोपनिषत्	अथर्वणवेदः	वैष्णव०	३२
१०३.	कलिसन्तरणोपनिषत्	कृष्णयजुर्वेदः	वैष्णव०	१६
१०४.	जाबाल्युपनिषत्	सामवेदः	शैव०	६५
१०५.	सौभाग्यलक्ष्म्युपनिषत्	ऋग्वेदः	शाक्त०	१०५
१०६.	सरस्वतीरहस्योपनिषत्	कृष्णयजुर्वेदः	शाक्त०	७४
१०७.	बह्वृचोपनिषत्	ऋग्वेदः	शाक्त०	६१
१०८.	मुक्तिकोपनिषत्	शुक्लयजुर्वेदः	सामान्यवे०	३४५

वेदक्रमेण उपनिषदां ईशादिसंख्या

ऋग्वेदे—८, २९, ३८, ४२, ४७, ५७, ६७, ८२, १०५, १०७
(आहत्य—१० उपनिषदः)

शुक्लयजुर्वेदे—१, १०, १३, १५, १९, ३०, ३२, ३४, ४४, ४८, ५३, ५९, ६०, ६४, ७३, ९१, ९७, ९९, १०८
(आहत्य—१९ उपनिषदः)

कृष्णयजुर्वेदे—३, ७, ११, १२, १४, १७, १८, २०, २१, २८, ३१, ३३, ३५, ३७, ३९, ४०, ४१, ४९, ५१, ६२, ६३, ६९, ७२, ७९, ८३, ८५, ८६, ९३, ९४, ९८, १०३, १०६ (आहत्य—३२ उपनिषदः)

सामवेदे—२, ९, १६, २४, २९, ३६, ४६, ५६, ६१, ६५, ६८, ७४, ७५, ८८, ९०, १०४ (आहत्य—१६ उपनिषदः)

अथर्वणवेदे—४, ५, ६, २२, २३, २६, २७, ४३, ४५, ५०, ५२, ५४, ५५, ५८, ६६, ७०, ७१, ७६, ७७, ७८, ८०, ८१, ८४, ८७, ८९, ९२, ९५, ९६, १००, १०१, १०२ (आहत्य ३१ उपनिषदः)

(आहत्य—१०८ उपनिषदः)

शान्तिपाठविवरणम्

ऋग्वेदगतानां दशसंख्याकानां ऐतरेयकौषीतकिनादबिन्द्वात्मप्रबोधनिर्वाणमुद्गलाक्षमालिकात्रिपुरासौभाग्यबह्वृचाख्यानामुपनिषदां वाङ्मे मनसि—इति शान्तिः ।

शान्तिविवरणम्

वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरावीर्म एधि । वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेनाहोरात्रान् संदधामि ऋतं वदिष्यामि सत्यं वदिष्यामि । तन्मामवतु तद्वक्तारमवतु अवतु मामवतु वक्तारमवतु वक्तारम् ॥ ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

शुक्लयजुर्वेदगतानां एकोनविंशतिसंख्याकानां ईशावास्यबृहदारण्यजाबालहंसपरमहंससुबालमन्त्रिकानिरालम्बत्रिशिखिब्राह्मणमण्डलब्राह्मणाद्वयतारकपैङ्गलभिक्षुतुरीयातीताध्यात्मतारसारयाज्ञवल्क्यशाट्यायनीमुक्तिकाख्यानामुपनिषदां पूर्णमदः—इति शान्तिः ।

शान्तिविवरणम्

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते । ॐ शान्तिः शान्तिः शान्तिः ॥ २ ॥

कृष्णयजुर्वेदगतानां द्वात्रिंशत्संख्याकानां कठवल्लीतैत्तिरीयकब्रह्म-कैवल्यश्वेताश्वतरगर्भनारायणामृतबिन्द्वमृतनादकालाग्निरुद्रक्षुरिकासर्वसारशुक-रहस्यतेजोबिन्दुध्यानबिन्दुब्रह्मविद्यायोगतत्त्वदक्षिणामूर्तिस्कन्दशारीरकयोग-शिखैकाक्षराक्ष्यवधूतकठरुद्रहृदययोगकुण्डलिनीपञ्चब्रह्मप्राणाग्निहोत्रवराहकलि-सन्तारणसरस्वतीरहस्याख्यानामुपनिषदां सह नाववतु—इति शान्तिः।

शान्तिविवरणम्

सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्वि नावधीतमस्तु मा विद्विषावहै। ॐ शान्तिः शान्तिः शान्तिः॥ ३॥

सामवेदगतानां षोडशसंख्याकानां केनच्छान्दोग्यारुणिमैत्रायणि-मैत्रेयीवज्रसूचिकायोगचूडामणिवासुदेवमहत्संन्यासाव्यक्तकुण्डिकासावित्री-रुद्राक्षजाबालदर्शनजाबाल्याख्यानामुपनिषदां आप्यायन्तु—इति शान्तिः।

शान्तिविवरणम्

आप्यायन्तु ममाङ्गानि वाक् प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च। सर्वाणि सर्वं ब्रह्मोपनिषदं माहं ब्रह्म निराकुर्यां मा मा ब्रह्म निराकरोत् अनिराकरणमस्तु अनिराकरणमस्तु तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु ते मयि सन्तु। ॐ शान्तिः शान्तिः शान्तिः॥ ४॥

अथर्ववेदगतानां एकत्रिंशत्संख्याकानां प्रश्नमुण्डकमाण्डूक्याथर्वशि-रोऽथर्वशिखाबृहज्जाबालनृसिंहतापनीनारदपरिव्राजकसीताशरभमहानारायण-रामरहस्यरामतापनीशाण्डिल्यपरमहंसपरिव्राजकान्नपूर्णासूर्यात्मपाशुपतपरब्र-

ह्यत्रिपुरातपनदेवीभावनाभस्मजाबालगणपतिमहावाक्यगोपालतपनकृष्णहय-
ग्रीवदत्तात्रेयगारुडाख्यानामुपनिषदां भद्रं कर्णेभिः—इति शान्तिः ।

शान्तिविवरणम्

भद्रं कर्णेभिः श्रृणुयाम देवाः भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरै-
रङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः
स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति
नो बृहस्पतिर्दधातु । ॐ शान्तिः शान्तिः शान्तिः ॥ १ ॥

अस्मिन् संपुटे अन्तर्गतोपनिषत्सूची

विषयसूचिका

१. छान्दोग्योपनिषत्

प्रथमोऽध्यायः

द्वितीयोऽध्यायः

तृतीयोऽध्यायः

चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

षष्ठोऽध्यायः

सप्तमोऽध्याय:

अष्टमोऽध्यायः

२. बृहदारण्यकोपनिषत्

प्रथमोऽध्यायः

प्रथमं ब्राह्मणम्

द्वितीयं ब्राह्मणम्

तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम्

पञ्चमं ब्राह्मणम्

षष्ठं ब्राह्मणम्

द्वितीयोऽध्याय:

प्रथमं ब्राह्मणम्

द्वितीयं ब्राह्मणम्

तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम्

पञ्चमं ब्राह्मणम्

षष्ठं ब्राह्मणम्

तृतीयोऽध्यायः

प्रथमं ब्राह्मणम्

द्वितीयं ब्राह्मणम्

तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम्

पञ्चमं ब्राह्मणम्

षष्ठं ब्राह्मणम्

सप्तमं ब्राह्मणम्

अष्टमं ब्राह्मणम्

नवमं ब्राह्मणम्

चतुर्थोऽध्याय:

प्रथमं ब्राह्मणम्

द्वितीयं ब्राह्मणम्

तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम्

पञ्चमं ब्राह्मणम्

षष्ठं ब्राह्मणम्

पञ्चमोऽध्यायः

नवमं ब्राह्मणम्

दशमं ब्राह्मणम्

एकादशं ब्राह्मणम्

द्वादशं ब्राह्मणम्

त्रयोदशं ब्राह्मणम्

चतुर्दशं ब्राह्मणम्

पञ्चदशं ब्राह्मणम्

षष्ठोऽध्यायः

प्रथमं ब्राह्मणम्

द्वितीयं ब्राह्मणम्

तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम्

ॐ

छान्दोग्योपनिषत्

आप्यायन्तु—इति शान्तिः

प्रथमोऽध्यायः

ज्ञानोत्पत्त्यर्थमुपासनानि कर्माणि च

ओमित्येतदक्षरमुद्गीथमुपासीत ओमिति ह्युद्गायति तस्योपव्याख्यानम्। एषां भूतानां पृथिवी रसः पृथिव्या आपो रसः अपामोषधयो रसः ओषधीनां पुरुषो रसः पुरुषस्य वाक् रसः वाच ऋक् रसः ऋचः साम रसः साम्न उद्गीथो रसः। स एष रसानाꣳ रसतमः परमः परार्ध्योऽष्टमो य उद्गीथः। कतमा कतमा ऋक्? कतमत् कतमत् साम? कतमः कतम उद्गीथः? इति विमृष्टं भवति। वागेव ऋक् प्राणः साम ओमित्येतदक्षरमुद्गीथः तद्वा एतन्मिथुनं यद्वा ऋक् च प्राणश्च ऋक् च साम च। तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे सꣳसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम्। आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षर-

मुद्गीथमुपास्ते । तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजानात्योमित्येव तदा हैषा उ एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते । तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयति ओमिति शंसति ओमित्युद्गायति एतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन । तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद । नाना तु विद्या चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवाक्षरस्योपव्याख्यानं भवति ॥ १॥

श्री उपनिषद्ब्रह्मयोगिविरचितं विवरणम्

ॐ श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः

छान्दोग्योपनिषद्गूढपरमाशयविग्रहम् ।
तत्त्वमस्यादिवाग्वेद्यं भूमानं राममाश्रये ॥

इह खलु सामवेदप्रविभक्तशाखायां दर्शपूर्णमासादिवाजिमेधान्तकर्माङ्गसामानि गायत्रादिसामसहितानि वंशब्राह्मणानि च समस्तकर्माश्रयभूतमुख्यप्राणोपासनानि चाभिहितानि । प्रातिस्विकेन तत्रत्यज्ञानं कर्म वा मुख्यप्राणविज्ञानसमुच्चितकर्म वा, किञ्चिद्विकलं कर्म फलोपधायकं न भवतीति भिया सम्यगनुष्ठितं सकामस्य चन्द्रलोकप्रतिपत्तये पुनरावृत्तये च भवति । तथा च वक्ष्यते— "तस्मिन् यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तन्ते" इति । तथा च स्मृतिः—

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।

इति । निष्कामस्य मुमुक्षोरीश्वरार्पणधिया यथोक्तवर्त्मना कर्मज्ञानसमुच्चयानुष्ठानतारतम्यतोऽर्चिरादिमार्गेणापुनरावृत्तिलक्षणसालोक्यादिचतुर्विधमुक्तिरभिहिता । तथा

च वक्ष्यति—"स एनान् ब्रह्म गमयति स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते" इति,

तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ।

इति स्मृतेश्च । उक्तमार्गद्वयं विहाय स्वभावप्रवृत्तानां मार्गद्वयविपरीतफलं वक्ष्यति—"अथैतयोः पथोर्न कतरेण च न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति । जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यते । तस्माज्जुगुप्सेत" इति । स्मृतिश्च—

यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥

इति । न हि सांसारिकगतित्रयेऽपि परमपुरुषार्थसिद्धिरिष्यते । स्वातिरिक्तप्रपञ्चापह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रज्ञानसमकालं तन्मात्रावस्थानलक्षणकैवल्यमवगम्यते । तज्ज्ञानस्य च क्रियाकारकतत्फलेषणोपमर्दनपूर्वकत्वात् ।

न कर्मणा न प्रजया न चान्यैरपि साधनैः ।
ब्रह्मवेदनमात्रेण ब्रह्माप्नोत्येव मानवः ।
ज्ञानादेवास्य शास्त्रस्य सर्वावस्थोऽपि मुच्यते ॥,
तमेवं विद्वानतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ।

इत्यादिश्रुतेः । कस्यचित्पुरुषधौरेयस्य स्वकृतसत्कर्मफलार्पणसन्तुष्टेश्वरप्रसादजनितचित्तशुद्धिर्व्याप्यपारमहंस्याश्रमधर्ममुपेयुषो मुमुक्षोः साधनचतुष्टयसंपत्त्यलङ्कृतस्य स्वातिरिक्तकलनानिरसनपूर्वकं ब्रह्ममात्रजिज्ञासोदेति । तादृशजिज्ञासोः प्रत्यगभिन्नभूमब्रह्ममात्रावगतये तद्यावत्साधनपौष्कल्यगर्भिणी "ओं इत्येतदक्षरं" इत्याद्यष्टाध्यायभूषितेयं छान्दोग्योपनिषदारभ्यते । न हि ब्रह्मज्ञानादन्यत्रार्चिरादिमार्गद्वयेऽपि निःश्रेयसप्राप्तिरस्ति । न हि कर्मसहभावि ब्रह्मदर्शनम् । क्रियाकारकफलभेदोपमर्दनपूर्वकं "एकमेवाद्वितीयम्", "यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति" इत्यादिवाक्यजनितावगतेः बाधकानुपपत्तेः कर्म-

विधिप्रत्यय एव बाधक इति चेन्न; कर्तृभोक्तृज्ञानपूर्वकं कर्मफलरागिण एव कर्मविधानात् । अद्वैतज्ञानवतोऽपि तथेति चेन्न; कर्तृभोक्तृत्वादिज्ञानस्य "आत्मैवेदं सर्वं" इत्यादिनोपमर्दितत्वात् । तस्मात् स्वाज्ञं प्रत्येव कर्म विधीयते न हि स्वज्ञस्य । तथा च वक्ष्यति—"सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति" इति । तत्रैव ब्रह्मविद्याप्रकरणे कैवल्यसन्निकृष्टफलान्युपासनान्युपदिश्यन्ते "मनोमयः प्राणशरीर"इत्यादीनि । तथा कर्माङ्गत्वेन रहस्यसामानि वृत्तिसामान्यात् । यथा मनोवृत्तिमात्रं ब्रह्मज्ञानं तथोपासनानां मनोवृत्तिमात्रत्वात् । ब्रह्मज्ञानोपासनयोः मनोवृत्तिसाम्यादनयोः को विशेषः ? इति चेन्न; ब्रह्मज्ञानस्य स्वाध्यस्तकर्तृकारकादिनिवर्तकत्वात् । तथा चेत् "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्याद्युपासनानि निष्प्रयोजनतां भजेयुरिति चेन्न; सत्त्वशुद्धिहेतुत्वेन ब्रह्मज्ञानोपकारकत्वात् । विशुद्धचित्तस्य हि ज्ञानमुत्पद्यते । तद्धेतूद्भूतान्युपासनानि कर्माणि च इत्येतत्सर्वं यत्र सम्यग्दृश्यते तस्याश्छान्दोग्योपनिषदो जिज्ञासुप्रतिपत्त्यर्थमल्पग्रन्थतो विवरणमारभ्यते यथाक्रमं—**ओमित्येतदक्षरं** इत्यादिना । यदक्षरं ओमिति प्रसिद्धं तद्ब्रह्माभिधानं ब्रह्मणो नेदिष्ठत्वात् । "यथा नामी वाचकेन नाम्नो योऽभिमुखो भवेत्" इति श्रुत्यनुरोधेन प्रणवेनाभिधीयमानं ब्रह्म प्रसीदति । एवमभिधानत्वेन प्रतीकत्वेन च सर्ववेदान्तेषु ब्रह्मोपासनं श्रेष्ठमिति प्रसिद्धम् । जपकर्मस्वाध्यायोपक्रमोपसंहारयोरपि प्रणवोच्चारणपूर्वकत्वात् श्रेष्ठत्वमस्य निरङ्कुशम् । तथाविधोङ्कारस्योद्गीथभक्त्यवयवत्वात् **ओमित्येतदक्षरमुद्गीथमित्युपासीत** उद्गीथावयवब्रह्मप्रतीकाक्षरे दृढाभिमतिं सन्तनुयादित्यर्थः । तत्र हेतुमाह—**ओमिति ह्युद्गायति** इति । ओमित्यारभ्य ह्युद्गाता उद्गायति । **तस्याक्षरस्येयत्ताप्रकाशनमुपव्याख्यानं** वर्तत इत्यध्याहार्यम् । तत् कथम् ? इत्यत्र **एषां** चराचर**भूतानां पृथिवी रसः** । तस्याः सर्वभूताधिकरणत्वात् रसत्वं युज्यते । **पृथिव्या आपो रसः** । अप्सु हि पृथिवी ओता प्रोता च भवति । **अपामोषधयो रसः** तासामबायत्तत्वात् । **ओषधीनां पुरुषो रसः** । तस्यौषधिनिष्पन्नान्नपरिणामत्वात् । **पुरुषस्य वाक् रसः** । तदवयवानां वाचस्सारिष्ठत्वात् । **वाच ऋक् रसः**

सारतरत्वात्। **ऋचः साम रसः** सुश्राव्यत्वात्। **साम्न उद्गीथो रसः** सर्वसारिष्ठत्वेन प्रकृतत्वात्। **स एष उद्गीथाख्य ओङ्कारः** भूतादिगतोत्तरोत्तररसानां **रसतमः**। परब्रह्मप्रतीकत्वादयं **परमः**। परमर्धमालम्बनं योऽर्हति स **परार्ध्यः**। पृथिव्यादिरसाद्यपेक्षयोद्गीथस्याष्टसंख्यापूरकत्वमभिहितम्। **सोऽयं य उद्गीथोऽष्टमः**। **कतमा कतमेति** वीप्सा आदरार्था। बहूनां जातिपरिप्रश्ने डतमच्प्रयोगः स्यादिति चेन्न; ऋग्व्यक्तीनां बहुत्वात् जातौ परिप्रश्नो जातिपरिप्रश्न इति विग्रहे जातौ ऋग्व्यक्तीनां बहुत्वोपपत्तेः। एवं चेत् **विमृष्टं भवति** विमर्शः कृतो भवति। **वागेव ऋक् प्राणः साम** वाक्प्राणयोः ऋक्सामयोनित्वात्। ऋक्सामयोनिवाक्प्राणग्रहणतस्सर्वासामृचां सर्वेषां साम्नां च ग्रहणं कृतं स्यात्। सर्वर्क्सामग्रहणे ऋक्सामसाध्यानां कर्मणां ग्रहणं कृतं स्यात्। तद्ग्रहणे सर्वे कामा गृहीताः स्युरित्यर्थः। **ओमित्येतदक्षरमुद्गीथः** इति भक्त्या शंका निवर्तते। मिथुनं निर्दिशति— **तद्वा** इति। यद्वाक् च प्राणश्च ऋक्सामकारणभूतौ **तद्वा एतन्मिथुनं यद्वाक् च प्राणश्च ऋक् च साम चेति** तत्कारणभूतावुच्येते। वाक्प्राणयोर्मिथुनत्वम**ोमित्येतस्मिन्नक्षरे संसृज्यते**। अस्य मिथुनस्योङ्कारसंसृष्टत्वेन सर्वकामावाप्तिगुणवत्त्वं सिद्धम्। तत्र दृष्टान्त उच्यते। यथा लोके मिथुनावयवत्वेन **मिथुनौ** स्त्रीपुंसौ ग्राम्यधर्मतया यदा **समागच्छतः** संसृज्येयातां तदा **तौ** स्त्रीपुंसावन्योन्यस्य **काममापयतो वै** प्रापयत एव। तथा स्वात्मानुप्रविष्टमिथुनेनोङ्कारस्य सर्वकामावाप्तिगुणत्वं सिद्धमित्यर्थः। तदुपासकोऽप्युद्गाता तद्धर्मा भवतीति **आपयिता ह वै कामानां** यजमानस्य **भवति**। **य एतदक्षरमुद्गीथ**माप्तिगुणविशिष्टत्वेनो**पास्ते** तस्य तद्यथोक्तं फलं भवतीत्यर्थः। "तं यथा यथोपासते तथैव भवति" इति श्रुतेः। ओङ्कारस्य समृद्धिगुणत्वं कथम्? इत्यत आह—**तद्वा** इति। **तद्वा एतत्प्रकृतमनुज्ञा च सा अक्षरं चेत्यनुज्ञाक्षरम्**। अनुज्ञा अनुमतिरोङ्कार इत्यर्थः। अनुमतित्वं श्रुतिरेव व्याचष्टे—**यद्धीति**। लोके विद्वान् धनी वा ज्ञानं धनं वा **यद्धि किञ्च यत्किञ्चेदमनुजानाति** तत्रानुमतिं **कुर्वन्नोमित्येव तदाह**। तथा च श्रुतिः "त्रयस्त्रिंशदित्योमिति होवाच" इति। तथा च एष कश्चिदेवं करोमीत्युक्तोऽन्य

ओमित्येवाह । अत **एषा उ एव** एषैव **समृद्धिः । यदनुज्ञा** या अनुज्ञा सा हि समृद्धिः अनुज्ञायाः समृद्धिमूलत्वात् । समृद्धो ह्योमित्यनुज्ञां ददाति । तस्मादोङ्कारः समृद्धिगुणवानित्यर्थः । एवं समृद्धिगुणोपासनेन तद्धर्मा सन् यजमानस्य **कामानां समर्धयिता ह वै भवति । य एतदेवं विद्वानक्षरमुपास्ते** इत्यादि पूर्ववत् । अथेदानीमक्षरं स्तौति—तेनेति । **तेन** प्रकृतेनाक्षरेण ऋग्वेदादि-लक्षणा **त्रयी विद्या** तन्निर्वर्त्यकर्मजातं **वर्तत** इति प्रसिद्धम् । तत्कथम् ? **ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायतीति** सोमादाववगम्यते तल्लिङ्ग-दर्शनात् । तस्य **कर्मैवैतस्याक्षरस्यापचित्यै** पूजार्थम् । तस्य परब्रह्मप्रतीकत्वेन तत्कृतापचितिर्ब्रह्मण एव स्यात् "स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति" इति स्मृतेः । किञ्च एतस्यैवाक्षरस्य **महिम्ना** महत्त्वेन ऋत्विग्यजमानादिप्राणैः तथा व्रीहियवादिनिर्वृत्त**रसेन** ततो वृष्ट्यादिक्रमेण प्राणोऽन्नं च जायते । प्राणैरन्नेन च यज्ञस्तायते । अक्षरस्य महिम्ना रसेनेति तदुच्यते । तथाक्षरविज्ञानवतः कर्मकर्तव्यतामाक्षिपति—तेनेति । **तेनाक्षरेणोभौ कुरुतः यश्चैतदेतदक्षर**याथात्म्यं **वेद यश्चा**क्षराज्ञानपूर्वकं कर्ममात्रं वेद, कर्म तावुभावपि कुरुतः । तयोश्च कर्मसामर्थ्यादेव फलं स्यात् किमक्षरज्ञानेन ? इति । तत्र यस्मा**न्नाना तु विद्या चाविद्या च** विद्याविद्ये तत्फलयोः भिन्नभिन्नत्वात् । तुशब्दः पक्षव्यावृत्त्यर्थः । ओङ्कारस्य कर्माङ्गमात्रविज्ञानमेकम् । रसतमाप्तिसमृद्धिगुणवद्विज्ञानमपरम् । तत्र ज्ञानाधिक्यात्फलाधिक्यं युक्तम् । तथा च लोके ज्ञान्योर्वणिगितरयोर्नवरत्नक्रय-विक्रययोस्तत्र वणिजस्तदियत्तापरिज्ञानतः फलाधिक्यं तद्विपर्ययमितरस्य । तस्मात् **यदेव** कर्म श्रद्दधानः सन् **विद्यया करोति** तदेव विद्यासमुच्चितं कर्म अविद्वत्कृतकर्मापेक्षया **वीर्यवत्तरं** ज्ञानहेतुसत्त्वशुद्धिफलदं **भवति खलु । एतस्य** प्रकृतो**द्गीथाक्षरस्योपव्याख्यानं भवति** ॥ १ ॥

अध्यात्मावच्छिन्नोद्गीथविवरणम्

देवासुरा ह वै यत्र संयेतिरे उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुः अनेनैनान् अभिभविष्याम इति । ते ह नासिक्यं

प्राणमुद्गीथमुपासांचक्रिरे तꣳ हासुराः पाप्मना विविधुस्तस्मात्तेनो-
भयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्धः । अथ ह
वाचमुद्गीथमुपासांचक्रिरे ताꣳ हासुराः पाप्मना विविधुस्तस्मात्तयो-
भयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा । अथ ह चक्षु-
रुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुः तस्मात्तेनोभयं
पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् । अथ ह
श्रोत्रमुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुः तस्मात्तेनो-
भयꣳ शृणोति श्रवणीयं चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् । अथ
ह मन उद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुः तस्मात्ते-
नोभयꣳ संकल्पयते संकल्पनीयं चासंकल्पनीयं च पाप्मना ह्येतद्वि-
द्धम् । अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे तꣳ
हासुरा ऋत्वा विदध्वंसुर्यथाश्मानमाखणमृत्वा विध्वꣳसेत् । एवं
यथाश्मानमाखणमृत्वा विध्वꣳसत एवꣳ हैव स विध्वꣳसते य एवं-
विदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः । नैवैतेन
सुरभि न दुर्गन्धि विजानाति अपहतपाप्मा ह्येष तेन यदश्नाति
यत्पिबति तेनेतरान् प्राणानवति एतमु एवान्ततोऽवित्त्वा उत्क्रामति
व्याददात्येवान्तत इति । तꣳ हाङ्गिरा उद्गीथमुपासांचक्रे एवाङ्गिरसं
मन्यन्तेऽङ्गानां यद्रसः । तेन तꣳ ह बृहस्पतिरुद्गीथमुपासांचक्रे एतमु
एव बृहस्पतिं मन्यन्ते वाक् हि बृहती तस्या एष पतिः । तेन
तꣳ हायास्य उद्गीथमुपासांचक्रे एतमु एवायास्यं मन्यन्ते आस्या-

द्यदयते । तेन तꣳह बको दाल्भ्यो विदांचकार । स ह नैमिशीयाना-मुद्गाता बभूव स ह स्म एभ्यः कामानागायति । आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥२॥

अध्यात्मावच्छिन्नोद्गीथविवरणमाह—**देवासुरा** इति । स्वस्वविषयद्योतनादिन्द्रियवृत्तयो देवाश्च तद्वैपरीत्येन केवलासुभरणतया तमोगुणप्रधानेन्द्रियवृत्तयः असुराश्च **देवासुराः** । **हवै** इति शब्दौ पूर्ववृत्तस्मारकौ । यस्मिन् **यत्र** इतरेतर-स्वापहरणनिमित्तसंग्रामे **संयेतिरे** सङ्ग्रामं कृतवन्त इत्यर्थः । संपूर्वस्य यतेः संग्रामार्थत्वात् । शास्त्रीयसत्त्वप्रकाशवृत्तयो देवास्तद्विपरीतरजस्तमोवृत्तयोऽसुराश्च परस्परजयैषिण **उभयेऽपि** । कर्मज्ञानाधिकृतो यः स पुरुष एव प्रजापतिः । प्रजापतेरपत्यानि ते **प्राजापत्याः** । "पुरुष एवोक्थमहमेव महान् प्रजापतिः" इति श्रुतेः । **तद्ध** तदुत्कर्षापकर्षनिमित्ते ह किल तत्र सत्त्वेन्द्रियवृत्तयो **देवा उद्गीथं** तद्भक्त्युपलक्षितमौद्गात्रं कर्माजह्रुराहृतवन्तः । किमर्थं ते ज्योतिष्टोमादि कर्माजह्रुः ? इत्यत आह—अनेनेति । **अनेन** कर्मणा **एनानभिभविष्याम** इत्यभि-प्रायेण **ते ह** देवा **नासिक्यं** नासिकाभवघ्राणाख्यप्राण**मुद्गीथं** उद्गीथभक्त्यो-**पासाञ्चक्रिरे** उद्गातृत्वेन वृतवन्त इत्यर्थः । **तमेवं** देवैर्वृतमुद्गातारं नासिक्यं प्राणं स्वाभाविकतमोवृत्तय **असुरा** धर्मासहरूपेण **पाप्मना विविधुः** संसर्गं कृतवन्त इत्यर्थः । स हि नासिक्यः प्राणः पाप्मना संसर्गी बभूव । यस्मादेवं **तस्मात्तेन** पाप्मना प्रेरितो घ्राणप्राणः । तेन **सुरभि च दुर्गन्धि चेत्युभयं जिघ्रति** लोकः । उभयग्रहणादेष घ्राणः **पाप्मना विद्धः** । यदेवेदमप्रतिरूपं जिघ्रतीति च समानप्रकरणश्रुतितः मुख्यप्राणोपास्यत्वायायं विचारः श्रुत्या प्रवर्तितः । अतश्चक्षुरादिक्रमेणैवं विचार्यते । चक्षुरादय आसुरेण पाप्मना विद्धा इत्यपोह्यन्ते । प्रथमपर्यायसमानार्थतयोक्तार्थमेतत् । **अथ ह वाचं चक्षुः श्रोत्रं मन** इत्यादि घ्राणादीनामासुरेण पाप्मना विद्धत्वात् । **अथानन्तरं य एवायं** मुखालयत्वेन प्रसिद्धो **मुख्यः प्राणः तमुद्गीथमुपासाञ्चक्रिरे** । **तं हासुराः** पूर्ववत् **ऋत्वा** प्राप्य **विदध्वंसुः** । कथं ते प्राणं स्पृष्ट्वा विनष्टाः स्युः ? इत्यत्र दृष्टान्तमाह—

यथेति। लोके टङ्कैरपि खनितुं न शक्यत इत्यखणः। स एव आखणः। तं **आखणं अश्मानं** पांसुपिण्डो लोष्टोऽय**मृत्वा** गत्वा तद्भेदाभिप्रायेण निक्षिप्तोऽपि किञ्चिदप्यश्मनो भेदमकृत्वा स्वयमेव **विध्वंसेत्** विदीर्येत। एवं विशुद्धो हि प्राणः असुरैरधर्षितत्वात्। एवंविदः फलमाह—**एवमिति। एवं हैव स विध्वंसते।** कोऽसौ? इत्यत आह—**य** इति। एवं यथोक्तप्राणविदि **पापं कर्तुं यः कामयते यश्चैनं** प्राणविद**मभिदासति** प्रत्याक्रोशताडनादिभिः हिनस्ति सोऽप्येवमेव विध्वंसत इत्यर्थः। यस्मादेष प्राणवित् **अश्माखण** इवाधर्षणीयः यस्माच्च मुख्यप्राणोऽसुरैः न विद्धः तस्मात् **नैवैतेन** प्राणेन लोकः **सुरभि न दुर्गन्धि विजानाति।** किन्तु प्राणस्य पापविद्धत्वेन तेनोभयं विजानातीत्यर्थः। अतश्चायं यस्मात् पाप्मापहतो विनाशितः सोऽय**मपहतपाप्मा ह्येषः** एतस्यासुरास्पृष्टत्वेन विशुद्धत्वात्। **तेन** मुख्येन प्राणेन लोको **यदश्नाति यत्पिबति तेनाशितेन** पीतेन **चेतरान्** घ्राणादीनवति तत्स्थितिरन्नपाननिमित्तेत्यर्थः। प्राणस्य शुद्धत्वेन सर्वभृत्त्वात्। कथं प्राणाशितपीताभ्यामितरेषां स्थितिः? इत्यत्र—**एतमु एव** मुख्यप्राणं निमित्तीकृत्यान्नपाने इत्यर्थः। अशनायापिपासयोः प्राणधर्मत्वात्। **अन्ततो** मरणकाले **अवित्त्वा** अलब्ध्वा प्राणस्थितिं घ्राणादिप्राणसमुदाय **उत्क्रामति।** अप्राणो ह्यशितुं पातुं न शक्नुयात्। तदानीं घ्राणादिकरणग्रामस्योत्क्रान्तिर्दृश्यते। अनुत्क्रान्तप्राणो हि **व्याददाति** आस्यविदारणं करोति **अन्ततः** अन्तकाले। तं मुख्यप्राणमहं गिर इत्येवंगुणमुद्गीथमङ्गिरा **उपासांचक्रे। एतमु एवाङ्गिरसं** प्राणं **मन्यन्ते** केचित् अङ्गिगुणविशिष्टत्वात्। तत्कथम्? **अङ्गानां** मध्ये **यत्**प्राणाख्यं ब्रह्म **रस**त्वेनाभिमतं तेनासावाङ्गिरसः। यथाङ्गिरसं मन्यन्ते तथा बृहस्पतिमायास्यं प्राणं मन्यन्त इत्यर्थः। तथा वाचो बृहत्याः पतिः **तेनासौ बृहस्पतिः।** तथा **आस्यात् अयते** निर्गच्छति **तेनायास्य** ऋषिः प्राण एव सन्नुपासांचक्र इत्यर्थः। तथान्योपासकोऽप्यात्मानमेवाङ्गिरसादिगुणविशिष्टं प्राणमुद्गीथमुपासीत। न केवलमङ्गिरःप्रभृतय एवोपासांचक्रिरे किन्तु **तं ह** नामतो **बकः दल्भस्यापत्यं दाल्भ्यो विदाञ्चकार** तत्प्राणयाथात्म्यं विज्ञातवान्। विदित्वा **स ह**

नैमिशीयानां सत्रिणामुद्गाता **बभूव** । **स** ह प्राणविज्ञानमहिम्ना **एभ्यो** नैमिशीयेभ्यः **कामानागायति स्म** ह गानं कृतवानित्यर्थः । तथान्योऽप्युद्गाता **कामानां** वा **आगाता भवति** । **य एतदेवं विद्वान्** यथोक्तगुणं प्राणमक्षर**मुद्गीथ-मुपास्ते** तस्यैतत्फलम् । प्राणात्मभावो हि दृष्टं फलम् । अदृष्टफलं[तु]हिरण्यगर्भाप्तिः "देवो भूत्वा देवानप्येति" इति श्रुतेः । एतदात्मविषयमुद्गीथोपासनमित्युप-संहरति—**इत्यध्यात्ममिति** ॥ २ ॥

अधिदेवतावच्छिन्नोद्गीथस्वरूपम्

अथाधिदैवतं य एवासौ तपति तमुद्गीथमुपासीत उद्यन्वा एष प्रजाभ्य उद्गायति उद्यꣳस्तमो भयमपहन्ति अपहन्ता ह वै भयस्य तमसो भवति य एवं वेद । समान उ एवायं चासौ चोष्णो-ऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिममसुं चोद्गीथमुपासीत । अथ खलु व्यानमेवोद्गीथ-मुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपानोऽथ यः प्राणा-पानयोः सन्धिः स व्यानो यो व्यानः सा वाक् तस्मादप्राणन्न-नपानन् वाचमभिव्याहरति । या वाक् सा ऋक् तस्मादप्राणन्न-नपानन् ऋचमभिव्याहरति या ऋक् तत्साम तस्मादप्राणन्ननपानन् साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायति । अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानꣳस्तानि करोत्येतस्य हेतोर्व्यानमेवोद्गी-थमुपासीत । अथ खलूद्गीथाक्षराण्युपासीत उद्गीथ इति प्राण एव उत् प्राणेन ह्युत्तिष्ठति वाक् गीः वाचो ह गिर इत्याचक्षते अन्नं थं अन्ने

हीदꣳ सर्वꣳ स्थितम् । द्यौरेव उत् अन्तरिक्षं गीः पृथिवी थं आदित्य एव उत् वायुर्गीः अग्निः थꣳ सामवेद एव उत् यजुर्वेदो गीः ऋग्वेदः थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतान्येवं विद्वान् उद्गीथाक्षराण्युपास्त उद्गीथ इति । अथ खल्वाशीः समृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन् स्यात् तत्सामोपधावेत् । यस्यामृचि तामृचं यदार्षेयं तमृषिं यां देवतामभिष्टोष्यन् स्यात् तां देवतामुपधावेत् । येन छन्दसा स्तोष्यन् स्यात् तच्छन्द उपधावेत् येन स्तोमेन स्तोष्यमाणः स्यात् तꣳ स्तोममुपधावेत् । यां दिशमभिष्टोष्यन् स्यात् तां दिशमुपधावेत् । आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृद्ध्येत यत्कामः स्तुवीतेति यत्कामः स्तुवीतेति ॥ ३ ॥

अधिदेवतावच्छिन्नोद्गीथस्वरूपमाह—**अथेति** । अथाध्यात्मविषयोद्गीथकथनानन्तरं अधिदेवताविषयमुद्गीथं प्रस्तुतम् । तस्यानेकधा उपास्यत्वाय **य एवासावादित्यस्तपति तमादित्यदृष्ट्योद्गीथमुपासीत** । उद्गीथशब्दोऽक्षरवाची । स कथमादित्ये वर्तते ? इत्यत आह—**उद्यन्निति** । **उद्यन्नुद्गच्छन् वै एष आदित्यः प्रजाभ्यः** प्रजानामन्नोत्पत्त्यर्थं उद्गायतीवोद्गायति । न ह्यादित्यानुदये व्रीह्याद्युत्पत्तिर्भवति । यथोद्गातान्नार्थमुद्गायति तथा सवितेत्यर्थः । किं **चोद्यन्नेव** सविता प्राणिनां नैशं **तमः तज्जभयमपहन्ति** । **यः** सवितारमेवंगुणविशिष्टं **वेद** सोऽयं विद्वान् स्वजनिमृतिनिमित्तभयस्य तद्धेतुस्वाज्ञानलक्षणतमसश्चापहन्ता **ह वै** नाशयिता **भवति** । स्थानभेदात् प्राणादित्ययोर्भेदेऽपि वस्तुतस्तयोरभेद एवेत्याह—**समान इति** । गुणतः सवित्रा प्राणः प्राणेन सविता **चायं समान**

उ **एव** तुल्यो भवति। केन गुणेन तयोः साम्यं? इत्यत्र **उष्णोऽयं** प्राण **उष्णश्चासौ** सविता। किञ्च स्वरविदः **इमं** प्राणं **स्वर इत्याचक्षते**। तथा **स्वर इति प्रत्यास्वर इति चामुं** सवितारं आचक्षत इत्यनुवर्तते। प्रत्यास्वर इत्यत्र यस्मात्प्राणः स्वरत्येव न हि प्रत्यास्वरो न मृतः। तथा सविताहन्यहनि प्रत्यागच्छतीति प्रत्यास्वरः। यस्माद्गुणतो नामतश्च प्राणादित्यौ समानौ अतस्तयोरभेदा**देतं** प्राण**मिममुं** चादित्य**मुद्गीथमुपासीत**। उद्गीथस्य प्रकारान्तरेणोपासनमाह—**अथ खल्विति**। प्राणवृत्तिविशेषं **व्यानमेवोद्गीथमुपासीत**। तत्सत्त्वं निरूपयति—**यद्वा इति**। **यद्वै** पुरुषो मुखनासिकाभ्यां प्राणिति वायुं बहिश्चारयति **स** हि **प्राण**वायुः। **यदपानिति** अपश्वसिति अन्तराकर्षति वायुं **सोऽपानः**। अथापानस्वरूपकथनानन्तरं **प्राणापानयोर्यः सन्धिः स व्यानः** वीर्यवत्कर्मकर्ता। कथं तस्य वीर्यवत्कर्मकर्तृत्वम्? इत्यत आह—**य** इति। **यो व्यानः सा वाक्** वाचो व्यानकार्यत्वात्। **तस्मादप्राणन् अनपानन्** तद्व्यापारमकुर्वन् **वाचमभिव्याहरति** लोकः। तथा **या वाक् सा** हि **ऋक्** सूक्तं साम सामावयवं चोद्गीथं **चाप्राणन् अनपानन्** व्यानेनैव निर्वर्तयतीत्यर्थः। न केवलं वागाद्यभिव्याहरणं **अतोऽस्मादन्यान्यपि वीर्यवन्ति कर्माणि** व्याननिर्वर्त्यानीत्याह—**यथेति**। **यथाग्नेर्मन्थनं** मथनमाजेर्मर्यादायाः **सरणं** धावनं **दृढस्य धनुषः आयमनं चाप्राणन् अनपानन् तानि करोति** अतः प्राणादिवृत्तिभ्यो व्यानस्योपासनं ज्यायः राजोपासनवत् फलवत्त्वात्। **एतस्य हेतोरेतस्मात्** कारणात् **व्यानमेवोद्गीथमुपासीत**। न हि तदतिरिक्तवीर्यवत्फलदोपासनमस्ति। **अथ खलूद्गीथाक्षराणि उपासीत उद्गीथ** इत्युद्गीथनामाक्षराणि न हि भक्त्यक्षराणीत्यर्थः। नामाक्षरोपासनतो नाम्न्युपासनं कृतं स्यादित्यर्थः। यद्वत् **उत्** इत्यक्षरे **प्राण एव** प्राणदृष्टिः। कथं उत्त्वं प्राणस्य? इत्यत्र सर्वोऽपि **प्राणेन ह्युत्तिष्ठति** सप्राणस्योत्थानदर्शनात्। अत उदः प्राणस्य च सामान्यं युक्तम्। शिष्टास्तु **वाक् गीः वाचो ह गिर इत्याचक्षते**। तथा**न्नं थम्**। **अन्ने हीदं सर्वं स्थितं** अतोऽस्त्यन्नस्य थकारस्य च सामान्यम्। श्रुत्युक्तानि हि त्रयाणां सामान्यानि। तदनुरोधेन शेषेष्वपि सामान्यानि द्रष्टव्यानि। **उच्चैः स्थानात्**

द्यौरेव उत्। लोकानां गिरणादन्तरिक्षं गीः। सर्वप्राणिस्थानत्वात् पृथिवी थम्। ऊर्ध्वत्वात् आदित्य एव उत्। अग्न्यादीनां गिरणात् वायुर्गीः। यज्ञकर्मावस्थानादग्निः थम्। स्वर्गसंस्कृतत्वात् सामवेद एव उत्। यजुषा देवानां हविर्गिरणात् यजुर्वेदो गीः। साम्न ऋच्यध्यूढत्वात्सर्वं ऋग्वेदः थम्। अधुनोद्गीथाक्षरोपासनाफलमाह—दुग्ध इति। अस्मै साधकाय गोवत् वाक् क्षीरवत्फलं दुग्धे दोग्धि। यो वाचो दोहः वागादिशब्दसाध्यं फलं स्वयमेव वागात्मानमेव दोग्धि। किंचान्नवान् समृद्धान्नः अन्नादो दीप्ताग्निः भवति। यो विद्वान् यथोक्तगुणान्युद्गीथाक्षराण्युद्गीथ इत्युपास्ते स यथोक्तफलमश्नुत इत्यर्थः। अथ खल्वाशीः समृद्धिः आशिषः कामस्य समृद्धिरुच्यत इति वाक्यशेषः। ध्येयत्वेनोपसरणान्युपसर्तव्यानि इत्युपासीत। तद्यथेत्यत्र उद्गाता येन साम्ना स्तोष्यन् स्यात् तत्सामोपधावेत्। येन गायत्र्यादिछन्दसा स्तोष्यन् स्यात् तच्छन्दः उपधावेत्। येन स्तोमेन स्तोष्यमाणः स्यात्—स्तोष्यमाण इत्यात्मनेपदं स्तोमाङ्गफलस्य कर्तृगामित्वात्—तं स्तोममुपधावेत्। यां दिशमभिष्टोष्यन् स्यात् तां दिशमुपधावेत्। उद्गाता अधिष्ठातृभिः नामगोत्रादिभिः सहात्मानमन्तत उपसृत्य यजमानस्य यः कामस्तं काममभिध्यायन्ननुसंधानं कुर्वन् स्वरोष्मव्यञ्जनादिभ्योऽप्रमत्तः प्रमादमकुर्वन् स्तुवीत। ततोऽभ्याशो ह क्षिप्रमेवास्मा एवंविदे स कामः समृद्ध्येत समृद्धिं गच्छेत्। यस्य यद्विषयकः कामः यत्कामः सन् स्तुवीत इत्यत्र द्विर्वचनं प्रकृतोपासनासमाप्त्यर्थम्॥ ३॥

अक्षरस्य गुणवैशिष्ट्योपासनम्

ओमित्येतदक्षरमुद्गीथमुपासीत ओमिति ह्युद्गायति तस्योपव्याख्यानम्। देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशꣳस्ते छन्दोभिरच्छादयन् यदेभिरच्छादयꣳस्तच्छन्दसां छन्दस्त्वम्। तानु तत्र मृत्युर्यथा मत्स्यमुदके परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि। ते नु विदित्वोर्ध्वा ऋचः साम्नो यजुषः स्वरमेव प्राविशन्। यदा वा

ऋचमाप्नोति ओमित्येवातिस्वरति एवꣳ साम एवं यजुरेष उ स्वरो यदेतदक्षरमेतदमृतमभयं तत्प्रविश्य देवा अमृता अभया अभवन् । स य एतदेवं विद्वानक्षरं प्रणौति एतदेवाक्षरꣳस्वरममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तदमृतो भवति ॥ ४ ॥

प्रकृताक्षरस्यामृताभयगुणवैशिष्ट्योपासनविधित्सया इदमारभ्यते—**ओमिति** । ओमित्यादि व्याख्यातम् । **देवा वै मृत्योः** सकाशात् **बिभ्यतो** भीताः सन्तः **त्रयीं विद्यां** तन्निर्वर्त्यकर्म **प्राविशन्** तस्य मृत्युत्राणनहेतुत्वात् । किञ्च **ते** देवाः कर्मण्यविनियुक्तछन्दोभिर्मन्त्रजपहोमादि कुर्वन्तः सन्तः स्वात्मानं कर्मान्तरेणाच्छादयन् । **यद्यस्मादेभिराच्छादयन्तः** तस्माच्छन्दसां मन्त्राणां छन्दस्त्वं सिद्धमित्यर्थः । **यथोदके** मत्स्यघातको बडिशादिसाधनतो **मत्स्यं परिपश्येत्** तथा **तान्** तत्र देवान् कर्मक्षयोपायसाध्यानित्येवं **पर्यपश्यत्** । असौ मृत्युः क्व देवान् ददर्श ? इत्यत आह—**ऋचि साम्नि यजुषीति** । ऋग्यजुःसामसंबद्धे कर्मणीत्यर्थः । देवास्तेन वैदिकेन कर्मणा शुद्धात्मानः सन्तो मृत्योश्चिकीर्षितं **विदित्वा ऋचः साम्नो यजुषः** तन्निर्वर्त्यकर्मण **ऊर्ध्वा** ऊर्ध्वदृष्ट्यो भूत्वा कर्मणा मृत्युभयानिवृत्तेस्तदपास्य अमृताभयगुणमक्षरमेव **स्वर**शब्दितं **प्राविशन्** ओङ्कारोपासनापरा भवेयुरित्यर्थः । एवकारः समुच्चयप्रतिषेधार्थः अवधारणार्थो वा । स्वरशब्दवाच्यत्वं कुतः ? इत्यत आह—**यदेति** । **यदा वै ऋचमाप्नोति ओमित्येवातिस्वरति एवं साम एवं यजुः एष उ स्वरः** । कोऽसौ ? **यदेतदक्षरमेतदमृतमभयं** प्रविशति । अमृताभयब्रह्मप्रतीकत्वात्तदक्षरं **प्रविश्य ते देवा अमृता अभया अभवन्** । **स यो**ऽन्योऽपि **विद्वान्** देववदेव एतदक्षरममृताभयगुणं **प्रणौति** उपासनरूपां स्तुतिं करोति स तथैव **तदेवाक्षरं स्वरममृतमभयं प्रविशति** । राज्ञोऽन्तरङ्गत्वेन राजकुलप्रविष्टवत् तदेतदक्षरं **प्रविश्य** येनामृतत्वसाधनेन **यदमृता देवा** अमृता अभूवन् तत्साधनेन तादृशा**मृतो भवति** । तेनामृतेन न न्यूनता नाप्यधिकतेत्यर्थः ॥ ४ ॥

आदित्याक्षरोपासनम्

अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति । एतमु एवाहमभ्यगासिषं तस्मात् मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मीꣳस्त्वं पर्यावर्तयात् बहवो वै ते भविष्यन्तीत्यधिदैवतम् । अथाध्यात्मं य एवायं मुख्यः प्राणस्तमुद्गीथमुपासीत ओमिति ह्येष स्वरन्नेति । एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणाꣳस्त्वं भूमानमभिगायतात् बहवो वै मे भविष्यन्तीति । अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृषदनात् हैवापि दुरुद्गीथमनुसमाहरतीत्यनुसमाहरतीति ॥ ९ ॥

प्रणवोद्गीथयोरेकत्वाभिप्रायेण प्राणरश्मिगुणविशिष्टादित्याक्षरोपासनमनेकपुत्रफलदमिदानीं वक्तव्यमितीदमारभ्यते—अथेति । **अथ खलु य उद्गीथः** बह्वृचानां **स प्रणवः** । यस्तेषां **प्रणवः स** एव छन्दोगानामुद्गीथशब्दवाच्यः । **असौ वा आदित्य उद्गीथः** । **एष प्रणव**शब्दवाच्योऽपि बह्वृचानां नान्योऽयमुद्गीथ आदित्यः । कथम् ? उद्गीथाक्षरं **ओमि**त्येतदेव । **हि** यस्मात् **स्वरन्**नुच्चरन् अथवा स्वरन्नुद्गच्छन् सवितोद्गीथेनेति । तमेतमु **एवाहमभ्यगासिषं** आदित्यरश्मिभेदमकृत्वाभिमुख्येन गीतवानस्मि । तेन **तस्मान्मम त्वमेकोऽसि** पुत्र! **इति कौषीतकिः पुत्रमुवाच** । अतो **रश्मी**नादित्यं च भेदेन **त्वं पर्यावर्तयात्** पर्यावर्तयेत्यर्थः । एवं रश्मीनां बहुत्वयोगात् **बहवो वै ते** तव पुत्रा **भविष्यन्तीत्यधिदैवतम्** । **अथा**नन्तरम**ध्यात्म**मुच्यते । **य एवायं मुख्यः प्राणः तमुद्गीथमुपासीते**ति पूर्ववत् । तथोमिति **ह्येष** प्राणोऽपि **स्वरन्नेति** । वागादिप्रवृत्त्यर्थं ओमिति ह्यनुज्ञां कुर्वन्निवैति । न हि मुमूर्षुमृतिकाले तत्समीपस्थाः

प्राणस्योङ्करणं शृण्वन्तीत्येतत्सामान्यात्। तथादित्येऽप्यनुज्ञामात्रमोङ्करणं द्रष्टव्यम्। **एतमु एवाहमभ्यगासिषमि**त्यादि पूर्ववत्। अतो वागादित्यमुख्यप्राणभेदगुणविशिष्टोद्गीथोपासनां कुर्वन् मनसा **भूमानमभिगायता**दिति पूर्ववत्। **बह्वो वै मे पुत्रा भविष्यन्ती**त्यभिसन्धिपूर्वकं उद्गानं कुर्यादित्यर्थः। प्राणादित्यैकत्वोद्गीथदृष्टेरेकपुत्रदोषदुष्टत्वात् तदपोह्य रश्मिप्राणभेददृष्टिरस्मिन् खण्डे बहुपुत्रलाभाय कर्तव्येति चोद्यते। **अथ खलु य उद्गीथ** इत्यादिप्रणवोद्गीथैकत्वदर्शनमुक्तम्। तत्फलमाह—**होतृषदनादि**ति। यत्र स्थित्वा होता शंसति तत्स्थलं होतृषदनम्। तत्रत्यहोत्रा कर्मणः सम्यक् प्रयुक्तत्वात्। न हि देशमात्रादाहर्तुं शक्यते फलम्। किं तत्? **हैवापि दुरुद्गीथं** दुष्टमुद्गीथं उद्गानं कृतं **तदनुसमाहरति** समीकरणं करोतीत्यर्थः॥ ५॥

उद्गीथस्य साधनान्तरप्रकाशनम्

इयमेव ऋक् अग्निः साम तदेतदेतस्यामृचि अध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते इयमेव सा अग्निः अमः तत्साम। अन्तरिक्षमेव ऋक् वायुः साम तदेतदेतस्यामृचि अध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयतेऽन्तरिक्षमेव सा वायुः अमः तत्साम। द्यौरेव ऋक् आदित्यः साम तदेतदेतस्यामृचि अध्यूढꣳ सामं तस्मादृच्यध्यूढꣳ साम गीयते द्यौरेव सा आदित्योऽमः तत्साम। नक्षत्राण्येव ऋक् चन्द्रमाः साम तदेतदेतस्यामृचि अध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते नक्षत्राण्येव सा चन्द्रमा अमः तत्साम। अथ यदेतदादित्यस्य शुक्लं भाः सैव ऋक् अथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यां ऋच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते। अथ यदेवैतदादित्यस्य शुक्लं भाः सैव साथ

यन्नीलं परः कृष्णं तदमः तत्साम अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः। तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्य उदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद। तस्य ऋक् च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गाता एतस्य हि गाता स एष ये चामुष्मात् पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥ ६ ॥

अथेदानीमुद्गीथस्य सर्वसंपत्फलहेतुतया साधनान्तरप्रकाशनार्थमिदमारभ्यते—**इयमिति**। **इयमेव पृथिवी ऋक्**। ऋचि पृथिवीदृष्टिः कार्येत्यर्थः। तथा**ग्निः साम**। साम्नि अग्निदृष्टिः। पृथिव्यग्न्योः ऋक्सामत्वं कुतः? इत्यत आह – **तदिति**। **तदेतद**ग्न्याख्यं साम **एतस्यां** पृथिव्यां **ऋच्यध्यूढं** उपरिभावेन स्थितं **साम**। **तस्मादृच्यध्यूढमि**दानीमपि **साम** सामगैर्गीयते। यथा ऋक्सामे अत्यन्ताभिन्ने तथा पृथिव्यग्नी इत्यर्थः। **इयमेव पृथिवी सा** सामनामार्धशब्दवाच्या। इतरार्धशब्दवाच्योऽग्निः **अमः**। तदेतत्पृथिव्यग्निद्वयं **सा**मैकशब्दाभिधेयत्वमापन्नम्। तस्मात् पृथिव्यग्न्योः ऋक्सामत्वं सिद्धम्। सामाक्षरयोः पृथिव्यग्निदृष्टिविधानार्थमियमेव साग्निरम इति केचित्। **अन्तरिक्षमेव ऋक् वायुः सा**मेत्यादि पूर्ववत्। नक्षत्राणामधिपतिश्च**न्द्रमाः अमः** अतस्साम। **अथ यदेतदादित्यस्य शुक्लं भाः** शुक्ला दीप्तिः **सैव ऋक्**। **अथ यदेतदादित्ये नीलं परो**ऽतिशयेन **कृष्णं** कार्ष्ण्यं तद्ध्येकान्तदृष्टेः **तत्साम** दृश्यते। त एव भाः शुक्लकृष्णे सा च अमश्च साम। **अथ य एषोऽन्तरादित्य** आदित्यमण्डलान्तः **हिरण्मयो** ज्योतिर्मयः। उत्तरेष्वपि हिरण्मयशब्दस्य ज्योतिर्मयत्वमर्थः। नास्य हिरण्यविकारत्वं संभवति। न ह्यचेतनं हिरण्याद्यपहतपाप्मत्वादिविशेषणभाग्भवति। तस्मादयं ज्योतिर्मयः। पुरिशयनादन्तर्याम्यात्मना पूरणाद्वा **पुरुषः** निवृत्तावरणै**र्दृश्यते**। ज्योतिर्मयस्यापि श्मश्रुकेशादयः कृष्णाः स्युरित्यत आह—

हिरण्यश्मश्रुर्हिरण्यकेश इति। **आप्रणखात् सर्वाङ्गसुवर्ण** इव भारूप इत्यर्थः। तस्य भारूपत्वेऽप्यक्ष्णोर्विशेषमाह— **कप्यासमिति**। आसेरुपवेशनार्थस्य करणे घञि कपेरासः कप्यास इव पुण्डरीकमत्यन्ततेजोमयं **तदेवास्याक्षिणी**। उपमितोपमानत्वान्न हीनोपमा। यद्वा—कं पिबतीति कपिः सूर्यः। तदुदयत आस्यते विकसतीति **कप्यासं पुण्डरीकम्**। तत्तुल्ये तदक्षिणी इत्यर्थः। तस्य किं नाम? इत्यत आह—**तस्य उदिति नामेति**। **स एष देवः सर्वेभ्यः पाप्मभ्यः** तत्कार्येभ्य **उदितः** उद्गतः। एवं उन्नामानमात्मानं यथावत् **यो वेद** सोऽपि विद्वान् **सर्वेभ्यः पाप्मभ्य** उदेति उद्गच्छति। **ह वा** इति शब्दाववधारणार्थौ। विदुषोऽप्यपहतपाप्मत्वात्। तथा च वक्ष्यति "य आत्मा अपहतपाप्मा" इति। तस्यादित्यादीनामिवोद्गीथत्वं विवृणोति— **तस्येति**। **तस्य ऋक् च साम च गेष्णौ** पृथिव्यग्न्याद्युक्तलक्षणे पर्वणी सर्वेशितृत्वाद्युपपद्यते। पृथिव्यग्नि-ऋक्सामादिगेष्णत्वं सर्वकारणत्वात् संभवतीत्यर्थः। यस्मादुद्गेष्णत्वे प्राप्ते तस्मा-**दयमुद्गीथ** इत्युद्गीथत्वं देवस्य परोक्षप्रियत्वात्। **तस्मात्त्वेव** हेतोः उत् गायतीत्युद्गाता। **एतस्योद्गातुः** उद्गातेति नामप्रसिद्धिः। स एष देवो उन्नामा **ये चामुष्मादादित्यात्** परागञ्चन्तीति **पराञ्चो लोकाः तेषां** लोकानां **चेष्टे**। चशब्दात् धारयतीत्यर्थः। "स दाधार" इति श्रुतेः। किञ्च **देवकामानामपीष्टे** इत्येतदुद्गीथस्याधिदेवतास्वरूपमुक्तमित्यर्थः॥ ६॥

अध्यात्मस्वरूपम्

अथाध्यात्मं वागेव ऋक् प्राणः साम तदेतदेतस्यामृचि अध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते वागेव सा प्राणोऽमः तत्साम। चक्षुरेव ऋक् आत्मा साम तदेतदेतस्यामृचि अध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते चक्षुरेव सात्मा अमस्तत्साम। श्रोत्रमेव ऋक् मनः साम तदेतदेतस्यां ऋच्यध्यूढꣳ साम तस्मा-दृच्यध्यूढꣳ साम गीयते श्रोत्रमेव सा मनो अमस्तत्साम। अथ

यदेतदक्ष्णः शुक्लं भाः सैव ऋक् अथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳसाम तस्मादृच्यध्यूढꣳ साम गीयते। अथ यदेवैतदक्ष्णः शुक्लं भाः सैव साथ यन्नीलं परः कृष्णं तदमः तत्साम। अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैव ऋक् तत्साम तदुक्थं तत् यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम। स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेति तद्य इमे वीणायां गायन्ति एतं ते गायन्ति तस्मात्ते धनसनयः। अथ य एतदेवं विद्वान् साम गायत्युभौ स गायति सोऽमुनैव स एष ये चामुष्मात् पराञ्चो लोकाः ताꣳश्चाप्नोति देवकामास्ताꣳश्च। अथानेनैव ये चैतस्मा-दर्वाञ्चो लोकास्ताꣳश्चाप्नोति मनुष्यकामाꣳश्च तस्मादु हैवंविदुद्गाता ब्रूयात्—कं ते काममागायानि? इति एष ह्येव कामगानस्येष्टे य एवं विद्वान् साम गायति साम गायति॥ ७॥

अधुनाध्यात्मस्वरूपमुच्यते—अथेति। वागेव ऋक् घ्राणाख्योऽयं प्राणः साम अथोर्ध्वस्थानसामान्यात। वागेव सा प्राणोऽम इत्यादि पूर्ववत्। चक्षुरेव ऋक् आत्मा सामेत्यत्र तत्रत्यछायात्मा। श्रोत्रमेव ऋक् मनः साम इत्यत्र मनसः श्रोत्राधिष्ठानत्वात् सामत्वम्। अथ यदेतदक्ष्णः शुक्लं भा इत्यादित्य इव दृक्शक्त्यधिष्ठानं तत् साम। अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते विश्वादिः "दक्षिणाक्षिमुखे विश्वः" इति खिलश्रुतेः। सैव ऋक् अध्यात्ममधिदैवतं च वागाद्याः पृथिव्याद्याश्च प्रसिद्धाः। पादबद्धात्मिका ऋक्। तथा सोक्थ-साहचर्यात् स्तोत्रं भवति। उक्थादन्यत् साम ऋक् शस्त्रादि। तथा स्वाहा स्वधा वषडित्यादि सर्वमेव यजुः तद्ब्रह्म तस्य सर्वात्मकत्वेन सर्वकारणत्वात्।

ब्रह्मशब्देनात्र त्रयो वेदा उच्यन्ते। **तदेव रूपं तस्यैतस्य** चाक्षुषस्येति निर्दिश्यते। किं तत्? इत्यत आह—**यदिति**। यदमुष्य हिरण्मय इत्याद्यधिदैवतमुक्तं **यावमुष्य गेष्णौ** पर्वणी तावेवास्य चाक्षुषस्य रूपं गेष्णौ च। यच्चोक्तमुदिति **अमुष्य नाम तदेवास्य नाम**। तयोः स्थानभेदेऽपि वस्तुत एकत्वात्। **स एव** चाक्षुष आत्मा। **अर्वाञ्चो ये लोकास्तेषां** मानुषाणां **कामानामीष्टे**। तत् तस्मात् **य इमे** गायका **वीणायां गायन्ति एतमेव ते गायन्ति** एतस्य ईशभावारूढत्वात्। **तस्मात्ते धनसनयो** धनवन्तो भवन्ति। **अथ य एतदेवमुद्गीथं विद्वान् साम गायति** चाक्षुषमादित्यं **चोभौ** साम गायति। एवंविदः फलमाचष्टे—**सोऽमुनैवेति**। सोऽयं विद्वानमुनादित्येनैव **स एष ये चामुष्मात् पराञ्चो लोकास्तांश्चाप्नोति**। देवो भूत्वा **देवकामांश्च**। **अथानेनैव** चाक्षुषेण **ये चैतस्मादर्वाञ्चो लोकास्तांश्चाप्नोति**। चाक्षुषो भूत्वा **मनुष्यकामांश्चा**प्नोतीत्यर्थः। **तस्मादु हैवंवित् उद्गाता कं ते काममागायानि?** इति यजमानं ब्रूयात् यस्मादेष ह्युद्गाता कामगानस्यास्य कामान् संपादयितु**मीष्टे** समर्थो भवति। कोऽसौ? इत्यत आह—**य एतदेवं विद्वान् साम गायतीति** द्विरुक्तिरुपासनापरिसमाप्त्यर्था॥ ७॥

अक्षरस्य परोवरीयस्त्वोपासनम्

त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति ते होचुः उद्गीथे वै कुशलाः स्मः हन्त उद्गीथे कथां वदाम इति। तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्मणयोर्वदतोर्वाचꣳ श्रोष्यामीति। स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति होवाच। का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य का

गतिरिति अन्नमिति होवाच अन्नस्य का गतिरिति आप इति होवाच। अपां का गतिरित्यसौ लोक इति होवाच अमुष्य लोकस्य का गतिरिति न स्वर्गं लोकमतिनयेदिति होवाच स्वर्गं वयं लोकꣳ सामाभि-संस्थापयामः स्वर्गसꣳस्तावꣳ हि सामेति। तꣳ ह शिलकः शाला-वत्यश्चैकितायनं दाल्भ्यमुवाच अप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति। हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच अमुष्य लोकस्य का गतिरित्ययं लोक इति होवाच अस्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकꣳ सामाभिसꣳस्थापयामः प्रतिष्ठासꣳस्तावꣳ हि सामेति। तꣳ ह प्रवाहणो जैवलिरुवाच अन्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विप-तिष्यतीति मूर्धा ते विपतेदिति हन्ताहमेतद्भगवत्तो वेदानीति विद्धीति होवाच ॥ ८ ॥

अक्षरस्यानेकधोपास्यत्वेन परोवरीयस्त्वगुणफलवदुपासनविधित्सया इदमा-रभ्यते—त्रय इति। कस्मिंश्चिद्देशकालादौ समेतास्त्रयो मुनयः उद्गीथे तद्या-थात्म्यवेदने कुशलाः समर्था बभूवुः। न हि त्रयाणामेव तत्कुशलत्वं उषस्ति-जानश्रुतिप्रभृतीनां विद्यमानत्वात्। के ते त्रयः? इत्यत आह—शिलक इत्यादि। नामतः शिलकः। शालावतोऽपत्यं शालावत्यः। चिकितायनस्यापत्यं चैकितायनः। दल्भगोत्रो दाल्भ्यः द्व्यामुष्यायणो वा। नामतः प्रवाहणः। जीवलस्यापत्यं जैवलिः। एवं विख्यातास्त्रयस्ते होचुः। हकार ऐतिह्यार्थः। उद्गीथे वै कुशला निपुणाः स्मो वयमिति। हन्त! उद्गीथविषये पक्षप्रति-पक्षोपन्यासेन कथां वदामो वादं कुर्म इत्यर्थः। विद्याकुशलानां विवादो

व्यर्थ इति चेन्न; संशयविपर्यासनिरासपूर्वकं तद्विषये दृढज्ञानसंभवात्। तथेत्युक्त्वा ते ह समुपविविशुः। तत्र राज्ञः प्रागल्भ्यात् ब्राह्मणावितरौ। स राजा प्रवाहणो जैवलिरुवाच। 'ब्राह्मणयोः' इति लिङ्गादयं राजेति द्योत्यते। भगवन्तावग्रे वदताम्। वदतोर्ब्राह्मणयोरर्थगुम्भितां वाचं श्रोष्यामीति। स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच। किमिति? हन्त! त्वा त्वां पृच्छानीति। अनेनैवमुक्त इतरः पृच्छेति होवाच लब्धानुमतिराह—का साम्नो गतिः? इति। परोवरीयस्त्वगुणविशिष्टोद्गीथस्यात्रोपास्यत्वेन प्रकृतत्वात्। वक्ष्यति च "परोवरीयांसमुद्गीथम्" इति। उद्गीथाख्यसाम्नः का गतिः परायणं? इति पृष्टो दाल्भ्य उवाच—स्वर इति। मृदाश्रयघटवत् साम्नः स्वराश्रयत्वात्। स्वरस्य का गतिः? इति। प्राण इति होवाच स्वरस्य प्राणगतिकत्वात्। प्राणस्य का गतिः? इति। अन्नमिति होवाच प्राणस्थितेरन्नायत्तत्वात्। "शुष्यति वै प्राण ऋतेऽन्नात्" इति श्रुतेः। अन्नस्य का गतिः? इति। आप इति होवाच अन्नस्याप्संभवत्वात्। अपां का गतिः? इति। असौ लोक इति होवाच। अमुष्य लोकस्य वृष्टिहेतुत्वात्। अमुष्य लोकस्य का गतिः? इति पृष्टो दाल्भ्य आह—नेति। स्वर्गं लोकमतीत्याश्रयान्तरं साम न हि नयेत् कश्चिदिति होवाच। अतो वयमपि स्वर्गं लोकं सामाभिसंस्थापयामः एतत्साम स्वर्गलोकप्रतिष्ठं जानीम इत्यर्थः। स्वर्गत्वेन संस्तवनं यस्य तत् साम स्वर्गसंस्तावं हि। तं हेतरः शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच। परोवरीयस्त्वेनाप्रतिष्ठितं साम। वै इत्यागमस्मारकः किलेति च। दाल्भ्य! ते तव साम यस्त्वसहिष्णुः एतर्ह्येतस्मिन् काले प्रतिष्ठितं सामाप्रतिष्ठितमित्येवं ब्रूयात् तदपराधेन मूर्धा शिरस्ते विपतिष्यति। एवमपराधिनस्ते मूर्धा विपतेदित्यत्र न हि संशय इत्यर्थः। अमुष्य लोकस्य का गतिः? इति दाल्भ्येन पृष्टः शालावत्योऽयं लोक इति होवाच एतल्लोककृतयागदानादेः परलोकगतिहेतुत्वात्। "अतः प्रदानं देवा उपजीवन्ति" इति श्रुतेः। अस्य लोकस्य सर्वभूतप्रतिष्ठत्वेन साम्नोऽप्ययं लोकः प्रतिष्ठेति युक्तम्। शालावत्येनास्य लोकस्य का गतिः?

इत्युक्तः आह कश्चित्— न प्रतिष्ठामिमं लोकं सामातिनयेत् । अतो वयं प्रतिष्ठां लोकं सामाभिसंस्थापयामः । यतः, प्रतिष्ठात्वेन संस्तावं संस्तुतं हि सामेत्यर्थः । "इयं वै रथन्तरम्" इति श्रुतेः । एवमुक्तवन्तं प्रवाहणो जैवलिरुवाच । अन्तवद्वै किल ते शालावत्य सामेत्यादि पूर्ववत् । तं ह शालावत्य आह—हन्त! अहमेतद्भगवत्तो वेदानीति । विद्धीति होवाचेतरः ॥ ८ ॥

शालावत्यस्य प्रश्नः

अस्य लोकस्य का गतिरिति आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् । स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति परोवरीयसो ह लोकान् जयति य एतदेवं विद्वान् परोवरीयाꣳसमुद्गीथमुपास्ते । तꣳ हैतमतिधन्वा शौनक उदरशाण्डिल्याय उक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिँल्लोके जीवनं भविष्यति । तथामुष्मिँल्लोके लोक इति स य एतमेवं विद्वानुपास्ते परोवरीय एव हास्यामुष्मिँल्लोके जीवनं भवति तथामुष्मिँल्लोके लोक इति लोके लोक इति ॥ ९ ॥

एवमनुज्ञातः पृच्छति—अस्येति । अस्य लोकस्य का गतिः ? इत्यनेन पृष्टः प्रवाहण आकाश इति होवाच । आकाशशब्देन परमात्मा उच्यते । "आकाशो ह वै नाम" इति श्रुतेः । तस्यैव सर्वहेतुत्वमाह । तेजोऽबन्नादिक्रमेण सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते । प्रलयकाले तावदाकाशं प्रत्यस्तं यन्ति । तथा च वक्ष्यति "तत्तेजोऽसृजत", "तेजः परस्यां देवतायां" इति । हि यस्मादाकाश एव एभ्यः सर्वेभ्यो वियदादिभूतेभ्यो

ज्यायान् अतः सर्वभूतपरायणमाकाश एव। सर्वेषां भूतानां कालत्रयेऽपि आकाशप्रतिष्ठत्वात्। यस्मात् परश्च वरीयांश्च **स एष परोवरीयानुद्गीथः** परमात्मप्रतीकत्वात्। अत एव स एषोऽनन्त उद्गीथार्थपरमात्मनः त्रिविध-परिच्छेदशून्यत्वात्। यस्तु विद्वान् तमेतं परोवरीयांसमुद्गीथमुपास्ते तस्यै-तत्फलमाचष्टे—**परोवरीयो हास्य भवतीति**। अस्य विदुषः परं वरीयः विशिष्टतरजीवनं भविष्यतीत्येतत् दृष्टफलम्। **परोवरीयसो ह लोकानिन्द्रादि-** ब्रह्मलोकान्तान् **जयतीत्युत्कृष्टफलम्**। **य एतदेवं विद्वान् परोवरीयांस-मुद्गीथमुपास्ते**। **तमेतमुद्गीथं** विद्वान्नामतोऽयमतिधन्वा शुनकस्यापत्यं **शौनकः** स्वशिष्याय **उदरशाण्डिल्याय** एतदुद्गीथदर्शनमुक्त्वोवाच। **यावत्त** तव **प्रजायां** सन्ततौ भवा **उद्गीथं वेदिष्यन्ते** ज्ञास्यन्ति तावन्तं कालं **परोवरीयो हैभ्यो** लौकिकजीवनेभ्यः **उत्तरोत्तरविशिष्टतरजीवनं भविष्यतीति** दृष्टफलम्। अदृष्टफलन्तु **अमुष्मिन्** **परलोकेऽपि** परोवरीयान् लोको भविष्यतीत्यतिधन्वा शौनकः शाण्डिल्यायोक्तवान्। स्यादेतत्फलं पूर्वेषां, नेदानींतनानामित्यत आह—**स य इति**। **स यः** कश्चिदेतमेवं विद्वानुद्गीथमुपास्ते तस्याप्येवमेव **परोवरीय एव हास्मिन् लोके जीवनं** भविष्यति। **तथामुष्मिन् लोके**। लोक इति द्विरुक्तिरादरार्थेत्यर्थः ॥ ९ ॥

प्रतिहारोपासनम्

मटचीहतेषु कुरुष्वाटिक्या सह जायया उपस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास। स ह इभ्यं कुल्माषान् खादन्तं बिभिक्षे तꣳहोवाच। नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति। एतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतꣳस्यादिति होवाच। न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच कामो म उदपानमिति। स ह खादित्वातिशेषान् जायाया आजहार साग्र एव सुभिक्षा बभूव

तान् प्रतिगृह्य निदधौ । स ह प्रातः संजिहान उवाच यत् बतान्नस्य लभेमहि लभेमहि धनमात्राᳪ राजासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति । तं जायोवाच हन्त पते ! इम एव कुल्माषा इति तान् खादित्वामुं यज्ञं विततमेयाय । तत्रोद्गातॄनास्तावे स्तोष्यमाणान् उपोपविवेश स ह प्रस्तोतारमुवाच । प्रस्तोतः ! या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति । एवमेवोद्गातारमुवाच उद्गातः ! या देवता उद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति । एवमेव प्रतिहर्तारमुवाच प्रतिहर्तः ! या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णीमासांचक्रिरे ॥ १० ॥

उद्गीथोपासनाङ्गत्वेन प्रस्तावप्रतिहारविषयं उपासनं वक्तव्यमितीदमारभ्यते—मटचीति । इयमाख्यायिका सुखावबोधार्था । मटच्योऽशनयस्ताभिर्हतेषु कुरुषु तद्देशगतसस्येषु तेन दुर्भिक्षे जाते ततो मुनिरनुत्पन्नस्त्रीचिह्नेयमाटिकी । तयाटिक्या जायया सह नामत उषस्तिः । चक्रायणस्यापत्यं चाक्रायणः । इभो हस्ती तमर्हतीति इभ्यः हस्त्यारोहः । तस्य ग्रामे इभ्यग्रामे । द्रा कुत्सायामिति प्रद्राणकः कुत्सितां गतिं गतः सन्नुवास । सोऽन्नार्थी कस्यचिद्गृहमेत्य यदृच्छया कुत्सितमाषान् खादन्तमिभ्यं बिभिक्षे याचितवानित्यर्थः । सोऽयमिभ्यस्तमुषस्तिमुवाच । मया भक्ष्यमाणकुल्माषादुच्छिष्टादन्ये न विद्यन्ते । यच्च ये मे इम उपनिहिताः मद्भोजनपात्रे ये निक्षिप्ताः नेतः परं किंचिदप्यस्ति इत्युक्तोऽप्युषस्तिस्तं प्रत्युवाच । एतेषां तानि मे मह्यं देहीति होवाच । स इभ्यः अस्मै उषस्तये तानेव प्रददौ । स्वपीतावशिष्टमुदकं गृहीत्वोवाच । हन्त ! अनुपानमपि गृहाणेत्युक्त उषस्तिः प्रत्युवाच । तत्स्वीकरण उच्छिष्टं मे मम पीतं स्यात् यद्यहं पास्यामीत्युक्तः प्रत्यु-

वाच इभ्यः—किं न स्विदेते कुल्माषा उच्छिष्टाः? इत्युक्त आह उषस्तिः— इमान् कुल्माषान् यद्यहमखादंस्तदाहं नाजीविष्यं नैव जीविष्यामीति होवाच। कामतो मे मम उदपानं लभ्यत इत्यर्थः। अतः प्राणात्ययकाले गर्हितान्नभक्षणेऽपि न हि प्रत्यवायोऽस्तीत्यर्थः। प्राणधारणनिमित्तमुपायान्तरे सति एतादृशं कर्म ज्ञान्यभिमानेन कुर्वतो नरकपातः स्यादेवेत्यत्र ज्ञानवैराग्यसंपन्नस्य स्वस्मिन्नेव मुक्तिरिति न; "सर्वत्राचारप्रसक्तिः" इत्यादिश्रुतेः। प्रद्राणकगतिं गतो मुनिः तान् कुल्माषान् खादित्वातिशेषान् शिष्टान् जायायै कारुण्यादाजहार। सा तु कुल्माषलाभादग्रे एव सुभिक्षा लब्धान्ना बभूव। तथापि तान् कुल्माषान् पत्युर्हस्तात् प्रतिगृह्य निदधौ। तस्याः कर्म जानन् प्रातःकाले पत्न्यां शृण्वन्त्यां सञ्जिहानो निद्रां परित्यजन्नुवाच। किमुवाच? इत्यत्र यत् बतेति। खिद्यमानोऽन्नस्य स्तोकं लभेमहि। तदा तद्भुक्त्वा येनास्माकं जीवनं भविष्यति तद्धनमात्रां स्तोकं वा लभेमहि। तल्लाभे हेतुमाह— नातिदूरे राजासौ यक्ष्यते। तदात्मनेपदं यजमानत्वात्तस्य। सोऽयं राजा मा मां पात्रं मत्वा सर्वैरार्त्विज्यैः ऋत्विक्कर्मप्रयोजनाय वृणीते। एवमुक्तवन्तं जायोवाच। किमिति? हे पते! त्वया मद्धस्ते ये कुल्माषा निक्षिप्ताः ते इम एव। तान् खादित्वा राज्ञोऽमुं यज्ञं ऋत्विग्भिः विततमेयाय। तत्र गत्वा उद्गातृपुरुषानेत्य, अस्मिंस्तुवन्तीत्यास्तावः तस्मिन्नास्तावे स्तोष्यमाणानुपोपविवेश। स होपविश्य प्रस्तोतारमुवाच। स्वाभिमुखीकरणाय हे प्रस्तोतः! इत्यामन्त्र्य प्रस्तावभक्तिं या देवतानुगतान्वायत्ता विदुषो मम पुरतः तां चेदविद्वान् प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति। एवमुद्गातारं प्रतिहर्तारमुवाचेत्यादि समानमन्यत्। ते ह प्रस्तोत्रादयः मूर्धपातभिया कर्मभ्यः समारतास्सन्तः तूष्णीमासाञ्चक्रिरे निर्व्यापारा बभूवुरित्यर्थः॥ १०॥

प्रस्तावादीनां प्राणादित्यान्नदृष्ट्या उपासनम्

अथ हैनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीति उषस्तिरस्मि चाक्रायण इति होवाच। स होवाच भगवन्तं वा

अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषं भगवतो वा अहमवित्त्वा अन्यानवृषि । भगवाꣳस्त्वेव मे सर्वैरार्त्विज्यैरिति तथेति अथ तर्ह्येत एव समतिसृष्टाः स्तुवतां यावत्त्वेभ्यो धनं दद्याः तावन्मम दद्या इति तथेति ह यजमान उवाच । अथ हैनं प्रस्तोता उपससाद प्रस्तोतः! या देवता प्रस्तावमन्वायत्ता तां चेदविदान् प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत् कतमा सा देवतेति । प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ता तां चेदविद्वान् प्रास्तोष्यो मूर्धा ते व्यपतिष्यत् तथोक्तस्य मयेति । अथ हैनमुद्गाता उपससाद उद्गातः! या देवता उद्गीथमन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत् कतमा सा देवतेति । आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति सैषा देवता उद्गीथमन्वायत्ता तां चेदविद्वानुदगास्यः मूर्धा ते व्यपतिष्यत् तथोक्तस्य मयेति । अथ हैनं प्रतिहर्ता उपससाद प्रतिहर्तः! या देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत् कतमा सा देवतेति । अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान् प्रत्यहरिष्यः मूर्धा ते व्यपतिष्यत् तथोक्तस्य मयेति तथोक्तस्य मयेति ॥ ११ ॥

ततः किम्? इत्यत आह—अथेति। अथ स्वऋत्विक्कर्मोपरमणानन्तरमेनमुषस्तिं यजमानो राजोवाच ह। किमिति? भगवन्तं वाहं विविदिषाणि वेत्तुमिच्छामीत्युक्तो मुनिः यदि तेऽहं श्रोत्रपथमागत उषस्तिरस्मि चाक्रायण इति होवाच। सत्यमेव भगवन्तं बहुगुणमश्रौषमिति स ह यजमान उवाच। सर्वैरार्त्विज्यैर्भगवन्तं पर्यैषिषं पर्येषणं कृतवानस्मि। भगवतः स्थितिमहमवित्त्वा अविदित्वान्विष्यमाणोऽपि भवदलाभेनान्यानिमानवृषि वृतवानस्मि। अद्यापि भगवांस्त्वेव मे मम सर्वैरार्त्विज्यैरित्युक्तस्तथेत्याह उषस्तिः। अथानन्तरं तर्हि पूर्वं त्वया वृताः एत एव मया समतिसृष्टा अनुज्ञातास्सन्तः स्तुवतां त्वयैतत्कार्यं यावत्त्वेभ्य ऋत्विग्भ्यो धनं दद्याः ह प्रयच्छसि तावन्मम दद्याः इत्युक्तस्तथेति ह यजमान उवाच। अथौषस्त्यां वाचं श्रुत्वा हैनमुषस्तिं विनयेन प्रस्तोता उपससाद उपजगाम। प्रस्तोतः! या देवतेत्यादि पूर्वं भगवानवोचत्। या प्रस्तावभक्तिमन्वायत्ता सा कतमा देवता? इति पृष्ट उषस्तिः प्राण इति होवाच। कथम्? सर्वाणि ह वा इमानि स्थावरजङ्गमानि भूतानि प्रलयकाले प्राणमेवाभिसंविशन्ति प्राणात्मनैवाभ्युज्जिहते। उत्पत्तिकाले प्राणादेवोद्गच्छन्ति। अतः प्रस्तावस्य प्राणो देवतेति युक्तम्। अतः सैषा देवता प्रस्तावमन्वायत्ता। तां चेदविद्वान् त्वं प्रास्तोष्यः प्रस्तावभक्तिं कृतवानसि यदि तदा ते मूर्धा व्यपतिष्यत् विपतितं अभविष्यत्। तथोक्तस्य मया निषिद्धस्सन् कर्मणो यदुपरममकार्षीः अतः साधु कृतं त्वयेत्यभिप्रायः। अथ उद्गाताप्यपृच्छत्—कतमा उद्गीथभक्तिमन्वायत्ता देवता? इति पृष्ट आदित्य इति होवाच। सर्वाणि ह वा इमानि भूतानि आदित्यमुच्चैः सन्तं गायन्ति स्तुवन्ति उच्छब्दसामान्यात्। अथ हैनं प्रतिहर्ता उपससाद। कतमा सा प्रतिहारभक्तिमन्वायत्ता? इति पृष्टोऽन्नमिति होवाच। सर्वाणि ह वा इमानि भूतानि अन्नमेवात्मानं प्रतिहरमाणानि जीवन्ति। प्रतिशब्दसामान्यात्। सैषा देवता प्रतिहारभक्तिमन्वायत्तेति। समानमन्यत्। तथोक्तस्य मयेति प्रस्तावोद्गीथप्रतिहारभक्तीः प्राणादित्यान्नदृष्ट्योपासीतेति प्राणाद्यापत्तिः कर्मसमृद्धिर्वा तत्फलमिति समुदायार्थः। तत्त-

त्कर्मदेवताज्ञानतः कृतं कर्म निष्फलमिति चेन्न; केवलकर्मिणो दक्षिणमार्गतः चन्द्रलोकाप्तिफलसत्त्वात्। देवताज्ञानपूर्वककर्मानुष्ठानत उत्तरेण पथा ब्रह्मलोकं गत्वापुनरावृत्तिरिति शेषः ॥ ११ ॥

अन्नसमृद्ध्यर्थमुपासनम्

अथातः शौव उद्गीथः तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्व्राज। तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायतु अशनायाम वा इति। तान् होवाच इहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयांचकार। ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः सꣳरब्धाः सर्पन्तीत्येवमाससृपुस्ते ह समुपविश्य हिंचक्रुः। ओ३मदा३मों३पिबा३मों३देवो वरुणः प्रजापतिः सविता२न्नमिहा२हरदन्नपते२ऽन्नमिहाहरा२हरो३मिति ॥ १२ ॥

अतीते खण्डेऽन्नालाभत उच्छिष्टभक्षणादिकष्टावस्थोक्ता। इदानीं तन्मा भूदित्यन्नसमृद्ध्य इदमारभ्यते—अथेति। अथोषस्तिविजयानन्तरं श्वभिर्दृष्ट उद्गीथः शौव इह प्रस्तूयते। तत्तत्र ह किल नामतो बको दल्भस्यापत्यं दाल्भ्यः ग्लावो नामतः। मित्राया अपत्यं मैत्रेयः। वाशब्दश्चार्थः। असौ द्व्यामुष्यायण इत्यर्थः। "द्विनामा तु द्विगोत्रजः" इति स्मृतेः। स्वाध्यायं कर्तुं ग्रामाद्बहिरुद्व्राज विविक्तदेशं जगामेत्यर्थः। प्रतिपालयाञ्चकारेत्येकवचनलिंगात् तद्ध बक इत्यादिविशेषणविशिष्ट एकोऽसावृषिरित्यवगम्यते। ऋषेरन्नकामनया चोद्गीथकालप्रतिपालनात तत्स्वाध्यायतोषितेयं देवता तस्मा ऋषये तदनुग्रहार्थं श्वरूपं गृहीत्वा श्वा श्वेतः प्रादुर्बभूव। तमन्ये क्षुल्लकाः श्वान उपसमेत्योचुः—अन्नं नोऽस्मभ्यं भगवानागायतु एवमागानतो निष्पादयत्वित्यर्थः। वागादयो

मुख्यप्राणेन सह स्वाध्यायतोषिताः सन्तः श्वरूपं धृत्वैनमनुगृह्णन्तीति भावः। बुभुक्षिताः वयमशनायामः अशितुमिच्छाम इत्येवमुक्तः श्वा श्वेतस्तान् क्षुल्लकान् शुन उवाच। किमिति? इहैवास्मिन् देशे मा मां प्रातः प्रातःकाले उपसमीयातेति। दैर्घ्यं छान्दसम्। प्रातरिति शब्दतः प्रातःकाल एव आदित्याभिमुख्येन कर्तव्यता द्योत्यते। अपराह्ण आदित्यानभिमुख्यात्। तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेय ऋषिः प्रतिपालयाञ्चकार तत्कालप्रतीक्षणं कृतवानित्यर्थः। ते श्वानस्तत्रैव ऋषेः समक्षमागम्य यथैवेह कर्मणि बहिष्पवमानेन स्तोत्रेणोद्गातृपुरुषाः स्तोष्यमाणा अन्योन्यं संरब्धाः सर्पन्तीत्येवमेवेह श्वानो मुखं मुखेनाबध्यासस्रृपुः परिभ्रमणं कृतवन्त इत्यर्थः। त एवं संसृप्य समुपविश्योपविष्टास्सन्तः हिंचक्रुः हिंकारं कृतवन्त इत्यर्थः। ओमदाम ओं पिवाम ओं द्योतनाद्देवो जगतोऽभिवर्षणाद्वरुणः प्रजानां पालनात् प्रजापतिः सर्वस्य प्रसवितृत्वात् सविता। एतैः पर्यायैः एवंभूतस्स आदित्योऽन्नमस्मभ्यमिहाहरत् आहरत्विति। त एवं हिंकृत्वा पुनरप्यूचुः—हेऽन्नपते सवितः! अन्नमस्मभ्यमिहाहर। आहरेत्यभ्यास आदरार्थः ॥ १२ ॥

स्तोभाक्षरोपासनम्

अयं वाव लोको हाउकारो वायुर्हाइकारश्चन्द्रमा अथकार आत्मा इहकारोऽग्निरीकारः। आदित्य ऊकारो निहव एकारो विश्वेदेवा औहोइकारः प्रजापतिर्हिंकारः प्राणः स्वरोऽन्नं या वाग्विराट्। अनिरुक्तस्त्रयोदशः स्तोभः संचरो हुंकारः। दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवꣳ साम्नामुपनिषदं वेद उपनिषदं वेद इति ॥ १३ ॥

भक्तिविषयोपासनस्य सामावयवसंबद्धत्वात् सामावयवीभूतस्तोभाक्षरविषयोपासनानि वक्तुमिदमारभ्यते---अयमिति। "इयं वै रथन्तरम्" इति श्रुत्या रथन्तरे साम्नि यः प्रसिद्धः अयं वाव अयमेव लोको हाउकारः स्तोभः

उकारः स्तोभोऽयं लोक इत्युपासीतेत्यर्थः। वामदेवसाम्नि यः प्रसिद्धः स वायुर्हाइकारः। वामदेवसाम्नो वायुसंबन्धाद्वा। इकरं वायुदृष्ट्योपासीत। चन्द्रमा अथकारः चन्द्रदृष्ट्या अथकारमुपासीत। अन्नात्मा हि चन्द्रः। अन्ने हीदं स्थितं थकाराकारसामान्यात्। आत्मेहेति स्तोभः प्रत्यक्षत्वेनोपदिश्यते। इहेति च स्तोभे तत्सामान्यात्। यतो निधनानि चाग्नेयानि सामानीत्यग्नि-रीकारः। आदित्य ऊकारः। उच्चैस्सन्तमादित्यं गायन्तीत्यूकारश्चायं स्तोभ आदित्यदैवत्ये साम्नि प्रसिद्धः। निहव एकार इत्यत्र निहव इत्याह्वान-मेकारः स्तोभः। एहीति चाह्वयन्तीति सामान्यात्। विश्वेदेवा औहोइकारः। एतत् स्तोभस्य वैश्वदेव्ये साम्नि दर्शनात्। प्रजापतिः हिंकारः आनिरुक्त्यात् हिंकारस्य चाव्यक्तत्वात्। प्राणः स्वरः प्राणस्य स्वर इति स्तोभहेतुत्व-सामान्यात्। या इति स्तोभोऽन्नं अन्ने हीदं यातीत्यतस्तत्सामान्यात्। वागिति विराट् स्तोभो विराडन्नं देवताविशेषो वा। वैराजे साम्नि अयं स्तोभः प्रसिद्धः। अव्यक्तत्वादनिरुक्तः। इदं वा इदं वेति निर्वक्तुमशक्यत्वाद्विकल्प्यमानस्वरूपः संचरः। त्रयोदशो हुंकारः अव्यक्तो ह्ययमतोऽनिरुक्तविशेष एवोपास्यः। स्तोभा-क्षरोपासनफलमाह—दुग्ध इति। दुग्धेऽस्मै वाग्दोहमित्याद्युक्तार्थम। य एतामेवं साम्नां सामावयवस्तोभाक्षरविषयामुपनिषदं वेद तस्यैतत् यथोक्तं फलमित्यर्थः। द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः सामावयवोपासनापरिसमाप्त्यर्थो वा इति ॥१३॥

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

समस्तसामोपासनानि

समस्तस्य खलु साम्न उपासनꣳ साधु यत्खलु साधु तत्सामेत्याचक्षते यदसाधु तदसामेति। तदुताप्याहुः साम्नैनमुपा-

गादिति साधुनैनमुपागादित्येव तदाहुरसाम्नैनमुपागादिति असाधुनैन-
मुपागादित्येव तदाहुः । अथ उताप्याहुः साम नो बतेति यत्साधु
भवति साधु बतेत्येव तदाहुरसाम नो बतेति यदसाधु भवति असाधु
बतेत्येव तदाहुः । स य एतदेवं विद्वान् साधु सामेत्युपास्ते
अभ्याशो ह यदेनꣳ साधवो धर्मा आ च गच्छेयुः उप च
नमेयुः ॥ १ ॥

"ओमित्येतदक्षरं" इत्यादिना अनेकफलदं सामावयवविषयं स्तोभाक्षर-
विषयं चोपासनमुक्तम् । उक्तस्य सामैकदेशसंबन्धमात्रत्वात् समस्तोपासनाया
व्यस्तोपासनापूर्वकत्वाच्च अथेदानीं समस्तसामविषयाण्युपासनानि वक्तव्यानीति
श्रुतिरारभते—समस्तस्येत्यादिना । पाञ्चभक्तिकसाप्तभक्तिकत्वेन सर्वावयवविशिष्ट-
स्य समस्तस्य साम्न उपासनं खलु साधु समस्ते साम्नि साधुदृष्टिविधानात्
साधु सामेत्युपास्त इत्युपसंहाराच्च । व्यस्तोपासनापेक्षया समस्तोपासनायाः
साधुत्वं युज्यत इत्युक्तं हि । व्यस्तोपासनायामसाधुत्वविवक्षयेत्यर्थः । साधु-
शब्दः शोभनवाची । कथम् ? इत्यत आह—यदिति । लोके यत्खलु साधु
शोभनत्वेन प्रसिद्धं शिष्टास्तत्सामेत्याचक्षते । यद्विपरीततयासाधु तदसामेति ।
तत्तत्र साध्वसाधुकरणे सन्त एवमुताप्याहुरेनं राजानं सामन्तं वा साम्नोपागात्
उपगतवान् । लौकिकास्तु साधुना शोभनाभिप्रायेणैनमुपागादित्येवाहुः । यत्र
बन्धनाद्यसाधुकार्यं दृश्यते तत्रासाम्नैनमुपागादिति असाधुनैनमुपागादित्येव
तदाहुः । अथ उतापि चाहुर्नोऽस्माकं स्वसंवेद्यं साम बतेत्यनुकम्पया संपृक्त-
मित्याहुरित्याह—यदिति । यत् साधु भवति साधु बतेत्येव तदाहुरसाम नो
बतेति । विपर्यये जाते यदसाधु भवति असाधु बतेत्येव तदाहुः ।
तस्मात्सामसाधुशब्दयोरेकार्थत्वं सिद्धमित्यर्थः । स यः कश्चित्साधु साम
साधुगुणवत् सामेत्युपास्ते तस्यैतत्फलम् । अभ्याशो ह क्षिप्रमेव ह । यदिति
क्रियाविशेषणम् । एनमुपासकं श्रुतिस्मृत्यविरुद्धतया साधवः शोभना धर्मा

आ च गच्छेयुः। न केवलमागच्छेयुः भोग्यत्वेन उप च नमेयुश्च उपतिष्ठेयुरित्यर्थः ॥ १ ॥

साधुदृष्ट्योपासनीयकथनम्

लोकेषु पञ्चविधꣳ सामोपासीत पृथिवी हिंकारः अग्निः प्रस्तावः अन्तरिक्षमुद्गीथः आदित्यः प्रतिहारो द्यौर्निधनमित्यूर्ध्वेषु। अथावृत्तेषु द्यौर्हिंकार आदित्यः प्रस्तावः अन्तरिक्षमुद्गीथः अग्निः प्रतिहारः पृथिवी निधनम्। कल्पन्ते हास्मै लोका ऊर्ध्वाश्चावृत्ताश्च य एतदेवं विद्वान् लोकेषु पञ्चविधꣳ सामोपास्ते ॥ २ ॥

कानि साधुदृष्ट्योपासनीयानि? इत्यत आह--लोकेष्विति। लोकेषु पृथिव्यादिषु पञ्चभक्तिभेदेन पञ्चविधं साधु समस्तं सामोपासीत। लोकेष्वित्यत्र या सप्तमी तां प्रथमात्वेन विपरिणम्य, पृथिवी हिङ्कारः प्राथम्यसामान्यात। अग्निः प्रस्तावः। अग्नौ हि कर्माणि प्रस्तूयन्ते। अन्तरिक्षमुद्गीथः। अन्तरिक्षे हि गानम्। उद्गीथस्य गकारविशिष्टत्वात्। आदित्यः प्रतिहारः। आदित्यस्य मां प्रति मां प्रतीति सर्वप्राण्यभिमुखत्वात्। द्यौः निधनम्। निधीयन्तेऽस्मिन् सर्वे इति निधनम्। दिवः पृथिव्याद्याधारत्वात्। इत्यूर्ध्वगतेषु लोकेषु लोकदृष्ट्या सामोपासनं विहितम्। अथावृत्तेन द्युमुखलोकेषु पञ्चविधमुच्यते। लोकानां गत्यागतिविशिष्टत्वात्। यत एवमत आवृत्तेषु द्यौः हिङ्कारः प्राथम्यात्। आदित्यः प्रस्तावः आदित्योदयस्य सर्वप्राणिकर्मप्रस्तावहेतुत्वात। अन्तरिक्षमुद्गीथः। अन्तरिक्षे हि गानमभिव्यज्यत इत्याद्युक्तार्थम्। अग्निः प्रतिहारः अग्नेः प्राणिभिः प्रतिहरणात्। पृथिवी निधनं भूतग्रामाश्रयत्वात्। एवमुपासनाफलमाह—कल्पन्त इति। अस्मा उपासकाय गत्यागतिविशिष्टो-र्ध्वाश्चावृत्ताश्च लोकाः भोग्यत्वेन कल्पन्ते समर्थीभवन्तीत्यर्थः। य एतदेवं

विद्वान् लोकेषु पञ्चविधं सप्तविधं साधु सामेत्युपास्त इति सर्वत्र योजनीयम् ॥ २ ॥

वृष्टौ पञ्चविधसामोपासनम्

वृष्टौ पञ्चविधꣳ सामोपासीत पुरोवातो हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहारः उद्गृह्णाति तन्निधनम् । वर्षति हास्मै वर्षति ह य एतदेवं विद्वान् वृष्टौ पञ्चविधꣳ सामोपास्ते ॥ ३ ॥

तत्रादौ वृष्टौ पञ्चविधं सामोपासीत इति । वृष्टौ पञ्चविधं सामोपासीत सर्वप्राणिस्थितेः वृष्टिनिमित्तत्वात् । पुरोवातो हिङ्कारः । यथा साम हिङ्कारादिनिधनान्तं तथा पुरोवाताद्युद्ग्रहणान्ता वृष्टिरित्यर्थः । अतः पुरोवातो हिङ्कारः प्राथम्यात् । मेघो जायते स प्रस्तावः प्रावृषि मेघजनेर्वृष्टिहेतुत्वात् । वर्षति स उद्गीथः श्रैष्ठ्यात् । विद्योतते स्तनयति स प्रतिहारः प्रतिहृतत्वात् । उद्गृह्णाति तन्निधनं समाप्तिसामान्यात् । विद्याफलं वर्षति हास्मा इच्छातः । असत्यामपि वृष्टौ वर्षति ह । य एतदित्यादि पूर्ववत् ॥ ३ ॥

अप्सु पञ्चविधसामोपासनम्

सर्वास्वप्सु पञ्चविधꣳ सामोपासीत मेघो यत्संप्लवते स हिंकारो यद्वर्षति स प्रस्तावो याः प्राच्यः स्यन्दन्ते स उद्गीथो याः प्रतीच्यः स प्रतिहारः समुद्रो निधनम् । न हाप्सु प्रैति अप्सुमान् भवति य एतदेवं विद्वान् सर्वास्वप्सु पञ्चविधꣳ सामोपास्ते ॥ ४ ॥

अप्सु पाञ्चभक्तिकमाह—सर्वास्विति । सर्वास्वप्सु पञ्चविधं सामो पासीत सर्वासामपां वृष्टिपूर्वकत्वात् । मेघो यत्संप्लवते इतरेतरमेकीभावेन

घनीभवति स हिङ्कारः। यद्वर्षति स प्रस्तावः अपां सर्वतो व्याप्तेः। याः प्राच्यः स्यन्दन्ते स उद्गीथः श्रैष्ठ्यात्। याः प्रतीच्यः स प्रतिहारः प्रतिशब्दसाम्यात्। अपां समुद्रो निधनम्। न हाप्सु प्रैति अप्सुमान् भवतीति फलम्॥ ४॥

ऋतुषु पञ्चविधसामोपासनम्

ऋतुषु पञ्चविधꣳ सामोपासीत वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनम्। कल्पन्ते हास्मा ऋतव ऋतुमान् भवति य एतदेवं विद्वान् ऋतुषु पञ्चविधꣳ सामोपास्ते॥ ५॥

तथा ऋतुषु पञ्चविधं—इति। ऋतुषु पञ्चविधं सामोपासीत। ऋतूनां व्यवस्थितत्वात्। वसन्तो हिङ्कारः प्राथम्यात्। ग्रीष्मः प्रस्तावः। प्रावृडर्थं यवादिसङ्ग्रहः प्रस्तूयते। प्राधान्यात् वर्षा उद्गीथः। शरत प्रतिहारः रोगिणां प्रतिहरणात्। हेमन्तो निधनं निवाते निधनात्प्राणिनाम्। अस्मा उपासकाय ऋतव ऋतुव्यवस्थितफलं भोग्यत्वेन कल्पन्ते। ऋतुमान् आर्तवभोगैः संपन्नो भवतीत्यर्थः॥ ५॥

पशुषु पञ्चविधसामोपासनम्

पशुषु पञ्चविधꣳ सामोपासीत अजा हिंकारः अवयः प्रस्तावो गाव उद्गीथः अश्वाः प्रतिहारः पुरुषो निधनम्। भवन्ति हास्य पशवः पशुमान् भवति य एतदेवं विद्वान् पशुषु पञ्चविधꣳ सामोपास्ते॥ ६॥

पशुषु पञ्चविधं—इति। पशुषु पञ्चविधं सामोपासीत। अजा हिङ्कारः अजस्य हिङ्कारवत् पशूनां प्राथम्यात् "अजः पशूनाम्" इति श्रुतेः।

साहचर्याद्वयः प्रस्तावः । श्रैष्ठ्यात् गाव उद्गीथः । प्रतिहरणात् अश्वाः प्रतिहारः । पुरुषो निधनं पशूनां पुरुषाश्रयत्वात् । भवन्ति हास्य पशवः पशुमान् भवतीति फलम् । शिष्टमुक्तार्थम् ॥ ६ ॥

प्राणेषु पञ्चविधसामोपासनम्

प्राणेषु पञ्चविधं परोवरीयः सामोपासीत प्राणो हिंकारो वाक् प्रस्तावश्चक्षुरुद्गीथः श्रोत्रं प्रतिहारो मनो निधनं परोवरीयाꣳसि वैतानि । परोवरीयो हास्य भवति परोवरीयसो ह लोकान् जयति य एतदेवं विद्वान् प्राणेषु पञ्चविधं परोवरीयः सामोपास्त इति तु पञ्चविधस्य ॥ ७ ॥

प्राणेषु पञ्चविधं—इति । प्राणेषु पञ्चविधं परोवरीयः प्राणदृष्टिविशिष्टं सामोपासीत । घ्राणाख्यप्राणो हिंकारः उत्तरोत्तरवरीयसां प्राथम्यात् । वाक् प्रस्तावः वाचा हि सर्वं प्रस्तूयते । अतो घ्राणादपि वाग्वरीयसी । चक्षुरुद्गीथः वाचो ह बहुतरविषयप्रकाशनात् । श्रोत्रं प्रतिहारः प्रतिहृतत्वात् । चक्षुरपेक्षया श्रोत्रं वरीयः सर्वप्रागिरुतश्रवणात् । मनो निधनं सर्वेन्द्रियतद्विषयाणां मनस्येव निधानात् । मनसो वागादीनां वरीयस्त्वं युज्यते, मनसो व्यापकत्वेनातीन्द्रियविषयगोचरत्वात् । एवमुत्तरोत्तरहेतुभ्यः प्राणादीनि परोवरीयांसि । एतद्दृष्टिविशिष्टं परोवरीयस्सामोपास्ते । परोवरीयो हास्य जीवनं भवतीत्युक्तार्थमेतत् । इति तु पञ्चविधस्य साम्न उपासनमुक्तम् ॥ ७ ॥

सप्तविधसमस्तसामोपासनस्य साधुत्वम्

अथ सप्तविधस्य वाचि सप्तविधꣳ सामोपासीत यत्किञ्च वाचो हुमिति स हिंकारो यत् प्रेति स प्रस्तावो यदेति स आदिः ।

यत् उदिति स उद्गीथो यत्प्रतीति स प्रतिहारो यदुपेति स उपद्रवो यन्नीति तन्निधनम् । दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतदेवं विद्वान् वाचि सप्तविध॰ सामोपास्ते ॥ ८ ॥

सप्तविधस्य समस्तस्य साम्न उपासनं साध्वितीदमारभ्यते—अथेति । वाचीति सप्तम्याः पूर्ववत्प्रथमार्थः । वाग्दृष्टिविशिष्टं सप्तविधं सामोपासीत । यत्किञ्च वाचो हुमिति विशेषः स हिङ्कारः हिङ्कारसामान्यात् । यत्प्रेति शब्दरूपं स प्रस्तावः प्रशब्दसामान्यात् । यदेति आ इति एति स आदि-राकारसामान्यात् । यद्वा—आदिरोङ्कारः तस्य सर्वादित्वात् । यदुदिति स उद्गीथः उद्गीथस्य उत्पूर्वत्वात् । यत्प्रतीति स प्रतिहारः प्रतिशब्द-सामान्यात् । यदुपेति स उपद्रवः उपद्रवस्योपोपक्रमत्वात् । यन्नीति तन्निधनं निशब्दसामान्यात् । दुग्धेऽस्मा इत्याद्युक्तार्थम् ॥ ८ ॥

समस्तसाम्नि आदित्यस्य सप्तधा उपास्यत्वम्

अथ खल्वमुमादित्य॰ सप्तविध॰ सामोपासीत सर्वदा समस्तेन साम मां प्रति मां प्रतीति सर्वेण समस्तेन साम । तस्मि-न्निमानि सर्वाणि भूतान्यन्वायत्तानीति विद्यात् तस्य यत्पुरोदयात् स हिंकारस्तदस्य पशवोऽन्वायत्तास्तस्मात्ते हिंकुर्वन्ति हिंकारभाजिनो ह्येतस्य साम्नः । अथ यत्प्रथमोदिते स प्रस्तावस्तदस्य मनुष्या अन्वायत्तास्तस्मात्ते प्रस्तुतिकामाः प्रश॰साकामाः प्रस्तावभाजिनो ह्येतस्य साम्नः । अथ यत्संगववेलाया॰ स आदिस्तदस्य वया॰स्य-न्वायत्तानि तस्मात्तान्यन्तरिक्षेऽनारम्भणान्यादायात्मानं परिपतन्ति आदिभाजीनि ह्येतस्य साम्नः । अथ यत् संप्रति मध्यन्दिने स

उद्गीथः तदस्य देवा अन्वायत्तास्तस्मात्ते सत्तमाः प्राजापत्याना-मुद्गीथभाजिनो ह्येतस्य साम्नः । अथ यदूर्ध्वं मध्यंदिनात् प्रागपराह्णात् स प्रतिहारस्तदस्य गर्भा अन्वायत्तास्तस्मात्ते प्रतिहृता नावपद्यन्ते प्रतिहारभाजिनो ह्येतस्य साम्नः । अथ यदूर्ध्वमपराह्णात् प्रागस्तमयात् स उपद्रवस्तदस्यारण्या अन्वायत्तास्तस्मात्ते पुरुषं दृष्ट्वा कक्षꣳ श्वभ्रमित्युपद्रवन्ति उपद्रवभाजिनो ह्येतस्य साम्नः । अथ यत्प्रथमास्तमिते तन्निधनं तदस्य पितरोऽन्वायत्तास्तस्मात्तान्निदधति निधनभाजिनो ह्येतस्य साम्न एवं खल्वमुमादित्यꣳ सप्तविधꣳ सामोपास्ते ॥ ९ ॥

प्रथमाध्याये पञ्चावयवसाम्नि आदित्यदृष्टिरुक्ता । इदानीं समस्तसाम्नि आदित्यः सप्तधा उपास्यत इत्याह—अथेति । अथ खल्वमुमादित्यं समस्ते साम्नि अवयवशो विभज्य सप्तविधं सामोपासीत । आदित्यस्य कथं सामत्वं ? इत्यत आह—सर्वदेति । आदित्यस्य उद्गीथसामहेतुत्वेन वृद्धिक्षयवैरल्यात् सर्वदा समः । तेन हेतुनादित्यः साम । यतो मां प्रति मां प्रतीति समानबुद्धिविषयो भवति अतः सर्वेण समः । अतः सामादित्यः । तस्मिन्नादित्ये अवयवविभागशः इमानि सर्वाणि भूतानि अन्वायत्तानि उपजीव्यत्वेनादित्यमनुगतानीति विद्यात् । तत्कथं ? तस्यादित्यस्योदयात् पुरा यत् धर्मरूपं स हिङ्कारो भक्तिः । तत्रेदं हि सामान्यम् । यदस्य हिङ्कारभक्तिरूपं तदस्य गवादयः पशवोऽन्वा यत्ताः तद्भक्तिरूपं उपजीवन्तीत्यर्थः । यस्मादेवं तस्मात्ते पशवो हिङ्कुर्वन्ति । उदयात्प्रागेव पशूनामादित्यसामभक्तिरूपहिङ्कारभजनशीलत्वात् । तस्माद्ध्येतस्य साम्नो हिङ्कारभाजिनः पशव इत्यर्थः । अथ प्रथमोदिते यत्सवितृरूपं स प्रस्तावः । तदस्य मनुष्या अन्वायत्ताः पूर्ववत् । यस्मादेतस्यादित्यस्य साम्नः प्रस्तावभाजिनो मनुष्या भवन्ति तस्मात्ते प्रस्तुतिं प्रशंसां कामयन्त इति

प्रस्तुतिकामाः प्रशंसाकामाश्च भवन्तीत्यर्थः । अथ यद्गवां रश्मीनां सहगमनं सङ्गवो यस्यां वेलायां, सा हि गवां वत्सैः संगववेला । तस्मिन् काले यत्सवितृरूपं स आदिर्भक्तिविशेष ओङ्कारः । तदस्य वयांसि पक्षिणोऽन्वायत्तानि । यस्मादेवं तस्मात्तानि वयांसि अन्तरिक्षेऽनारम्भणानि अनालम्बनानि आत्मानमेवालम्बनत्वेन गृहीत्वा परिपतन्ति । अत आकारसाम्यादादिभक्तिभाजितसाम्न इत्यर्थः । अथ यत्संप्रति मध्यंदिने यद्रूपं स उद्गीथभक्तिः । तदस्य द्योतनात् देवा अन्वायत्ताः । तस्मात्ते प्रजापत्यपत्यानां सत्तमाः श्रेष्ठतमाः एतस्य साम्न उद्गीथभाजिनो भवन्तीत्यर्थः । अथ यदूर्ध्वं मध्यन्दिनात् प्रागपराह्णात् सवितुर्यद्रूपं स प्रतिहारः । तदस्य गर्भा अन्वायत्तास्तस्मात्ते सवितुः प्रतिहारभक्तिरूपेणोर्ध्वं प्रतिहृताः सन्तो नावपद्यन्ते पतनद्वारे सत्यपि नाधः पतन्तीत्यर्थः । अत एतस्य साम्नः प्रतिहारभाजिनो गर्भा भवन्ति । अथ यदूर्ध्वमपराह्णात् प्रागस्तमयात् स उपद्रवः । तदस्यारण्याः पशवोऽन्वायत्ताः । तस्मात्ते पुरुषं दृष्ट्वा भीताः सन्तः कक्षमरण्यं श्वभ्रं भयशून्यं मत्वोपद्रवन्ति । यस्मात्पुरुषं दृष्ट्वा उपद्रवणात् एतस्य साम्न उपद्रवभाजिनो भवन्ति । अथ यत्प्रथमास्तमिते सवितर्यदर्शनं जिगमिषति तन्निधनम् । तदस्य पितरोऽन्वायत्ताः । तस्मात्तान्निदधति वर्गद्वयपित्रादीन् दर्भेषु निक्षिपन्ति पिण्डस्थापनस्य तदर्थत्वात् । निधनसंबन्धाच्च एतस्य साम्नः पितरो निधनभाजिनो भवन्ति । एवमवयवशः सप्तधा विभक्तं खल्वमुमादित्यं सप्तविधं सामोपास्ते । तस्य तदापत्तिः फलमिति वाक्यशेषः ॥ ९ ॥

आदित्यात्मकमृत्युतरणाय सामोपासनम्

अथ खल्वात्मसंमितमतिमृत्यु सप्तविधꣳसामोपासीत हिंकार इति त्र्यक्षरं प्रस्ताव इति त्र्यक्षरं तत्समम् । आदिरिति द्व्यक्षरं प्रतिहार इति चतुरक्षरं तत इहैकं तत्समम् । उद्गीथ इति त्र्यक्षर-

मुपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवति अक्षरमतिशिष्यते त्र्यक्षरं तत्समम् । निधनमिति त्र्यक्षरं तत्सममेव भवति तानि ह वा एतानि द्वाविꣳशतिरक्षराणि । एकविꣳशत्यादित्यमाप्नोत्येकविꣳशो वा इतोऽसावादित्यो द्वाविꣳशेन परमादित्याज्जयति तन्नाकं तद्विशोकम् । आप्नोति हादित्यस्य जयं परो हास्यादित्यजयात् जयो भवति य एतदेवं विद्वानात्मसंमितमतिमृत्यु सप्तविधꣳ सामोपास्ते सामोपास्ते ॥ १० ॥

आदित्यात्मकोऽयं मृत्युरहोरात्रादिकालरूपेण प्राणिजातं प्रमापयति । तत्तरणाय इदं सामोपासनमुपदिश्यते—अथेति । अथादित्यविषयसामोपासनानन्तरं स्वावयवसमतया परमात्मना मितमात्मसंमितं मृत्योरत्ययहेतुत्वादतिमृत्यु सप्तविधं सामोपासीत । यथा प्रथमाध्याये उद्गीथ इत्युद्गीथाक्षराणि उपास्यत्वेनोक्तानि तथैवेह साम्नः सप्तविधभक्तिनामाक्षराणि समाहृत्य त्रिभिस्त्रिभिः समतया सामत्वं परिकल्प्य तदुपासनेन मृत्युगोचराक्षरसंख्यासामान्यात् मृत्युमादित्यं प्राप्य तदतिरिक्ताक्षरेणादित्यस्य मृत्योरतिक्रमणं स्यादित्यतिमृत्यु साम । तस्य प्रथमभक्तिनामाक्षराणि हिङ्कार इति, त्र्यक्षरं भक्तिनाम । प्रस्ताव इति भक्तिनामापि त्र्यक्षरमेव । पूर्वेण तत्समम् । आदिरिति द्व्यक्षरम् । सप्तविधसामसंख्यापूरणे ओङ्कार आदिरित्युच्यते । तेन वैषम्यं प्राप्तम् । तत्साम्यायाह—प्रतिहार इति चतुरक्षरम् । तत आद्यक्षरयोरेकाक्षरं विच्छिद्य प्रतिक्षिप्यते । तेन तत्सममेव भवति । उद्गीथ इति त्र्यक्षरं उपद्रव इति चतुरक्षरं त्रिभिस्त्रिभिः समं भवति । अक्षरमतिशिष्यतेऽतिरिच्यते । तेन प्राप्तवैषम्यसाम्यकरणाय तदेकमपि सदक्षरमिति त्र्यक्षरमेव भवति । अतस्तत्समम् । निधनमिति त्र्यक्षरं तत्सममेव भवति । एवं त्र्यक्षरसमतया सामत्वं संपाद्य यथाप्राप्तान्यक्षराण्येव संख्यायन्ते । तानि ह वा एतानि सप्तभक्तिनामाक्षराणि द्वाविंशतिः । तत्रैकविंशत्यक्षरसंख्यया आदित्यं मृत्यु-

माप्नोति । "द्वादश मासाः पञ्चर्तवः त्रय इमे लोका असावादित्य एकविंशः" इति श्रुतेः । **एकविंशो वा इतोऽसावादित्यः** शिष्टद्वाविंशाक्षरेण मृत्योरादित्यात्परं **जयत्याप्नोति** । आदित्यात् परं किं ? इत्यत आह—**तन्नाकमिति** । कं न भवतीत्यकम् । तन्न भवतीति **नाकम्** । कं सुखमेवेत्यर्थः । दुःखस्य मृत्युविषयत्वात् तद्विपरीतसुखस्य मानसदुःखवैरल्यात् । **विशोकं तदाप्नोति** । तत्कथं ? इत्यत्रैकविंशतितमसंख्ययादित्यस्य जयमनु **परो** ह्यस्यादित्यस्य जयात् द्वाविंशत्यक्षरसंख्यया परो **जयो भवति** । **य एतदेवं विद्वानि**त्युक्तार्थं फलम् । द्विरावृत्तिः साप्तभक्तिकसामपरिसमाप्त्यर्था ॥ १० ॥

गायत्रादिफलकसामोपासनान्तराणि

मनो हिंकारो वाक् प्रस्तावः चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनमेतद्गायत्रं प्राणेषु प्रोतम् । स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद प्राणी भवति सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या महामनाः स्यात् तद्व्रतम् ॥ ११ ॥

अभिमन्थति स हिंकारो धूमो जायते स प्रस्तावो ज्वलति स उद्गीथः अङ्गारा भवन्ति स प्रतिहार उपशाम्यति तन्निधनꣳ सꣳशाम्यति तन्निधनमेतद्रथन्तरमग्नौ प्रोतम् । स य एवमेतद्रथन्तरमग्नौ प्रोतं वेद ब्रह्मवर्चस्वी अन्नादो भवति सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या न प्रत्यक् अग्निमाचामेत् न निष्ठीवेत् तद्व्रतम् ॥ १२ ॥

उपमन्त्रयते स हिंकारो ज्ञपयते स प्रस्तावः स्त्रिया सह शेते स उद्गीथः प्रतिस्त्रि सह शेते स प्रतिहारः कालं गच्छति तन्निधनं पारं गच्छति तन्निधनमेतद्वामदेव्यं मिथुने प्रोतम् । स य

एवमेतद्वामदेव्यं मिथुने प्रोतं वेद मिथुनीभवति मिथुनात् मिथुनात् प्रजायते सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या न कांचन परिहरेत् तद्व्रतम् ॥ १३ ॥

उद्यन् हिंकार उदितः प्रस्तावो मध्यन्दिन उद्गीथः अपराह्णः प्रतिहारः अस्तं यन्निधनमेतत् बृहत् आदित्ये प्रोतम् । स य एवमेतत् बृहत् आदित्ये प्रोतं वेद तेजस्वी अन्नादो भवति सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या तपन्तं न निन्देत् तद्व्रतम् ॥ १४ ॥

अभ्राणि संप्लवन्ते स हिंकारो मेघो जायते स प्रस्तावो वर्षति स उद्गीथो विद्योतते स्तनयति स प्रतिहार उद्गृह्णाति तन्निधनमेतद्वैरूपं पर्जन्ये प्रोतम् । स य एवमेतद्वैरूपं पर्जन्ये प्रोतं वेद विरूपाꣳश्च सुरूपाꣳश्च पशूनवरुन्धे सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या वर्षन्तं न निन्देत् तद्व्रतम् ॥ १५ ॥

वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा उद्गीथः शरत् प्रतिहारो हेमन्तो निधनमेतद्वैराजमृतुषु प्रोतम् । स य एवमेतद्वैराजमृतुषु प्रोतं वेद विराजति प्रजया पशुभिर्ब्रह्मवर्चसेन सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या ऋतुं न निन्देत् तद्व्रतम् ॥ १६ ॥

पृथिवी हिंकारः अन्तरिक्षं प्रस्तावो द्यौरुद्गीथो दिशः प्रतिहारः समुद्रो निधनमेताः शक्वर्यो लोकेषु प्रोताः । स य एवमेताः

शक्वर्यो लोकेषु प्रोता वेद लोकी भवति सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या लोकान् न निन्देत् तद्व्रतम् ॥ १७ ॥

अजा हिंकारः अवयः प्रस्तावो गाव उद्गीथः अश्वाः प्रतिहारः पुरुषो निधनमेता रेवत्यः पशुषु प्रोताः । स य एवमेता रेवत्यः पशुषु प्रोता वेद पशुमान् भवति सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या पशून् न निन्देत् तद्व्रतम् ॥१८॥

लोम हिंकारः त्वक् प्रस्तावो माꣳसमुद्गीथः अस्थि प्रतिहारो मज्जा निधनमेतत् यज्ञायज्ञीयमङ्गेषु प्रोतम् । स य एवमेतत् यज्ञायज्ञीयमङ्गेषु प्रोतं वेद अङ्गी भवति नाङ्गेन विहूर्छति सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या संवत्सरं मज्ज्ञो नाश्नीयात् तद्व्रतं मज्ज्ञो नाश्नीयादिति वा ॥ १९ ॥

अग्निर्हिंकारो वायुः प्रस्ताव आदित्य उद्गीथो नक्षत्राणि प्रतिहारश्चन्द्रमा निधनमेतद्राजनं देवतासु प्रोतम् । स य एवमेतद्राजनं देवतासु प्रोतं वेद एतासामेव देवतानाꣳ सलोकताꣳ सार्ष्टिताꣳ सायुज्यं गच्छति सर्वमायुरेति ज्योक् जीवति महान् प्रजया पशुभिर्भवति महान् कीर्त्या ब्राह्मणान् न निन्देत् तद्व्रतम् ॥२०॥

त्रयी विद्या हिंकारः त्रय इमे लोकाः स प्रस्तावः अग्निर्वायुरादित्यः स उद्गीथो नक्षत्राणि वयाꣳसि मरीचयः स प्रतिहारः सर्पा गन्धर्वाः पितरस्तन्निधनमेतत्साम सर्वस्मिन् प्रोतम् । स य एवमेतत्साम सर्वस्मिन् प्रोतं वेद सर्वꣳ ह भवति । तदेष श्लोकः—

यानि पञ्चधा त्रीणि त्रीणि तेभ्यो न ज्यायः परमन्यदस्ति ।
यस्तद्वेद स वेद सर्वँ सर्वा दिशो बलिमस्मै हरन्ति ॥

सर्वमस्मीत्युपासीत तद्व्रतं तद्व्रतम् ॥ २१ ॥

पञ्चसप्तविधभक्तिसाम्नोः नामग्रहणं विनोपासनमुक्तम् । अथेदानीं गायत्रादिनामग्रहणविशिष्टफलानि सामोपासनान्तराण्युच्यन्ते—**मनो हिङ्कार** इत्यादिना । सर्वकरणप्रवृत्तीनां मनसः प्राथम्यात् **मनो हिङ्कारः** । तदानन्तर्यतो **वाक् प्रस्तावः** वाचः प्रस्तवनहेतुत्वात् । **चक्षुरुद्गीथः** श्रैष्ठ्यात् । **श्रोत्रं प्रतिहारः** प्रतिहृतत्वात् । **प्राणो निधनं** स्वापकाले करणग्रामस्य प्राणे निधनात् । **एतद्गायत्रं** साम **प्राणेषु प्रोतं** गायत्र्याः प्राणत्वेन संस्तुतत्वात् । **स य एवमेतद्गायत्रं प्राणेषु प्रोतं वेद** सोऽयमविकलकरणः **प्राणी भवति** । **सर्वमायुरेति** शतसंवत्सरं जीवति । यावदायुषं **ज्योक्** ज्वलन् **जीवति** । **महान् प्रजया पशुभिः भवति** । **महान् कीर्त्या** । एवं गायत्रोपासकस्य **एतद्व्रतम्** । **महामनाः** अक्षुद्रमतिः **स्यादित्यर्थः** ॥ ११ ॥ **अभिमन्थति** इति । **अभिमन्थति स हिङ्कारः** प्राथम्यात् । **धूमो जायते स प्रस्तावः** आनन्तर्यात् । **ज्वलति स उद्गीथः** । हविराज्यसंबन्धादङ्गारा **भवन्ति स प्रतिहारः** अङ्गाराणां प्रतिहृतत्वात् । **अग्नेः** सावशेषता उपशमः । निश्शेषता संशमः । शमाप्तिसामान्यान्निधनम् । **एतद्रथन्तरमग्नौ प्रोतम्** । **स य** इत्यादि पूर्ववत् । स्वाध्यायनिमित्तं तेजो ब्रह्मवर्चसम् । तद्वान् । **अन्नादो** दीप्ताग्निः । **प्रत्यक्** अग्नेराभिमुख्येन **नाचामेत्** न भक्षयेत् **न निष्ठीवेत्** श्लेष्मनिरसनं न कुर्यात् **तद्व्रतम्** ॥ १२ ॥ **उपमन्त्रयते** इति । **उपमन्त्रयते** सङ्केतं करोतीति यत् **स हिङ्कारः** प्राथम्यात् । **ज्ञपयते** तोषयति **स प्रस्तावः** । **स्त्रिया सह** पर्यङ्के **शेते** इति यत् **स उद्गीथः** श्रैष्ठ्यात् । **प्रतिस्त्रि सह शेते** स्त्रियोऽभिमुखीकरणं **स प्रतिहारः** । **मैथुनेन कालं गच्छति** समाप्तितः **पारं गच्छतीति** यत् **तन्निधनम्** । **एतद्वामदेव्यं मिथुने प्रोतम्** । **स य** इत्यादि पूर्ववत् । **मिथुनी** अविधुरो भवति । **मिथुनात् मिथुनात्**

प्रजायते अमोघरेता भवति। स्वपर्यङ्कगतां स्त्रियं **न कांचन परिहरेत्**। समागमनार्थिन्याः स्त्रियो वामदेव्योपासनाङ्गत्वेन विधानात्। एतस्मादन्यत्र प्रतिषेधो युक्त एव ॥ १३ ॥ **उद्यन् हिङ्कारः** इति। **उद्यन्** सविता **हिङ्कारः** प्राथम्यात्। **उदितः प्रस्तावः** कर्मणां प्रस्तवनहेतुत्वात्। **मध्यंदिन उद्गीथः** श्रैष्ठ्यात्। **अपराह्णः प्रतिहारः** पश्वादिगृहप्रतिहरणात्। **अस्तं यन्निधनं** प्राणिनां रात्रौ गृहे निधानात्। बृहत आदित्यदेवत्वात् **एतद्बृहत् आदित्ये प्रोतम्**। **स य** इत्यादि पूर्ववत्। **तपन्तं न निन्देत् तद्व्रतम्** ॥ १४ ॥ **अभ्राणि संप्लवन्ते** इति। अब्भरणादभ्राणि मेघाः उदकवर्षणहेतुत्वात्। उक्तार्थमन्यत्। **एतद्वैरूपं** नाम साम **पर्जन्ये प्रोतम्**। पर्जन्यस्यानेकरूपत्वाद्वैरूप्यम्। **विरूपांश्चा**जाविकादिपशूनवरुन्धे प्राप्नोति। **वर्षन्तं न निन्देत् तद्व्रतम्** ॥ १५ ॥ **वसन्त** इति। **वसन्तो हिंकारः** प्राथम्यात्। **ग्रीष्मः** इत्यादि पूर्ववत्। **एतद्वैराजमृतुषु प्रोतं वेद** सोऽयं यथा ऋतव आर्तवैर्धर्मैः विराजन्ते तथा विद्वान् प्रजादिभिरित्युक्तार्थम्। **ऋतून्न निन्देत् तद्व्रतम्** ॥ १६ ॥ **पृथिवी हिंकारः** इति। **पृथिवी हिंकार** इत्यादि पूर्ववत्। **रेवत्य इव शक्वर्य** इति नित्यबहुवचनम्। **लोकेषु प्रोताः**। **लोकी भवति** लोकफलेन युज्यते। **लोकान्न निन्देत् तद्व्रतम्** ॥ १७ ॥ **अजा हिङ्कारोऽवयः** इति। **अजा हिङ्कार** इत्यादि पूर्ववत् ॥ १८ ॥ **लोम हिङ्कारः** इति। **लोम हिङ्कारः** लोम्नो देहावयवानां प्राथम्यात्। **त्वक् प्रस्ताव** आनन्तर्यात्। **मांसं उद्गीथः** श्रैष्ठ्यात्। **अस्थि प्रतिहार** प्रतिह्वतत्वात्। **मज्जा निधनम्**। **एतत् यज्ञायज्ञीयं** नाम साम **अङ्गेषु प्रोतं वेद अङ्गी** समग्राङ्गो **भवति**। **नाङ्गेन विहूर्च्छति** न हि पङ्ग्वादिर्भवति। **संवत्सरं मज्ज्ञो** संवत्सरमात्रं **मांसानि नाश्नीयात्**। बहुवचनं मत्स्याद्युपलक्षणार्थम्। सर्वदैव **नाश्नीयादिति** वा **तद्व्रतम्** ॥ १९ ॥ **अग्निः हिंकार** इति। **अग्निर्हिङ्कारः** प्रथमस्थानत्वात्। **वायुः प्रस्तावः** आनन्तर्यात्। **आदित्य उद्गीथः** श्रैष्ठ्यात्। **नक्षत्राणि प्रतिहारः** प्रतिह्वतत्वात्। **चन्द्रमा निधनं** कर्मिणां तन्निधनात्। **एतद्राजनं देवतासु प्रोतं वेद**। विद्याफलम्—**एतासामग्न्यादिदेवतानां सलोकतां सार्ष्टितां** समानर्धितां **सायुज्यं**

देहैकत्वम् । वाशब्दोऽत्र लुप्तो द्रष्टव्यः । सलोकतां वेत्यादिभावनाविशेषतः फलविशेषोपपत्तेः एतत्समुच्चयानुपपत्तेश्च । **ब्राह्मणान्न निन्देत् तद्व्रतम्** । "एते वै देवाः प्रत्यक्षं यद्ब्राह्मणाः" इति श्रुतेः । सर्वदेवानां ब्राह्मणदेहाश्रयत्वेन तन्निन्दा सर्वदेवतानिन्देत्यर्थः ॥ २० ॥ **त्रयी विद्या** इति । त्रयीविद्याया अग्न्यादिसाम्न आनन्तर्यात् **त्रयी विद्या हिङ्कारः** सर्वकर्तव्यानां प्राथम्यात् । **त्रय इमे लोकाः स प्रस्तावः** तत्कार्यत्वेनानन्तर्यात् । अग्न्यादीनामुद्गीथत्वं श्रैष्ठ्यात् । नक्षत्रादीनां प्रतिहृतत्वात्प्रतिहारत्वम् । सर्पादीनामन्तकारित्वसामान्यान्निधनत्वम् । **एतत्साम्नां** नामविशेषाभावात् सामसामान्यं **सर्वस्मिन् प्रोतम्** । हिंकारादिसामभक्तयस्त्रयीविद्यादृष्ट्या उपास्याः । अतीतेष्वपि सामोपासनेषु यत्साम यत्र **प्रोतं** तद्दृष्ट्या तदुपास्यम् । सर्वविषयसामविदः फलं—**सर्वं ह भवति** सर्वभावापत्त्या सर्वेश्वरो भवतीत्यर्थः । निरुपचरितसर्वभावापत्तौ दिग्भ्यो बलिप्राप्त्यनुपपत्तेः, इत्यत्रास्मिन्नर्थे **तदेष श्लोको** मन्त्रो भवतीत्याह—**यानीति** । **यानि पञ्चधा** हिंकारादिविभागतः प्रोक्तानि **त्रीणि** त्रयीविद्यादीनि तेभ्यः पञ्चधा त्रिकेभ्यो **ज्यायो** महत्तरं **परं** व्यतिरिक्त**मन्यन्नास्ति** तत्रैव हि सर्वस्यान्तर्भावात् । **यस्तद्**यथोक्तं सर्वात्मकं साम **वेद स वेद सर्वं** तस्य सर्वज्ञत्वात् । **अस्मा** एवंविदे सर्वदिक्स्था नानाविधबलिं **हरन्ति** प्रापयन्ति । अत एतत्**सर्वमस्मीति** **सामोपासीत** । **तस्यैतदेव व्रतम्** । द्विर्वचनं सामोपासनासमाप्त्यर्थम् ॥ २१ ॥

उद्गातुः गानविशेषसंपदुपदेशः

विनर्दि साम्नो वृणे पशव्यमित्यग्नेरुद्गीथः अनिरुक्तः प्रजापतेर्निरुक्तः सोमस्य मृदु श्लक्ष्णं वायोः श्लक्ष्णं बलवदिन्द्रस्य क्रौञ्चं बृहस्पतेरपध्वानं वरुणस्य तान् सर्वानेवोपासीत वारुणं त्वेव वर्जयेत् । अमृतत्वं देवेभ्य आगायानि इत्यागायेत् स्वधां पितृभ्य आशां मनुष्येभ्यस्तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमा-

त्मन आगायानि इत्येतानि मनसा ध्यायन् अप्रमत्तः स्तुवीत । सर्वे स्वरा इन्द्रस्यात्मानः सर्व ऊष्माणः प्रजापतेरात्मानः सर्वे स्पर्शा मृत्योरात्मानः तं यदि स्वरेषु उपालभेत इन्द्रꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति वक्ष्यतीत्येनं ब्रूयात् । अथ यद्येनमूष्मसु उपालभेत प्रजापतिꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति पेक्ष्यतीत्येनं ब्रूयात् अथ यद्येनꣳ स्पर्शेषु उपालभेत मृत्युꣳ शरणं प्रपन्नोऽभूवं स त्वा प्रति धक्ष्यतीत्येनं ब्रूयात् । सर्वे स्वरा घोषवन्तो बलवन्तो वक्तव्या इन्द्रे बलं ददानीति सर्वे ऊष्माणोऽग्रस्ता अनिरस्ता विवृता वक्तव्याः प्रजापतेरात्मानं परिददानीति सर्वे स्पर्शा लेशेनानभिनिहिता वक्तव्या मृत्योरात्मानं परिहराणीति ॥ २२ ॥

उद्गातुः सामोपासनाप्रसङ्गेन फलविशेषसंबन्धिगानविशेषसंपदुपदिश्यते— **विनर्दीति** । वृषभकूजितसमतया विशिष्टो नर्दः स्वरविशेषोऽस्यास्तीति विनर्दि गानम् । तच्च **साम्नः** संबन्धि । पशुहितत्वात्**पशव्यम्** । **अग्नेर**ग्निर्दैवत्यं **उद्गीथ** उद्गानम् । तद्विशिष्टमहं एवं वृणे प्रार्थय इति कश्चित् यजमान उद्गाता वा मन्यते । **अनिरुक्तः** अविशेषितः **प्रजापतेः** प्रजापतिदैवत्यसामगानविशेषः, आनिरुक्त्यात् प्रजापतेः । यो हि **निरुक्तः** स्पष्टः **सोमस्य** सोमदैवत्यः स उद्गीथ इत्यर्थः । **मृदु श्लक्ष्णं च** गानं **वायो**र्वायुदैवत्यम् । **श्लक्ष्णं** गानं बलवत् प्रयत्नाधिक्योपेतं यदिन्द्रस्यैन्द्रं तद्गानम् । क्रौञ्चपक्षिनादसमं **क्रौञ्चं बृहस्पतेः** बार्हस्पत्यम् । यदपध्वानं भिन्नकांस्यस्वरतुल्यं **वरुणस्य** तद्गानम् । **तान् सर्वानेवोपासीत** उपास्यत्वेन प्रयुञ्जीतेत्यर्थः । उपसेवेतेति यावत् । **वारुणं त्वेवैकं वर्जयेत्** । **अमृतत्वं देवेभ्यः आगायानि** साधयानीत्यागायेत् । **स्वधां पितृभ्यः आशां मनुष्येभ्यः तृणोदकं पशुभ्यः स्वर्गं लोकं यजमानायान्नमात्मने** मह्यमागायानीति सर्वत्रानुषज्यते । **एतानि मनसा ध्यायन्**

स्वरोष्मव्यञ्जनादिभ्योऽप्रमत्तः सन् स्तुवीत। सर्वेऽकारादयः स्वराः इन्द्रस्यात्मानः देहावयवस्थानीयत्वात्। शषसहादयः सर्व ऊष्माणः प्रजापतेः काश्यपस्यात्मानः। सर्वे स्पर्शाः कादयो व्यञ्जनानि मृत्योः आदित्यस्यात्मानः। तमेवंविदमुद्गातारं यदि कश्चित स्वरेषु उपालभेत त्वया दुष्टः स्वरः प्रयुक्त इत्युपालम्भनं कुर्यात् तदा प्राणिनामीश्वरमिन्द्रं शरणं प्रपन्नोऽभूवम्। इन्द्रभावमेत्य स्वरान् प्रयुञ्जानोऽहं स्वराणामिन्द्राश्रयत्वात्। सोऽयमिन्द्रः त्वा त्वां प्रति वक्ष्यतीत्येनं ब्रूयात्। अथ यद्येनमूष्मसु उपालभेत प्रजापतिं शरणं प्रपन्नोऽभूवम्। स त्वा प्रति पेक्ष्यति सम्यक् पेषणं करोतीत्येनं ब्रूयात्। अथ यद्येनं स्पर्शेषूपालभेत मृत्युं शरणं प्रपन्नोऽभूवम्। स त्वा प्रति धक्ष्यति भस्मीकरिष्यतीत्येनं ब्रूयात्। यतः स्वरादय इन्द्राद्यात्मानः अतः सर्वे स्वराः घोषवन्तो बलवन्तो वक्तव्याः। तथाहमिन्द्रे बलं ददानि। तथा सर्व ऊष्माणोऽन्तरग्रस्ता बहिरनिरस्ता विवृता विवृतप्रयत्नोपेताः। प्रजापतेरात्मानं परिददानीति। सर्वे स्पर्शा लेशेन शनकैरनभिनिहिता अनभिक्षिप्ता वक्तव्याः। मृत्योरात्मानं परिहरन् परिहराणीति ॥ २२ ॥

केवलोङ्कारोपासनादिभिः परब्रह्मप्राप्तिः

त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुले अवसादयन् सर्व एते पुण्यलोका भवन्ति ब्रह्मसꣳस्थोऽमृतत्वमेति। प्रजापतिर्लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयी विद्या संप्रास्रवत् तामभ्यतपत् तस्या अभितप्ताया एतान्यक्षराणि संप्रास्रवन्त भूर्भुवः स्वरिति। तान्यभ्यतपत् तेभ्योऽभितप्तेभ्य ओङ्कारः संप्रास्रवत् तद्यथा शङ्कुना सर्वाणि पर्णानि संतृण्णानि एवमोंकारेण सर्वा वाक् संतृण्णा ओंकार एवेदꣳ सर्वमोंकार एवेदꣳ सर्वम् ॥ २३ ॥

सामावयवोङ्कारोपासनं फलवत् न केवलमित्याशङ्क्य समस्तसामोपासनैरपरब्रह्माप्तिः फलम्। परब्रह्माप्तिः केवलोङ्कारोपासनादिभिः स्यादेव इतीदमारभ्यते—**त्रय** इति। **त्रयो** हि **धर्मस्कन्धाः** विभागाः। के ते? **यज्ञः** अग्निहोत्रादिकं कर्म। **अध्ययनं** यथोक्तनियमपूर्वकं ऋगादिवेदाभ्यासः। **दानं** बहिर्वेदि भिक्षमाणेभ्योऽर्थिभ्यो यथाशक्ति न्यायतः स्वार्जितद्रव्यत्यागः—**इत्येष प्रथमो** धर्मस्कन्धः। प्राथमिकधर्मस्कन्धस्य गृहस्थसमवेतत्वात् तेनैव स निर्वर्तनीयः। द्वितीयतृतीयश्रवणादस्य प्राथम्यम्। द्वितीय**स्तप एव** कृच्छ्रचान्द्रायणादि। तद्वान् तापसो वानप्रस्थ इत्यर्थः—**द्वितीयो** धर्मस्कन्धः। दर्शनाद्यष्टाङ्गमैथुनविरलो **ब्रह्मचारी आचार्यकुलवासी**। नियमतो यावज्जीवमात्मानमाचार्यकुले**ऽवसादयन्**—अयं **तृतीयो** धर्मस्कन्धः। अत्यन्तमित्यादिविशेषणादयं नैष्ठिक इत्यवगम्यते। ब्रह्मचर्यस्य विद्यार्थत्वात्। **सर्व एते** त्रय आश्रमिणः स्वोचितधर्मानुष्ठानप्रभव**पुण्यलोकाः** व्रतिकामिवनिन आश्रमिणो **भवन्ति**। तत्र स्कन्धत्रयेऽप्यनुक्तो हि परिव्राट् अवशिष्टो भवति। तस्य व्रत्यादिवत् कर्मानधिकृतत्वात् न तस्य देवादिप्राप्तिलक्षणममृतत्वमस्ति इति चेत्—सत्यम्; तस्य पृथक्फलश्रवणात्। सोऽयं परिव्राट् तु **ब्रह्मसंस्थः** स्वातिरिक्तकलनाविरलं ब्रह्म स्वमात्रमिति ब्रह्ममात्रावशेषतया स्थितत्वात्। सोऽयं ब्रह्मीभूतः परिव्राट् ब्रह्ममात्रज्ञानसमकालमेव तन्मात्रावस्थानलक्षण**ममृतत्वमेति**। चतुर्णामाश्रमिणां ज्ञानाभावेऽपि स्वस्वधर्मानुष्ठानात् सर्व एते पुण्यलोका भवन्तीत्युक्तेनात्र परिव्राडवशेषितः। तस्यापि स्वाश्रमोचिततपआदिदर्शनात्। तपःशब्देन परिव्राट्तापसौ गृहीतौ। ततस्तेषां चतुर्णां मध्ये यो हि प्रणवसेवनया ब्रह्मसंस्थो भवति सोऽमृतत्वमेतीति चतुर्णामधिकृतत्वाविशेषात्। न हि गवादिशब्दवत् ब्रह्मसंस्थशब्दः परिव्राजके रूढितामर्हति। तस्मात् सर्वेषां च ब्रह्मसंस्थत्वमुपपद्यत इति चेन्न; कर्मप्रत्यययोर्विरोधात्। कर्तृकारकक्रियाफलभेदजुष्टकर्मप्रत्ययारूढा व्रत्यादयः। परिव्राट् तु "सत् एकमेवाद्वितीयं," "ब्रह्मव्यतिरिक्तं न किञ्चिदस्ति," "ब्रह्ममात्रमसन्नहि" इति कर्तृकारकादिक्रियाफलकलनाविरलब्रह्ममात्रप्रत्ययो भवति विद्याविद्ययोर्विरोधात्। स्वातिरिक्तास्ति-

त्वप्रत्ययमुपादाय कर्मविधयः प्रवृत्ताः । "सन्मात्रं सत्यं तदतिरिक्तमन्यद-सदन्यत्" इति श्रुतिप्रमाणजनिताविधेयब्रह्ममात्रप्रत्ययेन यस्य कर्मविधयो निवृत्ताः सोऽयं ब्रह्मज्ञानमृदितकर्मा परिव्राडेव ब्रह्मसंस्थ उच्यते । न हि तदितरस्तन्निष्ठा-मर्हति । इदं कृत्वा इदमाप्नुयादित्यभिसन्धिदर्शनात् । निवृत्तकर्मण एव ब्रह्म-विद्यायामधिकार इत्यत्र प्रवृत्तिलक्षणं कर्म ज्ञानं सन्न्यासलक्षणम्—

तस्मात् ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ।
कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
तस्मात्कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥
अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यक् ऋषिसंघजुष्टम् । इत्यादि,
नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति ।

इति श्रुतेः स्मृतेश्च । तस्मात् ब्रह्मसंस्थशब्दः व्याविद्धसर्वकर्मणि परिव्राजके युज्यते मुख्यामृतत्वश्रवणात् । तस्यैव ब्रह्मसंस्थत्वं पारिव्राज्यं चेति सिद्धम् । स यत्संस्थोऽमृतत्वमेति तन्निरूप्यं निरूपयति—प्रजापतिर्विराट् काश्यपो वा सारजिघृक्षया लोकानुद्दिश्याभ्यतपत् तपो ध्यानं कृतवान् । तेभ्योऽभितप्तेभ्यः सारभूता त्रयी विद्या प्रजापतेर्मनसि संप्रास्रवत् प्रादुरभूदित्यर्थः । तामभ्यतपत् । तस्या अभितप्तायास्त्रयीविद्यायाः एतान्यक्षराणि भूर्भुवःस्वरिति व्याहृतयः संप्रास्रवन्त । तान्यक्षराण्यभ्यतपत् । तेभ्योऽभितप्तेभ्य ओङ्कारः संप्रास्रवत् । तदोङ्काराख्यं ब्रह्म कीदृशं ? इत्यत आह—तदिति । तद्यथा पर्णनालेन शंकुना सर्वाणि पर्णानि संतृण्णानि व्याप्तानि एवं ब्रह्मप्रतीके-नोङ्कारेण सर्वा वाक् शब्दराशिः संतृण्णा । अत ओङ्कार एवेदं शब्दजातं अर्थजातञ्च सर्वम् । ओङ्कारगताभिधानाभिधेयकलनापाये तुरीयोङ्कारत्वेन विद्योत-मानं ब्रह्मैवावशिष्यते । "ओङ्काराग्रविद्योतं तुरीयतुरीयं",

यतो वाचो निवर्तन्ते विकल्पकलनान्विताः ।
विकल्पसंक्षयाज्जन्तोः पदं तदवशिष्यते ॥

इति श्रुतेः । द्विरुक्तिरादरार्था ॥ २३ ॥

सामसन्त्रहोमार्थसाम्नामुपदेशः

ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवनꣳ रुद्राणां माध्यन्दिनꣳ सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनम् । क्व तर्हि यजमानस्य लोक इति स यस्तं न विद्यात् कथं कुर्यात् अथ विद्वान् कुर्यात् । पुरा प्रातरनुवाकस्योपाकरणात् जघनेन गार्हपत्यस्योदङ्मुख उपविश्य स वासवꣳ सामाभिगायति । लो ३ कद्वारमपावा ३ र्णू ३३ पश्येम त्वा वयꣳरा ३३३३३ हुं ३ आ ३३ ज्या ३ यो ३ आ ३२१११ इति । अथ जुहोति नमोऽग्नये पृथिवीक्षिते लोकक्षिते लोकं मे यजमानाय विन्द एष वै यजमानस्य लोक एतास्मि । अत्र यजमानः परस्तादायुषः स्वाहा अपजहि परिघमित्युक्त्वा उत्तिष्ठति तस्मै वसवः प्रातःसवनꣳ संप्रयच्छन्ति । पुरा माध्यन्दिनस्य सवनस्योपाकरणात् जघनेनाग्नीध्रीयस्योदङ्मुख उपविश्य स रौद्रꣳ सामाभिगायति । लो ३ कद्वारमपावा ३ र्णू ३३ पश्येम त्वा वयं वैरा ३३३३३ हुं ३ आ ३३ ज्या ३ यो ३ आ ३२१११ इति । अथ जुहोति नमो वायवे अन्तरिक्षक्षिते लोकक्षिते लोकं मे यजमानाय विन्द एष वै यजमानस्य लोक एतास्मि । अत्र यजमानः परस्तादायुषः स्वाहा अपजहि परिघमित्युक्त्वा उत्तिष्ठति तस्मै रुद्रा माध्यन्दिनꣳ सवनꣳ संप्रयच्छन्ति । पुरा तृतीयसवनस्य उपाकरणात् जघनेनाहवनीयस्य उदङ्मुख उपविश्य स आदित्यꣳ स वैश्वदेवꣳ सामाभिगायति ।

लो ३ कद्वारमपावा ३ र्णू ३३ पश्येम त्वा वयꣳस्वारा ३३३३३ हुं ३ आ ३३ ज्या ३ यो ३ आ ३२१११ इति। आदित्यमथ वैश्वदेवं लो ३ कद्वारमपावा ३ र्णू ३३ पश्येम त्वा वयꣳसाम्रा ३३३३३ हुं ३ आ ३३ ज्या ३ यो ३ आ ३२१११ इति। अथ जुहोति नम आदित्येभ्यश्च विश्वेभ्यश्च देवेभ्यो दिविक्षिद्भ्यो लोकक्षिद्भ्यो लोकं मे यजमानाय विन्दत। एष वै यजमानस्य लोक एतास्मि अत्र यजमानः परस्तादायुषः स्वाहा अपहत परिघमित्युक्त्वा उत्तिष्ठति। तस्मा आदित्याश्च विश्वे च देवास्तृतीयं सवनꣳ संप्रयच्छन्ति एष ह वै यज्ञस्य मात्रां वेद य एवं वेद य एवं वेद ॥ २४ ॥

लोकादिनिष्यन्दनकथनमोङ्कारस्तुत्यर्थम्। सामोपासनाप्रसङ्गमध्ये परापरब्रह्मप्रतीकत्वेनालम्बनत्वेनोङ्कारं अमृतत्वहेतुतया प्रतिपाद्य अथ प्रकृतियज्ञाङ्गभूतसाममन्त्रहोमार्थसामान्युपदिशति—**ब्रह्मवादिन** इति। **ब्रह्मवादिनो वदन्ति। यद्वसूनां प्रातःसवनं** प्रसिद्धं तैश्च प्रातःसवनसंबद्धोऽयं लोको वशीकृतः। तथा रुद्रैर्माध्यंदिनसवनेशानैरन्तरिक्षलोकः। तथादित्यैश्च विश्वैर्देवैश्च तृतीयसवनेशानैस्तृतीयो लोको वशीकृतः। यजमानस्य लोकोऽन्यः परिशिष्टो न विद्यत इति। ततः **क तर्हि यजमानस्य लोकः** यदर्थमयं यजते? "लोकाय वै यजते" इति श्रुतेः। लोकाभावे च **स यो** यजमानस्तं लोकस्वीकरणोपायं साम होममन्त्रार्थलक्षणं **न विद्यात्** सोऽज्ञः **कथं कुर्यात्** यज्ञम्? न कथञ्चन तस्य कर्तृत्वमुपपद्यते। अविदुषः कर्ममात्रविदः कर्तृत्वं प्रतिषिध्यत इति सामादिविज्ञानस्तुतय इत्यर्थः। **अथ** तद्वक्ष्यमाणं सामाद्युपायं **विद्वान् कर्म कुर्यात्**। कथम्? **पुरा** पूर्वं **प्रातरनुवाकस्य** शस्त्रस्य प्रारम्भात् **गार्हपत्यस्य जघनेन** पश्चादुदङ्मुखस्सन्नुपविश्य वसुदैवत्यं **स वासवं सामाभिगायति**।

हे अग्ने! पृथिव्यादिलोकाप्तिद्वारमपावृणु। तेन द्वारेण पश्येम त्वा त्वां राज्यायेति। अथानन्तरं जुहोति। केन मन्त्रेण? इत्यत्र अग्नये तुभ्यं नमः वयं प्रह्वीभूताः। पृथिवीक्षिते पृथिवीनिवासाय लोकं मे मह्यं यजमानाय विन्द लभस्व। एष वै यजमानस्य लोकः। एता आगन्तास्मि। अस्मिन् लोके यजमानोऽहमायुषः परस्तादूर्ध्वं मृतः सन्, स्वाहेति जुहोति। अपजहि परिघमपनय लोकद्वारकवाटं--इत्येतं मन्त्रमुक्त्वा उत्तिष्ठति। एवमेतैर्वसुभ्यः प्रातस्सवनसंबद्धो लोको निष्क्रीतः स्यात्। ततस्ते प्रातस्सवनं यजमानाय वसवः प्रयच्छन्ति। तथाग्नीध्रीयस्य दक्षिणाग्नेर्जघनेन उदङ्मुख उपविश्य स रौद्रं सामाभिगायति। अन्तरिक्षक्षित इत्यादि समानम्। तथाहवनीयस्य उदङ्मुख उपविश्य स आदित्यं स वैश्वदेवं च सामाभिगायति। क्रमेण स्वाराज्याय साम्राज्याय दिविक्षिद्भ्य इत्येवमादि समानम्। अन्यत् विन्दत अपहतेति बहुवचनमात्रविशेषः। यथोक्तसाम विद्वानेष वै यजमानः यज्ञस्य मात्रां वेद। य एवं वेदेति द्विर्वचनमध्यायपरिसमाप्त्यर्थम्॥ २४॥

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

सवित्रुपासनस्य पुरुषार्थसाधकतमत्वम्

असौ वा आदित्यो देवमधु तस्य द्यौरेव तिरश्चीनवꣳशः अन्तरिक्षमपूपो मरीचयः पुत्राः। तस्य ये प्राञ्चो रश्मयस्ता एवास्य प्राच्यो मधुनाड्य ऋच एष मधुकृत ऋग्वेद एष पुष्पं

ता अमृता आपः ता वा एता ऋचः । एतमृग्वेदमभ्यतपꣳस्तस्या-
भितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत । तद्व्यक्षरत्
तदादित्यमभितोऽश्रयत् तद्वा एतत् यदेतदादित्यस्य रोहितꣳरूपम् ॥ १ ॥

अतीताध्यायान्ते "यज्ञस्य मात्रां वेद" इति यज्ञाङ्गविषयसामहोमादीन्युपदिष्टानि । सर्वयज्ञनिर्वाहकः सविता महत्या श्रिया दीप्यते । स हि सर्वप्राणिकर्मफलभूतः सन् सर्वप्रत्यक्षतयावगम्यते । अतः सवितृविषयमुपासनं पुरुषार्थसाधकतममिति श्रुतिरारभते—असाविति । **असौ वा आदित्यो देवानां मध्विव मधु** । आदित्यस्य सर्वयज्ञफलरूपत्वात् । कथं तस्य मधुत्वं ? इत्यत आह—**तस्येति** । तस्य मधुन आदित्यस्य **द्यौरेव** भ्रमरसेव्यमध्वाधारतिरश्चीनवंश इव **तिरश्चीनवंशः** दिवस्तिर्यग्गतेव लक्ष्यमाणत्वात् । **अन्तरिक्षं मध्वपूपः** द्युवंशलग्नमिव लम्बमानत्वात् । तस्यादित्यस्य **मरीचयो** रश्मिस्था आपः पुत्रा इव **पुत्राः** । **तस्य ये प्राञ्चः** प्राच्यां दिशि गता **रश्मयः ता एवास्य** प्रागञ्चनात् **प्राच्यो मधुनाड्यः** मध्वाधारछिद्राणि । तत्र सवित्राश्रयं रोहितरूपं मधु कुर्वन्तीति भ्रमरा इव **ऋच एव मधुकृतः** । यत्र रसानादाय भ्रमरा इव मधु कुर्वन्ति सोऽयं **ऋग्वेद एव पुष्पम्** । ऋग्वेदशब्देन तद्विहितं कर्मोच्यते, न हि शब्दराशिः । तत्र भोग्यरसनिष्यन्दासम्भवात् , कर्मफलमधुनिस्स्रावसम्भवात् । पुष्पस्थानीयऋग्वेदविहितात्कर्मणः सकाशादापः कर्मफलान्यादाय ऋग्भिर्मधु निर्वर्त्यते । कास्ता आपः ? इत्यत्र सोमाज्यपयोरूपा आप अग्नौ प्रक्षिप्तास्तत्पाकाभिनिर्वृत्ता **अमृता** अत्यन्तरसवत्य **आपो** भवन्ति । अपाममृतार्थत्वात् । पुष्पेभ्यो रसमाददाना भ्रमरा इव **ता वा एता ऋचः** । **एतमेत**दृग्वेदविहितं कर्म पुष्पस्थानीय**मभ्यतपन्** अभितापं कृतवत्य इव । एता ऋचः कर्मणि प्रयुक्तास्**तस्य** ऋग्वेदस्या**भितप्तस्य यशो** दिगन्तविश्रुतत्वं **तेजो** देहगता दीप्तिः **इन्द्रिय**सामर्थ्यं **वीर्यं** बलमन्नाद्यमन्नादशक्तित्वं यागादिलक्षणात् कर्मणो यशआद्यन्नाद्यान्तं **रसोऽजायत** । **तद्व्यक्षरत्** व्यचलत् । गत्वा **तदादित्यमभितः** पार्श्वतः **अश्रय**दाश्रितवत् । कर्षकैः केदारनिष्पत्तिवत् मनुष्यै-

रादित्यसञ्चितमधु भोक्ष्याम इति यशआदिलक्षणफलाप्तये कर्माणि क्रियन्त इत्यर्थः। किं तत्? यदेतदादित्यस्य उद्यतो रोहितं रूपं दृश्यते तद्वा एतदित्यर्थः ॥ १ ॥

दक्षिणरश्म्युपासनफलम्

अथ येऽस्य दक्षिणा रश्मयस्ता एवास्य दक्षिणा मधुनाड्यो यजूꣳष्येव मधुकृतो यजुर्वेद एव पुष्पं ता अमृता आपः। तानि वा एतानि यजूꣳषि एतं यजुर्वेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत। तद्व्यक्षरत् तदादित्यमभितोऽश्रयत् तद्वा एतत् यदेतदादित्यस्य शुक्लꣳ रूपम् ॥ २ ॥

दक्षिणरश्मितदुपासनां तत्फलं चाह—अथेति। अथ येऽस्य दक्षिणा रश्मय इत्यादि समानम्। यजूंष्येव मधुकृतः। यजुर्वेदविहितं कर्म पुष्पमुच्यते पुष्पस्थानीयत्वात्। ता एव सोमाद्या अमृता आपः। तानि वा एतानीत्यादि समानम्। मध्ये तदादित्यस्य शुक्लं रूपमिति ॥ २ ॥

प्रत्यग्रश्म्युपासनम्

अथ येऽस्य प्रत्यञ्चो रश्मयस्ता एवास्य प्रतीच्यो मधुनाड्यः सामान्येव मधुकृतः सामवेद एव पुष्पं ता अमृता आपः। तानि वा एतानि सामानि एतꣳ सामवेदमभ्यतपꣳस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्यꣳ रसोऽजायत। तद्व्यक्षरत् तदादित्यमभितोऽश्रयत् तद्वा एतत् यदेतदादित्यस्य परं कृष्णꣳ रूपम् ॥३॥

अथ येऽस्य प्रत्यञ्च इति। अथ येऽस्य प्रत्यञ्चो रश्मय इत्यादि समानम्। तथा सामान्येव मधुकृतः। यदेतदादित्यस्य कृष्णं रूपमिति ॥ ३॥

उदग्रश्म्युपासनम्

अथ येऽस्य उदञ्चो रश्मयस्ता एवास्य उदीच्यो मधुनाड्यः अथर्वाङ्गिरस एव मधुकृत इतिहासपुराणं पुष्पं ता अमृता आपः । ते वा एते अथर्वाङ्गिरस एतदितिहासपुराणमभ्यतप९ंस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्य९ं रसोऽजायत । तद्व्यक्षरत् तदादित्यमभितोऽश्रयत् तद्वा एतत् यदेतदादित्यस्य परं कृष्ण९ं रूपम् ॥ ४ ॥

अथ येऽस्य उदञ्चो रश्मयस्ता इति । **अथ येऽस्योदञ्च** इत्यादि समानम् । अथर्वाङ्गिरोभिर्दृष्टा मन्त्रा **अथर्वाङ्गिरस एव मधुकृतः** कर्मणि प्रयुक्तत्वात् । **इतिहासपुराणं पुष्पम्** । अश्वमेधीयपारिप्लवरात्रिषु तयोरितिहासपुराणयोः कर्माङ्गत्वेन विनियोगसिद्धेः । मधु **एतदादित्यस्य परं कृष्णं** अतिशयेन कृष्णं **रूप**मित्यर्थः ॥ ४ ॥

ऊर्ध्वरश्म्युपासनम्

अथ येऽस्य ऊर्ध्वा रश्मयस्ता एवास्य ऊर्ध्वा मधुनाड्यो गुह्या एवादेशा मधुकृतो ब्रह्मैव पुष्पं ता अमृता आपः । ते वा एते गुह्या आदेशा एतत् ब्रह्माभ्यतप९ंस्तस्याभितप्तस्य यशस्तेज इन्द्रियं वीर्यमन्नाद्य९ं रसोऽजायत । तद्व्यक्षरत् तदादित्यमभितोऽश्रयत् तद्वा एतत् यदेतदादित्यस्य मध्ये क्षोभत इव । ते वा एते रसाना९ं रसा वेदा हि रसाः तेषामेते रसास्तानि वा एतान्यमृतानाममृतानि वेदा ह्यमृतास्तेषामेतान्यमृतानि ॥ ५ ॥

अथ येऽस्य ऊर्ध्वा रश्मयस्ता इति। **अथ येऽस्य ऊर्ध्वा रश्मय** इत्यादि समानम्। **गुह्या** गोप्या **एवादेशा** लोकद्वाराद्युपासनानि कर्माङ्गविषयाणि **मधुकृतः।** प्राणाख्यं **ब्रह्मैव पुष्पं** शब्दाधिकारात्। समानमन्यत्। **मध्ये-तदादित्यस्य मध्ये क्षोभत इव** समाहितदृष्टेः दृश्यते। **ते वा एते** यथोक्ता रोहितादिरूपविशेषा **रसानां रसाः।** के ते? इत्यत्र **वेदा हि रसाः** लोक-निष्यन्दत्वात्। **तेषां** कर्मभावमापन्नानामप्येते रोहितादिविशेषा **रसा** अत्यन्त-सारभूतत्वात्। **तथामृतानाममृतानि। वेदा ह्यमृताः तेषां** नित्यत्वात्। **एतानि** रोहितादिरूपाण्यमृतानि रसानां रसा इत्यादिरेषा कर्मस्तुतिः। यस्यैवं-विशिष्टान्यमृतानि फलानि स कृतकृत्यो भवति आदित्यादिभावमश्नुत इत्यर्थः ॥५॥

प्रथमामृतस्य वसूनामुपजीव्यत्वम्

तद्यत् प्रथमममृतं तद्वसव उपजीवन्ति अग्निना मुखेन न वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति। त एतदेव रूपमभिसंविशन्ति एतस्माद्रूपादुद्यन्ति। स य एतदेवममृतं वेद वसूनामेवैको भूत्वाग्निनैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यति स य एतदेव रूपमभिसंविशति एतस्माद्रूपादुदेति । स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता वसूनामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ६ ॥

पर्यायपञ्चकं विशिनष्टि—**तद्यदित्यादिना।** **तत्त्र यत्प्रथमं** रोहितरूप-लक्षणम**मृतं तत्** प्रातस्सवनेशाना **वसव उपजीवन्ति। अग्निना** प्रधानभूतेन मुखेनाग्निप्रधानास्सन्तः उपजीवन्ति। किं देवाः कबलग्रहमश्नन्ति? इत्यत आह—**न देवा अश्नन्ति न पिबन्तीति।** तथा चेत् कथमुपजीवन्ति? इत्यत आह—**एतदिति। एतदेव** रोहितरूप**ममृतं दृष्ट्वा** सर्वकरणैरनुभूय **तृप्यन्ति** दृशेः सर्वकरणद्वारोपलब्ध्यर्थत्वात्। रूपं दृष्ट्वा जीवन्तीत्युक्त्या

रूपस्य चाक्षुषत्वेन तत्कथमितरे विषयतामश्नुवते ? इति चेत् ; रूपस्य चाक्षुषत्वेऽपि यशआदीनां श्रोत्रादिगम्यत्वात् । देवानामादित्याश्रयत्वेन एतत्सर्वं स्वकरणैरनुभूय तृप्यन्तीत्यर्थः । कथं निरुद्यमा अमृतमुपजीवन्ति ? इत्यत्र **त एतदेव रूपमभि**लक्ष्य नास्माकमिदानीं भोगावसर इति ज्ञात्वा**भिसंविशन्ति** उदासते । यदा भोगावसरो भवेत् तदा **एतस्माद्रूपादुद्यन्ति** उत्साहवन्तो भवन्ति। न ह्यनुत्साहवतां भोगाप्तिर्दृष्टा । **स यः** कश्चि**देतदेवं** यथोक्तलक्षणम**मृत**मृग्वेद-विहितं कर्म पुष्पं तदादित्याश्रयणं रोहितरूपत्वममृतस्य प्राचीदिग्गतरश्मिनाडी-संस्थतां वसुभोग्यतामग्निमुखेन उपजीवनं दर्शनमात्रेण तृप्तिं स्वभोगावसरोद्यमनं तत्संवेशनं **वेद** सोऽपि वसुवत् सर्वमनुभवति । एवं विद्वान् कियन्तं काल उपजीवति ? इत्यत्राह—**स** इति । **स** विद्वान् **यावदादित्यः पुरस्तात्** प्राच्यां दिशि **उदेता पश्चात्** प्रतीच्यां दिशि **अस्तमेता** तावद्धि वसूनां भोगकालः । तावन्तं कालं **वसूनामाधिपत्यं स्वाराज्यं पर्येता** परितो गन्तेत्यर्थः ॥ ६ ॥

द्वितीयाद्यमृतस्य रुद्रादीनामुपजीव्यत्वम्

अथ यत् द्वितीयममृतं तद्रुद्रा उपजीवन्ति इन्द्रेण मुखेन न वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति । त एतदेव रूपमभिसंविशन्ति एतस्माद्रूपादुद्यन्ति । स य एतदेवममृतं वेद रुद्राणामेवैको भूत्वा इन्द्रेणैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशति एतस्माद्रूपादुदेति । स यावदादित्यः पुर-स्तादुदेता पश्चादस्तमेता द्विस्तावद्दक्षिणत उदेता उत्तरतोऽस्तमेता रुद्राणामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ७ ॥

अथ यत् तृतीयममृतं तदादित्या उपजीवन्ति वरुणेन मुखेन न वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति । त एतदेव रूपमभिसंविशन्ति एतस्माद्रूपादुद्यन्ति । स य एतदेवममृतं

वेद आदित्यानामेवैको भूत्वा वरुणेनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशति एतस्माद्रूपादुदेति । स यावदादित्यो दक्षिणत उदेता उत्तरतोऽस्तमेता द्विस्तावत् पश्चादुदेता पुरस्तादस्तमेता आदित्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ८ ॥

अथ यत् चतुर्थममृतं तन्मरुत उपजीवन्ति सोमेन मुखेन न वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति । त एतदेव रूपमभिसंविशन्ति एतस्माद्रूपादुद्यन्ति । स य एतदेवममृतं वेद मरुतामेवैको भूत्वा सोमेनैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशति एतस्माद्रूपादुदेति । स यावदादित्यः पश्चादुदेता पुरस्तादस्तमेता द्विस्तावदुत्तरत उदेता दक्षिणतोऽस्तमेता मरुतामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ ९ ॥

अथ यत् पञ्चमममृतं तत्साध्या उपजीवन्ति ब्रह्मणा मुखेन न वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्ति । त एतदेव रूपमभिसंविशन्ति एतस्माद्रूपादुद्यन्ति । स य एतदेवममृतं वेद साध्यानामेवैको भूत्वा ब्रह्मणैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यति स एतदेव रूपमभिसंविशति एतस्माद्रूपादुदेति । स यावदादित्य उत्तरत उदेता दक्षिणतोऽस्तमेता द्विस्तावदूर्ध्वमुदेता अर्वागस्तमेता साध्यानामेव तावदाधिपत्यꣳ स्वाराज्यं पर्येता ॥ १० ॥

अथ यत् द्वितीयं इति । अथ यत् द्वितीयममृतं तद्रुद्रा उपजीवन्ति इत्यादि खण्डचतुष्टयं समानम् । स यावदादित्यः पुरस्तादुदेता पश्चादस्तमेता

द्विस्तावत् ततो द्विगुणं कालं दक्षिणत उदेता उत्तरतोऽस्तमेता। रुद्राणां तावद्भोगकालः। तथा पश्चादुत्तरत ऊर्ध्वमुदेता विपर्ययेणास्तमेता पूर्वपूर्वापेक्षया उत्तरोत्तरेण कालेनादित्यस्य चतुर्दिक्षु विलसितेन्द्रयमवरुणसोमपुरीषु उदयास्तमनकालस्तुल्य इति चेन्न; आदित्यगतेः व्यत्यस्तवद्भानात्। आदित्योदयो नाम तत्रतत्रत्यप्राणिनां चक्षुर्गोचरत्वम्। तदगोचरत्वमस्तमनम्। न ह्यादित्यस्य परमार्थत उदयास्तमने स्तः। तत्रतत्रत्यपश्यत्प्राणिजाताभावे पूर्ववद्गच्छन्नपि नैवोदेति नास्तमेति। चक्षुर्गोचरतागोचरतावैरल्यात् तत्रतत्रत्यप्राणिनः सत्त्वे तदा अमरावत्या द्विगुणं कालं सांयमिनीं पुरीं प्रति आदित्यो दृश्यते। अतस्तन्निवासिनः प्रति दक्षिणत उदेति उत्तरतोऽस्तमेतीव भाति। तथोत्तरास्वपि पुरीषु आदित्योदयास्तमने पूर्ववत् योजनीये। सर्वेषां पुरीणामपि मेरुरुत्तरो भवति। यदायमादित्यः अमरावत्यां मध्यंगतो दृश्यते तदा संयमिन्यामुदयवत् दृश्यते। यदा तत्र मध्यंगतस्तदा वारुण्यामुदयवत् दृश्यते। तत्रापि यदा मध्यंगतस्तदा सौम्यामुदयवत् दृश्यते। तथोत्तरस्यां प्रदक्षिणावृत्तेस्तुल्यत्वात्। सर्वतश्चक्रवालपर्वतप्राकारनिवारितादित्यरश्मीनामिलावृतवासिनामादित्य ऊर्ध्वं उदेता अर्वाङस्तमेतेव दृश्यते आदित्यरश्मिकदम्बस्य पर्वतोर्ध्वच्छिद्रप्रवेशनात्। तथा ऋगाद्यमृतोपजीविनाममृतानां च द्विगुणोत्तरोत्तरवीर्यवत्त्वमनुमीयते। रुद्रादीनां स्वीयामृतभोगकाले द्वैगुण्यलिङ्गेन उद्यमनसंवेशनादि द्रष्टव्यम्। तत्तत्प्रकारविदुषश्च तत्तत्फलं समानम्। तत्तत्कर्मफलभोगक्षयतः सर्वानात्मन्युपसंहृत्यादित्यः स्वयमेव विजृम्भत इत्यर्थः॥ ७–१०॥

चिदादित्यो भूत्वा स्वस्वरूपभजनम्

अथ तत ऊर्ध्वं उदेत्य नैवोदेता नास्तमेता एकल एव मध्ये स्थाता। तदेष श्लोकः—

न वै तत्र न निम्लोच नोदियाय कदाचन।
देवास्तेनाहꣳ सत्येन मा विराधिषि ब्रह्मणा॥ इति।

न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद । तद्धैतद्ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यस्तद्धैतदुद्दालकाय आरुणये ज्येष्ठाय पुत्राय पिता ब्रह्म प्रोवाच । इदं वाव तज्ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात् प्राणाय्याय वान्तेवासिने । नान्यस्मै कस्मैचन यद्यप्यस्मा इमामद्भिः परिगृहीतां धनस्य पूर्णां दद्यात् एतदेव ततो भूय इति एतदेव ततो भूय इति ॥ ११ ॥

स्वभास्यप्रपञ्चाभावात् चिदादित्यो भूत्वा भासकतामपि सन्त्यज्य स्वस्वरूपं भजतीत्याह—**अथेति । अथ तत ऊर्ध्व उदेत्य नैवोदेता नास्तमेता एकल एव मध्ये स्थाता । तदेष श्लोकः— न वै तत्र इति ।** अथादित्योपासना-सञ्जातसत्त्वशुद्ध्यनन्तरं यतः स्वाज्ञानविजृम्भिताततप्रपञ्चोऽस्तं गतः ततस्त-स्मादसावादित्यः स्वभास्याचित्प्रपञ्चवैरल्यात् सर्वोर्ध्वपदंगतचिदादित्यो भूत्वा **ऊर्ध्व उदेता** स्वात्मन्येव सकृदुदितत्वात् । उदितस्यास्तंगतता स्यादित्यत आह—**नेति** । प्राणिजातभावाभावसापेक्षतया **नैवोदेता नास्तमेता** । स्वातिरिक्तकलनायां सत्यां उदयास्तमनविरलता कुतः ? इत्यत आह—**एकल** इति । स्वातिरिक्त-विश्वजातमेकब्रह्ममात्रावशेषतया यत्र विरूपविलयं भजति **सोऽयमेकलो** निष्प्रति-योगिकाद्वैतरूपेणैव मध्ये स्वात्मनि स्वावशेषतया तिष्ठतीति **मध्ये स्थाता** । एकब्रह्म वाशेषेण यत्र विश्वं विलीयते तद्ब्रह्म एकलमाख्यातम् । "भेदे सत्यपि वस्तुतः" इति स्मृतेः । एवं चिदादित्यो निष्प्रतियोगिकमवशिष्यते । तत्र कश्चिद्यथोक्तलक्षणं चिदादित्यं स्वावशेषधियोपेत्य समाहितस्सन् एतन्मन्त्रं ददर्श । एवं दृष्ट्वोत्थितं कश्चित् वस्वादिसमानचरणः रोहिताद्यमृतभोगी किं त्वं ब्रह्म-लोकादागतोऽसि ? तत्राप्यहोरात्राभ्यामादित्यः प्राणिनामायुः क्षपयति किम् ? इत्येवं पृष्टः तं प्रत्याह । तत्तत्र यथापृष्टेऽर्थे **एष श्लोको** मन्त्रो भवतीति श्रुतेर्वचनमिदम् । नाहं ब्रह्मलोकादागतोऽस्मि । ब्रह्मणो निष्प्रतियोगिकत्वेन तदतिरिक्तलोकवैरल्यात् ।

यत्र ब्रह्म स्वमात्रतया लोक्यते सोऽयं ब्रह्मलोकः परमात्मा। यत्राहं तन्मात्रतया स्थितोऽस्मि **न वै तत्र** ब्रह्ममात्रे त्वदभिप्रेतब्रह्मलोके वा सविता **न निम्लोच न** कदाप्यस्तं गच्छति। **कदाचन नोदियाय** नोदितो भवति। उदयास्तमनविरलो हि चिदादित्यः परमात्मा। भूरादिलोकापेक्षया ब्रह्मलोकोऽपि तथाविध इत्युक्तो न हि तद्वचः सत्यं मेने। तत्प्रत्ययार्थं शपथयति। **हे देवाः!** यूयं साक्षिणः श्रृणुत किं मयोक्तं सत्यम्? **तेन सत्येनाहं ब्रह्मणा** तन्मात्रेण **मा विराधिषि** मा विराध्येयम्। यद्यनृतं मयोक्तं तदा मे ब्रह्मभावो मा भूत्। सत्यमेव त्वयोक्तमिति देवा आहुरिति श्रुतिराह। स्वाज्ञदृष्ट्यादित्यस्योदयास्तमयवत्त्वेऽपि **अस्मै** ब्रह्ममात्रदृशे **न ह वा** आदित्य **उदेति न निम्लोचति** अस्तमेति। तद्दृष्ट्या भास्यभासकघटादित्यादिकलनावैरल्यात्। **सकृद्दिवा** अहोरात्रकलना-विरलस्वमात्रप्रकाशरूपिणी **हैवास्मै भवति** तस्य सकृद्भानस्वरूपत्वात्। **य एतामेवं ब्रह्मोपनिषदं** वेदान्तसिद्धान्तोक्तिं **वेद** जानाति सोऽयं विद्वानुदयास्तमन-कलनापह्नवसिद्धचिदादित्यतयावशिष्यते "ब्रह्म वेद ब्रह्मैव भवति" इति श्रुतेः। **तद्धैतत्** परापरब्रह्मगोचरमधुज्ञानं **ब्रह्मा** हिरण्यगर्भः **प्रजापतये** विराज **उवाच। स च मनवे। मनुरिक्ष्वाक्वादिप्रजाभ्यः** प्रोवाचेति विद्यां महीकरोति। **तद्धैतद्**यथोक्तं मधुज्ञानमुद्दालकायारुणये **ज्येष्ठाय पुत्राय** तत्पिता **प्रोवाच। इदं वाव ज्येष्ठाय पुत्राय पिता ब्रह्म प्रब्रूयात्।** एवं यः कोऽपि **वा प्रणाय्याय** प्रियतमायान्तेवासिने ब्रह्मचर्यादिसाधनसंपद्विशिष्टाय ब्रूयात् **नान्यस्मै कस्मैचन ब्रूयात्। यद्यप्यस्मा** आचार्याय **इमामद्भिः परिगृहीतां** समुद्रवेष्टितां **समस्तामपि** भोगोपकरणैः साकं **धनस्य पूर्णां वा दद्यात्** नासावस्या निष्क्रयो भवति। यस्मात्ततोऽपि निष्क्रयदानादेतदेव मधुविद्यादानं **भूयः** बहुतमफलमित्यर्थः। द्विरभ्यास आदरार्थः॥ ११॥

गायत्रीविद्यैव ब्रह्मविद्या

गायत्री वा इदꣳ सर्वं भूतं यदिदं किंच वाग्वै गायत्री वाग्वा इदꣳ सर्वं भूतं गायति च त्रायते च। या वै सा गायत्रीयं वाव

सा येयं पृथिवी अस्याꣳ हीदꣳ सर्वं भूतं प्रतिष्ठितमेतामेव नातिशीयते । या वै सा पृथिवी इयं वाव सा यदिदमस्मिन् पुरुषे शरीरमस्मिन् हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते । यद्वै तत्पुरुषे शरीरमिदं वाव तत् यदिदमस्मिन्नन्तःपुरुषे हृदयमस्मिन् हीमे प्राणाः प्रतिष्ठिता एतदेव नातिशीयन्ते । सैषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तम् ।

तावानस्य महिमा ततो ज्यायाꣳश्च पुरुषः ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥ इति ।

यद्वै तद्ब्रह्म इतीदं वाव तद्योऽयं बहिर्धा पुरुषादाकाशो यो वै स बहिर्धा पुरुषादाकाशः । अयं वाव स योऽयमन्तःपुरुष आकाशो यो वै सोऽन्तःपुरुष आकाशः । अयं वाव स योऽयमन्तर्हृदय आकाशस्तदेतत्पूर्णमप्रवर्ति पूर्णामप्रवर्तिनीꣳ श्रियं लभते य एवं वेद ॥ १२ ॥

यत एवैषातिशयितफला ब्रह्मविद्या अतः प्रकारान्तरेणापि सैव वक्तव्येतीदमारभ्यते—गायत्रीति । "अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति" इति श्रुत्यनुरोधेन प्रत्यस्तमितसर्वविशेषब्रह्मणो दुर्विज्ञेयत्वादनेकेषु छन्दःसु सत्स्वपि गायत्र्या ब्राह्मण्याधारत्वेन प्राधान्यात् तस्यामत्यन्तगौरवस्य प्रसिद्धत्वादतो गायत्रीविधयैव ब्रह्म ज्ञातुं युक्तम् । स्वयाथात्म्यं गायन्तं कीर्तयन्तं जानन्तं स्वातिरिक्तभयात् त्रायत इति गायत्री ब्रह्मविद्या चिद्रूपिणी । वैशब्दोऽवधारणार्थः । स्वाज्ञदृष्टिविकल्पितमिदं सर्वं भूतं प्राणिजातं यदिदं किञ्च स्थावरं जङ्गमं वास्ति तत्सर्वं स्वज्ञदृष्ट्या गायत्र्येव । गायत्र्याः प्रणवात्मकत्वेनाभिधानप्रपञ्चोऽपि सैवेत्याह—वाग्वै गायत्रीति । वाग्वा इदं सर्वं

भूतमभिधानाभिधेययोरेकत्वात्। असौ गौरसावश्व इति **गायति च** शब्दयति **त्रायते च** स्वातिरिक्तकलना वस्तुतो न ह्यस्ति अतस्त्वं मा भैषीरिति वाचा रक्षति। गायत्र्या वाचोऽनन्यत्वात्। गानात् त्राणनाच्च गायत्र्या गायत्रीत्वम्। **या वै सर्वभूतरूपा सा गायत्री। इयं वाव सा येयं पृथिवी** सर्वभूतसंबन्धात्। यतोऽस्यां पृथिव्यां **हीदं सर्वं** स्थावरजङ्गमात्मकं जगत् **प्रतिष्ठितम्। एतामेव** तत्सर्वकलना **नातिशीयन्ते** नातिवर्तन्ते। यथा गानत्राणनाभ्यां गायत्री तथा भूतसंबन्धा पृथिवी सर्वभूतप्रतिष्ठानात्। अतो हि गायत्री पृथिवी। **या वै सा पृथिवी** गायत्री। **इयं वाव सा यदिदमस्मिन् पुरुषे** जीवति। शिरःपाण्यादिमति **अस्मिन् हीमे** भूतशब्दवाच्याः **प्राणाः प्रतिष्ठिताः**। अतः पृथिवीवच्छरीरस्य भूतशब्दवाच्यप्राणप्रतिष्ठानात् **एतच्छरीरं** गायत्र्येव। यतः प्राणाः शरीरं **नातिशीयन्ते। यद्वै तत्पुरुषे शरीरं** गायत्री। **इदं वाव तत् यदिदमस्मिन्नन्तःपुरुषे** पुरुषान्तः पुण्डरीकाख्यं **हृदयमेतदपि** गायत्री। **अस्मिन् हीमे प्राणाः प्रतिष्ठिताः**। अतः शरीरवत् हृदयमपि गायत्री। प्राणा **एतदेव नातिशीयन्ते**। "अहिंसन् सर्वभूतानि", "प्राणो ह पिता प्राणो माता" इत्यादिश्रुतेः। **सैषा चतुष्पदा** "परो रजसे सावदोम्" इति तुर्यपादेन सहेत्यर्थः। वाग्भूतपृथिवीशरीरहृदयप्राणरूपेण **षड्विधा गायत्री**। तत्तस्मिन्नर्थे एतद्गायत्रमनुगतं ब्रह्म गायत्रीमुखेन ज्ञातव्यमिति **ऋचा** मन्त्रेणाभ्यनूक्तं प्रकाशितमित्यर्थः। **तावानस्य** गायत्र्याख्यब्रह्मणो **महिमा** विभूतिविस्तरः यावांश्चतुष्पात् षड्विध इति गायत्रीब्रह्मविकारो व्याख्यातः। **ततस्त**स्माद्गायत्रीविकारात् वाचारम्भणमात्रात् तदारोपापवादाधिकरणतया पुरीतति शयनात्तत्समष्टिप्रपञ्चपूरणाच्च परमार्थसत्यो निर्विकारः **पुरुष एव ज्यायान्**। निरतिशयमहत्वादस्य गायत्र्यधिष्ठितब्रह्मणः **प्रथमः पादः। सर्वाः** सर्वाणि **भूतानि** तेजोऽबन्नादीन्यनन्तकोटिब्रह्माण्डानि स्वातिरिक्तत्वेनाविद्यारूपाणीत्यर्थः। **अस्य** गायत्रीप्रपञ्चाधिकरणपुरुषस्य **दिवि** द्योतनवति स्वात्मनि स्वमात्रतयावस्थितं मर्त्यभावमापन्नस्वाविद्यापदतत्कार्यापह्नवसिद्धं **त्रिपा**च्चैतन्यम**मृतं** सन्मात्रस्वरूपत्वात्। "पश्यतेहापि सन्मात्रमसदन्यत्" इति श्रुतेः,

स्वाविद्यापदतत्कार्यं यद्बोधाद्यात्यपह्नवम् ।
तत् त्रिपाद्ब्रह्मचैतन्यं स्वमात्रमवशिष्यते ॥

इति स्मृतेश्च । त्रयः पादा अस्येति त्रिपादिति व्युत्पत्त्या परिच्छिन्नता स्यादिति चेन्न; त्रिपाच्छब्दस्य निरवधिकव्यापकद्योतनार्थत्वात् । तेन परिच्छिन्नदृष्टौ नष्टायां व्याप्यव्यापककलनापह्नवसिद्धं त्रिपात् निष्प्रतियोगिकतया स्वमात्रमवशिष्यत इत्यर्थः । स्वाज्ञादिदृष्ट्या यद्वै त्रिपादमृतं गायत्रीमुखेन ब्रह्मेत्युक्तं **इदं वाव** तदिदमेव **तद्योऽयं** प्रसिद्धो **बहिर्धा पुरुषात्** बहिर्भौतिकाकाशो **यो वै स बहिर्धा पुरुषादाकाश** उक्तः । **अयं वाव स योऽयमन्तःपुरुषे** शरीरान्तराकाशो **यो वै सोऽन्तः पुरुष आकाशः । अयं वाव स योऽयमन्तर्हृदय आकाशो** हृत्पुण्डरीकावच्छिन्नो व्याकृताकाशः । कथमाकाशस्य त्रिधा भेदः ? इत्यत्र जागरितस्थानविलसितबाह्याकाशे दुःखबाहुल्यं दृश्यते । ततः स्वप्नस्थानविलसितान्तःशरीराकाशे स्वल्पदुःखं भाति स्वापस्थानविलसितहृदयाकाशे दुःखनिवृत्तिर्दृश्यते—इत्याकाशस्य त्रिधा भेदेन व्याख्यानं युक्तम् । यत्रैतत् सर्वावस्थाभिः सह स्वाविद्यापदतत्कार्याकाशत्रयं विरूपविलयं भजति तदेतत्स्वातिरिक्तकलनापह्नवसिद्धं ब्रह्म स्वमात्रतया **पूर्णं** निष्प्रतियोगिकत्वात् । एवं तदुपलब्धिः कुत्र ? इत्यत्र हार्दाकाशे तत्रत्यकामादिवृत्तिभावाभावप्रकाशकप्रत्यग्रूपेण तदभिन्नब्रह्मरूपेण प्रत्यक्परविभागैक्यकलनाविरलब्रह्ममात्ररूपेणोपलभ्यते । यत एवमतस्तदप्रवर्ति निस्तरङ्गपरिपूर्णचिदर्णवत्वात् । **य एवं पूर्णमप्रवर्तिं** ब्रह्म निष्प्रतियोगिकस्वमात्रमिति **वेद** सोऽयं विद्वान् तद्वेदनसमकालं **पूर्णामप्रवर्तिनीं** तद्रूपावस्थानलक्षणां विकलेबरकैवल्य**श्रियं** स्वावशेषतया **लभते** । "य एवं निर्बीजं वेद निर्बीज एव स भवति" इति श्रुतेः ॥ १२ ॥

गायत्र्याख्यब्रह्मप्रापकद्वारनिर्देशः

तस्य ह वा एतस्य हृदयस्य पञ्च देवसुषयः स योऽस्य प्राङ् सुषिः स प्राणः तच्चक्षुः स आदित्यस्तदेतत्तेजोऽन्नाद्यमित्युपासीत

तेजस्वी अन्नादो भवति य एवं वेद । अथ योऽस्य दक्षिणः सुषिः स व्यानस्तच्छ्रोत्रꣳ स चन्द्रमास्तदेतच्छ्रीश्च यशश्चेत्युपासीत श्रीमान् यशस्वी भवति य एवं वेद । अथ योऽस्य प्रत्यङ् सुषिः सोऽपानः सा वाक् सोऽग्निस्तदेतद्ब्रह्मवर्चसमन्नाद्यमित्युपासीत ब्रह्मवर्चस्वी अन्नादो भवति य एवं वेद । अथ योऽस्य उदङ् सुषिः स समानस्तन्मनः स पर्जन्यस्तदेतत्कीर्तिश्च व्युष्टिश्चेत्युपासीत कीर्तिमान् व्युष्टिमान् भवति य एवं वेद । अथ योऽस्य ऊर्ध्वः सुषिः स उदानः स वायुः स आकाशस्तदेतदोजश्च महश्चेत्युपासीत ओजस्वी महस्वान् भवति य एवं वेद । ते वा एते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः स य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेद अस्य कुले वीरो जायते प्रतिपद्यते स्वर्गं लोकं य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य लोकस्य द्वारपान् वेद । अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषु उत्तमेषु लोकेषु इदं वाव तद्यदिदमस्मिन्नन्तः पुरुषे ज्योतिस्तस्यैषा दृष्टिः । यत्रैतदस्मिन् शरीरे सꣳस्पर्शेन उष्णिमानं विजानाति तस्यैषा श्रुतिर्यत्रैतत्कर्णावपिगृह्य निनदमिव नदथुरिव अग्नेरिव ज्वलत उपश्रृणोति तदेतद्दृष्टं च श्रुतं चेत्युपासीत चक्षुष्यः श्रुतो भवति य एवं वेद य एवं वेद ॥ १३ ॥

गायत्र्याख्यब्रह्मण उपासनाङ्गत्वेन मन्दानां गायत्र्याख्यब्रह्मप्रतिपत्तये तत्प्रापकद्वारनिर्दिदृक्षया इदमारभ्यते—तस्य हेति । यथा लोके द्वारपालप्रसादतो

राज्ञो दर्शनं भवति तथेहापि गायत्रीब्रह्मोपलब्धिस्थानत्वेन प्रकृतस्य **तस्य ह वा एतस्य हृदयस्य पञ्चसंख्याका देवानां सुषयः** स्वर्गाप्तिसाधनद्वाराणि प्राणादित्यादिभिरभिरक्ष्यमाणानीति देवसुषयः पञ्च **सन्ति।** अस्य स्वर्गाख्य-हृदयस्य पूर्वाभिमुखस्य **प्राङ् सुषिः** प्राक्छिद्रं यस्तत्सुषिरासनो भूत्वा नवद्वारेण सञ्चरन् प्रागनिति **स प्राणः। तच्चक्षुः** तथैवादित्यः "आदित्यो ह वै बाह्यः प्राणः" इति श्रुतेः। यश्चक्षुषि तिष्ठति **स आदित्यः।** स आदित्यः कस्मिन् प्रतिष्ठितः? इति। चक्षुषीति श्रुतेः। **तदेतत्** प्राणादित्याख्यं **ब्रह्म तेजोऽन्नाद्यमिति** गुणद्वय-विशिष्ट**मुपासीत। तत**स्**तेजस्वी अन्नादश्चा**मयावित्ववर्जितो **भवति। य एवं वेद** तेनोपासकेन वशीकृतो द्वारपालः हार्दब्रह्मप्राप्तिहेतुर्भवतीत्यदृष्टफलमेतत्। **अथ योऽस्य दक्षिणः सुषिः स** वीर्यवत्कर्मकर्ता **व्यानो** वायुविशेषः। तत्संबन्धि **श्रोत्रमिन्द्रियम्।** तथा **स चन्द्रमाः** श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्चेति सहाश्रयश्रुतेः। पूर्ववत्त**देतच्छ्रीश्च यशश्चे**त्युपासीत। तादृग्गुणवान् भवतीति समानम्। **अथ योऽस्य प्रत्यङ् सुषिः सोऽपानः।** अर्वागञ्चनादपानः। **तथा सा वाक्।** तत्संबन्धात्**सोऽग्निः। तदेतद्ब्रह्मवर्चसं** स्वाध्यायनिमित्तं तेजः स्वाध्यायस्याग्निसंबन्धात्। समानमन्यत्। **अथ योऽस्योदङ् सुषिः** तत्स्थः सन्नशितं पीतं समं नयतीति **स समानः।** तत्संबन्धं **मनो**ऽन्तःकरणं **स** वृष्ट्यात्मकः **पर्जन्यः** अपां पर्जन्यनिमित्तत्वात्। "मनसा सृष्टा आपश्च वरुणश्च" इति श्रुतेः। मनसो ज्ञानकीर्तिहेतुत्वात्। **कीर्ति**र्यशः सर्वत्र विश्रुतत्वम्। **व्युष्टि**र्देहगतलावण्यम्। समानमन्यत्। **अथ योऽस्योर्ध्वः सुषिः स** उत्क्रमणकर्म कुर्वन् उत् अनितीत्यु**दानः** तदाधारश्चाकाशः। तदेतद्वाय्वा-काशयोरोजोहेतुत्वादोजो बलं महत्त्वाच्च मह इति। समानमन्यत्। **ते वा एते पञ्च ब्रह्मपुरुषाः** पञ्चसुषिसंबन्धादेते हार्दस्वर्गलोकस्य **द्वारपालाः।** एतैर्हि चक्षुःश्रोत्रवाङ्मनःप्राणैर्बहिर्मुखप्रवृत्तैर्हार्दब्रह्मप्राप्तिद्वाराणि निरुद्धानि अनृत-प्रत्यूढत्वात्। ततो न हार्दे ब्रह्मणि मनस्तिष्ठति। तस्मादेते पञ्च ब्रह्मपुरुषाः स्वर्गस्य लोकस्य द्वारपाः। तदुपासनया ते प्रसन्ना भूत्वा हार्दब्रह्मपदं प्रापयन्तीत्यर्थः। अतः **स य एतानेवं पञ्च ब्रह्मपुरुषान् स्वर्गस्य**

लोकस्य द्वारपान् वेद उपासनेन वशीकरोति अयमुपासकस्तैरनिवारितः सन् स्वर्गं लोकं हार्दं ब्रह्म प्रतिपद्यते। किञ्चास्य विदुषः **कुले वीरः पुत्रो जायते**। स्वर्गलोकप्रतिपत्तिरेकं फलम्। **अथ** द्वारपालोपासनानिष्पन्नचित्त-शुद्ध्यनन्तरं "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि" इति यदुक्तं तत् त्रैपदं ब्रह्म ज्योतिः। **अतोऽमुष्माद्दिवो** द्युलोकोपलक्षिताविद्यापदतत्कार्य-जातात् **परः** परं **ज्योतिः** विद्वद्दृष्ट्यनुभूतिप्रमाणतो दीप्यत इव **दीप्यते**। अस्याग्नीन्धनयोगवद्दीप्तेरसंभवत्वेन प्रकाशमात्रत्वात्। तस्य प्रकाशमात्रत्वेन परि-च्छिन्नत्वप्रसक्तौ **विश्वतः पृष्ठेष्वि**त्यस्य व्याख्यानं सर्वतः **पृष्ठेष्वि**ति। अनुत्तमेष्वित्यत्र तत्पुरुषशङ्कानिरसनायाह—**उत्तमेषु लोकेष्वि**ति। सर्वव्या-पकता द्योत्यते। वस्तुतो ब्रह्म व्याप्यव्यापककलनाविरलं, व्याप्यव्यापकता मिथ्या—

केवलं ब्रह्ममात्रत्वान्नास्त्यनात्मेति निश्चिनु।

इति श्रुतेः। स्वाज्ञादिदृष्ट्या इदमेव त्रिपाद्ब्रह्म। **इदं वाव तद्यदिदमस्मिन् पुरुषेऽन्तर्मध्ये ज्योतिरवगम्यते तस्यैषा दृष्टिः**। सा द्विविधा **यत्रैतज्ज्योति-रस्मिन् शरीरे** हस्तसंस्पर्शेनोष्णिमानं **विजानाति**। उष्णिमा नाम चैतन्य-ज्योतिषो लिङ्गम्। न हि जीवच्छरीरमुष्णिमा व्यभिचरति। ज्ञातयश्चरमदशा-संन्दिग्धं स्पृष्ट्वा यदा औष्ण्यमुपलभ्यते तदा जीवति यदि शैत्यमुपलभ्यते तदा मरिष्यतीति वदन्ति। "तेजः परस्यां देवतायां" इति वक्ष्यति। अतस्तस्यैषा दृष्टिरित्युक्तं दर्शनोपायत्वात्। **तथा तस्य** ज्योतिष **एषा श्रुतिः** श्रवणम्। **यत्रैत**ज्ज्योतिषो लिङ्गं **पुरुषः** श्रोतुमिच्छति **तदेतत्कर्णावपिगृह्य**—एतच्छब्दः क्रियाविशेषणं—कर्णावङ्गुलीभ्यां पिधाय रथादेर्घोषो **निनदः** तमिव **शृणोति**। **नदथुरिव** ऋषभकूजितमिवान्तःशरीरे एवं शब्दं **शृणोति**। **तदेत**ज्ज्योतिः दृष्टश्रुतिलिङ्गत्वेन **दृष्टं च श्रुतं चेत्युपासीत**। एवमुपासनाच्चक्षुष्यो दर्शनीयः **श्रुतो विश्रुतश्च भवति। य एवं वेदे**ति दृष्टफलमेतत्। अदृष्टफलं पूर्वोक्तमेव। द्विरभ्यास आदरार्थः ॥ १३ ॥

स्वाज्ञदृष्ट्या परिच्छिन्नत्वस्य मार्जनम्

सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत। अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत। मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिद-मभ्यात्तोऽवाक्यनादरः। एष म आत्मान्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा एष म आत्मा-न्तर्हृदये ज्यायान् पृथिव्या ज्यायानन्तरिक्षात् ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्यः। सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादर एष म आत्मान्तर्हृदय एतद्ब्रह्म एतमितः प्रेत्याभिसंभवितास्मीति यस्य स्यादद्धा न विचिकित्सा-स्तीति ह स्माह शाण्डिल्यः शाण्डिल्यः॥ १४॥

एवं स्वाज्ञदृष्ट्या परिच्छिन्नत्वप्रसक्तौ तन्मार्जनायेदमारभ्यते— सर्वमिति। परमार्थदृष्ट्या त्रिपात् ब्रह्म निष्प्रतियोगिकस्वमात्रमपि स्वाज्ञदृष्ट्या नानेव भाति। तन्नामरूपादिविकृतिमदिदं सर्वमविद्यापदतत्कार्यजातं सर्वं स्वज्ञदृष्ट्या ब्रह्मैव खलु। यथा मृदाद्यतिरेकेण न हि घटादिरस्ति तथा ब्रह्मातिरेकेण किञ्चिदपि नास्तीत्यर्थः। कथं पुनः सर्वस्य ब्रह्मत्वम्? इत्यत्र हेतुमाह— तदिति। तस्माद्ब्रह्मणः सकाशात् तेजोबन्नादिक्रमेणाविद्यकपदं जायत इति तज्जम्। तथा सम्भूतिवैपरीत्येन तस्मिन्नेव लीयते तन्मात्रतयावशिष्यत इति तल्लम्। तथा स्थितिकाले तस्मिन्नेव अनिति चेष्टत इति तदनमित्येवं तज्जलानिति रागद्वेषादि-वैरल्यात् अतः शान्तः सन् त्रिपाद्ब्रह्ममात्रावगतये वक्ष्यमाणगुणविशिष्टं ब्रह्मो-पासीत। अथ खल्विति हेत्वर्थः। यतः क्रतुमयः क्रतुप्रायः पुरुषः

जीवस्य सङ्कल्पादिवृत्तिमत्वात् । यथा क्रतुरस्मिन् लोके जीवन्निह पुरुषो भवति तथेतोऽस्माल्लोकात् प्रेत्य क्रत्वनुरूपफलात्मको भवति । तथा च स्मृतिः—

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति—

इति । एवमतो जानन् स विद्वान् वक्ष्यमाणानुरोधेन क्रतुं कुर्वीत । एवं शास्त्रप्रामाण्यात् क्रत्वनुरूपं फलमुपपद्यते । किं तद्वक्ष्यमाणं? इत्यत्र अनेन मनुत इति मनः । तन्मयस्तत्प्रायः । तद्वृत्तिमवष्टभ्य विषयेषु प्रवृत्तत्वात्प्रवृत्त इव निवृत्त इव भाति वस्तुतोऽस्यामनस्कत्वात् । "यो वै प्राणस्सा प्रज्ञा या वा प्रज्ञा स प्राणः" इति श्रुत्यनुरोधेन क्रियाज्ञानशक्त्यात्मकः प्राण एव शरीरं यस्य सोऽयं प्राणशरीरः "प्राणशरीरनेता" इति श्रुतेः । भा दीप्तिः एवं रूपं यस्य स भारूपः । तथा सत्यसङ्कल्पः मिथ्यासङ्कल्पजीवविलक्षणत्वात् । जीवास्तु मिथ्यासङ्कल्पाः "अनृतेन हि प्रत्यूढाः" इति श्रुतेः । आकाश इव स्वगतसूक्ष्मादिरात्मा स्वरूपमस्येत्याकाशात्मा । स्वाज्ञदृष्ट्या येन स्वाविद्यापदं क्रियते सोऽयं सर्वकर्मा "स हि सर्वस्य कर्ता" इति श्रुतेः । यस्य सर्वे कामा दोषविरलाः स सर्वकामः—

धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ।

इति स्मृतेः । न ह्यत्र बहुव्रीहिः संभवति । तथा सर्वगन्धः सुखकरः "पुण्यो गन्धः पृथिव्याम्" इति स्मृतेः । तस्य पापपुण्यविदूरत्वात् सर्वमिदमविद्यापदतत्कार्यजातमभ्यात्तः विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तरूपेणाविद्यापदव्याप्तेः । अनया वक्तीति वाक् । वागेव वाकः । वचेर्वा घञन्तस्य करणे वाकः । स यस्य विद्यते स वाकी । तथा न भवतीत्यवाकी । वाक्प्रतिषेधः सर्वकरणोपलक्षणार्थः । करणग्रामवैरल्ये तत्तत्प्रबोधः कुतः? इति चेन्न ; अलुप्तविज्ञप्तिस्वरूपत्वात् ।

अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः ।
स वेत्ति वेद्यं न च तस्यास्ति वेत्ता—

इति श्रुतेः । करणग्रामप्रवृत्तिनिमित्तत्वेऽपि तत्प्रवृत्त्युदासीन इत्याह—**अनादर** इति । आप्तकामत्वात् स्वातिरेकेण कामानां सत्त्वे तत्र संभ्रमः स्यात् । न हि नित्यतृप्तस्य सम्भ्रमोऽस्ति । **एष** हि **मे** मम **आत्मान्तर्हृदये** हृत्पुण्डरीकमध्ये **व्रीहेर्वा यवाद्वा सर्षपाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा** परिच्छिन्नप्रमाणाद**प्यणीयान्** अणुतमः । तथा चेदणुप्रमाणत्वं स्यादित्याशङ्कायामाह—**एष म आत्मान्तर्हृदये ज्यायान् पृथिव्या** इत्यादिना । ज्यायस्त्वमनन्तपरिमाणत्वं च दर्शयति—**मनोमय** इत्यादिना **ज्यायानेभ्यो लोकेभ्य** इत्यन्तेन । यथोक्तलक्षणोऽयमीश्वरो ध्येयः न तु विशिष्ट एवेति शङ्कायां तन्निवृत्त्यर्थं पुनस्सर्वकर्मेत्यादि मनोमयत्वादिगुणविशिष्ट एवेश्वरोऽत्र ध्येयः । अत एव षष्ठसप्तमयोरिव तत्त्वमसि आत्मैवेदं सर्वमिति नेह स्वाराज्येऽभिषिञ्चति प्रेत्याभिसंभवितास्मीति लिङ्गदर्शनात् । **एष म आत्मान्तर्हृदय** इत्यत्र सर्वं खल्विदं ब्रह्मेति यत्प्रकृतं तत् ब्रह्मेत्युच्यते । **इतोऽस्माच्छरीरात् प्रेत्यैतमात्मानं अभिसंभवितास्मि** यथाक्रतुस्तथा प्रतिपत्तास्मीत्यर्थः । **यस्यैवंविद** एवं स्यामहमित्यद्धा सत्यं क्रतुफलसंबन्धे प्रेत्य एवं स्यामिति **न च विचिकित्सा** स्यात् स तथेश्वरभावं प्रतिपद्यते—इत्येतदेव **शाण्डिल्यो मुनिराह स्म** उक्तवान् किल । यथा क्रतुस्तथा भवतीत्यत्र स्वविकल्पितसर्वविशेषापह्नवसिद्धब्रह्मणि स्वावशेषतया ज्ञाते तज्ज्ञानसमकालं तद्भावापत्तिः स्यादित्यर्थात् सिद्धं भवति ।

सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि ।

इति श्रुतेः । द्विरभ्यास आदरार्थः ॥ १४ ॥

वीरपुत्रस्य दीर्घायुष्ट्वसिद्धये कोशविज्ञानम्

अन्तरिक्षोदरः कोशो भूमिबुध्नो न जीर्यति दिशो ह्यस्य स्रक्तयो द्यौरस्योत्तरं बिलꣳ स एष कोशो वसुधानस्तस्मिन्

विश्वमिदꣳ श्रितम् । तस्य प्राची दिक् जुहूर्नाम, सहमाना नाम दक्षिणा, राज्ञी नाम प्रतीची, सुभूता नाम उदीची ; तासां वायुर्वत्सः स य एतमेवं वायुं दिशां वत्सं वेद न पुत्ररोदꣳ रोदिति सोऽह-मेतमेवं वायुं दिशां वत्सं वेद मा पुत्ररोदꣳ रुदम् । अरिष्टं कोशं प्रपद्ये अमुना अमुना अमुना प्राणं प्रपद्ये अमुना अमुना अमुना भूः प्रपद्ये अमुना अमुना अमुना भुवः प्रपद्ये अमुना अमुना अमुना स्वः प्रपद्ये अमुना अमुना अमुना । स यदवोचं प्राणं प्रपद्य इति प्राणो वा इदꣳ सर्वं भूतं यदिदं किंच तमेव तत्प्रापत्सि । अथ यदवोचं भूः प्रपद्य इति पृथिवीं प्रपद्येऽन्तरिक्षं प्रपद्ये दिवं प्रपद्ये इत्येव तदवोचम् । अथ यदवोचं भुवः प्रपद्य इति अग्निं प्रपद्ये वायुं प्रपद्य आदित्यं प्रपद्य इत्येव तदवोचम् । अथ यदवोचꣳ स्वः प्रपद्य इति ऋग्वेदं प्रपद्ये यजुर्वेदं प्रपद्ये सामवेदं प्रपद्ये इत्येव तदवोचं तदवोचम् ॥ १९ ॥

पुरास्य कुले वीरो जायत इत्युक्तं ; न हि वीरजन्ममात्रं पितुस्तुष्टिकरं भवति । "तस्मात्पुत्रमनुशिष्टं लोक्यमाहुः" इति श्रुत्यनुरोधेन तस्य दीर्घायुष्ट्व-सिद्धये कोशविज्ञानमारभ्यते—अन्तरिक्ष इति । अन्तरिक्षमुदरमन्तःसुषिरं यस्य कोशस्य सोऽयमन्तरिक्षोदरः कोश इव कोशः । कोशधर्मपूगविशिष्टत्वात् । भूमिर्बुध्नो मूलं यस्य सोऽयं भूमिबुध्नः । स कदापि न जीर्यति न विनश्यति । तस्य त्रैलोक्यात्मकत्वेन सहस्रादियुगकालावस्थायित्वात् । अस्य दिशः सर्वा हि स्रक्तयः कोणाः । अस्य कोशस्य द्यौरुत्तरं बिलम । यथोक्तगुणः स एष कोशो वसुधानः प्राणिकर्मफलाख्यवस्वधिकरणत्वात् । तस्मिन् कोशे हि समस्तप्राणिकर्मफललक्षणं विश्वमिदं श्रितमाश्रितमित्यर्थः । तस्य प्राची दिग्भागः

कर्मिणो जुह्वतीति जुहूर्नाम भवति। प्राणिनोऽस्यां यमपुर्यां पापफलानि सहन्त इति सहमाना नाम दक्षिणा दिक्। तथा राज्ञा वरुणेनाधिष्ठिता राज्ञी नाम पश्चिमा दिक्। सुभूतिमद्भिः ईश्वरकुबेरादिभिः अधिष्ठिता सुभूता नाम उदीची दिक्। तासां दिशां वायुर्वत्सः वायोर्दिक्प्रभवत्वात्, पुरोवात इत्यादि-प्रतीतेः। स्वपुत्रदीर्घजीवितार्थी स यः कश्चिदेतं वायुं दिशां वत्समममृतं वेद न हि स पुत्रनिमित्तं रोदनं रोदिति तत्पुत्रो न म्रियत इत्यर्थः। यत एवंविदः फलं कोशविज्ञानं अतः सोऽहं पुत्रजीवनार्थं तमेव वायुं दिशां वत्सं वेद जाने। अतो मा पुत्ररोदं रुदं मम पुत्रनिमित्तरोदनं मा भूदित्यर्थः। अतोऽह-मरिष्टमविनाशिनं कोशं प्रपद्ये पुत्रायुषे प्रपन्नोऽस्मि। अमुनामुनामुनेति पुत्रस्य त्रिर्नाम गृह्णाति। तथा पुत्रस्य प्राणं प्रपद्येऽमुनामुनामुना। भूः प्रपद्ये-ऽमुनामुनामुना। भुवः प्रपद्येऽमुनामुनामुना। स्वः प्रपद्येऽमुनामुनामुना। सर्वत्र प्रपद्य इति पुनः पुनः त्रिः नाम गृह्णाति। स यदवोचं प्राणं प्रपद्य इति व्याख्यानार्थं प्राणो वा इदं सर्वं भूतं यदिदं किंच "यथा वा अरा नाभौ" इति वक्ष्यति। अतस्तमेव प्राणं सर्वभावेन प्रापत्सि प्रपन्नोऽभूवम। अथ यदवोचं भूः प्रपद्य इति भूरादित्रीन् लोकान् प्रपद्य इति तदवोचम्। अथ यदवोचं भुवः प्रपद्य इति अग्न्यादीन् प्रपद्य इति तदवोचम्। अथ यदवोचं स्वः प्रपद्य इति ऋगादिवेदान् प्रपद्य इति तदवोचम्—इत्युपदिष्टानेतान् मन्त्रान् जपेत्। पूर्वोक्तमन्तरिक्षोदरं कोशं सदिग्वत्सं यथावत् ध्यायेत्। द्विर्वचनमादरार्थम्॥ १९॥

स्वदीर्घजीवनाय उपासनम्

पुरुषो वाव यज्ञः तस्य यानि चतुर्विꣳशतिवर्षाणि तत्प्रातःसवनं चतुर्विꣳशत्यक्षरा गायत्री गायत्रं प्रातःसवनं तदस्य वसवोऽन्वायत्ताः प्राणा वाव वसव एते हीदꣳ सर्वं वासयन्ति। तं चेदेतस्मिन् वयसि किंचिदुपतपेत् स ब्रूयात् स प्राणा वसव

इदं मे प्रातःसवनं माध्यन्दिनꣳ सवनमनुसन्तनुतेति माहं प्राणानां वसूनां मध्ये यज्ञो विलोप्सीय इत्युद्धैव तत एति अगदो ह भवति। अथ यानि चतुश्चत्वारिंशद्वर्षाणि तन्माध्यन्दिनꣳ सवनं चतुश्चत्वारिꣳशदक्षरा त्रिष्टुप् त्रैष्टुभं माध्यदिनꣳ सवनं तदस्य रुद्रा अन्वायत्ताः प्राणा वाव रुद्रा एते हीदꣳ सर्वꣳ रोदयन्ति। तं चेदेतस्मिन् वयसि किंचिदुपतपेत् स ब्रूयात् प्राणा रुद्रा इदं मे माध्यन्दिनꣳ सवनं तृतीयसवनमनुसन्तनुतेति माहं प्राणानाꣳ रुद्राणां मध्ये यज्ञो विलोप्सीय इत्युद्धैव तत एति अगदो ह भवति। अथ यान्यष्टाचत्वारिꣳशद्वर्षाणि तृतीयसवनमष्टाचत्वारिꣳशदक्षरा जगती जागतं तृतीयसवनं तदस्यादित्या अन्वायत्ताः प्राणा वाव आदित्या एते हीदꣳ सर्वमाददते। तं चेदेतस्मिन् वयसि किंचिदुपतपेत स ब्रूयात् प्राणा आदित्या इदं मे तृतीयसवनं आयुरनुसन्तनुतेति माहं प्राणानामादित्यानां मध्ये यज्ञो विलोप्सीय इत्युद्धैव तत एति अगदो हैव भवति। एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेयः स किं म एतदुपतपसि योऽहमनेन न प्रेष्यामीति स ह षोडशं वर्षशतमजीवत् प्र ह षोडशं वर्षशतं जीवति य एवं वेद ॥ १६ ॥

पुत्रजीवनार्थमुपासनं जपश्चोक्तः। यदि स्वयं दीर्घायुस्तदा तत्फलेन युज्यते नान्यथेति। अथेदानीं स्वदीर्घजीवनायेदमुच्यते—पुरुष इति। पुरुषो वाव वावशब्दोऽवधारणार्थः। पुरुष एव **यज्ञः**। कथं तस्य यज्ञत्वं? इत्यत आह—तस्येति। तस्यायुषो यानि चतुर्विंशतिवर्षाणि पुरुषाख्ययज्ञस्य तत्प्रात-

स्सवनम्। केन सामान्येन? इत्यत्र चतुर्विंशत्यक्षरा गायत्री। विधियज्ञ-प्रातस्सवनं गायत्रीछन्दस्कं हि। विधियज्ञसामान्यात् पुरुषस्य यज्ञत्वम्। तथोत्तरयोरप्यायुषोः सवनद्वयसंपत् त्रिष्टुब्जगत्यक्षरसंख्यासामान्यतो वाच्या। किञ्च तदस्य पुरुषयज्ञस्य विधियज्ञवत् वसवोऽन्वायत्ताः अनुगता इत्यर्थः। के ते वसवः? इत्यत्र प्राणा वाव वागादय एव वसवः। एते हि यस्मात् पुरुषजातं वासयन्ति। सत्सु प्राणेष्विदं सर्वं वसति नान्यथेति। अतो वसनाद्वसवः। तं चेत् यज्ञभावमापन्नं पुरुषमेतस्मिन् प्रातस्सवनवयसि किंचित् व्याध्यादिशङ्का तमुपतपेत् दुःखमुत्पादयेत् तदात्मानं यज्ञं मन्यमानो ब्रूयात् इमं मन्त्रं जपेत्---हे प्राणा वसवः! इदं मे प्रातस्सवनं वर्तते। तन्माध्यंदिनं सवनमनुसन्तनुत माध्यंदिनसवनायुषं मां कुरुतेत्यर्थः। माहं यज्ञो युष्माकं प्राणानां वसूनां मध्ये विलोप्सीय मा विच्छेदेयमित्यर्थः। इतिशब्दो मन्त्रसमाप्त्यर्थः। स तेन जपादिना ततस्तस्मादुपतापादुदेति उद्गच्छति अगदो नीरोगी भवत्येव। अथ यानि चतुश्चत्वारिंशद्वर्षाणीत्यादि समानम्। रुदन्ति रोदयन्तीति प्राणा रुद्राः। क्रूरा हि ते मध्यमे वयसि रुद्राः। तथा आदित्याः प्राणाः। ते शब्दादिजातमिदमाददते अत आदित्याः। तृतीयसवनमायुः षोडशोत्तरं वर्षशतमनुसंतनुत यज्ञं समापयतेत्यर्थः। समानमन्यत्। एवमविद्या-फलनिश्चयमित्येतदुदाहरति---एतत् यज्ञदर्शनं ह स्म वै किल तद्विद्वान् महिदासो नामतः इतराया अपत्यमैतरेय आह---किं कस्मात् मामेतदुपतपनं उपतपसि? स त्वं हे रोग! योऽहं यज्ञोऽनेन त्वत्कृतोपतापेन न प्रेष्यामि न मरिष्यामि, वृथा ते श्रमः---इत्येवमाह स्मेति पूर्वेण संबन्धः। स ह्येवंनिश्चयः सन् षोडशं वर्षशतमजीवत्। अन्योऽप्येवंनिश्चयः षोडशसहितं वर्षशतं जीवति। य एवं यज्ञसंपदं वेद स यथोक्तफलमश्नुत इत्यर्थः॥ १६॥

पुरुषयज्ञाङ्गत्वेन कथनम्

स यदशिशिषति यत्पिपासति यन्न रमते ता अस्य दीक्षाः।

अथ यदश्नाति यत्पिबति यद्रमते तदुपसदैरेति। अथ यद्धसति

यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव तदेति । अथ यत्तपो दान-मार्जवमहिꣳसा सत्यवचनमिति ता अस्य दक्षिणाः । तस्मादाहुः सोष्यति असोष्टेति पुनरुत्पादनमेवास्य तन्मरणमेवास्य अवभृथः । तद्धैतत् घोर आङ्गिरसः कृष्णाय देवकीपुत्राय उक्त्वोवाच अपिपास एव स बभूव सोऽन्तवेलायामेतत् त्रयं प्रतिपद्येत अक्षितमसि अच्युतमसि प्राणसꣳशितमसीति तत्रैते द्वे ऋचौ भवतः । आदित्प्रत्नस्य रेतसः । उद्वयं तमसस्परि ज्योतिः पश्यन्त उत्तरꣳ स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तममिति ज्योतिरुत्तममिति ॥ १७ ॥

पुरुषयज्ञाङ्गत्वेनेदमाम्नायते—स यदिति । स पुरुषो **यदशिशिषति यत्पिपासति** अशितुं पातुं चेच्छति इष्टाद्यप्राप्तिनिमित्तं **यन्न रमते** यदेवंजातीयकं दुःखमनुभवति **ता अस्य दीक्षाः** विधियज्ञस्येव दुःखसामान्यात् । **अथ यदश्नाति यत्पिबति यद्रमते** इष्टादिसंयोगात् रतिं चानुभवति **तदुपसदैरुपसद्भिः** समानतामेति । उपसदां पयोव्रतनिमित्तमत्यल्पसुखमतोऽशनादीनामुपसदां च सामान्यम् । **अथ यद्धसति यज्जक्षति यन्मैथुनं चरति स्तुतशस्त्रैरेव** तत्समानतामेति शब्दवत्त्वसामान्यात् । **अथ यत्तपो दानमार्जवमहिंसा सत्यवचनमिति ता अस्य दक्षिणाः** धर्मपुष्टिकरत्वसामान्यात् । यस्मात् यज्ञः पुरुषः तस्मात्तं जनयिष्यति यदा माता तदाहुरन्ये **सोष्यतीति** तस्य मातरम् । यदा च प्रसूता भवति तदा विधियज्ञवदसोष्ट देवदत्तः सोमं सोष्यति । यज्ञदत्तस्सोममसोष्टेति । शब्दसामान्याद्वा पुरुषो यज्ञः । अस्य तत् पुरुषाख्य-यज्ञस्य विधियज्ञस्येव **पुनरुत्पादनमेव** सोष्यति असोष्टेतिशब्दसंबन्धित्वम् । किञ्च पुरुषयज्ञस्य **तन्मरणमेवावभृथः** समाप्तिसामान्यात् । **तद्धैतत्** यज्ञदर्शनं नामतो **घोरः** गोत्रत **आङ्गिरसो** मुनिः **कृष्णाय देवकीपुत्राय** शिष्या-

योक्त्वोवाच । किमुक्तवान्? इत्यत्र एतत् त्रयमुक्तवानिति व्यवहितेन संबन्धः । **सोऽयं कृष्ण** एतद्दर्शनं श्रुत्वान्यविद्याभ्योऽपिपासोऽवितृष्णो **बभूव** । यत्कृष्णस्यान्यविद्यातृष्णाविच्छेदकरी सैवंविधेति विद्या महीकृता । य एवं यथोक्तयज्ञवित् **अन्तवेलायां** मरणकाले **एतन्मन्त्रत्रयं प्रतिपद्येत** जपेत् । किं तन्मन्त्रत्रयम्? आदित्यप्राणावेकीकृत्याक्षितमक्षतमसीत्येकं यजुः । तथा तमेव स्वरूपादप्रच्युतमसीति द्वितीयं यजुः । **प्राणसंशितं** सूक्ष्मतत्त्वमसीति तृतीयं यजुः । तदेतस्मिन् विद्यास्तुत्यर्थे **द्वे ऋचौ** मन्त्रौ **भवतः** । किं जपार्थाविमावपि? न, एतत् त्रयं प्रतिपद्येतेति त्रित्वसंख्याबाधात् । तेन साकं स्यादिति चेन्न; पञ्चसंख्याविधानात् । **आत् इत्** आकारानुबद्धः तकारो निरर्थकः इच्छब्दश्च । **प्रत्नस्य** चिरन्तनस्य **रेतसो** जगत्कारणस्य सतो ज्योतिः प्रकाशमापश्यन्ति । आशब्द उत्सृष्टानुबन्धः पश्यन्तीत्यनेन संबध्यते । किं तज्ज्योतिः पश्यन्ति? इत्यत्र—वासरमहरहरिव तत्सर्वतो व्याप्तं ब्रह्मज्योतिः ब्रह्मचर्यादिसाधनसंपन्ना ब्रह्मविदः पश्यन्तीत्यर्थः । परमपरं ज्योतिः दिवि विद्योतनवति इध्यते दीप्यत इति येन ज्योतिषा इद्धस्सविता तपति चन्द्रमा भाति ग्रहतारकादयो भासन्ते । किंचान्या ऋगाह—उद्वयमिति । स्वाज्ञानलक्षणात् **तमसस्परि** परस्तात् **उद्वयं ज्योतिः** पश्यन् **उत्तर**मादित्यस्थं **पश्यन्तो** वयं तज्ज्योतिः स्वः स्वात्मीयमादित्यस्थं च तदेकं ज्योतिः ये उत्तरमुत्कृष्टतरं **पश्यन्तो** वयमुदगन्म । किमुदगन्म? इत्यत आह—देवमिति । देवत्रा देवेषु सर्वेषु देवं द्योतनावन्तं सूर्यं रश्मिप्राणेरणात् तं सूर्यमुदगन्म **ज्योतिरुत्तमं** सर्वज्योतिर्भ्यः उत्कृष्टतममहो प्राप्ता वयमित्यर्थः । इदं ज्योतिः यजुस्त्रयेण ऋग्भ्यां च स्तुतं प्रकाशितमित्यर्थः । द्विर्वचनं यज्ञकल्पनासमाप्त्यर्थम् ॥ १७ ॥

आध्यात्मिकादिप्रपञ्चस्य ब्रह्मदृष्टिविधानम्

मनो ब्रह्मेत्युपासीत इत्यध्यात्मं अथाधिदैवतमाकाशो ब्रह्मेत्युभयमादिष्टं भवति अध्यात्मं चाधिदैवतं च । तदेतच्चतुष्पाद्ब्रह्म वाक् पादः प्राणः पादश्चक्षुः पादः श्रोत्रं पाद इत्यध्यात्मं अथा-

धिदैवतं अग्निः पादो वायुः पाद आदित्यः पादो दिशः पाद इत्युभयमेवादिष्टं भवति अध्यात्मं चैवाधिदैवतं च। वागेव ब्रह्मणश्चतुर्थः पादः सोऽग्निना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद। प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद। चक्षुरेव ब्रह्मणश्चतुर्थः पादः स आदित्येन ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद। श्रोत्रमेव ब्रह्मणश्चतुर्थः पादः स दिग्भिः ज्योतिषा भाति च तपति च भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद य एवं वेद ॥ १८ ॥

आध्यात्मिकादिप्रपञ्चस्य ब्रह्मदृष्टिविधानार्थमिदमुच्यते—**मनो ब्रह्मेति**। अनेन मनुत इत्यन्तःकरणं मनः। तत् परं ब्रह्मेत्युपासीतेत्येतद्दर्शनस्यात्मविषयत्वादध्यात्ममुच्यते। **अथाधिदैवतमिति** देवताविषयं दर्शनमुच्यते। **आकाशो ब्रह्मेत्येवमुपासीतेत्यध्यात्ममधिदैवतं चोभयं** ब्रह्मविषयत्वेनादिष्टमुपदिष्टं **भवति**। मनआकाशयोः सूक्ष्मत्वेन रूपादिविरलत्वेन सर्वगतत्वात्तदेतन्मनआख्यं **ब्रह्म** चत्वारः पादा अस्येति **चतुष्पात्**। कथं चतुष्पात्त्वं? इत्यत्र **वाक् पादः प्राणश्चक्षुः श्रोत्रमित्येते** चत्वारः पादा **इत्यध्यात्मम्**। एतच्चतुष्पदं मनो ब्रह्मविषयमित्यर्थः। अथाकाशब्रह्मणश्चतुष्पात्त्वं विवृणोति—अथेति। **अथाधिदैवतमग्निर्वायुरादित्यो दिश इति**। एवमेतदुभयमेवाध्यात्मादिभेदेन चतुष्पात् **ब्रह्म आदिष्टं भवति**। इतरपादत्रयापेक्षया **वागेव ब्रह्मणश्चतुर्थः पादः** वक्तव्यविषयस्य वाचि प्रतिष्ठितत्वात्। तथा प्राणो घ्राणः पादः। तत्र गन्धविषयस्य प्रतिष्ठितत्वात्। तथा चक्षुः पादः श्रोत्रं पाद इति मानस-

ब्रह्मणोऽध्यात्मं चतुष्पात्त्वम् । अथाधिदैवतमग्निवाय्वादित्यदिश आकाशब्रह्मण उपलभ्यन्ते । तेनास्याग्न्यादयः पादा उच्यन्ते । इत्यध्यात्मादिभेदेनोभयं तच्चतुष्पात्त्वमादिष्टं भवति । तत्र मानसब्रह्मणो वागेव चतुर्थः पादः । **सोऽग्निनाधिदैवतेन ज्योतिषा भाति च** दीप्यते **तपति च** सन्तापमौष्ण्यं करोति । **य एवं** यथोक्तं **वेद** एवं वेदनफलं **सोऽयं** विद्वान् **कीर्त्या यशसा ब्रह्मवर्चसेन** इद्धो भवति । तथा **प्राण एव ब्रह्मणश्चतुर्थः पादः** । **स वायुना** गन्धग्रहाय **भाति च तपति** चेत्यादि समानम् । तथा **चक्षुः आदित्येन** रूपग्रहणाय **श्रोत्रं** ताव**द्दिग्भिः** शब्दग्रहणाय । सर्वत्र कीर्त्यादि दृष्टफलम् । तत्तत्करणहेयांशविलयाधिकरणब्रह्मसंपत्तिरदृष्टफलम् । **य एवं वेदेति** द्विरुक्ति-दर्शनसमाप्त्यर्था ॥ १८ ॥

आदित्ये सकलब्रह्मदृष्टिकरणम्

आदित्यो ब्रह्मेत्यादेशः तस्योपव्याख्यानं असदेवेदमग्र आसीत् तत्सदासीत् तत्समभवत् तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आण्डकपाले रजतं च सुवर्णं चाभवताम् । तत् यद्रजतꣳ सेयं पृथिवी यत्सुवर्णꣳ सा द्यौः यज्जरायु ते पर्वता यदुल्बꣳ समेघो नीहारो या धमनयः ता नद्यो यद्वास्तेयमुदकꣳ स समुद्रः । अथ यत्तदजायत सोऽसा-वादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन्त सर्वाणि च भूतानि च सर्वे च कामास्तस्मात्तस्योदयं प्रति प्रत्यायनं प्रति घोषा उलूलवः अनूत्तिष्ठन्ति सर्वाणि च भूतानि सर्वे चैव कामाः । स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्ते अभ्याशो ह यदेनꣳ साधवो घोषा आ च गच्छेयुः उप च निम्रेडेरन् निम्रेडेरन् ॥ १९ ॥

आदित्यो ब्रह्मणः पाद इति यदुक्तं तस्मिन् सकलब्रह्मदृष्टिः कर्तव्येतीद-मारभ्यते—आदित्य इति। आदित्यो ब्रह्मेत्यादेश उपदेशः। तत्स्तुत्यर्थं व्याख्यानं क्रियते। इदं जगत् सृष्टेरग्रे प्रागनभिव्यक्तनामरूपमसदासीत्। असतस्तत्कार्यप्रतिषेधान्न केवलमसत्। "कथमसतः सज्जायेत" इति वक्ष्यति च। अस्याव्याकृतनामरूपत्वादसदिवासदित्युच्यते। असदेवेत्यवधारणस्या-व्याकृतनामरूपत्वेन जगदस्तीत्यवधारणपरत्वात्। तद्व्याकृतविषये सच्छब्द-प्रयोगदर्शनाच्च। प्रायशो जगन्नामरूपव्याकरणमादित्यायत्तम्। तदभावे इदमित्थ-मिति ज्ञातुमशक्यत्वात्। आदित्योदयात्पुरा जगतोऽनभिव्यक्तत्वेनादित्यसंबन्ध-वैरल्यात्। असदेवेदमित्युक्तिरादित्यस्तुत्यर्था। सदिति व्यवहृतेरादित्यनिमित्तत्वात्। जगतस्सत्त्वासत्त्वोक्तिः आदित्यब्रह्मोपदेशपरेत्यर्थः। तथा चोपसंहरिष्यति—"आदित्यं ब्रह्मेत्युपास्ते" इति। यदुत्पत्तेः प्रागसच्छब्दवाच्यं तत् नामरूपाभि-व्यक्त्या सदासीत्। अत्यल्पनामरूपव्याकरणतोऽङ्कुरीभूतबीजमिवासीत्। तत् क्रमेण स्थूलभावं समभजत्। तदाण्डं निरवर्तत। दैर्घ्यं छान्दसम्। संवृत्तमासीदित्यर्थः। तदण्डं संवत्सरमात्रामशयत तावन्तं कालं तूष्णीं स्थितं बभूव। तदण्डं तत ऊर्ध्वं वयसामण्डमिव निरभिद्यत निर्भिण्णमभूत्। इत्थं निर्भिण्णाण्डकपाले द्वे रजतं च सुवर्णं चाभवताम्। तत्तयोः कपालयोर्यद्रजतमासीत् सेयं पृथिवी अधोऽण्डकपालमित्यर्थः। यत्कपालं सुवर्णं सा द्यौः तदूर्ध्वाण्डकपालमित्यर्थः। यज्जरायु गर्भवेष्टनमत्रिकाण्ड-द्विशकलीकाले आसीत् ते पर्वता बभूवुः। यदुल्बमल्पगर्भपरिवेष्टनं मेघैः सह वर्तत इति समेघो नीहारः अवश्यायो बभूव। या जातगर्भस्य देहगा धमनयो भूसिराः ता नद्यो बभूवुः। यद्गर्भवस्तौ भवं वास्तेयमुदकं स समुद्रः। अथ गर्भरूपं यत्तदजायत सोऽसावादित्यस्तपति। तं जायमान-मादित्यमनु घोषाः शब्दाः उलूलव उरूरवा विस्तीर्णा रवा उदतिष्ठन्। ईश्वरस्यैवेह प्रथमपुत्रजन्मनि सर्वाणि स्थावरादिभूतानि सर्वे च स्त्र्यन्न-वस्त्रादयः काम्यन्त इति कामाः यस्मादादित्यजन्मनिमित्तास्तस्मात् तस्यादित्य-स्योदयं प्रति प्रत्यायनं प्रति प्रत्यस्तमनम्। यद्वा—पुनः प्रत्यागमनं प्रत्यायनं,

तन्निमित्तीकृत्य सर्वाणि च भूतानि सर्वे चैव कामाः घोषा उल्लूलवश्चा-नूत्तिष्ठन्ति। सवितुरुदयादेवैतत् प्रसिद्धमित्यर्थः। यः कश्चिदेतमेवमादित्यं ब्रह्मेत्युपास्ते तद्भावं प्रतिपद्यते। अभ्याशो ह क्षिप्रम्। यदिति क्रियाविशेषणम्। एनमेवंविदं प्रति साधवो घोषाः साध्वयमिति वार्ता आगच्छेयुः। न केवलं घोषाणामागमनमात्रं किन्तु उप च समीपं चागत्य निम्रेडेरन् परमसुखं च कुर्युरित्यर्थः। द्विर्वचनमादरार्थमध्यायपरिसमाप्त्यर्थश्च ॥ १९ ॥

इति तृतीयोऽध्यायः।

चतुर्थोऽध्यायः

वायुप्राणयोर्ब्रह्मत्वेनोपासनम्

जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस स ह सर्वत आवसथान् मापयांचक्रे सर्वत एव मे अत्स्यन्तीति। अथ ह हꣳसा निशायामतिपेतुः तद्धैवꣳ हꣳसो हꣳसमभ्युवाद हो होऽयि भल्लाक्ष! भल्लाक्ष! जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीः तत्त्वा मा प्रधाक्षीरिति। तमु ह परः प्रत्युवाच कम्बर एनमेतत्सन्तꣳ सयुग्वानमिव रैक्कमात्थेति यो नु कथꣳ सयुग्वा रैक्क इति। यथा कृतायविजितायाधरेयाः संयन्ति एवमेनꣳ सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत् स वेद स मयैतदुक्त इति। तदु ह जानश्रुतिः पौत्रायण

उपशुश्राव स ह संजिहान एव क्षत्तारमुवाच अङ्गारे ह सयुग्वान-मिव रैक्कमात्थेति यो नु कथꣳ सयुग्वा रैक्क इति । यथा कृताय-विजितायाधरेयाः संयन्ति एवमेनꣳ सर्वं तदभिसमेति यत्किंच प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति । स ह क्षत्ता अन्विष्य नाविदमिति प्रत्येयाय तꣳ होवाच यत्रारे ब्राह्मणस्या-न्वेषणा तदेनमर्च्छेति । सोऽधस्तात् शकटस्य पामानं कषमाण-मुपोपविवेश तꣳ हाभ्युवाद त्वं नु भगवः सयुग्वा रैक्क इति अहꣳ ह्यरा३ इति ह प्रतिजज्ञे स ह क्षत्ता अविदमिति प्रत्येयाय ॥ १ ॥

पुरस्ताद्ब्रह्मपाददृष्ट्या वायुप्राणाध्यासो वर्णितः । अथेदानीं वायुप्राणयो-र्ब्रह्मत्वेनोपासनार्थमयमध्याय आरभ्यते । इयमाख्यायिका तु सुखाववोधार्था— **जानश्रुतिरि**तिं । जनश्रुतस्यापत्यं **जानश्रुतिः** । **ह** इत्यैतिह्यार्थः । पुत्रस्य पौत्रः **पौत्रायणः** । श्रद्धापुरस्सरं ब्राह्मणेभ्यो देयमस्येति स **श्रद्धादेयः** । बह्वनेकं धनं दातुं शीलमस्येति **बहुदायी** । यस्य गृहेऽहन्यहनि बहु पक्तव्यमस्ति स **बहुपाक्यः** । एवंगुणसंपन्नो जानश्रुतिः कस्मिंश्चिद्देशविशेषे **आस** बभूव । **स ह सर्वतः** सर्वासु दिक्षु नगरेषु ग्रामेषु च **आवसथाः** आवसन्त्येष्विल्यावसथाः प्राणिनिवासयोग्यस्थलानि तान् **मापयाञ्चक्रे** कारितवानित्यर्थः । **सर्वत** एत्य मदावसथेषु वसन्तः सन्तो मद्दत्तान्नमत्स्यन्तीत्यभिप्रायेण कृतवानित्यर्थः । स कदाचिद्राजा घर्मकाले हर्म्योपरि निषसाद । **अथ** तत्र **ह निशायां** रात्रौ राज्ञोऽन्नदानादिगुणैस्तोषिता देवता **हंसरूपा** भूत्वा महाराजदृग्गोचरप्रदेशेऽति-**पेतुः** पतितवन्तः । **एवं** पततां हंसानां एकः स्वयं पृष्ठतः पतन्नग्रतः पतन्तमभ्युवाद । भो भो ! इति संबोध्य **अयि भल्लाक्ष भल्लाक्ष** ! इत्यादरोक्तिः । **जानश्रुतेः पौत्रायणस्य** पश्य पश्येदमाश्चर्यम् । **समं** तुल्यं **दिवा** द्युलोकव्यापि **ज्योतिस्तेजो**ऽन्नादिदानप्रभवमाततं व्याप्तम् । **तन्मा प्रसाङ्क्षीस्तज्ज्योतिषा**

संबन्धं मा कार्षीः। तज्ज्योतिस्त्वा त्वां मा प्रधाक्षीत् पुरुषव्यत्ययेन मा प्रधाक्षीरिति। तमेवमुक्तवन्तं **परोऽग्रगामी प्रत्युवाच**। अरे! निकृष्टोऽयं राजा। तं **कमु वरमेनं** केन माहात्म्येन **सन्तं युक्तं सयुग्वानं रैक्वमिव त्वमात्थ** रैक्वमिवैनं वक्तुमयुक्तमित्यर्थः। इतर आह—**सयुग्वा रैक्व** इति। **यो नु कथं** त्वयोच्यते नामतः सह युग्वना गन्त्र्या युक्त इति **सयुग्वा**। उक्तवन्तं भल्लाक्ष आह—**यथेति**। **यथा** लोके **कृतो** नाम द्यूतसमये प्रसिद्धश्चतुरङ्कः। **तस्मै कृताय विजिताय** तदर्थमितरे त्रिद्व्येकाङ्कास्त्रेताद्वापरकलिनामानः **संयन्ति** संगच्छन्ते अन्तर्भवन्ति। चतुरङ्के तु आये त्रिद्व्येकाङ्कानां विद्यमानत्वात्तस्मिन्नन्तर्भवन्तीति दृष्टान्तः। **एवमेव** कृतायस्थानीयं रैक्वं त्रेताद्यायस्थानीयं **सर्वं तदभिसमेति** अन्तर्भवति। तत्कथं? लोके तावत् **यत्किञ्च सर्वाः प्रजाः साधु** कर्मजातं **कुर्वन्ति** तत्सर्वं तत्फलं च रैक्वधर्मतत्फलेऽन्तर्भवतीत्यर्थः। **यत्स रैक्वो वेद** तद्वेद्यं यः कश्चिद्वेद **चेत्** तदा रैक्वमिव तमपि सर्वप्राणिकृतधर्मजातं तत्फलं चाभिसमेतीत्यनुवर्तते। **यो मयोक्तो** रैक्वः स एवंप्रभाववानित्युक्त्वा हंसास्तिरोधानं जग्मुः। **तदेतदात्मनः** कुत्सारूपं रैक्वस्य प्रशंसारूपं हंसवाक्यं हर्म्याग्रासनो **जानश्रुतिः पौत्रायणो** राजोपशुश्राव। एवं हंसवाक्यं पुनः पुनः स्मरन् रात्रिशेषमतिवाहयामास। ततः **स** वन्दिभिः प्रबोध्यमान इव **संजिहानः** शयनं परित्यजन्नेव **क्षत्तारमुवाच**। हे **अङ्ग** वत्स **अरे! ह सयुग्वानमिव रैक्वमात्थ**। स हि स्तुत्यर्हो नाहम्। अथवा सयुग्वानं गत्वा रैक्वं त्वमात्थ। तद्दिदृक्षा ममास्ति। इवशब्दोऽवधारणार्थः। **स ह क्षत्ता** प्रत्युवाच क्षत्तुः राज्ञः प्रियकारित्वात्। **यो नु कथं सयुग्वा रैक्वः? इति** क्षत्त्रा पृष्टः स च भल्लाक्षवचनतः तच्चिह्नं स्मरन् तदुक्तिमवोचत्। **यथा कृताये**-त्याद्युक्तार्थम्। **स ह क्षत्ता** नगरं ग्रामं वा गत्वा रैक्वमन्विष्य **नाविदं** नाज्ञासिषं इति **प्रत्येयाय** प्रत्यागतवान्। **तं** क्षत्तारं **स होवाच अरे क्षत्तः! ब्राह्मणस्य** ब्रह्मविदोऽन्वेषणा **यत्र**ारण्यनदीपुलिनादौ अनुमार्गणं भवति **तत्त्रैनं** रैक्वम**र्च्छ** मार्गणं कुर्वित्युक्तः क्षत्तान्विष्य विजनप्रदेशे गन्त्र्याश्शकटस्याधस्तात् **पामानं कषमाणं** कण्डूयमानं रैक्वं दृष्ट्वा नूनमयं सयुग्वा रैक्व इति विनयेन

तत्समीपमुपोपविवेश। हे भगवो भगवन्! त्वन्नु सयुग्वा रैक्वः? इति रैक्वं तं हाभ्युवाद। क्षत्त्रैवं पृष्टो मुनिः अरे! अहमस्मि रैक्व इत्यनादरवत् प्रतिजज्ञेऽभ्युपगतवान्। स क्षत्ता तं विज्ञाय अविदं ज्ञातवानस्मीति राजानं प्रति प्रत्येयाय प्रत्यागत्य तदुदन्तं विज्ञापयामासेत्यर्थः ॥ १ ॥

राज्ञा रैक्वसमीपगमनम्

तदुह जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कमश्वतरीरथं तदादाय प्रतिचक्रमे त॰ हाभ्युवाद ॥ १ ॥ रैक्व! इमानि षट् शतानि गवामयं निष्कोऽयमश्वतरीरथो नु म एतां भगवो देवता॰ शाधि यां देवतामुपास्स इति। तमु ह परः प्रत्युवाचाह हारेत्वा शूद्र! तवैव सह गोभिरस्त्विति तदुह पुनरेव जानश्रुतिः पौत्रायणः सहस्रं गवां निष्कमश्वतरीरथं दुहितरं तदादाय प्रतिचक्रमे। त॰ हाभ्युवाद रैक्व! इद॰ सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जाया अयं ग्रामो यस्मिन्नास्से अन्वेव मा भगवः शाधीति। तस्या ह मुखमुपोद्गृह्णन् उवाच आजहार इमाः शूद्र! अनेनैव मुखेनालापयिष्यथा इति ते हैते रैक्व! पर्णा नाम महावृषेषु यत्रास्मा उवास तस्मै होवाच ॥ २ ॥

क्षत्तृमुखतस्तदभिप्रायं ज्ञात्वा तत्समीपं स राजा गतवानित्याह—तदु हेति। तत् ऋषेर्गार्हस्थ्यानुकूलधनार्थितामवगम्य उ ह एव जानश्रुतिः पौत्रायणः षट् शतानि गवां निष्कं कर्णाभरणादिकं अश्वतरीभ्यां युक्तं रथं धनं च तदादाय रैक्वं प्रति प्रतिचक्रमे। तं च गत्वाभ्युवाद—हे रैक्व! गवां षट् शतानीमानि मया त्वदर्थमानीतानि। अयं निष्कोऽश्वतरीरथश्च

इदमेतद्धनं चादत्स्व । हे **भगवः! अनु म एतां** मम तामेव देवतां **यां देवता-मुपास्स इति** तदुपदेशेन मामनुशाधीत्यर्थः । तमेवमुक्तवन्तं राजानं **परो** रैक्वः **प्रत्युवाच** । अहेत्यनर्थको निपातः पृथगवधारणश्रवणात् । हारेण युक्ता गन्त्री सेयं **हारेत्वा गोभिस्सह तवैवास्तु** । हे **शूद्र** ! किमनेन मे प्रयोज-नमस्ति ? राज्ञः शूद्रत्वं कुतः ? इत्यत्र भल्लाक्षवचःश्रवणादेनं शुक् अविवेश । तेन शुचायं द्रवतीति ज्ञात्वा मुनिराह—**शूद्रेति** । यद्वा—शुश्रूषां विना केवलधनेनो-पजगामेति । न त्वयं जात्या शूद्रः । शूद्रस्य ब्रह्मविद्यानधिकारात् "तस्माच्छूद्रो निर्विद्योऽभवत्" इति श्रुतेः । यद्ययं शूद्रस्तदा कथं विद्यार्थं ब्राह्मणसमीपं व्रजेत् ? अथवाल्पधनमनेनाहृतमिति शूद्र इति रुषा उक्तवान् । **तदु ह जानश्रुतिः पौत्रायणः** ऋषेरभिप्रायं ज्ञात्वा **गवां सहस्रा**दिकमृषेरभिमतामात्मनो **दुहितरं तदादाय प्रतिचक्रमे । रैक्व ! इदं सहस्रं गवामयं निष्कोऽयमश्वतरीरथ इयं जाया** मम **दुहितानीता** । **अयं ग्रामो** मया त्वदर्थे परिकल्पितः । तदेतत्सर्वमादाय हे **भगवः! मामनुशाधी**त्युक्तः जायार्थमानीताया राज्ञो दुहि-तुर्हैव विद्याया मुखद्वारतामुपोद्गृह्णन् अनुजानन्नुवाच ।

> ब्रह्मचारी धनदायी मेधावी श्रोत्रियः प्रियः ।
> विद्यया वापि विद्यां यस्तानि तीर्थानि षण्मम ॥

इति स्मृत्यनुरोधेन राजानमुवाचेत्यर्थः । **इमा** गोप्रभृतय **आजहार** आहृतवानसि । **शूद्रेति** पूर्ववत् । **अनेनैव मुखेन** विद्याग्रहणतीर्थेना**लापयिष्यथाः** मां प्रीणय-सीत्यर्थः । **हे रैक्व! ते हैते** ग्रामाः **पर्णा नाम** विख्याताः सन्ति । तेषु **महावृषेषु** देशेषु **यत्र** येषु ग्रामेषु **उवास** रैक्व उषितवान् तांस्तात् ग्रामान् राजास्मै रैक्वाय ददौ । स रैक्व एवं दत्तवते ह किल विद्या**मुवाच** ॥ २ ॥

रैक्वेण राज्ञे संवर्गविद्योपदेशः

वायुर्वाव संवर्गो यदा वा अग्निरुद्वायति वायुमेवाप्येति यदा सूर्योऽस्तमेति वायुमेवाप्येति यदा चन्द्रोऽस्तमेति वायुमेवाप्येति ।

यदाप उच्छुष्यन्ति वायुमेवापियन्ति वायुर्ह्येव एतान् सर्वान् संवृङ्क्त इत्यधिदैवतम् । अथाध्यात्मं प्राणो वाव संवर्गः स यदा स्वपिति प्राणमेव वागप्येति प्राणं चक्षुः प्राणꣳ श्रोत्रं प्राणं मनः प्राणो ह्येवैतान् सर्वान् संवृङ्क्त इति । तौ वा एतौ द्वौ संवर्गौ वायुरेव देवेषु प्राणः प्राणेषु । अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे तस्मा उ ह न ददतुः । स होवाच महात्मनश्चतुरो देव एकः कः स जगार भुवनस्य गोपाः तं कापेय नाभिपश्यन्ति मर्त्या अभिप्रतारिन् बहुधा वसन्तं यस्मै वा एतदन्नं तस्मा एतन्न दत्तमिति । तदु ह शौनकः कापेयः प्रतिमन्वानः प्रत्येयाय आत्मा देवानां जनिता प्रजानाꣳ हिरण्यदꣳष्ट्रो बभसोऽनसूरिर्महान्तमस्य महिमानमाहुः अनद्यमानो यदनन्नमत्तीति [नि] वै वयं ब्रह्मचारिन् नेदमुपास्महे दत्तास्मै भिक्षामिति । तस्मा उ ह ददुस्ते वा एते पञ्चान्ये पञ्चान्ये दश सन्तस्तत्कृतं तस्मात् सर्वासु दिक्षु अन्नमेव दशकृतꣳ सैषा विराडन्नादी तयेदꣳ सर्वं दृष्टꣳ सर्वमस्येदं दृष्टं भवति अन्नादो भवति य एवं वेद य एवं वेद ॥ ३ ॥

राज्ञे संवर्गविद्यामुपदिदेशेत्याह--वायुरिति । बाह्यो वायुर्वा बाह्यादिसंग्रसनात् संवर्गः । वावेत्यवधारणार्थः । वायोः संवर्गत्वं कुतः ? इत्यत आह—यदेति । यदा वा यस्मिन्काले वै अग्निरुद्वायति उपशाम्यति तदासावग्निर्वायुमेवाप्येति वायुभावमेतीत्यर्थः । यदा सूर्योऽस्तमेति वायुमेवाप्येति । यदा चन्द्रोऽस्तमेति वायुमेवाप्येति तयोरदर्शनप्राप्तेर्वायुनिमित्तत्वात् । यदा प्रलये

सूर्याचन्द्रमसोस्तेजोरूपत्वेन वायावप्ययं स्यादित्यत्र "तेजो वायौ विलीयते" इति श्रुतेः । **यदाप उच्छुष्यन्ति वायुमेवापियन्ति** । यस्माद्वायुर्महाबलानग्न्यादीनेतान् **संवृङ्क्ते** अतो वायुः संवर्गगुणत्वेनोपास्यः देवतासु संवर्गनिमित्त **इत्यधिदैवतम्** । **अथानन्तरमध्यात्ममुच्यते** । आत्मसंसर्गनिमित्तत्वान्मुख्यः **प्राणो वाव संवर्गः** । **यदा** यस्मिन् काले **स** पुरुषः **स्वपिति** तदा वायुमग्निरिव **प्राणमेव वागप्येति** । तथा **चक्षुः श्रोत्रं मनश्च प्राणमेवाप्येति** । हि यस्मात् **प्राण एवैतान्** वागादीन् **संवृङ्क्त** इति प्राणोऽपि संवर्गगुणत्वेनोपास्य इत्यर्थः । अग्न्यादिबाह्यप्रपञ्चविलयाधारो वायुस्तत्पदार्थः परमात्मा । वागाद्यन्तःप्रपञ्चविलयाधारः प्राणः प्रत्यगात्मा । तयोराधेयनिरूपिताधारतावैरल्ये तदवशिष्टं ब्रह्मेत्यर्थात् सिद्धं भवतीति भावः । स्वाज्ञदृष्ट्या तु **तौ वा एतौ द्वौ संवर्गौ** संवर्जनगुणविशिष्टत्वात । तत्र **देवेषु वायुरेव** संवर्गः । वागादिप्राणेषु मुख्यप्राणो हि संवर्गः । तयोः स्तुत्यर्थमाख्यायिकामवतारयति—**अथेति** । संवर्गद्वयकथनानन्तरं शुनकस्यापत्यं **शौनकं** कपिगोत्रजं **कापेयं** नामतोऽभिप्रतारिणं **च** कक्षसेनस्यापत्यं **काक्षसेनिं** भोजनायोपविष्टौ सूपकारैः **परिविष्यमाणौ** तौ प्रति ब्रह्मविच्छौण्डो **ब्रह्मचारी बिभिक्षे** भिक्षितवान् । तज्ज्ञानजिज्ञासया **तस्मा उ ह** भिक्षां **न ददतुः** । किमयं वक्ष्यति ? इति न दत्तवन्तावित्यर्थः । **स ह उवाच** ब्रह्मचारी । द्वितीयाबहुवचनं **महात्मनश्चतुर** इति । अग्न्यादीनेको **देवो** वायुः संवृङ्क्ते वागादीन् प्राणः । **कोऽसौ** प्रजापतिः जगार ग्रस्तवान् । **कस्स जगार** ? इति प्रश्ने भवन्त्यस्मिन् भूतानीति भुवनं भूरादिचतुर्दशलोकः । तस्य **भुवनस्य** एको देवः **गोपाः** गोप्ता । **तं** प्रजापतिं **कापेय ! मर्त्या नाभिपश्यन्ति** न जानत इत्यर्थः । तेषामविवेकित्वेन मरणधर्मविशिष्टत्वात् । हे **अभिप्रतारिन्** ! अध्यात्माधिदैवाधिभूतप्रकारैर्**बहुधा वसन्तं** प्रजापतिम् । **यस्मै वा एतदहन्यहन्यन्नमदनाय** ह्रीयते संस्क्रियते च **तस्मै** प्रजापतये **न दत्तमेतदन्नमिति** ब्रह्मचारिणो वचनं **शौनकः कापेयः प्रतिमन्वानो** मनसा सम्यगालोचयन् ब्रह्मचारिणं **प्रत्येयाय**—गत्वा न पश्यन्ति मर्त्या इति यं त्वमवोचस्तं वयं सर्वात्मेति पश्यामः । किञ्च वायुरूपेणाग्न्यादिदेवानात्मन्युप-

संहृत्य पुनर्**जनिता**ेत्पादयिता । एतदधिदैवतं तथाध्यात्मं च । प्राणरूपेण वागादिकरणानां **प्रजानां जनिता। हिरण्यदंष्ट्रः** अमृतदंष्ट्रः । **बभसो** भक्षणशीलः । सूरिः सर्वज्ञः तद्विपरीतोऽसूरिः तत्प्रतिषेधो**ऽनसूरिः** सूरिरेवेत्यर्थः । **अस्य** प्रजापतेर्**महान्तं महिमानं** विभूतिं ब्रह्मविदः प्राणमाहुः । यस्मादयमन्यै**रनद्यमानो यद**ग्निवागादिदेवतारूपं **तदनन्नमत्ति। नि वा** इति निरर्थकौ निपातौ । हे **ब्रह्मचारिन्! वयं** आ **इद**मेव **ब्रह्मोपास्महे** इतोऽन्यन्न वयमुपास्महे । इदमहमस्मीति परमेव ब्रह्मोपास्मह इत्यर्थः । स्वभृत्यान् **दत्तास्मै भिक्षा**मित्यवोचत् । **ते** वै भृत्या भिक्षा**मस्मा उ ह ददुः**। ये गृह्यन्ते **ते वा एते** अग्न्यादयो वागादिभ्यो**ऽन्येऽ**धिदेवतारूपाः **पञ्च**। तत्सर्वग्रसिता वायुः तथा तेभ्यो**ऽन्ये पञ्चा**ध्यात्मसंज्ञिका वागादयः तत्सर्वग्रासो प्राणश्च संख्यया सर्वे दश भवन्ति । **ते दश सन्तः** एतत्सर्वं **तत्कृतं** भवति । एक आयः चतुरङ्कश्चत्वारः । त्रयोऽपरे त्र्यङ्काः । द्वावन्यौ द्व्यङ्कौ । यदेकान्य एकाङ्कः । इत्येव दश सन्तः । यस्मादेवं **तस्मात् सर्वासु दिक्षु** अग्न्याद्या वागाद्याश्च दशसंख्यासामान्यात् **अन्नमेव**। "दशाक्षरा विराट् विराडन्नं" इति श्रुतितोऽन्नमेव **दश कृतं** दशसंख्यासामान्यात् चतुरङ्कायत्वेन कृतेऽन्तर्भावात्। **सैषा विराट्** दशसंख्या सती अन्नमश्नातीत्य**न्नादी**। दशसंख्यासु नवसंख्या अन्तर्भूतेत्यतोऽन्नमन्नादिनी च। तथा विद्वान् दशदेवताभूतस्सन् विराट्त्वेन दशसंख्ययान्नं कृतसंख्ययान्नादी। तया अन्नान्नादिन्या **एवेदं** दशदिक्स्थं **सर्वं** जगत् **दृष्टं** कृतसंख्याभूतया उपलब्धमित्यर्थः । एवंविदो**ऽस्य** कृतसंख्याभूतस्य दशदिक्संबद्धं **सर्वं दृष्टमुपलब्धं भवति**। किंच **अन्नादश्च भवति य एवं वेद** तस्य यथोक्तदर्शिनः स्वदर्शनानुरूपं फलं भवतीत्यर्थः। द्विरुक्तिरुपासनापरिसमाप्त्यर्था ॥ ३ ॥

श्रद्धातपसोः ब्रह्मदृष्टिविधानम्

सत्यकामो ह जाबालो जबालां मातरमामन्त्रयांचक्रे ब्रह्मचर्यं भवति ! विवत्स्यामि किंगोत्रो न्वहमस्मीति । सा हैनमुवाच

नाहमेतद्वेद तात ! यद्गोत्रस्त्वमसि बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि स सत्यकाम एव जाबालो ब्रुवीथा इति । स ह हारिद्रुमतं गौतममेत्य उवाच ब्रह्मचर्यं भगवति वत्स्यामि उपेयां भगवन्तमिति । तꣳ होवाच किंगोत्रो नु सोम्य ! असीति स होवाच नाहमेतद्वेद भो यद्गोत्रोऽहमस्मि अपृच्छं मातरꣳ सा मा प्रत्यब्रवीत् बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे साहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति सोऽहꣳ सत्यकामो जाबालोऽस्मि भो इति । तꣳ होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधꣳ सोम्य ! आहर उप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानामबलानां चतुःशता गा निराकृत्य उवाच इमाः सोम्य ! अनुसंव्रजेति ता अभिप्रस्थापयन्नुवाच नासहस्रेणावर्तयेति स ह वर्षगणं प्रोवास ता यदा सहस्रꣳ संपेदुः ॥ ४ ॥

अन्नान्नादित्वलक्षणमध्यात्माधिदैवतप्रपञ्चमेकीकृत्य पुनः षोडशधा प्रविभज्य तत्र श्रद्धातपसोः ब्रह्मविद्याङ्गत्वेन ब्रह्मदृष्टिर्विधातव्येतीयमाख्यायिकारभ्यते— सत्यकाम इति । नामतः सत्यकामः । हकार ऐतिह्यार्थः । जबालाया अपत्यं जाबालः जबालां मातरमामन्त्रयांचक्रे । किमिति ? हे भवति ! आचार्यकुले स्वाध्यायग्रहणनिमित्तं ब्रह्मचर्यं विवत्स्यामि । किं मम गोत्रम् ? किंगोत्रो न्वहमस्मि ? इति । एवं पृष्टा जबाला सा हैनं पुत्रमुवाच । हे तात ! यद्गोत्रस्त्वमसि नाहमेतत्तव गोत्रं वेद । कथं न वेत्थ ? इत्युक्ता तमाह—बह्विति । भर्तृगृहेऽतिथ्यभ्यागतेभ्यो बहु परिचर्यां चरन्त्यहं परि-

चारिणी स्याम्। तेन परिचरणचित्तेन गोत्रादिस्मरणे मम मनो नाभूत्। यौवनकाले त्वामलभे लब्धवत्यस्मि। तदैव ते पिता उपरतः। अनाथा नाहमेतद्वेद यद्गोत्रस्त्वमसि। जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसि। स त्वं सत्यकाम एवाहं जाबालोऽस्मीत्याचार्याय ब्रुवीथाः यद्याचार्येण पृष्टस्तदेत्यर्थः। स ह सत्यकामो हरिद्रुमतोऽपत्यं हारिद्रुमतं गोत्रतो गौतममेत्य गत्वा तं होवाच—ब्रह्मचर्यं भगवति पूजावति विवत्स्यामि। अत उपेयामुपगच्छेयं शिष्यत्वेन भगवन्तमित्युक्तवन्तं तं होवाच गौतमः। विज्ञातकुलगोत्रो हि शिष्य उपनेतव्य इति मत्वा किंगोत्रो नु सोम्यासि? इति गौतमेन पृष्ट आह सत्यकामः स होवाच। नाहमेतद्वेद भोः! यद्गोत्रोऽहमस्मि। किन्त्वपृच्छं मातरम्। सा तु मां प्रत्यब्रवीत्। बह्वहं चरन्तीत्यादि पूर्ववत्। तस्या अहं वचः स्मरामि। सोऽहं सत्यकामो जाबालोऽस्मि भोः! इति। गौतमस्तं होवाच—एतदार्जवयुक्तं वचो ब्राह्मणो विशेषेण वक्तुमर्हति ब्राह्मणानामृजुस्वभावात्। यस्मान्न सत्यात् ब्राह्मणजातिधर्मात् अगाः न व्यपेतवानसि अतो ब्राह्मण! त्वामुपनेष्ये। उपनयनसंस्कारार्थं समिधं सोम्य! आहरेत्युक्त्वा तमुपनीय कृशानामबलानां चतुश्शता गा निराकृत्योवाच। इमाः सोम्य! अनुसंव्रजेत्युक्तः ता अरण्यं प्रत्यभिप्रस्थापयन्नुवाच। नासहस्रेणापूर्णेन नावर्तय न प्रत्यागच्छ। स च गुरुणैवमुक्तः तृणोदकबाहुल्यद्वन्द्वरहितारण्ये गाः प्रवेश्य स ह वर्षगणं प्रोवास। तत्र वसतानेन गावः सम्यक् रक्षिताः। यदा सहस्रं ताः संपेदुः तावन्तं कालं गाः पालयन् तत्रैव उषितवानित्यर्थः ॥ ४ ॥

ऋषभरूपेण वायुना सत्यकामस्यानुग्रहः

अथ हैनं ऋषभोऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव प्राप्ताः सोम्य! सहस्र९ स्मः प्रापय न आचार्यकुलम्। ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच

प्राची दिक्कला प्रतीची दिक्कला दक्षिणा दिक्कला उदीची दिक्कला एष वै सोम्य! चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम । स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते प्रकाशवानस्मिँल्लोके भवति प्रकाशवतो ह लोकान् जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्ते ॥ ९ ॥

तत्कृतब्रह्मचर्यश्रद्धादिसाधनसन्तुष्टो वायुः ऋषभभावमेत्य तमनुगृह्णातीत्याह—अथेति । अथ हैनमृषभोऽभ्युवाद सत्यकाम! इति । भगव इति ह प्रतिवचनं शुश्राव दत्तवान् । प्राप्ताः सोम्य! सहस्रं स्मः । पूर्णा तव प्रतिज्ञा । अतः प्रापय नोऽस्मानाचार्यकुलम् । अहं परस्य ब्रह्मणः पादं ते ब्रवाणीत्युक्तः प्रत्युवाच । ब्रवीतु मे मह्यं भगवानित्युक्त ऋषभः तस्मै सत्यकामायोवाच ब्रह्मपादचतुर्थांशमुक्तवान् । स कीदृशः? इत्यत्र प्राची दिक् कलेत्यादि । एष वै सोम्य! ब्रह्मणः पादः । चतस्रः कला अवयवा यस्येति सोऽयं चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नाम प्रकाशवानित्येव नामाभिधानं यस्य । तथोत्तरेऽपि पादाः त्रयः ब्रह्मणश्चतुष्कलाः । स यः कश्चिदेतमेवं ब्रह्मणश्चतुष्कलं पादं विद्वान् प्रकाशवान् प्रकाशगुणविशिष्टमुपास्ते उपासनाफलं अस्मिन् लोके प्रकाशवान् प्रख्यातो भवति । अदृष्टफलं तु प्रकाशवतो देवजातस्य लोकान् जयति । य एतमेवं विद्वान् चतुष्कलं पादं ब्रह्मणः प्रकाशवानित्युपास्त इति ॥ ९ ॥

अग्निना ब्रह्मपादकथनम्

अग्निः ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुः तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश । तमग्निरभ्युवाद सत्यकाम३

इति भगव इति ह प्रतिशुश्राव । ब्रह्मणः सोम्य ! ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच पृथिवी कला अन्तरिक्षं कला द्यौः कला समुद्रः कला एष वै सोम्य ! चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम । स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते अनन्तवानस्मिँल्लोके भवति अनन्तवतो ह लोकान् जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणोऽनन्तवानित्युपास्ते ॥ ६ ॥

वृषभोऽयमग्निः ते पादं वक्तेत्युक्त्वा उपररामेत्याह—अग्निरिति। स सत्यकामो ह श्वोभूते नित्यकर्मादि कृत्वाचार्यकुलं प्रति गा अभिप्रस्थापयाञ्चकार। ता गावो यत्र यस्मिन् देशे अभि सायं बभूवुः तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः ऋषभवचो ध्यायन् प्राङ्मुख उपविवेश । सत्यकाम ! इति तमग्निरभ्युवाद । स भगव इति ह प्रतिशुश्राव प्रतिवचनं ददौ । ब्रह्मणः सोम्य ! ते पादं ब्रवाणीति । ब्रवीतु मे भगवानिति । तस्मै होवाच—पृथिवी कला । अन्तरिक्षं कला । द्यौः कला। समुद्रः कला इत्यात्मगोचरमेव दर्शनमग्निरब्रवीत् । एष वै सोम्य ! चतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम । स यः कश्चित् यथोक्तमनन्तगुणत्वेन ब्रह्मणः पादमुपास्ते स तद्गुणो भवति। स्वयममृतो भूत्वानन्तवतो ह लोकान् जयतीति पूर्ववत् ॥ ६ ॥

हंसेन ब्रह्मपादकथनम्

हꣳसस्ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश । तꣳ हꣳस उपनिपत्य

अभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव । ब्रह्मणः सोम्य ! ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच अग्निः कला सूर्यः कला चन्द्रः कला विद्युत् कला एष वै सोम्य ! चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम । स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ज्योतिष्मानस्मिँल्लोके भवति ज्योतिष्मतो ह लोकान् जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मणो ज्योतिष्मानित्युपास्ते ॥ ७ ॥

सोऽग्निः हंसस्ते पादं वक्तेत्युक्त्वा उपररामेत्याह—हंस इति । हंसस्ते पादं वक्तेति । आदित्यो हंसः शौक्ल्यात् पतनसामान्याच्च । स ह श्वोभूते उक्तार्थमेतत् । हंसो ज्योतिर्विषयदर्शनं प्रोवाच । अत एव हंसस्यादित्यत्वं स्पष्टमित्यर्थः । विद्वत्फलं ज्योतिष्मान् दीप्तियुक्तोऽस्मिन् लोके भवति । मृत्वाग्न्यादिज्योतिष्मत एव लोकान् जयति । उक्तार्थमेतत् ॥ ७ ॥

मद्गुना ब्रह्मपादकथनम्

मद्गुः ते पादं वक्तेति स ह श्वोभूते गा अभिप्रस्थापयांचकार ता यत्राभि सायं बभूवुस्तत्राग्निमुपसमाधाय गा उपरुध्य समिधमाधाय पश्चादग्नेः प्राङुपोपविवेश । तं मद्गुरुपनिपत्य अभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव । ब्रह्मणः सोम्य ! ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच प्राणः कला चक्षुः कला श्रोत्रं कला मनः कला एष वै सोम्य ! चतुष्कलः पादो ब्रह्मण आयतनवान्नाम । स य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मण

आयतनवानित्युपास्ते आयतनवानस्मिँल्लोके भवति आयतनवतो ह लोकान् जयति य एतमेवं विद्वाꣳश्चतुष्कलं पादं ब्रह्मण आयतनवानित्युपास्ते ॥ ८ ॥

हंसोऽपि मद्गुः ते पादं वक्तेत्युक्त्वा उपररामेत्याह---मद्गुः ते पादं वक्तेति। मद्गुरिति जलचरपक्षिविशेषः। अप्संबन्धादसौ प्राण इत्यर्थः। पूर्ववत् मद्गुः स्वविषयमेव दर्शनमुवाचेत्याह—प्राणः कला चक्षुः कला इत्यादि। आयतनं मनः सर्वकरणानां मनआयतनत्वात्। अस्मिन् लोक आयतनवानाश्रयवान् भवति। आयतनवतो ह लोकान् जयति। य एतमित्यादि पूर्ववत् ॥८॥

सत्यकामेनाचार्यकुलगमनं विद्योपदेशश्च

प्राप हाचार्यकुलं तमाचार्योऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव। ब्रह्मविदिव वै सोम्य! भासि को नु त्वानुशशास इति अन्ये मनुष्येभ्य इति ह प्रतिजज्ञे भगवाꣳस्त्वेव मे कामे ब्रूयात्। श्रुतꣳ ह्येव मे भगवद्दृशेभ्य आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापदिति तस्मै हैतदेव उवाच अत्र ह न किंचन वीयायेति वीयायेति ॥ ९ ॥

एवं सत्यकामो ब्रह्मवित्पदमासाद्य स्वाचार्यनिकटं प्रापेत्याह—प्राप हाचार्यकुलं इति। चिन्तासर्वस्वविरलतया प्रसन्नकरणग्रामो ब्रह्मवित् तथा भासीत्यर्थः। को न्विति वितर्कयन्नुवाच—कस्त्वामनुशशास? इति। स च सत्यकाम आह—अन्य इति। भगवच्छिष्यं मां कोऽन्यो वा मनुष्योऽनुशासितुमुत्सहते? अतो मनुष्येभ्योऽन्ये मामनुशिष्टवन्तो देवाः। अतो मनुष्येभ्योऽन्य इति ह प्रतिजज्ञे प्रतिज्ञातवानित्यर्थः। भगवांस्त्वेव मे कामे ब्रूयात् मे मम कामे इच्छायां ब्रूयात्। नाहं भगवदन्योक्तं गणयामीत्यर्थः। श्रुतं ह्येव मे

भगवद्दृशेभ्यः आचार्याद्धैव विद्या विदिता साधिष्ठं प्रापत् इति। भगवत्समेभ्यो मया आचार्याद्धैव विद्या विदिता। सैव विद्या साधिष्ठं साधुतमत्वं प्रापत् भवत्कटाक्षत इत्यर्थः। अतो भगवानेव ब्रूयादित्युक्तः आचार्य आह— **तस्मै हैतदेवोवाच अत्र ह न किंचन वीयायेति।** देवताभिर्योक्ता तामेव विद्यामुवाचेत्यर्थः। **अत्र ह** षोडशकलविद्यायां **न किञ्चन** एकदेशमपि वीयाय न्यूनता न ह्यस्तीत्यर्थः। द्विरुक्तिर्विद्यापरिसमाप्त्यर्था॥ ९॥

उपकोसलाय त्रेताग्निभिः संभूय ब्रह्मोपदेशः

उपकोसलो ह वै कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास तस्य ह द्वादशवर्षाण्यग्नीन् परिचचार स ह स्म अन्यानन्तेवासिनः समावर्तयन् तꣳ ह स्मैव न समावर्तयति। तं जायोवाच तप्तो ब्रह्मचारी कुशलमग्नीन् परिचचारीन्मा त्वाग्नयः परिप्रवोचन् प्रब्रूह्यस्मा इति तस्मै हाप्रोच्यैव प्रवासांचक्रे। स ह व्याधिनानशितुं दध्रे तमाचार्यजायोवाच ब्रह्मचारिन्! अशान किंनु नाश्नासि? इति स होवाच बहव इमेऽस्मिन् पुरुषे कामा नानात्यया व्याधिभिः प्रतिपूर्णोऽस्मि नाशिष्यामीति। अथ हाग्नयः समूदिरे तप्तो ब्रह्मचारी कुशलं नः पर्यचारीत् हन्तास्मै प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म इति। स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कं च तु खं च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणं च हास्मै तदाकाशं च ऊचुः॥ १०॥

पूर्ववत् श्रद्धातपसोः ब्रह्मविद्यासाधनत्वं प्रदर्शयन् प्रकारान्तरेण ब्रह्मविद्यामारभते। आख्यायिकामवतारयति—**उपकोसल इति।** नामतो ह वा उप-

कोसलः कमलस्यापत्यं **कामलायनः सत्यकामे जाबाले ब्रह्मचर्यमुवास ।** तस्य स्वाचार्यस्याग्नीन् द्वादशवर्षाणि **परिचरणं** कृतवानित्यर्थः । **स ह स्म अन्यानन्तेवासिनः समावर्तयंस्तं ह स्मैव न समावर्तयतीति ।** सोऽयमाचार्योऽन्यान् स्वाध्यायं ग्राहयित्वा समावर्तयन् तत्रोपकोसलमेकं न समावर्तयति स्म ह । तस्य चित्तशुद्धयपूर्तेरित्यर्थः । उपकोसले करुणया स्वभर्तारं **जायोवाचे**त्याह—**तमिति** । एवमयं **ब्रह्मचारी** अग्निपरिचरणं कृतवान् । यतो भवानग्निभक्तं न समावर्तयति **अतोऽग्नयस्त्वा** त्वामस्मद्भक्तं न समावर्तयतीति **मा परिप्रवोचन** तव गर्हणं न कुर्युः । अतस्त्वरयास्मै शिष्याय तदभिलषितब्रह्मविद्यां **प्रब्रूहि** । एवं जाययोक्तोऽपि **तस्मै हाप्रोच्यैव प्रवासाञ्चक्रे** इति साधनवैकल्यधियेत्यर्थः । ततः किम्? इत्यत आह—**स ह** इति । **स** उपकोसलो **मनो**व्याधिनानशनव्रतं कर्तुं मनो **दध्रे** निश्चयं कृतवानित्यर्थः । आचार्यजाया तमुवाचेत्याह—तूष्णीमनश्नन् अग्न्यगारेऽवस्थितं **तमाचार्यजाया** हे **ब्रह्मचारिन्! अशान** भुङ्क्ष्व । **किन्नु** कस्मात्कारणान्नाश्नासि? **इत्युवाच ।** एवमुक्तः स होवाचेत्याह—**स होवाच** इति । **अस्मिन्नकृतार्थे पुरुषे बहवः** कर्तव्येच्छाविषयाः **कामाः** । नाना अत्ययोऽतिगमनं येषां कर्तव्यचिन्तारूपव्याधीनां ते **नानात्यया** व्याधयः । तैर्यतः **प्रतिपूर्णोऽस्मि** अतो **नाशिष्यामीत्युक्त्वा** उपरराम । ततः किं जातम्? इत्यत आह—**अथाग्नय** इति । इत्थं तूष्णींभूते ब्रह्मचारिणि **अथ हाग्नयस्त्रयो**ऽपि तत्कृतशुश्रूषया कारुण्याविष्टाः सन्तः **समूदिरे** त्रयः संभूय उक्तवन्त इत्यर्थः । अस्मत्कृते **तप्तो ब्रह्मचारी कुशलं नः पर्यचारीत्** यतो निरशनः सन् परिचरणं कृतवान् अतो **हन्तेदानीं अस्मै** ब्रह्मचारिणेऽस्मद्भक्ताय दुःखिताय तपःश्रद्धान्विताय सर्वे वयं ब्रह्मविद्यां **प्रब्रवामेति तस्मै होचुः प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति ।** तदुपदेशमाकर्ण्यार्धप्रबुद्धस्स **होवाच—प्राणो ब्रह्मेति** यद्भवद्भिरीरितम**हं** तत् **विजानामि ।** प्राणस्य सर्वजीवननिमित्तत्वेन प्रसिद्धपदार्थत्वात् । अतः प्राणस्य ब्रह्मत्वं युक्तमेवेत्यर्थः । **कं च तु खं च न विजानामीति ।** कंखंशब्दयोः सुखाकाशविषयत्वेन कथमत्र ब्रह्मचारिणो ज्ञानम्? इति चेन्न; कंखंशब्दवाच्यसुखा-

काशयोरचेतनत्वेनोद्भूतप्रध्वंसित्वात् तत् कथं ब्रह्म ? इति सन्दिहानो न विजानामीत्युक्तवान्। एवमुक्तवन्तं ब्रह्मचारिणं ते होचुः—यद्वाव कं तदेव खं कमिति यदेव वयमवोचाम तदेव खमाकाशम्। इत्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजन्यसुखान्निवर्तितं स्यात्। यदेवाकाशं खमित्यवोचाम तदेव कं सुखमिति विजानीहि। सुखेनैवं विशेष्यमाणं खं रक्तादिभ्यो नीलोत्पलवत् भौतिकाचेतनात् खान्निवर्तितं स्यात्। सुखाकाशयोरलौकिकत्वेन ब्रह्मरूपत्वात्। ब्रह्मचारिणो मोहापनयनाय कं ब्रह्म खं ब्रह्मेति कंखंशब्दयोरितरेतरविशेषणविशेष्यत्वनिर्देशः। यद्वाव कमित्याद्यग्निभिरुक्तवाक्यं विशेषबोधाय श्रुतिराचष्टे। अस्मै ब्रह्मचारिणे प्राणश्च प्राणसंबन्धाश्रयत्वेन तस्याकाशस्तदाकाशः हार्दाकाश इत्यर्थः। तस्य सुखगुणनिर्देशात्तं चाकाशं सुखगुणविशिष्टं ब्रह्म तत्स्थं च प्राणं ब्रह्मसंपर्कादेव ब्रह्मेत्युभयं समुच्चित्याग्नयो ब्रह्मचारिणे ऊचुः उक्तवन्त इत्यर्थः ॥ १० ॥

तस्मै गार्हपत्येन स्वविषयब्रह्मविद्योपदेशः

अथ हैनं गार्हपत्योऽनुशशास पृथिव्यग्निरन्नमादित्य इति य एष आदित्ये पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति। स य एतमेवं विद्वानुपास्ते अपहते पापकृत्यां लोकीभवति सर्वमायुरेति ज्योक् जीवति नास्यावरपुरुषाः क्षीयन्त उप वयं तं भुञ्जामः अस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एतमेवं विद्वानुपास्ते ॥ ११ ॥

इमेऽग्नयः संभूय ब्रह्मचारिणे ब्रह्म उक्त्वा प्रत्येकं स्वस्वविषयां ब्रह्मविद्यां वक्तुमारेभिरे इत्याह—अथेति। अथ संभूय उपदेशानन्तरं एनं ब्रह्मचारिणं गार्हपत्योऽग्निरनुशशास ह। किं तत् ? पृथिव्यग्निरन्नमादित्य इति चतस्रो मम एतास्तनवः। तत्रादित्ये पुरुषो दृश्यते सोऽहं गार्हपत्योऽग्निरस्मि। यश्च गार्हपत्योऽग्निः स एवाहं आदित्ये पुरुषोऽस्मीति पुनः पुनरावृत्य स

एवाहमस्मीति वचनं पृथिव्यन्नतन्वोर्भोज्यत्वं गार्हपत्यादित्ययोरत्तृत्वं प्रकाशन-धर्मविशिष्टत्वात्। एवं ज्ञानफलमाह—**स य** इति। **स यः** कश्चिदेतमन्ना-न्नादत्वेन चतुर्धा प्रविभक्तं गार्हपत्याग्निमुपास्ते स च **पापकृत्यामपहते** पापं कर्म विनाशयति। अस्मदीयाग्नेयलोकी **भवति। सर्वं** वर्षशतम**ायुरेति।** सर्वत्र **ज्योक्** उज्ज्वलं जीवति विख्यातो भवति। **न ह्यस्य** विदुषोऽ**वरपुरुषाः क्षीयन्ते** नास्य सन्ततिर्विच्छिद्यत इत्यर्थः। किञ्च **तं वयमस्मिंश्चामुष्मिंश्च लोके उपभुञ्जामः** पालयामः। **य एतमेवं विद्वानुपास्ते** तस्यैतत्फलं स्यादित्यर्थः॥ ११॥

दक्षिणाग्निना स्वीयविषयब्रह्मविद्योपदेशः

अथ हैनमन्वाहार्यपचनोऽनुशशास आपो दिशो नक्षत्राणि चन्द्रमा इति य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति। स य एतमेवं विद्वानुपास्ते अपहते पापकृत्यां लोकी भवति सर्वमायुरेति ज्योक् जीवति नास्यावरपुरुषाः क्षीयन्ते उप वयं तं भुञ्जामः अस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एतमेवं विद्वानुपास्ते॥ १२॥

अथेति। अथ गार्हपत्योपदेशानन्तरमेन**मन्वाहार्यपचना**भिधानो दक्षि-णाग्नि**रनुशशास ह**। किमिति? **आपो दिशो नक्षत्राणि चन्द्रमा इति** मम एताश्चतस्रस्तनवः ममैवं चतुर्धा व्यवस्थितत्वात्। तत्र **य एष चन्द्रमसि पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति** पूर्ववत्। अन्नसंबन्धा-दन्वाहार्यपचनचन्द्रमसोर्ज्योतिष्ट्वसामान्याच्च अपां नक्षत्राणां च दक्षिणदिक्-संबन्धात् पूर्ववदन्नत्वेन संबन्धः। नक्षत्राणां चन्द्रमसो भोज्यत्वप्रसिद्धेः। अपामन्नोत्पादकत्वादन्नत्वम्। विद्याफलं **स य** इति। **स य** इत्यादि पूर्ववत्॥ १२॥

आहवनीयेन स्वीयविषयब्रह्मविद्योपदेशः

अथ हैनमाहवनीयोऽनुशशास प्राण आकाशो द्यौर्विद्यु-
दिति य एष विद्युति पुरुषो दृश्यते सोऽहमस्मि स एवाहमस्मीति ।
स य एतमेवं विद्वानुपास्ते अपहते पापकृत्यां लोकी भवति सर्व-
मायुरेति ज्योक् जीवति नास्यावरपुरुषाः क्षीयन्ते उप वयं तं
भुञ्जामः अस्मिꣳश्च लोकेऽमुष्मिꣳश्च य एतमेवं विद्वानुपास्ते ॥१३॥

अथ हैनमिति । प्राण आकाशो द्यौर्विद्युदिति मम एताश्चतस्रस्तनवः ।
य एष विद्युति पुरुषो दृश्यते सोऽहमस्मीत्यादि पूर्ववत् । दिवाकाशयोरा-
श्रयत्वेन सामान्यम् । विद्युदाहवनीययोः भोज्यत्वेन सामान्यम् । समानमन्यत् ॥

त्रेताग्निभिस्तस्याचार्यसमीपप्रेषणम्

ते होचुः उपकोसल ! एषा सोम्य ! ते अस्मद्विद्या आत्म-
विद्या च आचार्यस्तु ते गतिं वक्तेति आजगाम हास्याचार्यः
तमाचार्योऽभ्युवाद उपकोसल३ इति । भगव इति ह प्रतिशुश्राव
ब्रह्मविद इव सोम्य ! ते मुखं भाति को नु त्वानुशशास ? इति को
नु मानुशिष्यात् ? भो इति इहापेव निह्नुत इमे नूनमीदृशा अन्या-
दृशा इतीह अग्नीनभ्यूदे किं नु सोम्य ! किल ते अवोचन् ? इति ।
इदमिति ह प्रतिजज्ञे लोकान् वाव किल सोम्य ! ते अवोचन्
अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश आपो न श्लिष्यन्ते
एवमेवंविदि पापं कर्म न श्लिष्यत इति ब्रवीतु मे भगवानिति तस्मै
होवाच ॥ १४ ॥

तं प्रति ते पुनरग्नयः संभूय ऊचुरित्याह—त इति। हे **सोम्य उपकोसल!** ते तवास्मदीयाग्निविद्या प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति चात्मविद्या सैषोक्ता अभिहिता। उक्तविद्याफलप्राप्तये **आचार्यस्तु ते गतिं वक्ता** इत्युक्त्वाग्नय उपरेमुरित्यर्थः। ततः किम्? इत्यत आह—**आजगाम हास्याचार्य** इति त्वरयेत्यर्थः। आगत्य किं कृतवान्? इत्यत आह—**तमाचार्य** इति। तं च शिष्यमुपकोसल! **इत्याचार्योऽभ्युवाद। स भगव इति ह प्रतिशुश्राव। हे सोम्य! ब्रह्मविद इव ते मुखं** प्रसन्नं **भाति। को नु त्वानुशशास?** इति गुरुणोक्तः प्रत्याह। हे भगवन्! त्वयि प्रोषिते **को नु मानुशिष्यात्** अनुशासनं कुर्यात्? इति। **इहापेव निह्नुते** अपनिह्नुत इवेति व्यवहितेन संबन्धः। न चापनिह्नुते न च यथावदग्न्युक्तमब्रवीदित्याशयः। कथं मया परिचरिता अग्नय उक्तवन्तः! यतस्त्वां दृष्ट्वा **नूनं** वेपमाना इव पूर्व**मन्यादृशाः** सन्तः **ईदृशा** दृश्यन्त इति **इहाग्नीनभ्यूदे** अभ्युक्तवान्। को नु त्वा अग्नीन् दर्शयन्? **किन्नु सोम्य!** अग्नयस्ते तुभ्यमवोचन्? इत्येवमुक्तवन्तं **प्रतिजज्ञे** किञ्चित्प्रतीक- मात्रं प्रतिज्ञातवान्, न ह्यग्न्युक्तं सर्वमवोचत्। यतः पृथिव्यादिलोकान् वा आचार्य आह—**हे सोम्य!** अग्नयस्ते न हि साकल्येन ब्रह्मावोचन्। यदीच्छसि त्वं श्रोतुमहं तु ते तुभ्यं साकल्येन **तद्ब्रह्म वक्ष्यामि**। मयोच्यमानब्रह्मज्ञानमाहात्म्यं शृणु। **यथा पुष्करपलाशे आपो न श्लिष्यन्ते** यथाहं वक्ष्यामि ब्रह्म **तथैवंविदि पापं कर्म न श्लिष्यते** न संबध्यत इत्यर्थः। एवमुक्तवत्याचार्ये उपकोसल आह—**ब्रवीतु मे भगवानिति**। आचार्यस्तस्मै होवाच ॥ १४ ॥

आचार्येण तस्मै साकल्यब्रह्मविद्योपदेशः

य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एत- दमृतमभयं एतद्ब्रह्मेति तत् यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चन्ति वर्त्मनी ह्येव गच्छति। एत१ संयद्वाम इत्याचक्षत एत१ हि सर्वाणि वामान्यभिसंयन्ति सर्वाण्येनं वामान्यभिसंयन्ति य एवं वेद। एष

उ एव वामनीरेष हि सर्वाणि वामानि नयति सर्वाणि वामानि नयति य एवं वेद । एष उ एव भामनीः एष हि सर्वेषु लोकेषु भाति सर्वेषु लोकेषु भाति य एवं वेद । अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदि च नार्चिषमेवाभिसंभवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षात् यान् षडुदङ्ङेति मासाꣳस्तान् मासेभ्यः संवत्सरꣳ संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः । स एनान् ब्रह्म गमयति एष देवपथो ब्रह्मपथ एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते नावर्तन्ते ॥ १९ ॥

साकल्यब्रह्मविद्यामाचार्य आह— **य एष** इति । "चक्षुषश्चक्षुः" इत्यादिश्रुत्यनुरोधेन ब्रह्मचर्यशान्तिदान्त्यादिसाधनसंपत्तितो निवृत्तबाह्यचक्षुर्भिर्य **एषोऽक्षिणि पुरुषो दृश्यते एष** एव सर्वप्राणिनामात्मेति **होवाच** । एतस्य चक्षुरादिकरणग्रामप्रवृत्तिनिमित्तत्वात् । यदात्मतत्त्वमवोचं **एतदमृतम**विनाशित्वात् । अत एवा**भयं** भवहेतुमरणशङ्कावैरल्यात् । अत एव **एतद्ब्रह्म** तस्यानन्तत्वेन बृहत्स्वरूपत्वात् । "आचार्यस्तु ते गतिं वक्ता" इत्युक्त्या अग्नीनां साकल्यं ब्रह्मविद्यापरिज्ञानं नेतीति चेन्न ; तैरपि कं ब्रह्म खं ब्रह्मेत्युक्तत्वात् । तदुक्तसुखाकाशस्यैवाक्षिण्यादित्यमण्डले च विद्यमानत्वात् । न ह्यग्नयः साकल्यब्रह्मविदः इति वक्तुमयुक्तम् । यथावदनुक्तेराचार्यतोषणार्थत्वात् । न हि सा स्वापरिज्ञाननिमित्तेत्यर्थः । यदक्षिस्थं ब्रह्म तन्माहात्म्यमिदमुच्यते— **तत्त्र** ब्रह्मोपलब्धिस्थानेऽस्मिन्नक्षिण **यद्यपि सर्पिर्वोदकं वा सिञ्चति वर्त्मनी** पक्ष्मणी **ह्येव गच्छति** । न चक्षुषा संबध्यते । अक्ष्णः पद्मपत्रमिव सर्पिरादिसंश्लेषाभावात् । किं पुनः स्थानिनोऽक्षिपुरुषस्यासंश्लेषत्वम्? **एतं पुरुषं संयद्वाम इत्याचक्षते** पुण्यकर्मफलाश्रयत्वात् । पुण्यानुरूपेण **एतं सर्वाणि वामानि** पुण्यकर्मफलानि प्राणिभ्यो नयति । य एवं वेद स्वात्मधर्मत्वेन तं सर्वाणि वामानि नयति । एतमेव हि **सर्वाणि वामानि** पुण्यफलानि **अभिसंयन्ति** ।

य एवं वेद । एनमपि सर्वाणि वामानि **अभिसंयन्ति** । **एष उ एव भामनीः** एष हि यस्मात् **सर्वेषु लोकेषु** आदित्यचन्द्राग्न्यादिरूपेण **भाति** "तस्य भासा सर्वमिदं विभाति" इति श्रुतेः । भामानि नयतीति **भामनीः** । **य एवं वेद** असावपि सर्वेषु लोकेषु भाति । अथेदानीं ब्रह्मविदो गतिरुच्यते । **यद्यपि उ चैवास्मिन्नेवंविदि मृते शव्यं** शवकर्म **कुर्वन्ति** यदि च ऋत्विजो न कुर्वन्ति करणाकरणयोरस्य विदुषो न हि लाभहानी भवतः "न कर्मणा वर्धते नो कनीयान्" इति श्रुतेः । ये सुखाकाशमक्षिस्थं संयद्वामो वामनी-र्भामनीरित्येवंगुणमुपासते प्राणसहितामग्निविद्यां च **तेऽर्चिषमेवाभिसंभवन्ति** अर्चिरभिमानिदेवतामभिप्रतिपद्यन्ते । **अर्चिषो** देवताया **अहर्**देवतां, **अह्न आपूर्य-माणपक्षं** शुक्लपक्षदेवतां, **आपूर्यमाणपक्षात् यान् षण्मासानुदङ्ङुत्तरां** दिश-**मेति** । कः सः ? विततान् मासानुत्तरायणदेवतारूपान् । **तेभ्यो मासेभ्यः संवत्सरं** संवत्सरदेवतां, ततः **संवत्सरात् आदित्यं, आदित्याच्चन्द्रमसं, चन्द्रमसो विद्युतं** ; तत्तत्रस्थान् **पुरुषः** कश्चिद्ब्रह्मलोकादागत्य मानव्यां सृष्टौ भवो मानवः । तद्विपरीतोऽयम**मानवः स पुरुषः** सत्यलोकालङ्कारहैरण्यगर्भं **ब्रह्म गमयति** गन्तृगन्तव्यादिव्यपदेशात् सविशेषं ब्रह्म गच्छतीत्यर्थः । निर्विशेषब्रह्मप्राप्तौ तदनुपपत्तेरत्रैव समवलीयन्ते "ब्रह्मैव सन् ब्रह्माप्येति" इति श्रुतेः । निश्शेषस्वातिरिक्तभेदनिरासतस्सन्मात्रभावापत्तिं वक्ष्यति "यत्र नान्यत् पश्यति" इत्यादि । न च तत्र गमनमार्गोऽस्ति सर्वस्य सन्मात्रत्वात् । यः प्रकृतः **एष** देवैरर्चिरादिभिः गमयितृभिरुपलक्षितः पन्था **देवपथः** । तेनैव ब्रह्म गन्तव्यमिति **ब्रह्मपथः** । **एतेन** ब्रह्म **प्रतिपद्यमाना** गच्छन्तः **इमं मानवं** मनोः सृष्टिलक्षण-**मावर्तं नावर्तन्ते नावर्तन्ते** घटीयन्त्रवत् जननादिसंसारावर्तं न प्रतिपद्यन्त इत्यर्थः । द्विरुक्तिर्विद्यापरिसमाप्त्यर्था ॥ १९ ॥

व्याहृतिविधानं ऋत्विग्ब्रह्मणो मौनं च

एष ह वै यज्ञो योऽयं पवत एष ह यन् इद॰ सर्वं पुनाति यदेष यन् इद॰ सर्वं पुनाति तस्मादेष एव यज्ञस्तस्य मनश्च वाक् च

वर्तनी । तयोरन्यतरां मनसा सꣳस्करोति ब्रह्मा वाचा होताध्वर्यु-रुद्गाता अन्यतराꣳ स यत्रोपाकृते प्रातरनुवाके पुरा परिधानीयाया ब्रह्मा व्यववदति । अन्यतरामेव वर्तनीꣳ सꣳस्करोति हीयते-ऽन्यतरा स यथैकपात् व्रजन् रथो वैकेन चक्रेण वर्तमानो रिष्यति एवमस्य यज्ञो रिष्यति यज्ञꣳ रिष्यन्तं यजमानः अनुरिष्यति स इष्ट्वा पापीयान् भवति । अथ यत्रोपाकृते प्रातरनुवाके न पुरा परिधानीयाया ब्रह्मा व्यववदति उभे एव वर्तनी सꣳस्कुर्वन्ति न हीयतेऽन्यतरा । स यथा उभयपात् व्रजन् रथो वा उभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठति एवमस्य यज्ञः प्रतितिष्ठति यज्ञं प्रतितिष्ठन्तं यजमानः अनु प्रतितिष्ठति स इष्ट्वा श्रेयान् भवति ॥१६॥

रहस्यप्रकरणत आरण्यकत्वसामान्यतश्च यज्ञक्षते उत्पन्ने प्रायश्चित्तत्वेन व्याहृतयो विधातव्यास्तदभिज्ञऋत्विग्ब्रह्मणो मौनं चेतीदमारभ्यते—एष हेति । **एष ह वै वायुर्योऽयं पवते अयं यज्ञः** । ह वा इति प्रसिद्ध्यर्थौ । वायुप्रतिष्ठो हि यज्ञः श्रुतिषु प्रसिद्धः । "अयं वै यज्ञो योऽयं पवते", "स्वाहा वातेधाः" इति श्रुतेः । वातस्य चलनात्मकत्वेन क्रियासमवायित्वं यज्ञारम्भप्रतिष्ठादेः वाताधीनत्वात् । **एष ह यन् गच्छन् इदं सर्वं पुनाति** पावयति चलद्वायोरपवित्रनिरासकत्वात् न ह्यचलतः । **यस्माच्चलन्नेष इदं सर्वं पुनाति तस्मात्** यत् पुनातीत्येष **एव यज्ञः** । तस्यैवंविधयज्ञस्य कर्मज्ञानव्यापृतं **मनश्च**, मन्त्रोच्चारण-व्यापृता **वाक् च**, त एते वाङ्मनसे **वर्तनी** मार्गौ । याभ्यां वर्तनीभ्यां त्रायमानस्सन् यज्ञः प्रवर्तते । "वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञः" इति श्रुतेः । अतो वाङ्मनसे वर्तनी उच्येते । यज्ञस्य **तयोरन्यतरां** वर्तनीं **मनसा** विवेकवता **संस्करोति** । **ब्रह्मा वाचा होताध्वर्युरुद्गाता** इत्येते त्रयोऽपि ऋत्विजो**ऽन्यतरां** वाग्वर्तनीं वाचैव संस्कुर्वन्ति । **अथ स ब्रह्मा यत्र**

यस्मिन् यज्ञे उपाकृते प्रारब्धे प्रातरनुवाके शस्त्रे पुरा पूर्वं परिधानीयाया ऋचो ब्रह्मा एतस्मिन्नन्तरे काले व्यववदति मौनं परित्यजति यदि तदान्यतरामेव वाग्वर्तनीं संस्करोति। ब्रह्मणा संस्क्रियमाणान्यतरा मनोवर्तनी हीयते विनश्यति। स यज्ञोऽन्यतरया वाग्वर्तन्यैव वर्तितुमशक्नुवन् रिष्यति। रिष्येदित्यत्र दृष्टान्तमाह--स यथेति। स यथैकपात् अध्वानं गच्छन् रिष्यति। रथो वैकेन चक्रेण वर्तमानो गच्छन् रिष्यत्येवमस्य यजमानस्य मूढब्रह्मणो यज्ञो रिष्यति। यज्ञं रिष्यन्तं यजमानोऽनुरिष्यति। यज्ञजीवनो हि यजमानः। तद्रेषे तस्य रेषः स्यादित्यर्थः। तत्तादृशं यज्ञमिष्ट्वा पापीयान् पापतरो भवति। अथ पुनर्यत्र ब्रह्मा विद्वान् वाग्विसर्गमकुर्वन् मौनमास्थाय वर्तते यावत्परिधानीयाया न व्यववदति तथैव सर्वर्त्विज उभे एव वर्तनी संस्कुर्वन्ति अन्यतरापि न हीयते। तत्र दृष्टान्तमाह—स यथा उभयपात् व्रजन् रथो वा उभाभ्यां चक्राभ्यां वर्तमानः प्रतितिष्ठति। एवं वर्तनीभ्यां युक्तो यज्ञोऽविनश्यन् स्वेनात्मना प्रतितिष्ठति। यज्ञं प्रतितिष्ठन्तं यजमानोऽनुप्रतितिष्ठति। मौनवद्ब्रह्मोपेतः स यजमानो यज्ञमिष्ट्वा श्रेयान् श्रेष्ठतरो भवतीत्यर्थः॥ १६॥

व्याहृतिहोमविधानम्

प्रजापतिर्लोकानभ्यतपत् तेषां तप्यमानानाꣳ रसान् प्रावृहदग्निं पृथिव्या वायुमन्तरिक्षादादित्यं दिवः। स एतास्तिस्रो देवता अभ्यतपत् तासां तप्यमानानाꣳ रसान् प्रावृहत् अग्नेः ऋचः वायोर्यजूꣳषि सामान्यादित्यात्। स एतां त्रयीं विद्यामभ्यतपत् तस्यास्तप्यमानाया रसान् प्रावृहत् भूरिति ऋग्भ्यः भुवरिति यजुर्भ्यः स्वरिति सामभ्यः। तद्यद्धि ऋक्तो रिष्येत् भूः स्वाहेति गार्हपत्ये जुहुयात् ऋचामेव तद्रसेन ऋचां वीर्येण ऋचां यज्ञस्य

विरिष्टꣳ संदधाति । अथ यदि यजुष्टो रिष्येत् भुवः स्वाहेति दक्षिणाग्नौ जुहुयात् यजुषामेव तद्रसेन यजुषां वीर्येण यजुषां यज्ञस्य विरिष्टꣳ संदधाति । अथ यदि सामतो रिष्येत् स्वः स्वाहेत्याहवनीये जुहुयात् साम्नामेव तद्रसेन साम्नां वीर्येण साम्नां यज्ञस्य विरिष्टꣳ संदधाति । तद्यथा लवणेन सुवर्णꣳ संदध्यात् सुवर्णेन रजतꣳ रजतेन त्रपु त्रपुणा सीसꣳ सीसेन लोहं लोहेन दारु दारु चर्मणा । एवमेषां लोकानामासां देवतानामस्यास्त्रय्या विद्याया वीर्येण यज्ञस्य विरिष्टꣳ संदधाति भेषजकृतो ह वा एष यज्ञो यत्र एवंवित् ब्रह्मा भवति । एष ह वा उदक्प्रवणो यज्ञो यत्र एवंवित् ब्रह्मा भवति एवंविदꣳ ह वा एषा ब्रह्माणमनु गाथा यतो यत आवर्तते तत्तद्गच्छति । मानवो ब्रह्मैव एक ऋत्विक् कुरूनश्वाभिरक्षति एवंविद्ध वै ब्रह्मा यज्ञं यजमानꣳ सर्वांश्च ऋत्विजोऽभिरक्षति तस्मादेवंविदमेव ब्रह्माणं कुर्वीत नानेवंविदं नानेवंविदम् ॥ १७ ॥

अत्र ब्रह्मणो मौनं विहितं, प्रायश्चित्तार्थं व्याहृतिहोमा विधातव्या इत्याह— **प्रजापतिरिति** । **प्रजापतिर्लोकानु**द्दिश्य तत्सारजिघृक्षया **अभ्यतपत्** ध्यानाख्यं तपश्चचार । **तेषां तप्यमानानां रसान् प्रावृहत्** जग्राहेत्यर्थः । कथं कान् जग्राह ? इत्यत्र **पृथिव्याः** सार**मग्निमन्तरिक्षाद्वायुं दिव आदित्यं** जग्राह । **स पुनः** अग्न्यादिदेवतोद्देशेनैवमभ्यतपत् । तत्सारत्वेन त्रयीविद्यां जग्राहेत्याह—**अग्नेर्ऋचो वायोर्यजूंषि सामान्यादित्यात्** । **स पुनस्तां त्रयीविद्यां अभ्यतपत् तस्यास्तप्यमानाया रसान् प्रावृहत्** । **ऋग्भ्यो भूरिति** व्याहृतिं **यजुर्भ्यो भुवरिति** व्याहृतिं **सामभ्यः स्वरिति** व्याहृतिं च जग्राहेत्यर्थः । यत एवं लोकदेववेदसारा महाव्याहृतयो भवन्ति अतस्तत्तत्र

यत् ऋक्तः ऋक्संबन्धात् ऋङ्निमित्तं **रिष्येत्** यज्ञः क्षतं प्राप्नुयात् तदा **भूः स्वाहेति गार्हपत्ये जुहुयात्**। सा हि तत्र प्रायश्चित्तिः। तत्कथम्? **ऋचामेव तद्रसेन** तदिति क्रियाविशेषणम्। रसेन ऋचां वीर्येणौजसा तथा च सति ऋचां यज्ञस्य ऋक्संबन्धतो **विरिष्टं** क्षतं संदधाति संधत्ते तदा पूर्वोक्तप्रायश्चित्तं कुर्यादित्यर्थः। **अथ यदि यजुष्टो रिष्येत् भुवः स्वाहेति दक्षिणाग्नौ जुहुयात्। यजुषामित्यादि** समानम्। तथा **सामनिमित्तरेषे स्वः स्वाहेत्याहवनीये जुहुयात्**। शिष्टं पूर्ववत्। ब्रह्मनिमित्तरेषे तु त्रिष्वग्निषु तिसृभिर्जुहुयात्। त्रय्या विद्यया हि ब्रह्मत्वम्। तथाविधब्रह्मत्वनिमित्ते रेषे उक्तप्रायश्चित्तं विना किञ्चिदन्यन्मृग्यम्। **तद्यथा—लवणेन सुवर्णं सन्दध्यात्** क्षारस्य स्वर्णगतमालिन्यग्रासत्वात्। अशक्यमपि पक्वकाले **सुवर्णेन रजतं** संदध्यात्। तथा **रजतेन त्रपु त्रपुणा सीसं सीसेन लोहं लोहेन दारु दारु चर्मणा** बन्धनीयम्। **एवमेषां लोकानामासां देवतानामस्यास्त्रय्या विद्याया** रसाख्यवीर्येण **यज्ञस्य विरिष्टं संदधाति**। चिकित्सकेन रोगार्त इव **भेषजकृतो ह वा एष यज्ञो** भवति। कोऽसौ? इत्यत्र योऽयं यज्ञः। **एवंवित्** व्याहृतिहोमप्रायश्चित्तवित् **ब्रह्मा ऋत्विक् भवति**। सोऽयं यज्ञो यथोक्तफलकृत् भवतीत्यर्थः। किञ्च—**एष ह वा उदक्प्रवणः** उदङ्निम्नः दक्षिणोच्छ्रितो **यज्ञो** भवति उत्तरमार्गप्रतिपत्तये भवतीत्यर्थः; **यत्रैवंविद्ब्रह्मा भवति**। य **एवंविदं ह वै ब्रह्माणमृत्विजं प्रत्येषा अनुगाथा** ब्रह्मणः स्तुतिपरा **यतो यत आवर्तते** कर्मक्षतिरभवत् तद्यज्ञक्षतरूपं सन्दधानः **तत्तत्**प्रायश्चित्तेन **गच्छति** परिपालयतीत्यर्थः। **मौनाचरणात्** मननाद्वा **मानवो ब्रह्मा**। स **एवैक ऋत्विक् कुरून्** कर्तॄन् यथा योद्धॄनारूढानश्वा **बडबा** सैन्धवी **रक्षति**। **एवंवित् ह वै ब्रह्मा यज्ञं यजमानं सर्वांश्च ऋत्विजोऽभिरक्षति** तत्कृतदोषापनयनात्। यत एवंविशिष्टो ब्रह्मा विद्वान् **तस्मादेवंविदमेव** यथोक्तव्याहृत्यादिप्रायश्चित्तविदमेव **ब्रह्माणं कुर्वीत**। कदापि **नानेवंविदम्**। द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः॥ १७॥

इति चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

वागादिभ्यः प्राणस्य श्रेष्ठत्वम्

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्च । यो ह वै वसिष्ठं वेद वसिष्ठो ह स्वानां भवति वाक् वाव वसिष्ठः । यो ह वै प्रतिष्ठां वेद प्रति ह तिष्ठति अस्मिंश्च लोके अमुष्मिꣳश्च चक्षुर्वाव प्रतिष्ठा । यो ह वै संपदं वेद सꣳहास्मै कामाः पद्यन्ते दैवाश्च मानुषाश्च श्रोत्रं वाव संपत् । यो ह वा आयतनं वेद आयतनꣳ ह स्वानां भवति मनो ह वा आयतनम् । अथ ह प्राणा अहꣳ श्रेयसि व्यूदिरे अहꣳ श्रेयानस्मि अहꣳ श्रेयानस्मीति । ते ह प्राणाः प्रजापतिं पितरमेत्य ऊचुः भगवन् ! को नः श्रेष्ठः ? इति तान् होवाच यस्मिन् व उत्क्रान्ते शरीरं पापिष्ठतरमिव दृश्येत स वः श्रेष्ठ इति । सा ह वाक् उच्चक्राम सा संवत्सरं प्रोष्य पर्येत्य उवाच कथमशकत ऋते मत् जीवितुमिति यथा कला अवदन्तः प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसा एवमिति प्रविवेश ह वाक् । चक्षुर्होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्य उवाच कथमशकत ऋते मत् जीवितुमिति यथान्धा अपश्यन्तः प्राणन्तः प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसा एवमिति प्रविवेश ह चक्षुः । श्रोत्रꣳ होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्य उवाच कथमशकत ऋते मत् जीवितुमिति यथा बधिरा अशृण्वन्तः प्राणन्तः प्राणेन वदन्तो

वाचा पश्यन्तश्चक्षुषा ध्यायन्तो मनसैवमिति प्रविवेश ह श्रोत्रम्। मनो होच्चक्राम तत्संवत्सरं प्रोष्य पर्येत्य उवाच कथमशकत ऋते मत् जीवितुमिति यथा बाला अमनसः प्राणन्तः प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेणैवमिति प्रविवेश ह मनः। अथ ह प्राण उच्चिक्रमिषन् स यथा सुहयः पड्वीशशंकून् संखिदेत् एवमितरान् प्राणान् समखिदत् तꣳ हाभिसमेत्योचुर्भगवन्! एधि त्वं नः श्रेष्ठोऽसि मा उत्क्रमीरिति। अथ हैनं वागुवाच यदहं वसिष्ठोऽस्मि त्वं तद्वसिष्ठोऽसीति अथ हैनं चक्षुरुवाच यदहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठासीति। अथ हैनं श्रोत्रमुवाच यदहꣳ संपदस्मि त्वं तत्संपदसीति अथ हैनं मन उवाच यदहमायतनमस्मि त्वं तदायतनमसीति। न वै वाचो न चक्षूꣳषि न श्रोत्राणि न मनाꣳसीत्याचक्षते प्राणा इत्येवाचक्षते प्राणो ह्येवैतानि सर्वाणि भवति ॥ १ ॥

ॐ अपरब्रह्मविद्याया उत्तरा गतिरुक्ता। अथेदानीं पञ्चमाध्याये ऊर्ध्वरेतसां श्रद्धालूनां पञ्चाग्निविदां विद्यान्तरशीलानां च तामेव गतिं प्रकटयन् केवलकर्मिणां धूमादिमार्गेण पुनरावृत्तिरूपा गतिः तद्विपरीतानां वैराग्यहेतोः कष्टतरा संसारगतिर्वक्तव्येति पञ्चमाध्याय आरभ्यते। गतित्रयाश्रयो हि प्राणः। "प्राणो वाव संवर्गः प्राण आकाशः प्राणो ब्रह्म" इति प्राणस्य श्रैष्ठ्यमाम्नातम्। तस्माद्वागादिभ्यः तस्य श्रेष्ठतां वक्तुमिदमारभ्यते— **यो ह वा** इति। फलेनादौ पुरुषमभिमुखीकरोति— **यो** हेति। **यो ह वै** कश्चित् **ज्येष्ठं** प्रथमजं गुणतः स्वरूपतश्च **श्रेष्ठं वेद स ज्येष्ठश्च श्रेष्ठश्च भवति**। वागादिभ्यः **प्राणो वाव ज्येष्ठश्च**। गर्भस्थपुरुषे वागादिप्रवृत्तेः पुरैव प्राणवृत्तिदर्शनात्। यत्प्रवर्तनाद्गर्भो

वर्धते अत एव प्राणो ज्येष्ठः। यथा सुहय इत्यादिवक्ष्यमाणगुणतो मुख्यप्राणस्वरूपतश्च अस्मिन् कार्यकरणसंघाते श्रेष्ठश्च। **यो ह वै वसिष्ठं** वस्तृतमं वसुमत्तमं वा **वेद** स तथैव **स्वानां** ज्ञातीनां **वसिष्ठो भवति**। कथं वसिष्ठता? इत्यत आह—वागिति। **वाग्वाव वसिष्ठः** सदस्यन्यानभिभूय वाग्मिनो वसन्तीति वसिष्ठत्वम्। **यो ह वै प्रतिष्ठां वेद स** चास्मिन् लोके **अमुष्मिंश्च प्रतितिष्ठति**। ह किल। तर्हि का प्रतिष्ठा? इत्यत्र **चक्षुर्वाव प्रतिष्ठा**। समदुर्गे पश्यतः प्रतिष्ठासिद्धेः। **यो ह वै संपदं वेद हास्मै दैवाश्च मानुषाश्च कामाः संपद्यन्ते**। का संपत्? इत्यत्र **श्रोत्रं वाव संपत्**। यतः श्रोत्रेणार्थविज्ञानपूर्वकं वेदा गृह्यन्ते। ततः कर्माणि क्रियन्ते। ततः कामाः संपद्यन्ते। अतः श्रोत्रस्य संपत्त्वम्। **यो ह वा आयतनं वेद स्वानामायतनं ह** वाश्रयो **भवति**। आयतनं किम्? इत्यत्र **मनो ह वा** इन्द्रियार्थप्रत्ययानामायतनं मनसः सर्वप्रत्ययाश्रयत्वात्। **अथ ह प्राणाः** एवं यथोक्तगुणाः सन्तोऽहं **श्रेयसि** श्रेयानहमस्मीति मिथो विरुद्धतया **व्यूदिरे** उक्तवन्तः। **ते हैवमात्मनः** श्रेष्ठताविज्ञानाय **प्रजापतिं पितरमेत्य ऊचुः—हे भगवन्! को नोऽ**स्माकं मध्ये गुणतः **श्रेष्ठः?** इत्येवं पृष्टवन्तः। **तान् होवाच** प्रजापतिः—**यस्मिन् वो** युष्माकं मध्ये **उत्क्रान्ते शरीरमिदम**तिशयेन **पापिष्ठतरम**स्पृश्यतया **दृश्येत स वः श्रेष्ठ** इत्यवोचत्। पित्रा तथोक्तेषु प्राणेषु **सा ह वाक् उच्चक्राम**। **सा** वागुत्क्रम्य **संवत्सरमात्रं प्रोष्य पुनः पर्येत्य** इतरान् प्राणा**नुवाच—यूयं मदृते** मया विना **जीवितुं कथं** केन प्रकारेणा**शकत** शक्तवन्तः? इत्युक्तास्ते होचुः। **यथा** लोके **कला मूका अवदन्तो** वाचा **जीवन्ति**। तत्कथम्? इत्यत्र **प्राणन्तः प्राणेन पश्यन्तः चक्षुषा शृण्वन्तः श्रोत्रेण ध्यायन्तो मनसा** सर्वकरणचेष्टां कुर्वन्तो वयं अजीविष्मेति श्रुत्वा स्वयं वाक् प्राणेभ्योऽवरतामवगम्य **प्रविवेश ह** पूर्ववत् स्वव्यापारे प्रवृत्तेत्यर्थः। समानमन्यत्—चक्षुः श्रोत्रं मनो होच्चक्रामेत्यादि। यथा बाला **अमनसः** अनभिव्यक्तमनसः। एवं वागादिषु परीक्षितेषु **अथ ह प्राण उच्चिक्र**-

मिषन् उत्क्रान्तुमिच्छन् ; ततः किम् ? इत्यत्र दृष्टान्तमाह—यथेति । **यथा लोके सुहयः पड्वीशशंकून्** पादबन्धनकीलान् कशया हतः **संखिदेत्** समुत्पाटयेत्, **एवमितरान्** वागादीन् **प्राणान् समखिदत्** समुत्पाटितवान् । ते ह प्राणाः स्वस्थानाच्चालिताः सन्तः **अभिसमेत्य** मिलित्वा मुख्यप्राणमूचुः । हे **भगवन्! एधि** भवान् नः स्वामी । यतस्त्वं **नोऽ**स्माकं **श्रेष्ठोऽसि** अतस्त्वमस्माद्देहात् **मोत्क्रमीरिति । अथ हैनं** प्राणं राज्ञो विश इव तद्बलिं हरन्तः आहुः । तत्राथ **हैनं वागुवाच** । यदिति क्रियाविशेषणम् । **यदहं वसिष्ठोऽस्मि त्वं** तत् गुणतो **वसिष्ठोऽसि** । तथोत्तरेष्वपि योज्यम् । **अथ हैनं चक्षुः श्रोत्रं मनश्च** प्राणमुवाचेति यत् तद्युक्तं लोके, यस्मात् **न वै वाचो न चक्षूंषि न श्रोत्राणि न मनांसी**त्यागमज्ञा लौकिका वा वागादिकरणान्याचक्षते । किं तर्हि ? **प्राणा इत्येवाचक्षते** । तत्कथं ? **प्राणो ह्येवैतानि सर्वाणि** वागादिकरणादीनि **भवति** । अतो वागादिभिः मुख्यप्राणं प्रति युक्तमुक्तमिति प्रकरणार्थः । अथ हैनं वागुवाचेत्याद्यचेतनानां कथमुपपद्यते ? देहप्रवेशो निर्गमो ब्रह्मगमनं प्राणस्तुतिर्वा कथमुपपद्यते ? इति चेन्न ; वागादीनामग्न्यादिचेतनावत् देवताधिष्ठितत्वादागमतश्चेतनावत्त्वं सिद्धमित्यर्थः ॥ १ ॥

प्राणादीनां संलापः मन्थाख्यं कर्म च

स होवाच किं मेऽन्नं भविष्यति ? इति यत्किंचिदिदं आ श्वभ्य आ शकुनिभ्य इति होचुः तद्वा एतदनस्यान्नं अनो ह वै नाम प्रत्यक्षं न ह वा एवंविदि किंचनानन्नं भवतीति । स होवाच किं मे वासो भविष्यति ? इति आप इति होचुः तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्च अद्भिः परिदधति लम्भुको ह वासो भवति अनग्नो ह भवति । तद्धैतत् सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्याय उक्त्वा उवाच यद्यप्येनच्छुष्काय स्थाणवे ब्रूयाज्जाये-

रन्नेवास्मिन् शाखाः प्ररोहेयुः पलाशानीति । अथ यदि महत् जिगमिषेदमावास्यायां दीक्षित्वा पौर्णमास्यां रात्रौ सर्वौषधस्य मन्थं दधिमधुनोरुपमथ्य ज्येष्ठाय श्रेष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् । वसिष्ठाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् प्रतिष्ठायै स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् संपदे स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् आयतनाय स्वाहेत्यग्नावाज्यस्य हुत्वा मन्थे संपातमवनयेत् । अथ प्रतिसृप्याञ्जलौ मन्थमाधाय जपति अमो नामासि अमा हि ते सर्वमिदꣳ स हि ज्येष्ठः श्रेष्ठो राजाधिपतिः स मा ज्यैष्ठ्यꣳ श्रैष्ठ्यꣳ राज्यमाधिपत्यं गमयतु अहमेवेदꣳ सर्वमसानीति । अथ खल्वेतया ऋचा पच्छ आचामति तत्सवितुर्वृणीमह इत्याचामति वयं देवस्य भोजनमित्याचामति श्रेष्ठꣳ सर्वधातममित्याचामति तुरं भगस्य धीमहीति सर्वं पिबति । निर्णिज्य कꣳसं चमसं वा पश्चादग्नेः संविशति चर्मणि वा स्थण्डिले वा वाचंयमोऽप्रसाहः स यदि स्त्रियं पश्येत् समृद्धं कर्मेति विद्यात् । तदेष श्लोकः—

यदा कर्मसु काम्येषु स्त्रियꣳ स्वप्नेषु पश्यति ।
समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने ।
तस्मिन् स्वप्ननिदर्शने ॥ २ ॥

प्राणं प्रष्टारं वागादीन् वक्तॄनिव श्रुतिरनुवदति—स होवाचेति । यो वागादिकरणानुग्राहकः प्राणः स होवाच—किं मेऽन्नं भविष्यति?

इति पृष्टा वागादय आहुः। यत्किञ्चेदं आ श्वभ्य आ शकुनिभ्यः श्वभिः शकुनिभिः सह सर्वप्राणिनां यदन्नं तत्तवान्नमिति होचुः प्राणस्यान्नजातात्तृत्वात्। तद्वा एतत् यत्किञ्चिल्लोके प्राणिभिरन्नमद्यते तदन्नमनस्य प्राणस्य प्राणेनैव तदद्यत इत्यर्थः। न ह्यप्राणः कश्चिदन्नमश्नाति। अनस्य तु सर्वप्रकारचेष्टागुणप्रदर्शनात्। अन इति प्राणस्य प्रत्यक्षं नाम सर्वान्नानामत्तुः साक्षादभिधानम्। न ह वा एवंविदि सर्वान्नानामत्तृत्वेन सर्वभूतस्थप्राणोऽहमस्मीत्येवंविदि किञ्चन प्राणिभिरद्यमानमनन्नं भवति। विदुषः प्राणभूतत्वात्। "प्राणाद्वा एष उदेति प्राणेऽस्तमेति" इत्युपक्रम्य "एवंविदो ह वा उदेति सूर्य एवंविदि अस्तमेति" इति श्रुतेः। स होवाच प्राणः किं मे वासो भविष्यति? इति। आप इति होचुः। यस्मादबालयः प्राणः तस्माद्वा एतदशिष्यन्तो ब्राह्मणा वासःस्थानीयाभिरद्भिः भोजनात्पुरस्तादुपरिष्टाच्च परिदधति परिधानं कुर्वन्ति। प्राणस्य लम्भुको लंभनशीलो वासो ह भवति वाससो लब्धैव भवति। वाससो लाभादनग्नो ह भवति उत्तरीयवान् भवति। भोजनपूर्वोत्तरकालयोः यदाचमनं तत्प्राणस्य वासोदर्शनमात्रम्। आचमनस्यामूलत्वात्। अपां प्राणस्य वासस्स्थानत्वात्। तस्मादाचमनस्य तदर्थत्वेन प्राणदर्शनं स्तूयते। तद्धैतत् प्राणदर्शनं सत्यकामो जाबालो नामतो गोश्रुतये व्याघ्रपदोऽपत्यं तस्मै वैय्याघ्रपद्यायान्यदपि वक्ष्यमाणमुक्त्वोवाच। किं तदुवाच? इत्यत्र प्राणवित् यद्यप्येनद्दर्शनं शुष्काय स्थाणवे ब्रूयात् जायेरन्नस्मिन् स्थाणौ शाखाः प्ररोहेयुः च पलाशानि पत्राणि च। इतिशब्दतः किमु वक्तव्यं जीवते पुरुषाय ब्रूयादिति द्योत्यते। यथोक्तब्रह्मविदे मन्थाख्यमिदं कर्मारभ्यते। अथानन्तरं यदि महत् जिगमिषेत् गन्तुमिच्छेत् महत्त्वप्राप्तिं यदि कामयेत् तदा तस्येदं कर्म विधीयते। महत्त्वे हि सति श्रीमान्। श्रीमतो धनम्। धनवतः कर्मानुष्ठानम्। ततो देवयानादिपन्थानं प्रतिपद्यत इति। न ह्येतत्कामिनः। तस्य कालादिरुच्यते—अमावास्यायां भूमिशयनादिनियमपूर्वकं दीक्षित्वा पयःपानपूर्वकं तपः-

सत्यब्रह्मचर्यादिधर्मविशिष्टो भूत्वा पौर्णमास्यां रात्रौ कर्मारभते। ग्राम्यारण्यभवसर्वौषधस्य यावच्छक्त्यल्पमनल्पमुपादाय तद्वितुषीकृत्य आममेव पिष्टं दधिमधुनोरौदुम्बरे कंसाकारे चमसाकारे वा अमत्रे प्रक्षिप्य उपमध्याग्रतः स्थापयित्वा ज्येष्ठाय श्रेष्ठाय स्वाहा इत्यग्नावावसथ्ये आज्यस्यावापस्थाने हुत्वा स्रुवलग्नं मन्थे संपातमवनयेदिति। समानमन्यत्—वसिष्ठाय प्रतिष्ठायै संपदे आयतनाय स्वाहेति प्रत्येकं संपातमवनयेत् संस्रावं पातयेत्। हुत्वाथ अग्नेरीषत्प्रतिसृप्याञ्जलौ च प्रतिसृप्य मन्थमाधाय जपतीमं मन्त्रं—अमो नामास्यमा हि ते। अम इति प्राणस्य नाम। प्राणोऽयमन्नेन प्राणिति हि देहं धारयति। अमो मन्थद्रव्यम्। अमो नामासीति प्राणः स्तूयते प्राणस्य मन्थान्नत्वात्। यतस्ते प्राणभूतस्य सर्वमिदं जगत् अन्नत्वेन व्यवस्थितं अतोऽमो नाम त्वम्। स हि प्राणभूतो मन्थो ज्येष्ठः श्रेष्ठश्च। अत एवायं राजा वागादीनामधिपतिः तत्पालयितृत्वात्। स मन्थः प्राणः मामपि ज्येष्ठादिगुणवन्तं गमयतु। अहमेवेदं सर्वं जगदसानि प्राणवत्। इतिशब्दो मन्त्रपरिसमाप्त्यर्थः। अथानन्तरं खल्वेतया वक्ष्यमाणया ऋचा पच्छः पादश आचामति। मन्त्रैकैकपदेन एकैकं ग्रासं भक्षयति। तत् भोजनं प्राणादित्ययोरेकत्वेन सर्वप्रसवितृत्वात् तथाविधसवितुः वृणीमहे येन मन्थरूपसावित्रान्नभोजनेन वयं सवितृरूपमापन्ना भवेमेत्यर्थः। देवस्य सवितुरिति पूर्वेण संबन्धः। सर्वान्निभ्यः श्रेष्ठं प्रशस्यतमत्वात्। सर्वधातमं सर्वजगद्धारयितृत्वात्। तुरं तूर्णं भगस्य सवितुः स्वरूपं धीमहि विशिष्टभोजनतः शुद्धान्तराः सन्तः चिन्तयेमहीति सर्वं च मन्थलेपं पिबति। कंसं कंसाकारं चमसाकारमौदुम्बरं पात्रं निर्णिज्य प्रक्षाल्य पीत्वाचम्याग्नेः पश्चात् चर्मण्यजिने वा केवलस्थण्डिले भूमौ वा प्राक्शिराः संविशति। वाचंयमो वाग्यतः सन् अनिष्टस्वप्नदर्शनेन न प्रसह्यते नाभिभूयत इत्यप्रसाहः संयतकरणग्रामः स्वपेदित्यर्थः। यदि स्वप्नेषु स स्त्रियं पश्येत् तदा ममेदं कर्म समृद्धमिति विद्यात्। तदेतस्मिन्नर्थे एष श्लोको मन्त्रो भवति—यदा यस्मिन् काले काम्यार्थकर्मसु स्वप्नप्रदेशेषु स्त्रियं पश्यति

तदा तत्र कर्मफलसमृद्धिं जानीयात्। तस्मिन् प्रशस्तस्वप्नदर्शने सतीत्यर्थः। कर्मसमाप्त्यर्थेयं द्विरुक्तिः ॥ २ ॥

मुमुक्षूणां वैराग्यहेतोः संसारगतिकथनम्

श्वेतकेतुर्हारुणेयः पञ्चालानाꣳ समितिमेयाय तꣳह प्रवाहणो जैवलिरुवाच कुमार ! अनु त्वाशिषत् पितेति अनु हि भगवः ! इति। वेत्थ यदितोऽधि प्रजाः प्रयन्तीति न भगवः ! इति वेत्थ यथा पुनरावर्तन्त३ इति न भगवः ! इति वेत्थ पथोर्देवयानस्य पितृयाणस्य च व्यावर्तना३ इति न भगवः! इति। वेत्थ यथासौ लोको न संपूर्यत३ इति न भगवः! इति वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति नैव भगवः! इति। अथानु किमनुशिष्टोऽवोचथाः ? यो हीमानि न विद्यात् कथꣳ सोऽनुशिष्टो ब्रुवीतेति स हायस्तः पितुरर्धमेयाय तꣳहोवाचाननुशिष्य वाव किल मा भगवानब्रवीदनु त्वाशिषमिति। पञ्च मा राजन्यबन्धुः प्रश्नानप्राक्षीत् तेषां नैकंचन अशकं विवक्तुमिति स होवाच यथा मा त्वं तदैतानवदो यथाहमेषां नैकंचन वेद यद्यहमिमानवेदिष्यं कथं ते नावक्ष्यम् ? इति। स ह गौतमो राज्ञोऽर्धमेयाय तस्मै ह प्राप्तायार्हां चकार स ह प्रातः सभाग उदेयाय तꣳ होवाच मानुषस्य भगवन् गौतम ! वित्तस्य वरं वृणीथा इति स होवाच तवैव राजन्! मानुषं वित्तं यामेव कुमारस्यान्ते वाचमभाषथास्तामेव मे ब्रूहीति। स ह कृच्छ्रीबभूव तꣳ ह चिरं वसेत्याज्ञापयांचकार तꣳ होवाच

यथा मा त्वं गौतमावदो यथेयं न प्राक् त्वत्तः पुरा विद्या ब्राह्मणान् गच्छति तस्मादु सर्वेषु लोकेषु क्षत्रस्यैव प्रशासनमभूदिति तस्मै होवाच ॥ ३ ॥

मुमुक्षूणां वैराग्यहेतोः ब्रह्मादिस्तम्बान्तसंसारगतयो वक्तव्या इत्येवमाख्यायिका आरभ्यते—नामतः **श्वेतकेतुः** अरुणस्यापत्यमारुणिः तदपत्यमा**रुणेयः पञ्चालानां** जनपदानां **समितिं** सभा**मेयाय** जगाम। तं गतवन्तं **प्रवाहणो** नामतः जीवलस्यापत्यं **जैवलिः उवाच**। हे **कुमार**! **अनु त्वा** त्वां **पिता अशिषत्** पित्रा किमनुशिष्टस्त्वम् ? इत्यर्थः। राज्ञैवमुक्त आह— **अनु** ह्यनुशिष्टोऽस्मि **भगवः**! **इति**। तं होवाच यद्यनुशिष्टोऽसि **इतो**ऽस्माल्लोकात् **अधि** उपरि **प्रजा यत् प्रयन्ति** तत्किं **वेत्थ** जानीषे ? हे **भगवः**! यत्पृच्छसि तन्नाहं जाने इतीतर आह। **यथा** येन क्रमेण **पुनरावर्तन्ते इति** यदि त्वं **वेत्थ**। **न भगवः**! **इति**। **वेत्थ यथासौ लोकः** पैत्र्यं प्राप्य येन कारणेन बहुभिः प्रयद्भिरपि **न संपूर्यते इति**। **न भगवः**! **इति** प्रत्याह। **देवयानस्य पितृयाणस्य च पथो**र्मार्गयोः **व्यावर्तना** व्यावर्तनं नाम सहगच्छतामितरेतरवियोगस्थानमित्यर्थः। तत्किं त्वं **वेत्थ**? **न भगवः**! **इति**। **यथा** येन क्रमेण **पञ्च**संख्याका**यामाहुतौ** हुतायामाहुतिसाधना **आपः पुरुष** इत्यभिधानं वचो यासां हूयमानषष्ठाहुतिभूतानां ताः **पुरुषवचसः** पुरुषशब्दवाच्या **भवन्तीति वेत्थ** त्वं ? इति राज्ञोक्तो **नैव भगवः**! अहं जान इत्याह। **अथानु किमनुशिष्टो**ऽस्मी**त्यवोचथाः** उक्तवानसि ? **यो हीमानि** पृष्टार्थजातानि **न विद्यात् स कथमनुशिष्टो**ऽस्मि इति **ब्रुवीत**? **इत्येवं स** श्वेतकेतुः **राज्ञायस्त** आयासितः सन् **पितुरर्धं** स्थान**मेयाय** गतवान्। **स तं** पितर**मुवाच**। **अननुशिष्य** अनुशासनमकृत्वैव **मा मां किल भगवान्** समावर्तनकाले **अब्रवीत्** उक्तवान्। **अनु त्वा अशिषं** अन्वशिषं **त्वामिति**। यतो मा मां राजन्या बन्धवो यस्येति स **राजन्यबंन्धुः** स्वयं दुर्वृत्तः **पञ्च**संख्याकान् **प्रश्नान् अप्राक्षीत्**

पृष्टवान् । तेषां प्रश्नानां नैकञ्चन एकमपि वक्तुमशकं अर्थतो निर्णेतुम-समर्थोऽस्मीत्यर्थः । पुत्रेणैवमुक्तः स होवाच पिता—यथा मा मां वत्स ! त्वं तदागतमात्रमेवैतान् प्रश्नानवदः उक्तवानसि तेषां नैकञ्चनाशकं विवक्तुमिति तथा मां जानीहि । यथाहमप्येषां प्रश्नानामेकमपि, यथा त्वं न जानीषे तथाहमप्येतं न जाने । मय्यन्यथाभावो न कर्तव्यः । यद्यहमिमान् प्रश्नानवेदिष्यं विदितवानस्मि कथं समावर्तनकाले पुरा प्रियपुत्राय ते नावक्ष्यं नोक्तवानस्मि ? इत्युक्त्वा स ह गोत्रतो गौतमो राज्ञो जैवलेरर्धं स्थानमेयाय । स तस्मै ह गौतमाय प्राप्तायार्हामर्हणां चकार । गौतमः कृतातिथ्यः तत्रैव उषित्वा परेद्युः प्रातःकाले सभागे सभां गते राजनि उदेयाय । सभागः पूज्यमानोऽन्यैः स्वयं गौतम उदेयाय । तं होवाच गौतमं राजा । हे भगवन् गौतम ! मानुषस्य वित्तस्य ग्रामादेर्वरं कामं वृणीथाः । स होवाच गौतमः । हे राजन् ! मानुषं वित्तं तवैव तिष्ठतु । यामेव मम कुमारस्यान्ते समीपे पञ्चप्रश्नलक्षणां वाचमभाषथाः तामेव वाचं मे मह्यं ब्रूहि इति गौतमेनोक्तो राजा स ह कृच्छ्री दुःखी बभूव । ब्राह्मणमप्रत्याख्येयं मन्वानो न्याय्येन विद्या वक्तव्येति मत्वा तं गौतमं चिरं वसेत्येवमाज्ञापयाञ्चकार । पुरा प्रत्याख्यानं चिरं वसेत्युक्तिप्रभवस्वापराधं हेतुवचनोक्त्या क्षमापयति । स राजा तं गौतममुवाच । ब्राह्मणः सर्वविद्योऽपि सन् तामेव वाचं मे ब्रूहीति पृष्टवानसि । तथाहं करिष्ये । तत्र किंचिद्वक्तव्यमस्ति । यथेयं विद्या त्वत्तु त्वत्तस्तु पुरा पूर्वं ब्राह्मणान् न गच्छति । अनया विद्यया ब्राह्मणा न हि अनुशिष्टवन्त इति तत्प्रसिद्धं लोके । तस्मात्तु पुरा सर्वेषु लोकेषु क्षत्रस्य क्षत्रियजातेरेवानया विद्यया प्रशासनं शिष्याणां प्रशास्तृत्वमभूत् । क्षत्रियपरम्परयैव इयं विद्या एतावन्तं कालं आगता । तथाप्येतां तुभ्यं वक्ष्यामि । त्वत्संप्रदानादूर्ध्वं ब्राह्मणान् गमिष्यति । अतो मया यदुक्तं तत्क्षन्तुमर्हसि इत्युक्त्वा तस्मै विद्यां राजा स होवाच ॥ ३ ॥

लोकस्याग्नित्वेनोपासनं प्रथमहोमपर्यायश्च

असौ वाव लोको गौतम! अग्निस्तस्यादित्य एव समित् रश्मयो धूमोऽहरर्चिः चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः। तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति ॥ ४ ॥

"इति तु पञ्चम्यामाहुतावापः" इति पञ्चमप्रश्नोऽयं प्रथममपाक्रियते। तदपाकरणस्य इतरापाकरणानुकूलत्वादित्यतोऽग्निहोत्रापूर्वविपरिणामलक्षणं पञ्चधा प्रविभज्याग्नित्वेनोपासनमुत्तरमार्गप्रतिपत्तिसाधनं विधित्सन्नाह—**असाविति**। हे **गौतम!** यथाग्निहोत्राधिकरणं आहवनीयः तथैवेहासौ **वाव** द्युलोकोऽग्निः। तस्य द्युलोकाग्नेः **आदित्य एव समित्**। द्युलोकस्यादित्येन सम्यगिद्धत्वात् आदित्यस्य समित्त्वम्। **रश्मयो धूमः** रश्मीनामादित्याद्युत्थानात्। समिधो हि धूम उत्तिष्ठति। प्रकाशसामान्यात् **अहरर्चिः**। अह्न आदित्यकार्यत्वात्। **चन्द्रमा अङ्गाराः**। अर्चिःप्रशमे अङ्गारवत् अहःप्रशमेऽभिव्यक्तत्वात्। **नक्षत्राणि विस्फुलिङ्गाः**। चन्द्रावयवत्त्वे नक्षत्राणां विप्रकीर्णत्वसामान्यात्। **तस्मिन्नेतस्मिन्नग्नौ** यजमानप्राणा हि **देवाः** अबाकारां **श्रद्धां जुह्वति**। **तस्या आहुतेः सोमो राजा संभवति**। "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति प्रश्नेऽपां होम्यतया श्रुतत्वात् अब्भाविता श्रद्धेयमित्यर्थः। "श्रद्धा वा आपः श्रद्धामेवारभ्य प्रणीय प्रचरति" इति श्रुतेः ॥ ४ ॥

पर्जन्यस्याग्नित्वेनोपासनं द्वितीयहोमपर्यायश्च

पर्जन्यो वाव गौतम! अग्निस्तस्य वायुरेव समित् अभ्रं धूमो विद्युदर्चिरशनिरङ्गारा ह्रादुनयो विस्फुलिङ्गाः। तस्मिन्नेतस्मिन्नग्नौ देवाः सोमꣳ राजानं जुह्वति तस्या आहुतेर्वर्षꣳ संभवति ॥ ५ ॥

द्वितीयहोमपर्यायार्थमाह—पर्जन्य इति । **पर्जन्यो वाव गौतम! अग्निः ।** पर्जन्यस्य वृष्ट्युपकरणाभिमानित्वात् । **तस्य वायुरेव समित्** । पर्जन्यस्य वायुना समिद्धत्वात् । "पुरोवातमेव जनयति वर्षस्यावरुद्ध्यै" इति श्रुतेः । **अभ्रं धूमः** । धूमवल्लक्ष्यमाणत्वात् । **विद्युदर्चिः** प्रकाशसामान्यात् । **अशनिरङ्गाराः** विद्युत्संबन्धात् । **ह्रादुनयो विस्फुलिङ्गाः** । मेघगर्जनविकीर्णत्वसामान्यात् । **तस्मिन्नेतस्मिन्नग्नौ देवाः सोमं राजानं जुह्वति । तस्या आहुतेर्वर्षः संभवति** । द्वितीयपर्याये श्रद्धाख्या आपः सोमाकारेण परिणम्य पर्जन्याग्निं प्रतिपद्य वृष्टित्वेन परिणमन्त इत्यर्थः ॥ ५ ॥

पृथिव्या अग्नित्वेनोपासनं तृतीयहोमपर्यायश्च

पृथिवी वाव गौतम! अग्निस्तस्याः संवत्सर एव समित्
आकाशो धूमो रात्रिरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गाः ।
तस्मिन्नेतस्मिन्नग्नौ देवा वर्षं जुह्वति तस्या आहुतेरन्नꣳ संभवति ॥६॥

तृतीयहोमपर्याय उच्यते—पृथिवीति । **पृथिवी वाव गौतम! अग्निः । तस्याः** पृथिव्याख्याग्नेः **संवत्सर एव समित्** । संवत्सरसमिद्धा हि पृथिवी व्रीह्यादिनिष्पत्तये भवति । **आकाशो धूमः** । अग्न्युत्थधूमवत् पृथिव्युत्थितवदाकाशदर्शनात् । **रात्रिरर्चिः** पृथिव्यनुरूपात् । **दिशोऽङ्गारा** उपशान्तत्वसामान्यात् । **अवान्तरदिशो विस्फुलिङ्गाः** क्षुद्रत्वसामान्यात् । **तस्मिन्नि**त्यादि समानम् । **तस्या आहुतेः** व्रीहियवाद्यन्नं **संभवति** ॥ ६ ॥

पुरुषस्याग्नित्वेनोपासनं चतुर्थहोमपर्यायश्च

पुरुषो वाव गौतम! अग्निस्तस्य वागेव समित् प्राणो धूमो
जिह्वार्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः । तस्मिन्नेतस्मिन्नग्नौ देवा
अन्नं जुह्वति तस्या आहुते रेतः संभवति ॥ ७ ॥

चतुर्थहोमपर्याय उच्यते—पुरुष इति। **पुरुषो वाव गौतम ! अग्निः।** **तस्य वागेव समित्।** पुरुषस्य वाक्समिद्धत्वात्। **प्राणो धूमः** धूमवन्मुखान्निर्गमनात्। **जिह्वार्चिः** लौहित्यात्। **चक्षुरङ्गाराः** भास आश्रयत्वात्। **श्रोत्रं विस्फुलिङ्गाः** विप्रकीर्णत्वसामान्यात्। **तस्मिन्नित्यादि** समानम्। व्रीह्यादिसंस्कृतमन्नं **जुह्वति। तस्या आहुते रेतः संभवति** ॥ ७ ॥

योषाया अग्नित्वेनोपासनं पञ्चमहोमपर्यायश्च

योषा वाव गौतम ! अग्निस्तस्या उपस्थ एव समित् यदुपमन्त्रयते स धूमो योनिरर्चिर्यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः। तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुतेर्गर्भः संभवति ॥ ८ ॥

पञ्चमहोमपर्याय उच्यते—योषेति। **योषा वाव गौतम ! अग्निः। तस्या उपस्थ एव समित्।** तेन हि सा समिद्ध्यते। **यदुपमन्त्रयते** सङ्केतं करोति **स धूमः।** उपमन्त्रणस्य स्त्रीवश्यहेतुत्वात्। **योनिरर्चिः** लौहित्यात्। **यदन्तर्मैथुनं करोति तेऽङ्गारा** अग्निसंबन्धात्। **अभिनन्दाः** सुखलवा **विस्फुलिङ्गाः** क्षुद्रत्वसामान्यात्। **तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति। तस्या आहुतेर्गर्भः संभवतीति** ॥ ८ ॥

गर्भोत्पत्त्यादिकथनम्

इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति स उल्बावृतो गर्भो दश वा नव वा मासानन्तः शयित्वा यावद्वाथ जायते। स जातो यावदायुषं जीवति तं प्रेतं दिष्टमितोऽग्नये एव हरन्ति यत एवेतो यतः संभूतो भवति ॥ ९ ॥

प्रश्नपञ्चके प्रथमः प्रश्नो व्याख्यात इत्याह—इतीति । इति त्वेवं श्रद्धासोमवर्षान्नरेतोहोमपर्यायक्रमेण योषिदग्निं प्राप्यापो गर्भा भवन्ति । अपामाहुतिसमवायित्वात् । न हि केवला आप एव सोमादिकार्यमारभन्ते । त्रिवृत्कृता एवाप इत्युच्यन्ते । अपां तेजोऽवन्नयोगतः कार्यारम्भकत्वात् । कार्ये दृश्यते ह्यब्बाहुल्यम् । सोमवृष्ट्यन्नरेतोदेहानां द्रवयुक्तत्वात् अपामेव सोमादिक्रमेण गर्भीभूतत्वाच्च । **इति त्वेव तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति** इति प्रश्नपञ्चके व्याख्यातोऽयमेकः प्रश्नः । योऽपां पञ्चमपरिणामविशेषः **सोऽयं गर्भ** आहुतिकर्मसमवायिश्रद्धाद्युल्बेन जरायुणावृतो **दश नव वा मासान्** मातुरन्तः **कुक्षौ शयित्वा यावद्वा** यथासंभवकालेऽथ **जायते । स एवं जातो यावदायुषं** कर्मनिमित्तं **तावज्जीवति । तमेतं** क्षीणायुषं **प्रेतं** परलोकं प्रति **दिष्टं** निर्दिष्टं यदि जीवन् ज्ञाने कर्मणि वाधिकृतस्तदैनमितोऽस्माद्ग्रामादग्नयेऽग्न्यर्थमृत्विजो **हरन्ति** पुत्रा वा । **यत एव इतोऽग्नेः** सकाशाच्छ्रद्धाद्याहुतिक्रमेण **यतश्च** पञ्चभ्योऽग्निभ्यः **संभूतः** अतः स्वामेव योनिमापादयन्तीत्यर्थः ॥ ९ ॥

देवयानादिमार्गैर्गतागतनिरूपणम्

तद्य इत्थं विदुः ये च इमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षात् यान् षट् उदङ्ङेति मासाꣳस्तान् । मासेभ्यः संवत्सरꣳ संवत्सरादादित्यमादित्याचन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो मानवः स एनान् ब्रह्म गमयति एष देवयानः पन्था इति । अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ति धूमात् रात्रिं रात्रेरपरपक्षमपरपक्षात् यान् षड्दक्षिणैति मासाꣳस्तान्नैते संवत्सरमभिप्राप्नुवन्ति । मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाचन्द्रमसमेष सोमो

राजा तद्देवानामन्नं तं देवा भक्षयन्ति । तस्मिन् यावत्संपातमुषित्वा अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्रं भवति । अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते अतो वै खलु दुर्निष्प्रपतरं यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति । तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा । अथैतयोः पथोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयꣳ स्थानं तेनासौ लोको न संपूर्यते तस्माज्जुगुप्सेत तदेष श्लोकः—स्तेनो हिरण्यस्य सुरां पिबꣳश्च गुरोस्तल्पमावसन् ब्रह्महा चैते पतन्ति चत्वारः पञ्चमश्चाचरꣳस्तैरिति । अथ ह य एतानेवं पञ्चाग्नीन् वेद न स ह तैरप्याचरन् पाप्मना लिप्यते शुद्धः पूतः पुण्यलोको भवति य एवं वेद य एवं वेद ॥१०॥

"वेत्थ यदितोऽधि प्रजाः प्रयन्ति" इति प्रश्नो ह्युपाकर्तव्यतया प्रत्युपस्थापित इत्याह—तद्य इत्थमिति । तत्तत्र लोके प्रत्युत्थितानां व्रतिकामिवनिनां मध्ये ये पञ्चाग्निदर्शनमित्थमेवं विदुः द्युलोकाद्यग्निभ्यो वयं जाता अग्न्यात्मान इति जानन्ति ये इत्थं न विदुस्ते केवलेष्टापूर्तदत्तपरा भूत्वा धूमादिना चन्द्रं गच्छन्तीति वक्ष्यति । ये चारण्योपलक्षिता वैखानसाः परिव्राजकाश्च श्रद्धा तप इत्युपासते तेषामप्यर्चिरादिना गमनं वक्ष्यति—

यान्त्यूर्ध्वरेतसो ब्रह्मचारिणश्चोत्तरां गतिम् ।

इति स्मृत्यनुरोधेन । इत्थं कर्मिभिः साकं वनिब्रह्मचारिणोऽपि सत्यं ब्रह्म हिरण्यगर्भाख्यमुपासते यदि तदा **ते सर्वे अर्चिषमर्चिरभिमानिदेवतां अभिसंभवन्ति** प्रतिपद्यन्ते । **अर्चिषोऽहरह्नः** इत्यादि चतुर्थाध्याये व्याख्यातम् । **एष देवयानः पन्था** व्याख्यातः । **इतिशब्दो** देवयानमार्गाप्तिसमाप्त्यर्थः । **अथ** देवयानमार्गकथनानन्तरं **ये इमे गृहस्थाः**, यथारण्यविशेषणं गृहिव्यावृत्तिं कुर्वत् सत् वानप्रस्थादिपर्यवसन्नं तथा **ग्राम** इति विशेषणं वन्यादिव्यावृत्तिं कुर्वत् सत् गृहिणि पर्यवस्यतीति । **ग्रामे** गृहस्थाश्रमे अग्निहोत्रादिवैदिकं कर्म इष्टं च वापीकूपतटाकारामादिकरणं पूर्तञ्च **इष्टापूर्ते** । यज्ञादन्यत्रार्थिभ्यो यथाशक्ति स्वार्जितद्रव्यसंविभागो **दत्तमित्युपासते** । इतिशब्दस्तेषां दर्शनवैरल्यद्योतकः । येषामपरब्रह्मदर्शनमपि न ह्यस्ति **ते** हि **धूमं** धूमाभिमानिदेवता**मभिसंभवन्ति** प्रतिपद्यन्त इत्यर्थः । तया ह्यतिवाहिता **धूमात् रात्रिं** रात्रिदेवतां **रात्रेरपरपक्ष**देवतां कृष्णपक्षाभिधानापरपक्षात् **यान् षण्मासान् दक्षिणां दिशमेति** सविता **तान् षण्मासान्** दक्षिणायनाभिमानिनीर्देवताः सङ्घचारिण्यः प्रतिपद्यन्ते । ता एव मासानिति बहुवचनात् । **तानेते** प्रकृताः कर्मिणः **संवत्सरं** संवत्सराभिमानिनीं देवतां **नाभिप्राप्नुवन्ति** तेषामुत्तरायणप्रापकज्ञानाभावात् । **मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाच्चन्द्रमसं** योऽन्तरिक्षे दृश्यते चन्द्रमाः **स एष** ब्राह्मणानां **सोमो राजा** । तच्चन्द्रमसं **देवानामन्नमि**न्द्रादयो **देवा भक्षयन्ति** । अतस्ते चन्द्रभूताः कर्मिणो धूमादिमार्गतो गत्वा देवैर्भक्ष्यन्ते । इष्टादिकारिणो देवा अद्यमाना इति चेन्न ; देवोपकरणमात्रत्वात् । न हि ते कवलोत्क्षेपेण देवैर्भक्ष्यन्ते । स्त्रीपशुपुत्राद्युपकरणेऽन्नशब्दप्रयोगात् । राज्ञां स्त्रियोऽन्नं पशवोऽन्नं विशोऽन्नमित्यादि । स्त्र्यादेः पुरुषोपभोग्यत्वेनान्नत्वम् । न हि स्त्र्यादिरुपभोगो भवति । तस्मात् कर्मिणो देवानामुपभोग्यास्सन्तो देवैः क्रीडन्ते । तेषां सुखोपभोग्यं शरीरं चन्द्रमण्डले आप्यमारभ्यते । श्रद्धाशब्दवाच्या आपो द्युलोकाग्नौ हुतास्सत्यः सोमो राजा संभवतीति पुरस्तादेवोक्तम् । तत्रैव

कर्मणि इष्टादिफलमुपभुञ्जाना आसते। **तस्मिन्ननेन** संपततीति कर्मफलक्षयः संपातः। **यावत्संपातं** तावच्चन्द्रमण्डले **उषित्वा अथ** अनन्तरं **एतमेव** वक्ष्यमाणमध्वानं **पुनर्निवर्तन्ते**। पुनःशब्दतोऽसकृच्चन्द्रमण्डलं गत्वा निवर्तन्त इति द्योत्यते। कर्मशेषेण जनित्वा पूर्ववासनया पुनः कर्मैव कृत्वा तत्फललिप्सया स्वर्गं प्राप्य घटीयन्त्रवदविश्रान्तं संसरन्तीत्यर्थः। चन्द्रात्कथं निवर्तन्ते? इत्यत आह—**यथेतमिति**। यथागतमित्यर्थः। चन्द्रमण्डलात् भौतिकाकाशं प्रतिपद्यन्ते। चन्द्रमण्डले शरीरारम्भका या आपस्ताः कर्मक्षये लीयन्ते आकाशभूता इव सूक्ष्मा भवन्ति। ता अन्तरिक्षाद्वायुर्भवन्ति। ताभिः सह **वायुर्भूत्वा धूमो भवति**। क्षीणकर्मा **धूमो भूत्वा** अब्भरणाद**भ्रं भवति**। **अभ्रं भूत्वा** ततः सेचनसमर्थो **मेघो भवति**। **मेघो भूत्वा प्रवर्षति**। शेषकर्मणा सह पततीत्यर्थः। **त इह व्रीहियवाः ओषधिवनस्पतयः तिलमाषा** इत्येवंप्रकारेण **जायन्ते**। क्षीणकर्मणामनेकत्वात् बहुवचननिर्देशः। मेघादिष्वेकरूपत्वादेकवचननिर्देशः। यतो वर्षधाराभिः पतितानां गिरितटदुर्गनदीसमुद्रारण्यमरुदेशादिसन्निवेशः **अतो वै खलु दुर्निष्प्रपतरं** दुर्निस्सरणम्। यद्यभक्ष्येषु स्थावरेषु पतितास्तत्रैव शुष्येरन्। यदि कदाचित् भक्ष्यस्थावरेषु पतितानां पुंदेहसंबन्धो दुर्लभ एव। स्थावराणां बहुत्वात्तत्र व्रीहियवादिभावः। दुर्निष्प्रपततरमिति वक्तव्ये तकारलोपो द्रष्टव्यः। अन्नदानामनेकत्वादूर्ध्वरेतोबालस्थविरनपुंसकभक्षिता यदि तदान्तराले विशीर्यन्ते। कदाचित् काकतालीयवृत्त्या पुंभिर्भक्ष्यन्ते तदा तद्भुक्तान्नं रेतोरूपेण परिणमते। तत्कथं? **यो यो ह्यन्नमत्ति** तत्परिणतमृतुकाले योषिति **यश्च रेतः सिञ्चति तद्भूय एव** तदाकृतिरेव **भवति**। अतः पुरुषात् पुरुषाकृतिरेव जायते, न हि जात्यन्तराकृतिः जायमानानां जनकाकृतिनियमात्। ये त्वन्ये चन्द्रमण्डलमनारुह्यैव पापकर्मतो घोरव्रीहियवादिभावं प्रतिपद्यन्ते न हि मनुष्यादिभावं तेषां नानुशयिनामिव दुर्निष्प्रपतरं यथाकर्मार्जितं नवं देहान्तरं तृणं जलूकावत् सङ्क्रमन्ते। "सविज्ञानमेवान्ववक्रामति" इति श्रुतेः। तत्र तेष्वनुशायिनामिह लोके

रमणीयं चरणं शीलं येषां पुण्यकर्मणां ते **रमणीयचरणाः** चन्द्रमण्डल-भुक्तशेषेण पुण्यकर्मणा **अभ्याशो ह** क्षिप्रम्। यदिति क्रियाविशेषणम्। क्रौर्यानृतमायाकौटिल्यादिराहित्येन **रमणीयां योनिमापद्येरन्।** **ब्राह्मणयोनिं वा क्षत्रियोनिं वा वैश्ययोनिं वा** योनिमापद्येरन्नित्यनुवर्तते। **अथ** पुनरेतद्विपरीता **ये** कपूयं कुत्सितं चरणं शीलं येषामशुभाशयानां ते **कपूयचरणाः अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकरयोनिं वा चाण्डालयोनिं वा** स्वस्वकर्मानुसारेण प्रतिपद्यन्त इत्यर्थः। ये तु रमणीयचरणा ब्राह्मणादयः ते केवलकर्मिणश्चेत् इष्टादिसाधनतो धूमादिवर्त्मना पुनः पुनर्घटीयन्त्रवत् गच्छन्त्यागच्छन्ति च। "गतागतं कामकामा लभन्ते" इति स्मृतेः। यदि ते विद्याशीलिनस्तदा अर्चिरादिना ब्रह्मलोकं गत्वा न पुनरावर्तन्ते। ये तु कर्मज्ञानबहिर्मुखाः स्वच्छन्दानुवर्तिनस्ते तु **अथैतयोरर्चिर्धूमादिपथोः न कतरेणान्यतरेण** यन्ति तेषां मार्गद्वयपरिभ्रष्टत्वात्। यान्येवंविधानि **तानीमानि भूतानि क्षुद्राणि** दंशमशककीटाद्यस-कृदावर्तीनि **भवन्ति** जायन्ते म्रियन्त इत्यर्थः। तेषां जनिमृतिसान्तत्यं दर्शयति—**जायस्व म्रियस्वेति।** जनिमृतिभ्यां कालं क्षपयन्ति। क्रिया-तत्फलभोगाभावात् तेषां जन्म व्यर्थमित्यर्थः। एतत्तु क्षुद्रजन्तुलक्षणम्। पुरोक्तपन्थानावपेक्ष्य **तृतीयं स्थानम्। तेनासौ लोको न संपूर्यते।** यस्मादेवं संसारगतिः कष्टा **तस्माज्जुगुप्सेत** बीभत्सेत ममैवंविधघोरा-पारसंसारपातो मा भूदिति घृणी भवेदित्यर्थः। तदेतस्मिन्नर्थे पञ्चाग्निविद्यास्तु-त्यर्थोऽयं **एष श्लोको** मन्त्रो भवति। **हिरण्यस्य स्तेनो** ब्रह्मस्वहर्ता ब्राह्मणोऽपि **सुरां पिबन् गुरोस्तल्पं** दारानावसन् **ब्रह्महा चैते चत्वारः पतन्ति।** पतितैश्चतुर्भिः सह चरतीति **पञ्चमश्च तैः** सह पतति। चतुर्भिः सहकारिणः प्रायश्चित्तमाह—**तैरिति। अथ ह यः** पुमान् **पञ्चाग्नीन् यथावद्वेद स तैर्महा-**पातकिभिरप्याचरन्नपि **तत्पाप्मना न लिप्यते।** तत्पञ्चाग्निदर्शनेन **शुद्धः पूतः** प्राजापत्यादि**पुण्यलोको भवति। य एवं** पञ्चप्रश्नप्रत्युत्तरं **वेद** स यथोक्तफलमश्नुत इत्यर्थः। समस्तप्रश्ननिर्णयप्रदर्शनार्थेयं द्विरुक्तिरित्यर्थः॥ १०॥

वैश्वानरात्मभावप्रतिपत्तिः

प्राचीनशाल औपमन्यवः सत्ययज्ञः पौलुषिरिन्द्रद्युम्नो भाल्लवेयो जनः शार्कराक्ष्यो बुडिल आश्वतराश्विः ते हैते महाशाला महाश्रोत्रियाः समेत्य मीमाꣳसां चक्रुः को नु आत्मा? किं ब्रह्म? इति। ते ह संपादयांचक्रुरुद्दालको वै भगवन्तोऽयमारुणिः संप्रतीममात्मानं वैश्वानरमध्येति तꣳ हन्ताभ्यागच्छामेति तꣳ हाभ्याजग्मुः। स ह संपादयांचकार प्रक्ष्यन्ति मामिमे महाशाला महाश्रोत्रियास्तेभ्यो न सर्वमिव प्रतिपत्स्ये हन्ताहमन्यमभ्यनुशासानीति। तान् होवाचाश्वपतिर्वै भगवन्तोऽयं कैकेयः संप्रतीममात्मानं वैश्वानरमध्येति तꣳ हन्ताभ्यागच्छामेति तꣳ हाभ्याजग्मुः। तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि कारयांचकार स ह प्रातः संजिहान उवाच न मे स्तेनो जनपदे न कदर्यो न मद्यपो नानाहिताग्निर्नाविद्वान् न स्वैरी स्वैरिणी कुतो यक्ष्यमाणो वै भगवन्तोऽहमस्मि यावदेकैकस्मा ऋत्विजे धनं दास्यामि तावद्भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति। ते होचुर्येन हैवार्थेन पुरुषश्चरेत् तꣳ हैव वदेदात्मानमेवेमं वैश्वानरꣳ संप्रत्यध्येषि तमेव नो ब्रूहीति। तान् होवाच प्रातर्वः प्रतिवक्तास्मीति ते ह समित्पाणयः पूर्वाह्णे प्रतिचक्रमिरे तान् हानुपनीयैव एतदुवाच॥११॥

"तद्देवानामन्नं तं देवा भक्षयन्ति" इति दक्षिणपथा गच्छतामन्नभाव उक्तः। क्षुद्रजन्तुलक्षणेयं कष्टा संसारगतिरप्युक्ता। तदुभयदोषपरिजिहीर्षया

वैश्वानरात्मभावप्रतिपत्त्यर्थमुत्तरग्रन्थारम्भः । "अत्स्यन्नं पश्यसि" इति लिङ्गात् । आख्यायिका तु सुखावबोधार्था—**प्राचीनेति** । नामतः **प्राचीनशालः**, उपमन्योरपत्यम**औपमन्यवः** । नामतः **सत्ययज्ञः**, पुलुषस्यापत्यं **पौलुषिः** । नामत **इन्द्रद्युम्नः**, भल्लवस्यापत्यं भाल्लविः । तदपत्यं **भाल्लवेयः** । नामतो **जनः**, शर्कराक्षस्यापत्यं **शार्कराक्ष्यः** । नामतो **बुडिलः**, अश्वतराश्वस्यापत्यं **आश्वतराश्विः** । पञ्चापि **ते हैते** विस्तीर्णशालासंपन्नत्वेन **महाशाला** महागृहस्थाः । श्रुताध्ययनसंपन्नत्वेन **महाश्रोत्रियाः** । त एवंभूतास्सन्तः **समेत्य** संभूय क्वचि**न्मीमांसां** विचारणां **चक्रुः** । कथमिति ? **को नोऽस्माकमात्मा ? किं ब्रह्म ? इति** । आत्मब्रह्मणोरितरेतरविशेषणविशेष्यत्वम् । ब्रह्मेत्यध्यात्मपरिच्छिन्नात्मतां निवर्तयति । आत्मेति शब्दादात्मातिरिक्तादित्याद्युपास्यतां निवर्तयति ब्रह्मात्मनोरेकत्वात् । यः सर्वात्मा वैश्वानरो ब्रह्मत्वेनाभिमतः स एवात्मेत्येतत् सिद्धं भवति "मूर्धा ते व्यपतिष्यत्" इत्यादि लिङ्गदर्शनात् । **ते ह** ब्रह्मात्मनिश्चयमलभमानाः तल्लाभाय मीमांसमानाः स्वाचार्यं **संपादयाञ्चक्रुः** । नामत **उद्दालको वै** प्रसिद्धः । **भगवन्तः**, अरुणस्यापत्य**मयमारुणिः संप्रति सम्यगिममात्मानमस्मदभिप्रेतं वैश्वानरमध्येति** जानाति । **हन्त** ! इदानीं **तं** प्रति गच्छाम इति निश्चित्य **तं हाभ्याजग्मुः** । स चारुणिस्तान् दृष्ट्वा तदागमनप्रयोजनं ज्ञात्वा **संपादयांचकार** । तत्कथम् ? **इमे महाशालाः महाश्रोत्रिया मां वैश्वानरं प्रक्ष्यन्ति** । **तेभ्योऽहं न सर्वमिव** पृष्टं **प्रतिपत्स्ये** वक्तुं नोत्सहे । अतो **हन्त** ! इदानीं **अहमेषामन्यमभ्यनुशासानि** वक्ष्यामीत्युपदेष्टारं संपाद्य **तान् होवाच** आगतान् । नामतो**ऽश्वपतिर्भगवन्तोऽयं** केकयस्यापत्यं **कैकेयः संप्रति सम्यगिममात्मानं वैश्वानरमध्येती**त्यादि समानम् । राजा **तेभ्यो ह प्राप्तेभ्यः पृथगर्हाणि** पुरोहितादिभिरर्हणानि **कारयाञ्चकार** । **स ह** राजा **परेद्युः** प्रातर्विनयेनोपगम्य **सञ्जिहान उवाच**—किमिति ? इदं धनं मत्तः सकाशादुपादध्वमिति । स तैः इदं धनं मास्त्विति प्रत्याख्यातः सन् राजा स्वात्मनः सद्वृत्ततां ख्यापयति—**न मे** इति । यतो मद्दत्तं न प्रतिगृह्णन्ति अतो मयि नूनं दोषं पश्यन्तीत्यालोच्य न हि मे मम **जनपदे**

परस्वहर्ता स्तेनो विद्यते। विभवे सति न हि कदर्योऽदातास्ति। न हि द्विजो मद्यपोऽस्ति। नानाहिताग्निः शतगुः। स्वाधिकारानुरूपं नाविद्वानस्ति। न स्वैरी परदारहर्तास्ति। अत एव स्वैरिणी कुतः? असंभवात्। वयं न धनार्थिन इति तैरुक्त आह—न मत्तः स्वल्पमपि धनं एते गृह्णन्तीत्यालोच्य हे भगवन्तः! अहं कतिभिरहोभिर्यक्ष्यमाणोऽस्मीति। तदर्थं मया धनं क्लृप्तं रक्षितम्। यावदेकैकस्मा इति ऋत्विजे धनं दास्यामि तावत् प्रत्येकं भगवद्भ्यो दास्यामि वसन्तु भगवन्त इति राज्ञोक्तास्ते होचुः—येन हैवार्थेन पुरुषश्चरेत् तं हैवार्थं वदेत्। अस्मदागमप्रयोजनमिदमित्याहुः। वयं वैश्वानरज्ञानार्थिनः। आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि सम्यग्जानासि। अतस्तमेव नोऽस्मभ्यं ब्रूहीत्युक्तः प्रातः वो युष्मभ्यं प्रतिवक्तास्मीति तान् होवाच। ते ह राज्ञोऽभिप्रायज्ञाः समित्पाणयः परेद्युः पूर्वाह्णे महाशालत्वाभिमानं हित्वा जातितो हीनं राजानं विनयेन विद्यार्थितया प्रतिचक्रमिरे। यथा ते महाशालास्तथान्यैर्विद्यार्थिभिः भवितव्यम्। तेभ्यश्च विद्यामनुपनीय उपनयनमकृत्वैव तान् विद्याभाजनं मत्वा वैश्वानरविज्ञानमुवाचेति वक्ष्यमाणेन संबन्धः। यथा योग्येभ्यो विद्या मया दत्ता तथान्येनापि विद्या दातव्या। तैरपि श्रद्दधानतया ग्राह्येत्याख्यायिकार्थः॥ ११॥

प्राचीनशालेन दिव एव आत्मत्वेनोपासनम्

औपमन्यव! कं त्वमात्मानमुपास्स? इति दिवमेव भगवो राजन्! इति होवाच एष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव सुतं प्रसुतमासुतं कुले दृश्यते। अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते मूर्धा त्वेष आत्मन इति होवाच मूर्धा ते व्यपतिष्यत् यन्मां नागमिष्य इति॥ १२॥

स कथमुवाच ? इत्यत आह—**औपमन्यवेति । औपमन्यव ! कं त्वमात्मानमुपास्से ? इति** पप्रच्छ । आचार्यः शिष्यं पृच्छतीति यत् तदयुक्तमिति चेन्न ; प्रश्नस्य शिष्यप्रतिभोत्पादनार्थत्वात् । तथा च वक्ष्यति "यद्वेत्थ तेन मोपसीद ततस्त ऊर्ध्वं वक्ष्यामि" इति । हे **भगवः राजन् ! दिवं** द्युलोकमेव वैश्वानरमुपासे **इति होवाच । एष वै सुतेजा** इति प्रसिद्धो **वैश्वानरः आत्मा** । तस्यात्मावयवभूतत्वात् । **यमात्मैक**-देशत्वेन **त्वमात्मानमुपास्से तस्मात्** सुतेजसो वैश्वानरस्योपासनात् **तव सुतमभिषुतं** सोमरूपं कर्मणि प्रकर्षेण च सुतमहर्गणादिष्वासुतं **तव कुले दृश्यते** । त्वत्कुलीना अतीव कर्मठा इत्यर्थः । दीप्ताग्निः सन् **अत्स्यन्नं** पुत्रपौत्रादिप्रियमिष्टं **पश्यसि च** । अतोऽन्योऽपि **अत्त्यन्नं पश्यति प्रियम् । अस्यापि च** प्रियं भवति । सुतमासुतमित्यादिकं कर्मित्वं **ब्रह्मवर्चसं च कुले भवतीत्यर्थः । यः** कश्चिदेवं यथोक्तगुणमेतं **वैश्वानरमुपास्ते । एष तु वैश्वानरस्य मूर्धा** उत्तमाङ्गं न हि कृत्स्नम् । अतः समस्तबुद्ध्या वैश्वानरो-पासनाद्विपरीतग्राहिणस्ते **मूर्धा व्यपतिष्यत्** विपतितमभविष्यत् **यत् मां नागमिष्यो** नागतोऽभविष्यः । साध्वकार्षीः यस्त्वं मामागतोऽसीत्यर्थः ॥ १२ ॥

सत्ययज्ञेन आदित्यस्यैव आत्मत्वेनोपासनम्

अथ होवाच सत्ययज्ञं पौलुषिं प्राचीनयोग्य ! कं त्वमा-त्मानमुपास्से ? इति आदित्यमेव भगवो राजन् ! इति होवाच एष वै विश्वरूप आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्तव बहु विश्वरूपं कुले दृश्यते । प्रवृत्तोऽश्वतरीरथो दासीनिष्कोऽत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते चक्षुष्ट्वेतदात्मन इति होवाचा-न्धोऽभविष्यत् यन्मां नागमिष्य इति ॥ १३ ॥

प्राचीनयोग्य ! कं त्वमात्मानमुपास्से ? इति । आदित्यमेव भगवो राजन् ! इति होवाच । आदित्यस्य विश्वरूपत्वेन शुक्लादिसर्वरूपत्वात् । तदुपासनात्तव कुले बहु विश्वरूपमिहामुत्रार्थोपकरणं दृश्यते । किञ्च अश्वतरीभ्यां युक्तो रथोऽश्वतरीरथः त्वामनु प्रवृत्तो दासीगणयुक्तो निष्को हारो यस्य स दासीनिष्कः । अत्स्यन्नमित्यादि समानम् । वैश्वानरस्य चक्षुः सविता । तस्य समस्तबुद्ध्योपासनादन्धोऽभविष्यः चक्षुर्हीनोऽभविष्यः यन्मां नागमिष्य इति पूर्ववत् ॥ १३ ॥

इन्द्रद्युम्नेन वायोरेवात्मत्वेनोपासनम्

अथ होवाच इन्द्रद्युम्नं भाल्लवेयं वैयाघ्रपद्य ! कं त्वमात्मानमुपास्से ? इति वायुमेव भगवो राजन् इति होवाच एष वै पृथग्वर्त्मात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वां पृथग्बलय आयन्ति पृथक रथश्रेणयोऽनुयन्ति । अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते प्राणस्त्वेष आत्मन इति होवाच प्राणस्त उदक्रमिष्यत् यन्मां नागमिष्य इति ॥ १४ ॥

अथ होवाच इन्द्रद्युम्नं भाल्लवेयं इति । यस्यावाहोद्वाहादिभेदतः पृथक् नानावर्त्मानि स्युः सोऽयं पृथग्वर्त्मात्मा वायुः । तस्मात् पृथग्वर्त्मात्मनो वैश्वानरस्योपासनात् पृथक् नानादिग्भ्यस्त्वां बलयो वस्त्रान्नादिलक्षणा बलय आयन्ति आगच्छन्ति । पृथक् रथश्रेणयो रथपङ्क्तयोऽपि त्वामनुयन्ति । अत्स्यन्नमित्यादि समानम् । प्राणस्त्वेष आत्मन इति होवाच । प्राणस्ते तव उदक्रमिष्यत् यन्मां नागमिष्य इति ॥ १४ ॥

जनेन आकाशस्यैवात्मत्वेनोपासनम्

अथ होवाच जनꣳ शार्कराक्ष्य! कं त्वमात्मानमुपास्से? इति आकाशमेव भगवो राजन्! इति होवाच एष वै बहुल आत्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं बहुलोऽसि प्रजया च धनेन च। अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते संदेहस्त्वेष आत्मन इति होवाच संदेहस्ते व्यशीर्यत् यन्मां नागमिष्य इति ॥ १९ ॥

अथ होवाच जनं इति। एष वै बहुल आत्मा वैश्वानरो विराट्। आकाशस्य सर्वगतत्वेन बहुलत्वम्। बहुलगुणोपासनात् त्वं पुत्रपौत्रादिलक्षणया प्रजया च धनेन बहुलोऽसि। सन्देहस्त्वेष आत्मनः वैश्वानरस्य सन्देहो मध्यशरीरम्। दिहेरुपचयार्थत्वान्मांसरुधिरादिभिर्बहुलं शरीरं सन्देहस्ते तव शरीरं व्यशीर्यत् विशीर्णमभविष्यत यन्मां नागमिष्य इति ॥ १९ ॥

बुडिलेन अपामेवात्मत्वेनोपासनम्

अथ होवाच बुडिलमाश्वतराश्वि वैयाघ्रपद्य! कं त्वमात्मानमुपास्से? इति अप एव भगवो राजन्! इति होवाच एष वै रयिरात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वꣳ रयिमान्पुष्टिमानसि। अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते बस्तिस्त्वेष आत्मन इति होवाच बस्तिस्ते व्यभेत्स्यत् यन्मां नागमिष्य इति ॥ १६ ॥

अथ होवाच बुडिलमाश्वतराश्वि इति। एष वै रयिरात्मा वैश्वानरः। तदुपासनात् तस्मात्त्वं रयिमान् धनवान् पुष्टिमान् शरीरपुष्टेश्चान्न-निमित्तत्वात्। वस्तिस्त्वेष आत्मनो वैश्वानरस्य मूत्रस्थानम्। वस्तिस्ते व्यभेत्स्यत् यन्मां नागमिष्य इति ॥ १६ ॥

उद्दालकेन पृथिव्या एवात्मत्वेनोपासनम्

अथ होवाच उद्दालकमारुणिं गौतम! कं त्वमात्मानमुपास्से? इति पृथिवीमेव भगवो राजन् इति होवाच एष वै प्रतिष्ठात्मा वैश्वानरो यं त्वमात्मानमुपास्से तस्मात्त्वं प्रतिष्ठितोऽसि प्रजया च पशुभिश्च। अत्स्यन्नं पश्यसि प्रियमत्त्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एतमेवमात्मानं वैश्वानरमुपास्ते पादौ त्वेतावात्मन इति होवाच पादौ ते व्यम्लास्येतां यन्मां नागमिष्य इति ॥ १७ ॥

अथ होवाच उद्दालकमारुणिं—इति। पृथिवीमेव भगवः! एष वै वैश्वानरस्य प्रतिष्ठा पादौ। पादौ ते व्यम्लास्येतां विम्लानौ शिथिलीभूतौ भविष्यतः यन्मां नागमिष्य इति ॥ १७ ॥

वैश्वानरात्मस्वरूपं तदुपासनफलं च

तान् होवाच एते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वाꣳसोऽन्नमात्थ यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु अन्नमत्ति। तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर

एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो मनोऽन्वाहार्यपचन आस्यमाहवनीयः ॥ १८ ॥

सर्वान् प्रति राजोवाचेत्याह—**तानिति**। यथोक्तवैश्वानरज्ञानवतस्तान् **होवाच**। **वै खलु** इत्यनर्थकौ निपातौ। **एते यूयमपृथक्सन्तमेकं वैश्वानरं पृथगिव विद्वांसोऽन्नमात्थ**। युष्माकं परिच्छिन्नात्मदृष्टित्वात् परिमितं फलं पुत्रपश्वादिरूपम्। **यस्त्वेतमेवं** द्युमूर्धत्वाद्यवयवविशिष्टमेकं प्रादेशैर्द्यु-मूर्धादिपृथिवीपादान्तैरध्यात्मं मीयत इति **प्रादेशमात्रम्**। यद्वा—शास्त्रेण प्रकृष्टमादिश्यत इति प्रादेशमात्रम्। प्रत्यगात्मतयाभिविधो मीयत इत्य**भि-विमानः**। तमेतमात्मानं विश्वान्नरान् पुण्यपापानुरूपं गतिं नयतीति **वैश्वानरमुपास्ते** यः **सोऽयं सर्वेषु** द्युलोकादिषु चराचरसर्वभूतेषु **सर्वेषु** शरीरेन्द्रियावच्छिन्नात्मसु वैश्वानरात्मवित् सर्वात्मा सन् **अन्नमत्ति**। न तथा पिण्डमात्राभिमान्यज्ञः। कथमेवं? इत्यत आह—**तस्येति**। **तस्य ह वा एतस्य** प्रकृतस्यात्मनः **वैश्वानरस्य मूर्धैव सुतेजा** इत्यादि **पृथिव्येव पादा**वित्यन्तमुक्तार्थमेतत्। अथेदानीं वैश्वानरविदो भोजनेऽग्नि-होत्रदृष्टिः कार्येत्याह—**उर** इति। वैश्वानरस्य **उर एव वेदिः** आकृति-सामान्यात्। **लोमानि बर्हिः** वेद्यामिव उरसि लोम्नामास्तीर्णवद्भानात्। **हृदयं गार्हपत्यः** मनआदेर्हृदयात् प्रणीतवद्भानात्। यत एवमतो**ऽन्वाहार्य-पचनोऽग्निर्मनः**। **आस्यं** मुखं अस्मिन्नन्नं हूयत इत्या**हवनीयः** ॥ १८ ॥

प्राणाग्निहोत्रप्रकारः तत्फलं च

तद्यद्भक्तं प्रथममागच्छेत् तद्धोमीयꣳ स यां प्रथमामाहुतिं जुहुयात् तां जुहुयात् प्राणाय स्वाहेति प्राणस्तृप्यति। प्राणे तृप्यति चक्षुस्तृप्यति चक्षुषि तृप्यत्यादित्यस्तृप्यत्यादित्ये तृप्यति द्यौस्तृप्यति दिवि तृप्यन्त्यां यत्किञ्च द्यौश्चादित्यश्चाधितिष्ठतस्त-

तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ १९ ॥

अथ यां द्वितीयां जुहुयात् तां जुहुयात् व्यानाय स्वाहेति व्यानस्तृप्यति । व्याने तृप्यति श्रोत्रं तृप्यति श्रोत्रे तृप्यति चन्द्रमास्तृप्यति चन्द्रमसि तृप्यति दिशस्तृप्यन्ति दिक्षु तृप्यन्तीषु यत्किञ्च दिशश्च चन्द्रमाश्चाधितिष्ठन्ति तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २० ॥

अथ यां तृतीयां जुहुयात् तां जुहुयादपानाय स्वाहेत्यपानस्तृप्यति । अपाने तृप्यति वाक् तृप्यति वाचि तृप्यन्त्यामग्निस्तृप्यत्यग्नौ तृप्यति पृथिवी तृप्यति पृथिव्यां तृप्यन्त्यां यत्किञ्च पृथिवी चाग्निश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २१ ॥

अथ यां चतुर्थीं जुहुयात् तां जुहुयात् समानाय स्वाहेति समानस्तृप्यति । समाने तृप्यति मनस्तृप्यति मनसि तृप्यति पर्जन्यस्तृप्यति पर्जन्ये तृप्यति विद्युत् तृप्यति विद्युति तृप्यन्त्यां यत्किञ्च विद्युच्च पर्जन्यश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २२ ॥

अथ यां पञ्चमीं जुहुयात् तां जुहुयादुदानाय स्वाहेत्युदानस्तृप्यति । उदाने तृप्यति त्वक् तृप्यति त्वचि तृप्यन्त्यां वायुस्तृप्यति वायौ तृप्यति आकाशस्तृप्यति आकाशे तृप्यति यत्किञ्च वायुश्चाकाशश्चाधितिष्ठतस्तत्तृप्यति तस्यानु तृप्तिं तृप्यति प्रजया पशुभिरन्नाद्येन तेजसा ब्रह्मवर्चसेनेति ॥ २३ ॥

हूयमानपञ्चाहुतिप्रकारं तत्फलं चाह— **तद्यदिति** । **तत्** तत्रैवं भोजनकाले **प्रथमं यद्भक्तमागच्छेत् तद्धोमीयं** होतव्यमित्यर्थः । प्राणाग्निहोत्रस्य विवक्षितत्वात् । **सोऽयं** भोक्ता **यां प्रथमामाहुतिं जुहुयात् तां प्राणाय स्वाहेत्यनेन** मन्त्रेण **जुहुयात्** । आहुतिशब्दादवदानप्रमाणमन्नं प्रक्षिपेदित्यर्थः । तेन होमेन **प्राणस्तृप्यति** । **प्राणे तृप्यति** सति **ततश्चक्षुस्तत आदित्यस्ततो द्यौश्च** तृप्यति । **यच्चान्यत् द्यौश्चादित्यश्च** स्वामित्वेनाधितिष्ठत: **तत्तृप्यति** । **तस्यानुतृप्तिं तृप्यति** तेषां तृप्तितः स्वयमभुञ्जानोऽपि तृप्यति । **प्रजया पशुभिरन्नाद्येन तेजसा** देहकान्त्या प्रागल्भ्येन व्यावृत्तस्वाध्यायनिमित्ततेजसा **ब्रह्मवर्चसेनापि** तृप्यत्ययमित्यर्थः । **अथ यां द्वितीयां, अथ यां तृतीयां, अथ यां चतुर्थीं, अथ यां पञ्चमीं**--इति । अथ यां द्वितीयां तृतीयां चतुर्थीं पञ्चमीं इत्यादि समानम् ॥ १९–२३ ॥

वैश्वानरविद्याप्रबोधाप्रबोधफलम्

स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात् तादृक् तत् स्यात् । अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति । तद्यथा इषीकातूलमग्नौ प्रोतं प्रदूयेत एवꣳहास्य सर्वे पाप्मानः प्रदूयन्ते य एतदेवं विद्वानग्निहोत्रं जुहोति । तस्मादु हैवंवित् यद्यपि चण्डालाय उच्छिष्टं प्रयच्छेत् आत्मनि हैवास्य तद्वैश्वानरे हुतꣳ स्यादिति तदेष श्लोकः—

यथेह क्षुधिता बाला मातरं पर्युपासते ।
एवꣳ सर्वाणि भूतानि अग्निहोत्रमुपासते ।
अग्निहोत्रमुपासत इति ॥ २४ ॥

यथावद्वैश्वानरविद्याप्रबोधाप्रबोधफलमाह—**स य इति**। **स यः** कश्चिदिदं वैश्वानरदर्शनं यथावदविद्वान् प्रसिद्धाग्निहोत्रं **जुहोति** यथाहुतियोग्या- **नङ्गारानपोह्य** अनाहुतिस्थाने **भस्मनि जुहुयात् तादृक्** तत्तुल्यम- विद्वदग्निहोत्रहवनं **स्यात्**। अविद्वदग्निहोत्रनिन्दावैश्वानरविदग्निहोत्रस्तुत्यर्थं विद्वदग्नि- होत्रफलं विशदयति—**अथेति**। **य एतदेवं विद्वानग्निहोत्रं जुहोति** विदुषस्तस्य **सर्वेषु लोकेष्वि**त्याद्युक्तार्थम्। हुतं भवति हुतमन्नमत्तीत्यनयोरे- कार्थत्वम्। किञ्च **तद्यथा इषीकायास्तूलमग्नौ प्रोतं** क्षिप्तं **प्रदूयेत** दह्येत **एवं हास्य** वैश्वानरभावमापन्नस्य सर्वान्नात्तुर्विदुषः **सर्वे** निरवशिष्टा धर्मा- धर्मलक्षणाः **पाप्मानो**ऽनेकजन्मसञ्चिता अपि **प्रदूयन्ते** दह्येरन्। तत्र ज्ञानप्राक्कालीना अज्ञानसहभाविनश्च प्रदूयन्ते। न हि वर्तमानशरीरारम्भकाः। तस्य लक्ष्योद्दिष्टबाणवत् प्रवृत्तफलत्वान्न दाहः संभवति। "क्षीयन्ते चास्य कर्माणि" इति, "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते" इति श्रुति- स्मृत्यनुरोधेन समग्रं कर्मत्रयं विलीयत इति चेत्सत्यम्; निर्विशेषज्ञानतः वैश्वानरस्य विश्वरूपत्वेन सविशेषत्वात्। न हि सविशेषज्ञानं कर्मत्रयं निर्मूलयितुं पारयति। तस्मादारब्धकर्मणः उपभोगेन क्षयो युक्त इत्यर्थः। **अथ य एतदेवं विद्वानग्निहोत्रं जुहोति** भुङ्क्ते स **यद्यपि चण्डालाय** उच्छिष्टानर्हाय **उच्छिष्टं प्रयच्छेत्**, उच्छिष्टदानस्य प्रतिषिद्धत्वेऽपि यद्यपि कुर्यात् तच्चण्डालदेहस्थितात्मनि **वैश्वानर** एव ह **तत् हुतं स्यात्**। **तदेतस्मिन्** स्तुत्यर्थः **एष श्लोको** मन्त्रः भवति। **यथेह** लोके **क्षुधिता बालाः** कदा नो माता अन्नं प्रयच्छतीति **मातरं पर्युपासते एवं हि सर्वाणि भूतानि** अन्नादानि एवंविद्वदग्निहोत्रं भोजनं कदा नु अन्नमयं भोक्ष्यत **इत्युपासते**। विद्वद्भोजनेन सर्वं जगत् तृप्तं भवतीत्यत्र—

यद्येको ब्रह्मविद्भुङ्क्ते जगत्तर्पयतेऽखिलम्।

इति स्मृतेः। द्विर्वचनमध्यायपरिसमाप्त्यर्थम् ॥ २४ ॥

इति पञ्चमोऽध्यायः

षष्ठोऽध्यायः

सर्वभूतेषु आत्मैकत्वप्रकटनम्

श्वेतकेतुर्हारुणेय आस तꣳ ह पितोवाच श्वेतकेतो ! वस ब्रह्मचर्यं न वै सोम्य ! अस्मत्कुलीनोऽननूच्य ब्रह्मबन्धुरिव भवतीति । स ह द्वादशवर्ष उपेत्य चतुर्विꣳशतिवर्षः सर्वान् वेदानधीत्य महामना अनूचानमानी स्तब्ध एयाय तꣳ ह पितोवाच श्वेतकेतो ! यन्नु सोम्य ! इदं महामना अनूचानमानी स्तब्धोऽसि उत तमादेशमप्राक्ष्यः । येनाश्रुतꣳ श्रुतं भवति अमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो भवति ? इति । यथा सोम्य ! एकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातꣳ स्यात् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् । यथा सोम्य ! एकेन लोहमणिना सर्वं लोहमयं विज्ञातꣳ स्यात् वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम् । यथा सोम्य ! एकेन नखनिकृन्तनेन सर्वं कार्ष्णायसं विज्ञातꣳ स्यात् वाचारम्भणं विकारो नामधेयं कृष्णायसमित्येव सत्यम् । एवꣳ सोम्य ! स आदेशो भवतीति । न वै नूनं भगवन्तस्त एतदवेदिषुः यद्ध्येतदवेदिष्यन् कथं मे नावक्ष्यन् ? इति भगवाꣳस्त्वेवमेतद्ब्रवीत्विति तथा सोम्य ! इति होवाच ॥ १ ॥

ॐ "सर्वं खल्विदं ब्रह्म तज्जलान्" इति विश्वोत्पत्तिस्थितिलयकारणता उक्ता । अनन्तरं चैकस्मिन् विदुषि तृप्ते भुक्ते सर्वजगत्तृप्तिरप्युक्ता । सर्वभूतात्मन एकत्वे तदुपपद्यते । स्वाज्ञदृष्टिप्रसक्तसर्वभूतेषु स्वज्ञदृष्टिप्रसक्ता-

त्मैकत्वं प्रकटयितुं षष्ठाध्याय आरभ्यते। पितापुत्राख्यायिका तु सर्ववेदान्तसारिष्ठतया विद्यास्तुत्यर्था—**श्वेतकेतुरि**ति। नामतोऽयं **श्वेतकेतुः** अरुणस्य पौत्र **आरुणेयः आस** बभूव। **ह** इत्यैतिह्यार्थः। **तं** पुत्रं विद्याभाजनं **तत्पिता** आरुणिः तदुपनयनकालात्ययं चालोक्य **उवाच**। किमिति? हे **श्वेतकेतो**! **नः** कुलानुरूपं गुरुकुलं गत्वा **ब्रह्मचर्यं वस**। हे **सोम्य**! **अस्मत्कुलीनो**ऽस्मद्वंशजः कश्चिदप्यननूच्यानधीत्य ब्राह्मणा बन्धवो यस्य स **ब्रह्मबन्धुरिव भवति**। न स्वयं ब्राह्मणवृत्त इत्यर्थः। तथा कोऽपि न भवति। यतः पिता योग्यं पुत्रं नोपनेष्यति अतस्स आचार्यान्तरं गत्वा ब्रह्मचर्यं वसत्वित्यभिसन्धिना पित्रैवमुक्तस्सन् **स ह श्वेतकेतुर्द्वादशवर्षः** सन् आचार्य**मुपेत्य** याव**च्चतुर्विंशतिवर्षो** बभूव तावत्**सर्वां**श्चतुरो **वेदानधीत्य** तदर्थं चावगम्य स्वतुल्यः कोऽपि नास्तीति महत् विद्यागर्वितं मनो यस्य सोऽयं **महामनाः** स्वयमेवानूचान इत्यभिमतिर्यस्य **सोऽनूचानमानी स्तब्धः** अप्रणतस्वभावः सन् गृहमेयाय। स्वकुलाननुरूपशीलं स्तब्धतया निषण्णं पुत्रं दृष्ट्वा **तं** ह**ोवाच**। तमसन्मार्गतो व्यावर्त्य सन्मार्गं प्रापिपयिषया हे **श्वेतकेतो**! **यन्नु सोम्य**! **इदं महामना अनूचानमानी स्तब्धश्चासि**। आचार्यनिकटात् कस्त्वयातिशयः प्राप्तः? येन वा परं ब्रह्मादिश्यते स आदेशः। **तमादेशमाचार्यं** प्रत्य**प्राक्ष्यः** किं पृष्टवानसि? आदेशस्य श्रुत्याचार्यैकलभ्यत्वात्। तमादेशमाचष्टे—**येने**ति। **येन** श्रुतेनान्यदश्रुतमपि **श्रुतं भवति**। **अमतमतर्कितं** तर्कितं भवति। इत्थमिदमित्य**विज्ञातं विज्ञातं** निश्चितं भवति। इति कृत्स्नवेदाध्ययनेऽपि स्वात्मतत्त्वाज्ञानादकृतार्थतैव स्यादित्याख्यायिकया द्योत्यते। श्वेतकेतुरेवं श्रुत्वा कथमन्यविज्ञानेनान्यद्विज्ञातं भवति? इति असंभवमालोच्य पृच्छति—हे **भगवः**! **कथन्नु** केन प्रकारेण **स आदेशो भवति**? इति पृष्ट इतर आह—**यथे**ति। सोऽयमादेशो यथा भवति तच्छृणु। हे **सोम्य**! **यथैकेन मृत्पिण्डेन** घटशरावादिकारणतया विज्ञातेनान्यद्विकारजातं **सर्वं मृन्मयं** मृद्विकारं **विज्ञातं स्यात्**। कार्यस्य कारणानन्यत्वात् कार्यकारणयोर्भेदावगतेरियत्ता श्रृण्वेतत्—

वाचारम्भणं वागालम्बनं **विकारो नामधेयं** नाममात्रं विना न हि विकारो नाम किञ्चिद्वस्त्वस्ति। परमार्थतो **मृत्तिकेत्येव सत्यम्**। न हि मृदतिरेकेण किञ्चिदपि घटशरावाद्यस्ति। तस्मात् कार्यावस्थायामपि कारणरूपमृदेव सत्यमित्यर्थः। **यथा सोम्य! एकेन लोहमणिना** सुवर्णघनेन **सर्वमन्यत्** कटकमकुटादिविकारजातं **विज्ञातं स्यात्**। **वाचारम्भण**मित्यादि समानम्। **यथा सोम्य! एकेन नखनिकृन्तनेन** कृष्णायसपिण्डेन **सर्वं** कृष्णायसविकारजातं **विज्ञातं स्यात्**। समानमन्यत्। दृष्टान्तबाहुल्यं दार्ष्टान्तिकदृढप्रतीत्यर्थम्। **एवं सोम्य!** यो मयोक्तः **स आदेशो भवती**त्युक्त इतर आह—**न वा इति**। **नूनं** भगवदुक्तार्थं **भगवन्तो मे गुरवो नावेदिषुः** न विज्ञातवन्तः। **यदि ह्यवेदिष्यन्** एतद्वस्तु **तत्कथं मे** भक्ताय **नावक्ष्यन्**? अतो मन्ये न विदितवन्त इति। यत एवमतो **भगवांस्त्वेव मे** मह्यं यद्विज्ञानतः सर्वज्ञत्वं स्यात् **तद्वस्तु ब्रवीतु**। एवमुक्तस्तथा **सोम्य! अस्त्विति** पिता **उवाच** ॥ १ ॥

सद्वस्तुस्वरूपं जगत्सृष्टिश्च

सदेव सोम्य! इदमग्र आसीदेकमेवाद्वितीयं तद्धैक आहु-रसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसतः सज्जायत। कुतस्तु खलु सोम्य! एवꣳ स्यात् इति होवाच कथमसतः सज्जायेत? इति सत्त्वेव सोम्य! इदमग्र आसीत् एकमेवाद्वितीयम्। तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत बहु स्यां प्रजायेयेति तदपोऽसृजत तस्माद्यत्र क्व च शोचति स्वेदते वा पुरुषस्तेजस एव तदधि आपो जायन्ते। ता आप ऐक्षन्त बह्व्यः स्याम प्रजायेमहीति ता अन्नमसृजन्त तस्मात् यत्र क्व च वर्षति तदेव भूयिष्ठमन्नं भवति अद्भ्य एव तदधि अन्नाद्यं जायते ॥ २ ॥

किं तद्वस्तु? इत्यत आह—**सदेवेति**। "पश्यतेहापि सन्मात्रमसदन्यत्" इति श्रुतिसहस्रेभ्यो यन्निष्प्रतियोगिकसन्मात्रमवगम्यते तदेव **सदिति** सच्छब्देनोच्यते। सदेवेत्येवकारोऽवधारणार्थः। सद्व्यतिरिक्तं न किञ्चिदस्तीत्यवधृतम्। सदतिरिक्तं जगदस्तीत्यत आह—**इदमिति**। यत् स्वाज्ञदृष्ट्या नामरूपक्रियावत् व्याकृतमुपलब्धं तदिदं जगत् स्वज्ञदृष्ट्या सदेवासीत्। कदेदं सदेवासीत्? इत्यत आह—**अग्र इति**। जगदभिव्यक्तेरग्रे प्राक्। किं नेदानीम्? इदानीमपि सदेव स्वज्ञानां स्वाज्ञानां नामरूपविशेषावच्छिन्नेदंबुद्धिविषयवत् भाति। उत्पत्त्यग्रे तु स्वाज्ञादेरभावात् सदेवेदमासीदित्यत्र न विवादः। यथा घटशरावादिकं न हि कालत्रयेऽपि मृदतिरिक्तं तथेदं जगत् कालत्रयेऽपि न सदतिरिक्तमस्तीत्यर्थः। यत् सदेवेत्यवधृतं तत् किं सप्रतियोगि? तत्राह— **एकमिति**। निष्प्रतियोगिकभावरूपं ब्रह्म कालत्रयेऽप्येकमित्यर्थः। एकशब्दतो निष्प्रतियोगिकभावरूपत्वेन सजातीयमायासंभवो द्योत्यते। एवकारतो विजातीयप्रपञ्चनिरासः। **अद्वितीय**शब्दतो विश्वविश्वाद्यविकल्पानुज्ञैकरसान्तत्रिपञ्चदशस्वगतभेदनिरासः। एवं स्वाज्ञदृष्टिप्रसक्तसजातीयादिभेदः स्वज्ञदृष्ट्या निरस्यते। वस्तुतस्तु स्वाज्ञादिदृष्टिमोहे सत्यसति सन्मात्रं निष्प्रतियोगिकस्वमात्रमवशिष्यत इत्यर्थः।

अनाख्यमनभिव्यक्तं सत् किञ्चिदवशिष्यते।

इति श्रुतेः। एवं सिद्धान्तेऽपि **तत्तत्र** सन्मात्रे वस्तुन्येके **वैनाशिका आहुः**। किमिति? **असदेव** सदभावमात्रम**ग्रे एकमेवाद्वितीयमासीदिति**। सदभावमात्रं हि प्रागुत्पत्तेस्तत्त्वं कल्पयन्ति। यस्मादेवं **तस्मादसतः** शशविषाणतुल्यात् **सत्** विद्यमानं वस्तु जायेतेत्येवं वैनाशिकपक्षं दर्शयित्वा प्रतिषेधति—**कुत इति**। कुतस्तु प्रमाणात् **खलु सोम्य! एवं स्यात्? इति होवाच। कथमसतस्सज्जायेत? इति**। न कुतश्चन प्रमाणादेवं संभवतीत्यर्थः। न ह्यभावात् भावोत्पत्तिरिष्यते। यदि स्यात्तदा घटार्थिना तत्कारणं नोपादीयेत। घटादावप्यभावता प्रसज्येत। न त्वेतदस्ति। अतो नासतः सदुत्पत्तिः।

न च—मृद्बुद्धिः घटबुद्धेः कारणम्; न हि मृत् घटो वास्तीति वाच्यम्। तथापि विद्यमानमृद्बुद्धेः विद्यमानघटबुद्धिकारणत्वात् न ह्यसतः सदुत्पत्ति-दृष्टान्तोऽस्तीत्यसद्वादिपक्षमुन्मूल्य स्वपक्षं स्थापयति--**सत्त्वेव सोम्य! इदमग्र आसीदेकमेवाद्वितीयमिति**। सतः सदुत्पत्तिदृष्टान्तो नास्तीति चेन्न; सतः संस्थानान्तरेणावस्थितत्वात्। यथा सर्पः कुण्डली यथा च मृत् चूर्णकपालघटाद्यात्मनावस्थिता तथा सदेव सर्वावस्थं भवतीत्यर्थः। यदा मृदादिसंस्थानमात्रं घटादयस्तथा सत्संस्थानमात्रमिदं सर्वमिति युक्तम्। तद्विकारसंस्थानस्य वाचारम्भणमात्रत्वात्। उक्तं हि "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं" इति, "तदेतत् ब्रह्म अपूर्वमनपरमनन्तरम-बाह्यं निष्कलं निष्क्रियं" इत्यादिश्रुतिसिद्धस्य सतः कथं सर्वविकारावस्थता? इति चेन्न; रज्ज्वज्ञानविजृम्भितसर्पसंस्थानवत् सन्मात्राज्ञधीविकल्पितविकार-संस्थानोपपत्तेः। न स्वज्ञदृष्ट्या "एकमेवाद्वितीयं" इति यत् सदभिहितं इदंबुद्धिकालेऽपि तत्सत् **ऐक्षत** ईक्षां दर्शनं कृतवत्। तदितरस्या-चेतनत्वादिदं सचेतनं ईक्षितृत्वात्। तत्कथमैक्षत? इत्यत आह--**बहु स्यामिति**। बहु प्रभूतं **स्यां** भवेयम्। यथा रज्ज्वादि स्वाज्ञानां सर्पादिरूपेण भासमानमिव जायते तथा स्वाज्ञदृष्ट्या **प्रजायेय** उत्पद्येय इव। न वस्तु-याथात्म्यदृशामधिष्ठानदर्शनस्यारोपबुद्धिनिरासकत्वात्।

यतो वाचो निवर्तन्ते विकल्पकलनान्विताः।
विकल्पसंक्षयाज्जन्तोः पदं तदवशिष्यते॥

इति श्रुतेः। प्रकृते तु स्वाज्ञदृष्ट्या तदैक्षतेति यत् मूलाविद्याबीजांशयोगतो बीजभावं प्राप्तवद्भातं तत् एवमीक्षित्वा **तेजोऽसृजत** सृष्टवत्। आदावा-काशादिसृष्टिप्रमाणविरोध इति चेन्न; आकाशवायुसृष्ट्यनन्तरभावित्वात् तेजआदिसृष्टेः। यद्वा सृष्टिक्रमस्याविवक्षितत्वात् मृदादिदृष्टान्ततः सत्कार्यमिदं सर्वमेकमेवाद्वितीयमिति विवक्षितम्। अथवा तेजोऽबन्नानामिव त्रिवृत्करणस्य विवक्षितत्वात्। तेजआदिसृष्टिमेवाचष्टे—**तदिति**। यत् रोहितरूपेण दग्धृपक्तृ-

प्रकाशकतया प्रकाशति चकास्ति **तत्** तेजोरूपसंस्थितं **सदैक्षत । बहु स्यां प्रजायेयेति** पूर्ववत् । **तदपोऽसृजत** । यतस्तेजसः कार्यभूता द्रवाः स्निग्धाः स्यन्दिन्यः आपः **तस्माद्यत्र क्व च** देशे काले वा **शोचति** सन्तप्यते **स्वेदते** प्रस्विद्यते **वा पुरुषः तेजस एव तत्तदापोऽधिजायन्ते । ता आप ऐक्षन्त** अब्आकारसंस्थितं सत् ऐक्षतेत्यर्थः । **बह्व्यः** प्रभूताः **स्यामो** भवेम **प्रजायेमहि** उत्पद्येमहीति । **ताः** पृथिवीलक्षणं पार्थिवं **अन्नमसृजन्त** । यस्मात् अप्कार्यमन्नं **तस्मात् यत्र क्व च देशे वर्षति** तत्तत्रैव **भूयिष्ठमन्नं भवति** । अतोऽ**द्भ्य एव तदन्नाद्यमधिजायते** । पूर्वं ता अन्नमसृजन्तेति पृथिव्युक्ता । इह तु दृष्टान्ते तावदन्नं च तदद्यं चेति विशेषतो व्रीहियवाद्युच्यते । तेजःप्रभृतीनामचेतनत्वात् कथं तेज ऐक्षत ? इति चेन्न ; तेजःप्रभृतीनामीक्षितृकारणपरिणामित्वात् ईक्षितृ अवेक्षितृ उच्यते । तद्गतेक्षितृत्वस्य तदनुगतसन्निष्ठत्वात् । यत एवमतश्चेतश्चेतनावत्कारणं जगदित्यर्थः ॥ २ ॥

तेजोऽबन्नानां त्रिवृत्करणप्रकारः

तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति आण्डजं जीवजमुद्भिज्जमिति । सेयं देवता ऐक्षत हन्त ! अहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति । तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सेयं देवता इमास्तिस्रो देवता अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरोत यथा नु खलु सोम्य ! इमास्तिस्रो देवतास्त्रि-वृत्त्रिवृदेकैका भवति तन्मे विजानीहीति ॥ ३ ॥

तेजोऽबन्नानां त्रिवृत्करणमुच्यते—तेषामिति । तेजःप्रभृतीनां त्रिवृत्कर-णस्य विवक्षितत्वात् तदभावे प्रत्यक्षनिर्देशानुपपत्तेः । तेजःप्रभृतिषु तिस्रो

देवता इति देवताशब्दप्रयोगान्न तेषां बीजनिर्देशः । तस्मात् **तेषां खल्वेषां** जीवविशिष्टपशुपक्षिस्थावरादीनामन्यूनातिरेकेण **त्रीण्येव बीजानि** कारणानि **भवन्ति** । तानि कानि? इत्यत्र अण्डात् जातमण्डजं तस्मादेवाण्डजं पक्षिसर्पादि । तज्जातितस्तदुत्पत्तिनियमात् । तज्जातिः तज्जातिबीजमित्यर्थः । अण्डाज्जातमण्डजमित्यत्र अण्डजस्याण्डमेव बीजं स्यादिति चेत्, सत्यम; श्रुतेः स्वच्छन्दानुवर्तित्वे स्यादेवम् । यतोऽण्डजाद्येव बीजं नाण्डादीत्याह अतो हि श्रुतिः स्वतन्त्रा । अण्डजाद्यभावे तज्जातीयसन्ततिविच्छेदात् । अतोऽण्डजादीनामण्डजान्येव बीजानि । तथा जीवाज्जातं **जीवजं** पुरुषपश्वादि जरायुजमित्येतत् । उद्भिनत्तीत्युद्भित् स्थावरम् । ततो जातमुद्भिज्जम् । स्थावराणां स्थावरमेव बीजम् । स्वेदजशोकजयोरण्डजोद्भिज्जयोर्यथायोगमन्तर्भावः । एवं चेत् त्रीण्येव बीजानीत्युत्पन्नं भवतीत्यर्थः । या प्रकृता **सेयं** सदाख्या **देवता** तेजोबन्नयोर्निरैक्षत । यथापूर्वं बहु स्यामितीक्षितवती बहुभवनमेव प्रयोजनमुररीकृत्य । **हन्त!** इदानीम**हमिमास्तिस्रस्**तेजआद्या **देवता अनेन** जीवेनान्तःकरणावच्छिन्नवद्भातेन वस्तुतस्तेजोऽबन्नभूततत्कार्यसङ्घात्**मना** तेजआदिभूततत्कार्य**मनुप्रविश्य, नाम** च **रूपं** च **नामरूपे** असौनामा अयं इदंरूप इति **व्याकरवाणि** विस्पष्टं व्याकुर्यामिति । अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति महासङ्कल्पपूर्वकमनेकदेहानुप्रवेशो बहुदुःखाय स्यादिति चेन्न; तत्संबन्धाभावात् । यथादर्शादौ पुरुषादिः छायामात्रेणानुप्रविष्टवत् भातोऽपि तद्गतदोषासंसर्गी तद्वत् देवतापीत्यत्र—

सूर्यो यथा सर्वलोकस्य चक्षुः न लिप्यते चाक्षुषैर्बाह्यदोषैः ।
एकस्तथा सर्वभूतान्तरात्मा न लिप्यते लोकदुःखेन बाह्यः ॥

इति श्रुतेः । छायामात्रप्रवेशेन मृषात्वं स्यादिति चेन्न; सदात्मना सत्त्वाभ्युपगमात् । नामरूपादिविकारजातं सदात्मना सत्यं विकाराणां सद्भिन्नत्वे वाचारम्भणमित्युक्तत्वात् । यत एवमतस्सर्वविकाराणां व्यावहारिकप्रातिभासिकदृष्टिभ्यां सत्त्वम् । "ब्रह्ममात्रमसन्न हि" इति श्रुत्यनुगृहीतपारमार्थिक-

दृष्ट्या ब्रह्मातिरिक्तस्यासत्त्वमेव न विरोधः। व्यावहारिकदृष्ट्या या सदेवेत्यवधारिता सैवेयं तिस्रो देवता अनुप्रविश्य स्वविकल्पितानभिव्यक्तनामरूपेऽभिव्यक्ततया व्याकरवाणीतीक्षित्वा तासां तिसृणां देवतानां एकैकां त्रिवृतं त्रिवृतं पृथक् पृथक् करवाणीति। इदं तेज इमा आप इदमन्नमिति व्यवहारप्रयोजनमीक्षित्वा सेयं देवता इमास्तिस्रो देवता अनेन जीवेनात्मना जलसूर्यप्रवेशवत् देवानां प्रथमं वैराजदेहमनुप्रविश्य यथाक्लृप्तमेव नामरूपे व्याकरोत्। तासां देवतानां गुणप्रधानतः त्रिवृत्त्रिवृतमेकैकामकरोत्। यथा नु खलु सोम्य! इमाः तिस्रो देवताः त्रिवृत्त्रिवृदेकैका भवति। देवतानां तेजोऽबन्नमयत्वेन त्रिधात्वमिति यत् तन्मे निगदतो विजानीहि विस्पष्टमवधारयेत्यर्थः ॥ ३ ॥

त्रिवृत्करणस्य उदाहरणम्

यदग्ने रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागात् अग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यदादित्यस्य रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागात् आदित्यादादित्यत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यच्चन्द्रमसो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागात् चन्द्राच्चन्द्रत्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। यद्विद्युतो रोहितꣳ रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागात् विद्युतो विद्युत्त्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्यम्। एतद्ध स्म वै तद्विद्वाꣳस आहुः पूर्वे महाशाला महाश्रोत्रिया न नोऽद्य कश्चनाश्रुतममतमविज्ञातमुदाह-

रिष्यतीति ह्येभ्यो विदांचक्रुः । यदु रोहितमिवाभूदिति तेजस-
स्तद्रूपमिति तद्विदांचक्रुः यदु शुक्लमिवाभूत् इत्यपाꣳ रूपमिति
तद्विदांचक्रुः यदु कृष्णमिवाभूदित्यन्नस्य रूपमिति तद्विदांचक्रुः ।
यद्विज्ञातमिवाभूत् इत्येतासामेव देवतानाꣳ समास इति तद्विदांचक्रुः
यथा नु खलु सोम्य! इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रि-
वृदेकैका भवति तन्मे विजानीहीति ॥ ४ ॥

एकदेशसिद्धितोऽशेषसिद्धये यत् देवतानां त्रिवृत्करणमुक्तं तस्योदाहरण-
माह—**यदिति** । लोके त्रिवृत्कृतस्याग्नेः **यत् रोहितं रूपं** प्रसिद्धं **तत्** अत्रिवृत्कृ-
तस्य **तेजसो रूपमिति** विद्धि । तथा **यदग्नेः शुक्लं रूपं तत्** अत्रिवृत्कृतापां
रूपम् । **यत्कृष्णं रूपं तद**त्रिवृत्कृतान्नाख्यपृथिव्या रूपमिति विद्धि ।
तत्रैवं रूपत्रयव्यतिरेकेणाग्निरिति यन्मन्यसे तस्या**ग्नेरग्नित्वम्** । रूपत्रय-
विवेकात् पूर्वमग्निबुद्धिरासीत् तव । इदानीं तु याग्निशब्दवाच्या सा बुद्धि**रपागाद**-
पगता स्यात् । रोहितादिरूपविवेकात् पुरा खल्वग्नेरग्नित्वम् । ततोऽग्निरिति
बुद्धिर्निवर्तते । पुराग्निरिति यन्नाम **विकारः तन्नामधेयं वाचारम्भणं**
नाममात्रमित्यर्थः । एवमग्निबुद्धेरनृतत्वे किं तत्सत्यं ? इत्यत्र **त्रीणि रूपाणीत्येव
सत्यम्** । एवेत्यवधारणतो रूपत्रयातिरिक्तं किंचिदपि नास्तीति द्योत्यते । तथा
यदादित्यस्य यच्चन्द्रमसो यद्विद्युत इत्यादि समानम् । तेजोऽवन्नानां
त्रिवृत्करणं प्रतिज्ञाय अग्न्यादिचतुर्भिर्विशेषणैः तेजस एव त्रिवृत्करणमुक्त्वा
अवन्नयोरुदाहरणं किं न प्रकाशितं ? इति चेत्, सत्यम्; एवं वक्तव्यम् ।
किन्तु तेजस उदाहरणं अवन्नोदाहरणोपलक्षणार्थं मन्यते श्रुतिः । यद्वा
गन्धरसयोरनुदाहरणं युक्तमेव त्रयाणामसम्भवात् । न हि गन्धरसौ
तेजस्युपलभ्येते । शब्दस्पर्शयोर्विभागेन दर्शयितुमशक्यत्वात् अनुदाहरणं
युक्तम् । इदं जगत् अग्न्यादिवत् त्रिवृत्कृतमित्युक्त्या अग्नेरग्नित्वापगमवत् जगतो
जगत्त्वमप्यपगमतां भजेदिति । तथान्नस्यापां शुक्लत्वेनापां सत्यत्वमपां तेजसः

शुङ्गत्वेन तेजसः सत्यत्वम्। तेजसोऽपि सच्छुङ्गत्वेन सत एव निरङ्कुशसत्यत्वम्। अन्नाप्तेजसां तु स्वस्वकारणानुप्रवेशतो वाचारम्भणमेवेत्यतदर्थस्य विवक्षितत्वात्। वाय्वाकाशयोरत्रिवृत्कृतत्वेन तेजोऽबन्नेष्वनन्तर्भूतत्वात् स्पर्शशब्दो विशिष्येत। कथं सता विज्ञातेन सर्वमन्यदविज्ञातं विज्ञातं भवेत्? इति चेन्न; रूपवद्द्रव्ये सर्वस्यान्तर्भूतत्वात्। तत्कथं? तेजसि शब्दस्पर्शयोरप्युपलब्धेः। अतस्तेजसि शब्दस्पर्शगुणवदाकाशवायुसद्भावोऽनुमीयते। तथा रूपवदबन्नयोः रसगन्धान्तर्भाव इति रूपवद्भूतत्रयत्रिवृत्करणतः सर्वं तदन्तर्भूतम्। सर्वस्य सद्विकारत्वात्। सर्वं रूपत्रयवद्विज्ञातं मन्यते श्रुतिः। यथा त्रिवृत्कृते त्रीणि रूपाणीत्येव सत्यं तथा पञ्चीकरणेऽपि समानोऽयं विभागः। त्रिवृत्करणवत् पञ्चीकरणस्यापि सद्विकारत्वाविशेषात्। सद्विज्ञानतः सर्वमिदं विज्ञातं स्यात्। तदेकस्मिन् सति विज्ञाते सर्वमिदं विज्ञातं भवति इति यदुक्तं तद्युक्तमित्यर्थः। **एतदर्थं तद्विद्वांसः पूर्वेऽतिक्रान्ता महाशाला महाश्रोत्रिया आहुः**। किमिति? **नोऽस्माकं कुलेऽद्येदानीं कश्चन कश्चिदप्यश्रुतममतमविज्ञातमुदाहरिष्यति** अस्मत्कुलीनानां सद्याथात्म्यज्ञत्वात्। कथं? इत्यत्र **एभ्यस्त्रिवृत्कृतरोहितादिरूपेभ्यः सर्वं सदिति विदाञ्चक्रुः**। सद्विज्ञानादेते सर्वज्ञा आसुरित्यर्थः। केन प्रकारेण विदाञ्चक्रुः? इत्यत्र—**यस्मिन्** कस्मिंश्चिद्वस्तुनि कपोतादिरूपे **यद्रोहितवद्भाति तत्तेजसो रूपमिति विदाञ्चक्रुः। यच्छुक्लवद्भातं तदपां यत्कृष्णमिव स्यात् तदन्नस्य रूपमिति विदाञ्चक्रुः। यत्** इदमित्थमिति दुर्लक्ष्यतया **विज्ञातमिवाभूत् तदप्येतासामेव देवतानां समासः** समुदाय इति **विदाञ्चक्रुः**। किं त्वया एतावताऽग्न्यादिवत् बाह्यं वस्तु विज्ञातम्? अथेदानीं ते विशेषतो निरूप्यते—**यथेति। यथा नु खलु सोम्य! इमास्तिस्रो देवताः** शिरःपाण्यादिलक्षणं **पुरुषं प्राप्य पुरुषेण** भुज्यमानास्सत्यः **त्रिवृत्त्रिवृदेकैका भवति**। भेदतस्तन्मे **विजानीहीति** ॥ ४ ॥

अन्नादीनां त्रेधा विधानम्

अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति यो मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः। आपः

पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो धातुस्तन्मूत्रं भवति यो मध्यमस्तल्लोहितं योऽणिष्ठः स प्राणः । तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति यो मध्यमः स मज्जा योऽणिष्ठः सा वाक् । अन्नमयꣳ हि सोम्य ! मनः आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य ! इति होवाच ॥ ९ ॥

किं तत् ? इत्यत आह—**अन्नमिति**। **अन्नमशितं** जाठराग्निना पच्यमानं **त्रेधा विधीयते** विभज्यते। तत्कथम् ? अशितान्नस्य **तस्य यः स्थविष्ठो धातुः तत्पुरीषं भवति**। तदन्नस्य **यो मध्यमो** धातुः तत् रसादिक्रमेण परिणम्य **मांसं** भवति । **योऽणिष्ठोऽ**णुतमो धातुः स हृदयं प्राप्य सूक्ष्मनाडीष्वनुप्रविश्य वागादिकरणग्रामानुग्राहकं **मनो** भवति। मनसोऽन्नोपचितत्वात् भौतिकत्वम्। ततो न हि नित्यत्वं निरवयवत्वं वा उपपद्यते । "मनोऽस्य दैवं चक्षुः" इति यदपि वक्ष्यते तदपीन्द्रियापेक्षया नित्यत्वमापेक्षिकम् । "सदेकमेवाद्वितीयं" इति स्वातिरिक्तसत्त्वासहश्रुतेः । तथापः **पीतास्त्रेधा विधीयन्ते । तस्ये**त्यादि समानम् । तथा च वक्ष्यति—"आपोमयः प्राणो न पिबतो विच्छेत्स्यते" इति । तथा **तेजोऽशितं** तैलघृतादि भक्षितं **त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुः तदस्थि भवति । यो मध्यमः स मज्जा । योऽणिष्ठः सा वाक्**। तैलघृतादिभक्षणस्य वाग्मित्वहेतुत्वात् । यत एवमतो**ऽन्नमयं हि सोम्य! मन आपोमयः प्राणस्तेजोमयी वागिति**। केवलान्नमापः स्नेहद्रव्यं भक्षतामाखुमत्स्यादीनां मनस्वित्वप्राणवत्त्ववाग्मित्वाविशेषात् कथमन्नमयं हि सोम्य! मन इत्यादिव्यपदेशः ? इति चेन्न ; अन्नाप्तेजसां त्रिवृत्कृतत्वेन सर्वत्र मनस्वित्वाद्युपपत्तेः । न हि कश्चिदप्यत्रिवृत्कृतमन्नमापस्तेजो वाश्नाति । एवं प्रत्यायितः श्वेतकेतुर्विस्पष्टप्रतिपित्सया पृच्छतीत्याह—**भूय**

इति । भूय एव दृष्टान्तान्तरेण मा मां प्रति भगवान् विज्ञापयतु अवगमयतु । तमेवमुक्तवन्तं यथा एतदुपपद्यते तत् तथास्तु सोम्य! इति पितोवाच ह ॥५॥

मनःप्रभृतीनामन्नादिमयत्वम्

दध्नः सोम्य! मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तत्सर्पिर्भवति । एवमेव खलु सोम्य! अन्नस्याश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति । अपा॒ सोम्य! पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवति । तेजसः सोम्य! अश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाक् भवति । अन्नमय॒ हि सोम्य! मन आपोमयः प्राणस्तेजोमयी वागिति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य! इति होवाच ॥ ६ ॥

वक्ष्यमाणदृष्टान्तः कः? इत्यत आह—दध्न इति। हे सोम्य! दध्नो मथ्यमानस्य योऽणिमा सुसूक्ष्मभागः स ऊर्ध्वः समुदीषति संभूय नवनीतभावेन ऊर्ध्वमुत्तिष्ठति तत्सर्पिर्भवति। यथा दृष्टान्तोऽयं एवमेव खलु सोम्य! अन्नस्याश्यमानस्य औदर्यवाय्वग्निभ्यां मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति। मनोऽवयवैर्मिलित्वोपचिनोतीति यावत्। तथापां सोम्य! पीयमानानां योऽणिमा स ऊर्ध्वः समुदीषति स प्राणो भवतीति। एवमेव खलु सोम्य! तेजसोऽश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति सा वाक् भवतीत्यादि समानम्। यदुक्तं भवता तत्सत्यमेवास्तु। मनस्तु अन्नमयमित्यत्र मम निश्चयो नैकान्तेन जातः। अतो मनसोऽन्नमयत्वं दृष्टान्तेन भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्य! इति होवाच पितेति ॥ ६ ॥

मनसस्त्वन्नविकारत्वे दृष्टान्तकथनम्

षोडशकलः सोम्य ! पुरुषः पञ्चदशाहानि माशीः काममपः पिब आपोमयः प्राणो न पिबतो विच्छेत्स्यत इति । स ह पञ्चदशाहानि नाश अथ हैनमुपससाद किं ब्रवीमि भोः ? इति ऋचः सोम्य ! यजूꣳषि सामानीति स होवाच न वै मा प्रतिभान्ति भो इति । तꣳ होवाच यथा सोम्य ! महतोऽभ्याहितस्यैकोऽङ्गारः खद्योतमात्रः परिशिष्टः स्यात् तेन ततोऽपि न बहु दहेदेवꣳ सोम्य ! ते षोडशानां कलानामेका कलातिशिष्टा स्यात् तयैतर्हि वेदान्नानुभवसि अशान अथ मे विज्ञास्यसीति । स हाश अथ हैनमुपससाद तꣳह यत्किञ्च पप्रच्छ सर्वꣳ ह प्रतिपेदे । तꣳ होवाच यथा सोम्य ! महतोऽभ्याहितस्यैकमङ्गारं खद्योतमात्रं परिशिष्टं तं तृणैरुपसमाधाय प्रज्वालयेत् तेन ततोऽपि बहु दहेत् । एवꣳ सोम्य ! ते षोडशानां कलानामेका कलातिशिष्टाभूत् सान्नेनोपसमाहिता प्राज्वालीत् तयैतर्हि वेदाननुभवसि अन्नमयꣳहि सोम्य ! मन आपोमयः प्राणस्तेजोमयी वागिति तद्धास्य विजज्ञाविति विजज्ञाविति ॥ ७ ॥

मनसस्त्वन्नविकारत्वे दृष्टान्तमाह—**षोडशेति** । यो भुक्तान्नाणिष्ठधातुः स्वस्वशक्तिं मनस्यादधाति । सा अन्नोपचिता मनश्शक्तिः पुरुषकलात्वेन निर्दिदिक्षया षोडशधा प्रविभक्ता । तया संयुक्तः **षोडशकलः** जीवः शिरःपाण्यादिलक्षणः **पुरुष** उच्यते । यस्यां सत्यां द्रष्टृत्वादिशक्तिः यदभावे सामर्थ्यहानिः अतः सर्वकारणसामर्थ्यं मनःकृतमेव । तद्बलेन हि संपन्ना लोके बलिनो भवन्ति । षोडशकलपुरुषस्यान्नकृतमेव हि मानसं वीर्यम् ।

यदि तत्प्रत्यक्षीकर्तुमिच्छसि तदैवं कुरु। किं मया कर्तव्यम्? हे सोम्य! त्वमितः **पञ्चदशसङ्ख्याकान्यहानि माशीः** अशनं मा कार्षीः निरशनं कुरु इत्येतत् यथाकाम**ममपः पिब**। एवं पिबतस्ते **प्राणो न विच्छेत्स्यते** न हि विच्छेदमापत्स्यते। यस्मा**दापोमयः प्राणः** तस्याब्विकारत्वात्। **स हैवं** मनसोऽन्नमयत्वं श्रुत्वा तत्प्रत्यक्षीकरणेच्छया **पञ्चदशाहानि नाश** निरशनेन उषितवान्। **अथ ह** षोडशेऽहन्ये**नं** पितर**मुपससाद** उपगम्योवाच—**किं ब्रवीमि भोः! इति**। तमितर आह—**हे सोम्य! ऋचो यजूंषि सामान्यधी**ष्वेति। पित्रैवमुक्त आह—**न वै मां** ऋगादीनि **प्रतिभान्ति** मन्मनसि न स्फुरन्तीत्यर्थः। **भो** भगवन्! इत्येवमुक्तवन्तं पिताह—यतस्ते ऋगादीनि न प्रतिभान्ति तत्कारणं श्रृण्विति **तं होवाच—हे सोम्य!** यथा इन्धनैः **अभ्याहितस्य महतो** महत्परिमाणस्याग्नेः पुनरिन्धनायोगादुपशान्तस्य **खद्योत**परिमाणमात्रोऽयं **एकोऽङ्गारः परिशिष्टः स्यात्**। तेनाङ्गारेण **ततोऽपि** तत्परिमाणादीषदपि **न बहु दहेत्**। **एवमेव खलु सोम्य! ते** तवान्नोपचितानां **षोडशानां कलानामेका कलातिशिष्टा स्यात्**। **तया खद्योत**मात्राङ्गारतुल्यया त्वं **एतर्हि**दानीं **वेदान्नानुभवसि**। **मे** मम वाचं **श्रृणु**। **अथाशेषं विज्ञास्यसि**। किं तत्? इदानीमश **भुङ्क्ष्व**। **स ह** तथैवा**श** भुक्तवान्। **अथ हैनं** पितरं शुश्रूषु**रुपससाद**। स होपगतवन्तं पुत्रं यत्किंचित् ऋगादिग्रन्थजातं तदर्थं च **पप्रच्छ**। स ह श्वेतकेतुस्तत्सर्वं ग्रन्थतोऽर्थतश्च **प्रतिपेदे**। **पुनः पिता तं होवाच—यथा सोम्य! महतोऽभ्याहित**स्येत्यादि समानम्। शान्ताग्नेः **खद्योतमात्रं परिशिष्टमेकमङ्गारं तं तृणा**दि**भिरुपसमाधाय** उपचयं कृत्वा **प्रज्वालयेत** वर्धयेत्। **तेनाङ्गारेण ततः** पूर्वपरिमाणा**दपि बहु दहेत्**। **एवं सोम्य! ते** तव **पञ्चदशाहान्यभुक्तवतः एका कलातिशिष्टा स्यात्** अपरपक्षशशिकलावत्। **सा** पुनर्भुक्तान्नेन प्रतिकवलं पूर्वपक्षशशिकलावत् **उपसमाहिता** वर्धिता सती **प्राज्वालीदिति** तदान्नेन उपसमाहिता स्वयं प्रज्वलितवतीत्यर्थः। **तया एतर्हि** इदानीं **वेदाननुभवसी**त्येवं व्यावृत्त्यनुवृत्तिभ्यां मनसोऽन्नमयत्वं सिद्धमित्युपसंहरति—**अन्नमयं हि सोम्य !**

मन इत्यादि । मनसोऽन्नमयत्वं यथा तव सिद्धं तथा आपोमयः प्राणः तेजोमयी वागिति च सिद्धमित्यभिप्रायः । तदेतत् हास्य पितुरुक्तं मनआदीनामन्नमयत्वं श्वेतकेतुर्विजज्ञौ विस्पष्टं ज्ञातवान् । द्विर्वचनं त्रिवृत्करणसमाप्त्यर्थम् ॥ ७ ॥

सदाख्यदेवतायाः परमार्थतः सन्मात्रतयावशेषः

उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच स्वप्नान्तं मे सोम्य ! विजानीहीति यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य ! तदा संपन्नो भवति स्वमपीतो भवति तस्मादेनꣳ स्वपितीत्याचक्षते स्वꣳ ह्यपीतो भवति । स यथा शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा बन्धनमेवोपश्रयत एवमेव खलु सोम्य ! तन्मनो दिशं दिशं पतित्वान्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनꣳ हि सोम्य ! मन इति । अशनापिपासे मे सोम्य ! विजानीहीति यत्रैतत्पुरुषोऽशिशिषति नामाप एव तदशितं नयन्ते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तदप आचक्षतेऽशनायेति तत्रैतच्छुङ्गमुत्पतितꣳ सोम्य ! विजानीहि नेदममूलं भविष्यतीति । तस्य क्व मूलꣳ स्यादन्यत्रान्नात् ? एवमेव खलु सोम्य ! अन्नेन शुङ्गेनापो मूलमन्विच्छ अद्भिः सोम्य ! शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य ! शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्य ! इमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः । अथ यत्रैतत्पुरुषः पिपासति नाम तेज एव तत्पीतं नयते तद्यथा गोनायोऽश्वनायः पुरुषनाय इत्येवं तत्तेज आचष्टे उदन्येति तत्रैतदेव शुङ्गमुत्पतितꣳ सोम्य ! विजानीहि

नेदममूलं भविष्यतीति। तस्य क्व मूलꣳ स्यादन्यत्राद्भ्यः ? अद्भिः सोम्य ! शुङ्गेन तेजो मूलमन्विच्छ तेजसा सोम्य ! शुङ्गेन सन्मूलमन्विच्छ सन्मूलाः सोम्य ! इमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठा यथा तु खलु सोम्य ! इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति तदुक्तं पुरस्तादेव भवति अस्य सोम्य ! पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायाम्। स य एषोऽणिमा ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो ! इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य ! इति होवाच ॥ ८ ॥

दर्पणजलाद्यनुप्रविष्टपुरुषसूर्यादिप्रतिबिम्बवत् अनेन जीवेनात्मना आद्यं वैराजपिण्डं यानुप्रविष्टा सदाख्या देवता सा सन्मात्ररूपापि स्वाज्ञदृष्ट्या स्वविकल्पितान्नाप्तेजोमयमनःप्राणवागुपाधिमिथ्यासंसर्गतो जीवभावमेत्य मननप्राणनवदनादिव्यापृतिविशिष्टेव भाता। स्वज्ञदृष्ट्या तद्व्यापृत्युपरमे पुनः स्वरूपं प्रतिपन्नेव भासते "ध्यायतीव लेलायतीव" इति श्रुतेः। स्वाज्ञदृष्ट्या यत्सत् सोपाधिकं जीवतामगात् तदेव स्वज्ञदृष्ट्या स्वाज्ञविकल्पितकरणग्रामप्रवृत्तिनिमित्तेश्वररूपेण तद्भावाभावप्रकाशकप्रत्यग्रूपेण तदभिन्नब्रह्मरूपेण च भासमानापि परमार्थदृशां सेयं देवता निष्प्रतियोगिकसन्मात्रतयावशिष्यत इत्येतमर्थं प्रकटयितुमुत्तरो ग्रन्थ आरभ्यते—उद्दालक इति। उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाच—हे सोम्य! मे निगदतः स्वप्नान्तं स्वातिरिक्तकलनाजातस्वापरूपं विजानीहि। कदा मे स्वप्नान्तो भवति ? इत्यत्र यत्रैतत्काले स्वप्स्यतः पुरुषस्य स्वपित्ययं पुरुष इत्येतन्नाम भवति तदा तस्मिन् काले सता प्रकृतसच्छब्दवाच्यदेवतया संपन्नो भवति। स्वाज्ञताविकल्पितोपाधिकृतजीवभावं विस्मृत्य यत्स्वं परमार्थसत् तदपीतोऽपिगतो भवति। यस्मादेवं तस्मादेनं लौकिकाः

स्वपितीत्याचक्षते। कथं लौकिकानां स्वात्मसंपत्तिदर्शनं? इत्यत्रोच्यते। **स्वं** देवतारूपमप्रतिपन्नस्य जाग्रदादिव्यापृतिप्रभवश्रमानिवृत्तेः। अतः **स्वं** **ह्यपीतो भवतीति** दर्शनं लौकिकानां युक्तम्। तेषां लोकयाथात्म्यज्ञत्वात्। यथा रोगार्तानां तन्निवृत्तितः स्वस्थता तथा स्वातिरिक्तकलनाव्यापृत्युपरमतः सत्संपत्तिरुपचर्यते। न परमार्थतो जाग्रदादौ पुनः प्रवृत्तिदर्शनात्। तत्प्रवृत्तेरनर्थरूपत्वेन व्यापृतिश्रान्तकरणग्रामोपरतिर्भवतीत्यत्र "वाक् श्राम्यति चक्षुः श्राम्यति" इति, "गृहीता वाक् गृहीतं चक्षुर्गृहीतं मनः" इत्यादि श्रुतिसिद्धकरणानि प्राणग्रस्तानि। प्राणस्त्वेकोऽश्रान्तो देहे जागर्ति "य एष सुप्तेषु जागर्ति" इति श्रुतेः। जाग्रत्स्वप्नस्वापानां सच्चिदानन्दावृतिरूपत्वेऽपि स्वापे निरायासस्थितिः सत्संपत्तिरिव भाति। सर्वावस्थास्वपि सत्संपत्तिरविशेषा सतो विभुत्वात्। अवस्थात्रयावृतदृशां सत्संपत्तिर्नानुभूयते। तथा च वक्ष्यति "सति संपद्य न विदुः" इति। तत्र करणानां प्राणबद्धत्वात्। कथं प्राणबद्धत्वं? इत्यत्र दृष्टान्तः—**स यथा** लोके **शकुनिः** पक्षिघातकहस्तगत**सूत्रेण प्रबद्धो** बन्धमोक्षणार्थी सन् **दिशं दिशं** प्रतिदिशं **पतित्वा** **बन्धनादन्यत्रायतनं** विश्रमणायालब्ध्वा **बन्धनमेवोपश्रयते एवमेव** यथा-दृष्टान्तं **खलु सोम्य!** तत्प्रकृतषोडशकलमन्नोपचितं **मनो** मश्वाक्रोशनवत् मनउपाधिको जीवः स्वाविद्याकामकर्मोरुपाशपाशितो **दिशं दिशं** जाग्रत्स्वप्नयोः **पतित्वा** सतोऽन्यत्रात्मन **आयतनमलब्ध्वा प्राणमेव** "स उ प्राणस्य प्राणः" इति, "प्राणशरीरो भारूपः" इति च श्रुतिसिद्धप्राणादेः प्राणनादिशक्तिदां देवतामेव **उपश्रयते**। यस्य मनसः प्राणो बन्धनं तत्**प्राण-बन्धनं हि सोम्य! मनः**। तदुपाधिकजीव एव स्वपिति नाम। तद्याथात्म्यं जगतो मूलम्। तत्पुत्रस्य दर्शयित्वा अन्नादिकार्यकारणपरम्परया जगन्मूलं सदिति दिदर्शयिषुः अशितुमिच्छा अशना, सन्यलोपेन, पातुमिच्छा पिपासा ते **अशनापिपासे मे** निगदतः **सोम्य! त्वं विजानीहि**। **यत्र** यस्मिन् **काले एतन्नामायं पुरुषोऽशिशिषति** अशितुमिच्छति तदा तस्य पुरुषस्य **नाम** निमित्तम्। तेन कठिनमन्नमशितं पीता **आपो** रसादिभावेन **नयन्ते** परिणमन्ते।

तदा भुक्तमन्नं जीर्यति । अथास्य अशिशिषतीति नाम भवतीति यत् तद्गौणम् । सर्वोऽपि जन्तुर्जीर्णेऽन्नमशितुमिच्छति । तत्रापामशितनेतृत्वादशनाया इति तन्नाम प्रसिद्धम् । अस्मिन्नर्थे यथा गां नयतीति गोनायो गोपालो ह्युच्यते । तथाश्वं नयतीत्यश्वपालोऽश्वनायः । तथा पुरुषं नयतीति राजा सेनाधिपतिर्वा पुरुषनायः । एवमशनायेति विसर्जनीयलोपेन लौकिकास्तदप आचक्षते । तत्रैवमद्भिः रसादिभावेन नीतेनाशितेनान्नेन निष्पादितमिदं शरीरं वटकणिकायामिव शुङ्गोऽङ्कुरः उत्पतितः । उत्पतितं तदिदं शुङ्गं शरीरादिकार्यं हे सोम्य! वटादिशुङ्गवदुत्पतितमिति विजानीहि । किं तत्र विज्ञेयं? इत्यत्र शृणु—इदं शरीरं शुङ्गमिव कार्यत्वान्नामूलं भविष्यतीत्युक्तः श्वेतकेतुराह—यद्येवं शरीरमिदं वटादिशुङ्गवत् समूलं तदा तस्य क मूलं स्यात्? इति पृष्टः पिता तदाह— तस्यान्नादन्यत्र मूलं न विद्यते । अन्नमेव तन्मूलमित्यर्थः । तत्कथम्? पुरुषाशितान्नमद्भिः द्रवीकृतं जाठराग्निना पच्यमानं सत् रसादिभावेन परिणमते । ततो रसाच्छोणितं शोणितान्मांसं मांसान्मेदो मेदसोऽस्थीन्यस्थिभ्यो मज्जा मज्जायाः शुक्रम् । "शुक्रशोणितसंयोगादावर्तते गर्भो हृदि व्यवस्थां नयति" इति श्रुत्यनुरोधेन योषिद्भुक्तान्नमपि रसादिक्रमेण परिणम्य लोहितं भवति । ताभ्यामन्नकार्याभ्यां कालतः संयुक्तशुक्रशोणिताभ्यां प्रत्यहमुपचीयमानोऽन्नमूलोऽयं देहशुङ्गः परिनिष्पन्नो भवति । यथान्नमूलत्वेन देहशुङ्ग उक्तः एवमेव खलु सोम्य! अन्नेन शुङ्गेनोत्पत्तिनाशविशिष्टेनापो मूलमन्विच्छ प्रतिपद्यस्व । तासामपामप्युत्पत्तिनाशवत्त्वेन कार्यरूपत्वात् तत्कारणं तेजो मूलमन्विच्छ । तेजसोऽप्युत्पत्तिनाशवत्त्वात् शुङ्गत्वमेवेति निश्चित्य सोम्य! तेजसा शुङ्गेन यस्मिन्ननृतजडदुःखविकारजातं जगद्विकल्पितं तदेतत्सन्मूलमेकमेवाद्वितीयम् । तदेव हि जगतो मूलं सदेवेत्यन्विच्छ । यत एवमतो हे सोम्य! स्थावरजङ्गमलक्षणाः सर्वाः प्रजाः सन्मूलाः सत्कारणाः स्थितिकाले सदायतनाः अन्ते च सत्प्रतिष्ठाः सदात्मना परिशेषिता इत्यर्थः । यथा घटादिकार्यजातं मृन्मूलं मृदायतनं मृत्प्रतिष्ठं कालत्रयेऽपि मृदनतिरिक्तत्वात् । अथेदानीमप्शुङ्गद्वारेण सन्मूलमव-

गन्तव्यमित्याह—**यत्रेति**। यस्मिन् काले **पिपासति** पातुमिच्छतीत्येतन्नाम **पुरुषो** भवति। तदप्यशिशिषतीतिवत् गौणं नाम भवति। अन्नशुङ्गं देहं द्रवीकृत्याशितान्ननेत्र्य आपः क्लेदयन्त्यतितरां तेजसा न शोष्यन्ते। तेजसा देहभावपरिणतात् शोषणात् पुरुषस्य पातुमिच्छा जायते। अथ तदा पुरुषः **पिपासति नाम**। अतस्तेज **एव तत्तदा पीतमवादि** शोषयत् सत् देहगतलोहितप्राणभावेन **नयते** परिणमति। **तद्यथा गोनाय** इत्यादि समानम्। **लोक एवं तत्तेज आचष्टे**। किमिति? **उदकं नयती**-त्युदन्यम्। **उदन्येतीति** छान्दसम्। पूर्ववत् **तत्राप्यपां एतदेव** शरीराख्यं **शुङ्गं** नान्यदित्येवमादि समानमन्यत्। सामर्थ्यादेतदेव तेजसोऽपि शुङ्गमाप्यं तन्मूलं तेजो गम्यते। तन्मूलं सदवगम्यते। पूर्ववदेवं हि तेजोऽबन्नमयस्य देहशुङ्गस्य वाचारम्भणमात्रत्वात्। सन्मूलं तु परमार्थसत्यमभयमन्विच्छेति पुत्रं गमयित्वाशिशिषति पिपासति नाम। प्रसिद्धद्वारेण यदन्यदिहास्मिन् प्रकरणे तेजोऽबन्नानां पुरुषोपभुज्यमानानां साङ्कर्येणोपचयकरत्वं वक्तव्यमिति पूर्वोक्तं व्यपदिशति—**यथेति**। **यथा तु खलु सोम्य! इमास्तेजोऽबन्नाख्यास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवति**। "अन्नमशितं त्रेधा विधीयते" इत्यादिना **पुरस्तादेव तदुक्तं भवति**। अन्नादीनामशितानां ये स्थविष्ठादयो धातवस्ते साप्तधातुकं शरीरमुपचिन्वन्ति मांसलोहितास्थिमज्जानो भवन्ति। तत्र ये त्वणिष्ठधातवो मनः प्राणं वाचश्चान्तःकरणसङ्घातमुपचिन्वन्तीति चोक्तं तन्मनो भवति स प्राणो भवति सा वाग्भवतीति। सोऽयं मनः-प्राणादिकरणसङ्घातो जीवाधिष्ठितः सन् देहे जीर्णभावं गतेऽथ देहान्तरम-वष्टभ्य पूर्वदेहात् प्रच्युतो गच्छति। हे **सोम्य! अस्य** महतः **पुरुषस्य प्रयतो** म्रियमाणस्य **वाक् मनसि संपद्यते** मनसस्तत्रोपसंहृतत्वात्। तदा ज्ञातयो न वदतीत्याहुः वाग्व्यापृतेर्मनःपूर्वकत्वात्। "यद्धि मनसा ध्यायति तद्वाचा वदति" इत्यादिश्रुतेः। यदा वागुपरमते तदा मनो मननव्यापारेण वर्तते। यदा मनोऽप्युपरतिं भजति तदा स्वापकाल इव **मनः प्राणसम्पन्नं** भवति। तदायं किमपि न जानातीति पार्श्वस्था ज्ञातय आहुः। स्वात्मन्युप-

संहृतकरणग्रामः **प्राणोऽपि** जीवाधिष्ठितः सन् देहसम्बन्धं विहाय **तेजसि** संपद्यते। न चलत्ययं मृतो न वेति सन्दिहानाः तद्देहं स्पृष्ट्वा उष्णमुपलभ्य जीवयुक्तं तं वदन्ति। यदा तेज उपरराम तदा **तेजः परस्यां देवतायां** उपशाम्यति। यदा करणग्रामो जीवावशेषितो भवति तदा जीवोऽपि स्वाज्ञानोपसंहारपूर्वकमुपसंह्रियते यदि तदा सदेव संपद्यते। यदि स्वाज्ञस्तदा सन्मूलादुत्थाय पुनर्देहजालमाविशति, यन्मूलादुत्थाय जीवो देहमाविशति पुनर्यद्भावमुपैति यत् सर्वप्रपञ्चारोपापवादयोरप्यास्पदवद्भाति, स्वाज्ञादिदृष्ट्या स्वातिरिक्तप्रपञ्चे सत्यसति परमार्थदृष्ट्या निष्प्रतियोगिकसन्मात्रतया योऽवशिष्यते कस्याप्यनास्पदतया **स** यस्सदाख्य **एष** उक्तोऽणिमा केशकोट्येकभागादपि सूक्ष्मरूपत्वात्। स्वाज्ञदृष्टिविकल्पितजगदारोपापवादयोः स्वज्ञदृष्ट्या मूलं स्वाविद्यापदतत्कार्यजातस्य यस्य सदेवात्मा तत् एतदात्म। तद्भावः **ऐतदात्म्यमिदं सर्वं** सर्वस्य तदात्मकत्वात्। न हि तदतिरेकेण संसारी नाम कश्चिदस्ति। "नान्यदतोऽस्ति द्रष्टा नान्यदतोऽस्ति श्रोता नान्यदतोऽस्ति मन्ता" इत्यादिश्रुतेः। येन सर्वमात्मसात्कृतं स्वातिरिक्तकलनापह्नवतः तदेव परमार्थसत्यम्।

अनात्मेति प्रसङ्गो वा अनात्मेति मनोऽपि वा।
अनात्मेति जगद्वापि नास्त्यनात्मेति निश्चिनु॥

इति श्रुत्यनुरोधेनात्मापह्नवसिद्ध **आत्मा स** एव हे **श्वेतकेतो!** यत् सत् आत्ममात्रतयावशिष्टं **तत् त्वमसि** भवसि। यद्वा—तच्छब्देन जगन्मूलमीशचैतन्यं, त्वंशब्देन तेजोऽवन्नतत्कार्यवागादिकरणग्रामोपाधिकं जीवचैतन्यं, असिपदेन तु तत्त्वंपदगतवाच्यार्थकारणकार्योपाधिनिरसनप्रादुर्भूतप्रत्यक्परयोरैक्यमुच्यते। तयोः स्वविकल्पितकार्यकारणोपाधिवैरल्यतो निर्विशेषत्वात्। परमार्थदृष्ट्या तयोरुपाधिसत्त्वासत्त्वसञ्जातभेदैक्यभ्रमोऽपि न ह्यस्ति—

केवलं ब्रह्ममात्रत्वात् नास्त्यनात्मेति निश्चिनु।

इति श्रुतेः। एवं पित्रा प्रत्यायितः पुत्र आह—**भूय एव मा भगवान् विज्ञापयत्विति**। भवदुक्तं यत् तत्तथैव। तत्र स्वापे सत्संपत्तिरुक्ता—सता

सोम्य! तदा संपन्नो भवतीति। तत्र लोके सत्संपन्ना वयमिति सत्संपद्य न विदुरित्यत्र दृष्टान्तेन मां प्रत्याययतु इत्युक्तः पिता तथास्तु सोम्य! इति होवाच इति ॥ ८ ॥

प्रत्यहं भूतानां सति संपद्यापि तदवेदनम्

यथा सोम्य! मधु मधुकृतो निस्तिष्ठन्ति नानात्ययानां वृक्षाणाꣳ रसान् समवहारमेकताꣳ रसं गमयन्ति। ते यथा तत्र न विवेकं लभन्तेऽमुष्याहं वृक्षस्य रसोऽस्म्यमुष्याहं वृक्षस्य रसोऽस्मीत्येवमेव खलु सोम्य! इमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपत्स्यामह इति। त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दꣳशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति। स य एषोऽणिमा ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो! इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य! इति होवाच ॥ ९ ॥

अहन्यहनि सति संपद्य भूतानि न विदुरिति यन्मां पृच्छसि शृणु तत्र दृष्टान्तमित्याह—यथेति। हे **सोम्य! यथा** लोके मधु कुर्वन्तीति **मधुकृतो** मधुमक्षिका **मधु निस्तिष्ठन्ति** तत्पराः सन्तो निष्पादयन्ति। तत्कथम्? **नानात्ययानां** नानादिग्गतानां नानाविधवृक्षाणां **रसान् समवहारं** समाहृत्य मधुत्वेनैकतां एकभावं **गमयन्ति** मधुत्वमविशेषेणापादयन्ति। ये मधुत्वेनैकीकृताः **ते** रसा अमुष्य वकुलस्य चूतस्य वा **वृक्षस्य रसोऽस्मीति विवेकं न लभन्ते। यथा**मुष्य अहं पुत्रोऽमुष्याहं नप्तास्मीति लोके लब्धविवेका न सङ्कीर्यन्ते नानामनुष्या न तथा नानावृक्षसंजातमधुराम्लकट्वादिरसाः। यथायं दृष्टान्तः **एवमेव खलु सोम्य! इमाः**

सर्वाः प्रजा अहन्यहनि नित्यादिप्रलयचतुष्टयेऽपि सति **सम्पद्य संपत्स्यामहे** संपन्ना इति वा न विदुः। कुतः? सद्याथात्म्याज्ञानात्। अतस्त इह लोके स्वकृतकर्मनिमित्ततो यां यां जातिं प्रपन्ना व्याघ्रादिजन्तवः सत्प्रतिष्ठा अपि कर्मनिमित्तवासनावासिताः सन्तः तद्भावेनैव पुनराभवन्ति। पुनः पुनः सत आगम्य व्याघ्रो वा सिंहो वेत्यादिजन्तवो यद्यत्पूर्वमिह लोके भवन्ति युगसहस्रकोट्यन्तरिता अपि वासनाबलात् तत्तदेव पुनरागम्य भवन्ति तत्तद्भाववासनाया अक्षीणत्वात्। ताः प्रजा यस्मिन् प्रविश्य पुनराभवन्ति, ये त्वन्ये सद्याथात्म्यज्ञानसंपन्नास्सदात्मानं प्रविश्य न पुनरावर्तन्ते, स य एष इत्यादि व्याख्यातम्। यथा स्वगृहे सुप्तः पुनरुत्थाय ग्रामान्तरं गतः स्वगृहादागतोऽस्मीति जानाति। कस्मादेवं जन्तूनां सत आगताः स्मेति विज्ञानं नोदेति? अतो **भूय एव मा भगवान् विज्ञापयतु** इत्युक्तः पिता **तथा सोम्य! इति होवाच** इति॥ ९॥

जन्तूनां सत एवागतत्वज्ञानानुदये नदीदृष्टान्तः

इमाः सोम्य! नद्यः पुरस्तात्प्राच्यः स्यन्दन्ते पश्चात्प्रतीच्यस्ताः समुद्रात् समुद्रमेवापियन्ति स समुद्र एव भवति ता यथा तत्र न विदुरियमहमस्मीति। एवमेव खलु सोम्य! इमाः सर्वाः प्रजाः सत आगत्य न विदुः सत आगच्छामह इति त इह व्याघ्रो वा सिꣳहो वा वृको वा वराहो वा कीटो वा पतङ्गो वा दꣳशो वा मशको वा यद्यद्भवन्ति तदाभवन्ति। स य एषोऽणिमा ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳस आत्मा तत्त्वमसि श्वेतकेतो! इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य! इति होवाच॥१०॥

त्वदुक्तार्थे दृष्टान्तं शृण्वित्याह—**इमा** इति। यथा **सोम्य! इमा** गङ्गाद्या **नद्यः पुरस्तात्** पूर्वां दिशं प्रागञ्चनात्**प्राच्यः स्यन्दन्ते** स्रवन्ति।

पश्चात् प्रतीचीं दिशं प्रत्यगञ्चनात् सिन्ध्वाद्याः प्रतीच्यः। ताः समुद्रात् जलधरैराक्षिप्ताः पुनर्वृष्टिरूपेण पतिताः गङ्गादिनदीरूपिण्यः पुनः समुद्रमेवापियन्ति। स समुद्र एव भवति। ता नद्यो यथा समुद्रात्मना एकतां गतास्तत्र इयं गङ्गाहमस्मि इयं यमुनाहमस्मीति च न विदुः। एवमेव खलु सोम्य! इमाः सर्वाः प्रजा यतः सत आगम्य न विदुः सत आगच्छामह इति वा। ते इह व्याघ्र इत्यादि समानमन्यत्। जले तरङ्गफेनादयः उत्पत्तिं स्थितिं प्रलयं गता इति लोके दृष्टम्। जीवास्तु प्रत्यहं सद्भावं गच्छन्तो नित्यादिप्रलयचतुष्टयेऽपि न विनश्यन्तीत्येतत् भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्य! इति होवाच पिता इति ॥१०॥

जीवानामविनाश्यत्वे वृक्षदृष्टान्तः

अस्य सोम्य! महतो वृक्षस्य यो मूलेऽभ्याहन्यात् जीवन् स्रवेत् यो मध्येऽभ्याहन्यात् जीवन् स्रवेत् योऽग्रेऽभ्याहन्यात् जीवन् स्रवेत् स एष जीवेनात्मनानुप्रभूतः पेपीयमानो मोदमानस्तिष्ठति। अस्य यदेकाꣳ शाखां जीवो जहाति अथ सा शुष्यति द्वितीयां जहाति अथ सा शुष्यति तृतीयां जहाति अथ सा शुष्यति सर्वं जहाति सर्वः शुष्यति एवमेव खलु सोम्य! विद्धीति होवाच। जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति स य एषोऽणिमा ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो! इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य! इति होवाच ॥ ११ ॥

त्वत्पृष्टेऽर्थे श्रृणु दृष्टान्तमित्याह—अस्येति। हे सोम्य! अस्यानेकशाखामण्डितत्वेन महतो वृक्षस्य कश्चित् यो मूलेऽभ्याहन्यात्। सकृत्

घातमात्रेण न शुष्यति जीवन्नेव भवति। तदा तस्य रसः स्रवेत्। तथा यो मध्येऽभ्याहन्यात जीवन् स्रवेत्। तथा योऽग्रेऽभ्याहन्यात् जीवन् स्रवेत्। स एष वृक्ष इदानीं जीवेनात्मनाऽनुप्रभूतोऽनुव्याप्तः स्वमूलैरुदकं भौमरसांश्च पेपीयमानो मोदमानस्तिष्ठति। तस्यास्य यदेकां शाखां रोगग्रस्तां हतां वा जीवो जहाति। वृक्षगतो जीवः तच्छाखागतात्मानं उपसंहरति। अथ तदा सा शाखा शुष्यति। तथा द्वितीयां तृतीयां च जहाति। अथ सा शुष्यति। तथा सर्वं वृक्षावयवं यदा जहाति तदा सर्वोऽपि वृक्षः शुष्यति। वृक्षस्य रसस्रावणशोषणादिलिङ्गात् जीवत्वं युक्तम्। "चेतनावन्तः स्थावराः" इति श्रुतेः। अचेतनाः स्थावरा इति केचन वदन्तीति यत् तदसारम्। वृक्षस्य स्वपादतो नीरभूरसपातृत्वेन सजीवत्वात। तद्वैपरीत्ये म्रियत इति प्रसिद्धेः। अत एव पेपीयमानो मोदमानस्तिष्ठतीत्युक्तम्। यथायं वृक्षदृष्टान्तः एवमेव खलु सोम्य! विद्धीति होवाच। जीवापेतं जीवरहितं वाव किलेदं शरीरं म्रियते। न हि जीवो म्रियत इति च। स्वकर्तव्य-कार्यशेषेण सुप्तस्य पुनरुत्थानकाले कार्यशेषमपरिसमाप्तमिति समापनदर्शनात्। किंच जातमात्रशिशोः जन्मान्तरानुभूतस्तन्यपानादिप्रवृत्तिदर्शनात् अग्निहोत्रादि-कर्मणामर्थवत्त्वाच्च न जीवो म्रियत इति युक्तमुक्तम्। स य एष इत्यादि समानम्। पृथिव्यादिनामरूपात्मकं जगदत्यन्तस्थूलम्। तत् कथं पुनरत्यन्तसूक्ष्मात सतो जायते? इत्येतमर्थं दृष्टान्तेन भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्य! इति होवाच इति॥ ११॥

अतिस्थूलस्य जगतः सूक्ष्मात् सतो जायमानत्वे न्यग्रोधफलदृष्टान्तः

न्यग्रोधफलमत आहरेति इदं भगवः! इति भिन्द्धीति भिन्नं भगवः! इति किमत्र पश्यसि? इति अण्व्य इव इमा धाना भगवः! इति आसामङ्गैकां भिन्द्धीति भिन्ना भगवः! इति किमत्र पश्यसि? इति न किंचन भगवः! इति। तꣳ होवाच यं वै सोम्य! एतमणि-

मानं न निभालयस एतस्य वै सोम्य ! एषोऽणिम्न एवं महान् न्यग्रोधस्तिष्ठति । श्रद्धत्स्व सोम्य ! इति स य एषोऽणिमा ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो ! इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य ! इति होवाच ॥१२॥

त्वत्पृष्टार्थं प्रत्यक्षेण दर्शयामीत्याह—न्यग्रोधेति । अतो विप्रकृष्टस्थितन्यग्रोधवृक्षात् फलमेकमाहरेति पित्रोक्तः स तथा चकार । इदं भगवः ! उपाहृतमिति फलं दर्शितवन्तं प्रत्याह—तत् भिन्द्धीति । भिन्नं भगवः ! इति । किमत्र पश्यसि ? इत्युक्त आह । अण्व्य इमे धानाः बीजानि पश्यामि भगवः ! इति । हे अङ्ग वत्स ! आसामेकां धानां भिन्द्धीति । भिन्ना भगवः ! इति । अत्र भिन्नधानायां किं पश्यसि ? इत्युक्तो न किंचन पश्यामि भगवः ! इति । तं होवाच—हे सोम्य ! भिन्नवटधानायां यमणिमानं न निभालयसे न पश्यसि एतस्य वै सोम्य ! अणिम्नो दृश्यमानस्य कार्यत्वेन एष महान् न्यग्रोधः स्थूलशाखास्कन्धफलपलाशवांस्तिष्ठतीत्यत्र उच्छब्दोऽध्याहार्यः उत्तिष्ठतीति । यत एवं सोम्य ! अतः श्रद्धत्स्व । अणिम्नः सत एव स्थूलनामरूपकार्यविशिष्टं जगदुत्पन्नमिति विश्वसि हि । श्रद्धायां सत्यां बुभुत्सितेऽर्थे मनसः समाधानं भवेत् । ततस्तदर्थावगतिः "अन्यत्रमना अभूवं नादर्शम्" इत्यादिश्रुतेः । स य इत्यादि समानम् । यदि जगत् सन्मूलं किं तत् नोपलभ्यते ? इत्येतत् दृष्टान्तेन भूय एव मा भगवान् विज्ञापयत्विति । तथा सोम्य ! इति होवाच इति ॥ १२ ॥

सन्मूलस्य जगतोऽनुपलभ्यमानत्वे लवणदृष्टान्तः

लवणमेतदुदकेऽवधाय अथ मा प्रातरुपसीदथा इति स ह तथा चकार तꣳहोवाच यद्दोषा लवणमुदकेऽवाधा अङ्ग ! तदाहरेति तद्धावमृश्य न विवेद । यथा विलीनमेवाङ्ग ! अस्यादावाचामेति

कथमिति ? लवणमिति मध्यादाचामेति कथमिति ? लवणमिति अन्तादाचामेति कथमिति ? लवणमिति अभिप्रास्य एनदथ मोपसीदथा इति तद्ध तथा चकार तत् शश्वत्संवर्तते तꣳहोवाचात्र वाव किल सत्सोम्य ! न निभालयसेऽत्रैव किलेति । स य एषोऽणिमा ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो ! इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य ! इति होवाच ॥१३॥

यन्नोपलभ्यत इत्युक्तं तत् प्रकारान्तरेण उपलभ्यत इत्यत्र शृणु दृष्टान्तमित्याह— लवणमिति । हे अङ्ग ! लवणमेतत् पिण्डरूपं परिच्छिन्नघटाद्युदकेऽवधाय प्रक्षिप्याथ मा मां श्वः प्रातरुपसीदथां उपगच्छथा इति पित्रोक्तः तत् प्रत्यक्षीकर्तुं तथा चकार । परेद्युः प्रातःकाले तं होवाच पुत्रम्— यल्लवणं दोषा रात्रौ घटोदके अवाधा निक्षिप्तवानसि तदाहरेत्युक्तः तल्लवणमुदके ह किलावमृश्य न विवेद न विज्ञातवान् । यथा विद्यमानमेव तल्लवणमप्सु लीनमणवभूत् । यथैवं विलीनं लवणं न वेत्थ तथापि तत्र चाक्षुषस्पार्शनप्रत्यक्षागम्यतया लवणं विद्यत उपलभते । तत्कथम् ? इति शङ्कमानं प्रत्यालक्ष्याह—अङ्ग ! अस्योदकस्यादावुपरि गृहीत्वाचामेत्युक्तः तथा कृतवन्तं तमुवाच । कथम् ? इतीतर आह स्वादुतो लवणमिति । उदकमध्यादाचामेति । कथम् ? इति । लवणमिति । अन्तादाचामेति । कथम् ? इति । लवणमिति । यद्येवमभिप्रास्य परित्यज्य एनदुदकमाचम्याथ मोपसीदथा इति । तद्ध तथा चकार । त्यक्तलवणः पितृसमीपमाजगाम । स पितृसमीपं गत्वा एवमुवाच—यन्मया रात्रौ घटोदके लवणं निक्षिप्तं तत्रैव तत्संवर्तते । एवमुक्तवन्तं तं होवाच पिता—यथोदकनिक्षेपात् पुरा इदं लवणपिण्डं दर्शनस्पर्शनाभ्यां गृहीतं पुनरुदकयोगतस्ताभ्यामगृह्यमाणमपि विद्यते, उपायान्तरजिह्वया तदुपलभ्यते, एवं तेजोऽबन्नादिकार्यशुङ्गदेहे वाव किल तेजोऽबन्नादिशुङ्गकारणं सत् चैतन्यवटबीजाणिमावत् विद्यमानमेव । न हि तत्रे-

न्द्रियैरुपलभसे न निभालयसे। यथा घटोदके लवणं दर्शनस्पर्शनाभ्यामनुपलभ्यमानमपि विद्यमानमेव मत्वा जिह्वया उपलब्धवानसि, एवं जगतो मूलं सत् अत्रैव विद्यमानमुपायान्तरेण लवणाणिमवदुपलभस्वेत्यध्याहार्यम्। स य इत्याद्युक्तार्थम्। उपायान्तरेण यदुपलम्भात् कृतार्थः स्यामनुपलम्भादकृतार्थः स्यां तदुपलब्धावुपायः कः? इत्येतमर्थं **भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्य! इति होवाच॥ १३॥**

सदुपलब्ध्युपायकथने गन्धारानीतपुरुषदृष्टान्तः

यथा सोम्य! पुरुषं गन्धारेभ्योऽभिनद्धाक्षमानीय तं ततोऽतिजने विसृजेत् स यथा तत्र प्राङ्वोदङ्वाऽधराङ्वा प्रत्यङ्वा प्रध्मायीताभिनद्धाक्ष आनीतोऽभिनद्धाक्षो विसृष्टः। तस्य यथाभिनहनं प्रमुच्य प्रब्रूयादेतां दिशं गन्धारा एतां दिशं व्रजेति स ग्रामाद्ग्रामं पृच्छन् पण्डितो मेधावी गन्धारानेवोपसंपद्येत एवमेवेहाचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्य इति। स य एषोऽणिमा ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो! इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य! इति होवाच॥ १४॥

सदुपलब्ध्युपायमाह—यथेति। हे **सोम्य! यथा** लोके कश्चित् द्रव्यहर्ता तस्करः यं कञ्चन **पुरुषं** अभिनद्धाक्षं बद्धचक्षुषं **गन्धारेभ्यो** जनपदेभ्यः समानीय पुनरभिनद्धाक्षं बद्धचक्षुषं बद्धहस्तं अतिजने निर्मानुष्यारण्ये विसृजेत्। ततः स दिग्भ्रमोपेतस्सन् तत्र प्राङ्वा उदङ्वा प्रागादिदिग्विभागमजानन् प्रध्मायीत तस्करेण गन्धारदेशेभ्योऽपानीतोऽभिनद्धाक्ष एव निर्जनारण्ये विसृष्ट इत्येवं विक्रोशेत्। एवं विक्रोशतस्तस्य

विक्रोशनं कश्चित् पथिकः कारुणिकः श्रुत्वा यथाभिनहनं यथाबन्धनं प्रमुच्य एतदुत्तरतो गन्धारा वर्तन्ते एतामुत्तरां दिशं व्रजेति ब्रूयात्। स एवं केनचित् कारुणिकेन बन्धनान्मोक्षितः ग्रामात् ग्रामान्तरं पृच्छन् उपदेशार्थग्रहणात् पण्डितः परोपदिष्टस्वग्रामसृत्यवधारणतो मेधावी गन्धारानेवोपसंपद्येत। न ह्येतद्विपरीतेन प्राप्तुं शक्यते। स गन्धारानेवोपसंपन्नो यथा निर्वृतः सुख्यभूत् तथैवं सन्मात्रतः स्वाज्ञानाख्यतस्करेण स्वाज्ञस्तेजोऽबन्नादिमयदेहारण्ये वातपित्तश्लेष्मरुधिरमेदोमांसास्थिमज्जाशुक्लमूत्रपुरीषवत् शीतोष्णसुखदुःखाद्यनेकद्वन्द्वमोहपटाभिनद्धाक्षो दारपुत्रादिपाशेन पाशितोऽमुष्य पुत्रोऽहं मम पुत्रो मम धनं सुख्यहं दुःख्यहं मूढः पण्डितो वाहं जायतेऽस्त्यादिषड्भावविकारवानहं हा हतोऽस्मि कथं जीविष्यामि? का मे गतिः? इति विक्रोशन् वर्तमानस्यानेकजनिसुकृतपरिपाकवशात् सत्संगतिर्लभ्यते। ततः सन्मार्गप्रवृत्तिः। ततो भगवद्भक्तिः। ततो देशिककटाक्षः प्रसरेत्। ततस्तदुपदेशो लभ्यते। न त्वममुष्य पुत्रादिधर्मवान् संसारी, किन्तु स्वातिरिक्ततेजोऽबन्नोपलक्षितस्वाविद्यापदतत्कार्यापह्नवसिद्धं यत् सदवशिष्यते तत् त्वमसि तन्निष्प्रतियोगिकस्वमात्रमित्युपदेशसमकालं "पश्यतेहापि सन्मात्रमसदन्यत्" इति श्रुतिसिद्धासदपह्नवसिद्धसद्ब्रह्म स्वमात्रमित्युपसंपद्य तन्मात्रतयावशिष्यत इत्येतमर्थमाह—**आचार्यवान् पुरुषो वेद** इति। तस्यास्यैवमाचार्यवतो यावत् सद्याथात्म्यज्ञानं नोदेति **तावदेव** संसारित्वम्। **चिरं यावन्न विमोक्ष्ये** न स्वातिरिक्तास्तिताभ्रमाद्विमोक्ष्यते तावदेव स्वाज्ञत्वम्। यावता कालेनाचार्योपदिष्टशास्त्रज्ञानमुदेति तेनागामिकर्मस्थूलांशनिवृत्त्या तत्राश्लेषो जायते। एतद्देहकृतमागामिकर्म यदि मननोपायतः शास्त्रजन्यं ज्ञानं विज्ञानं जायते तदा तेनानेकजन्मोपादानं सञ्चितकर्म पूर्वोक्तागामिसञ्चितयोरर्धांशो विलीयते। येन कर्मणा शरीरमारब्धं तदारब्धकर्म। तत् भोगमात्रेण विलीयते। देहावसानसमये वा यदि निदिध्यासनप्रभवसम्यग्ज्ञानं जायते तदागाम्यादिकर्मत्रयस्थूलादिभागत्रयं विलीयते। तदानीमयं जीवन्मुक्तो मुनिः कर्मत्रयभागत्रयापवादाधिकरणतदर्धमात्राकलनासङ्गसत् **संपत्स्ये** सत्संपत्स्यत इत्यर्थः।

न हि तद्दृष्ट्या देहमोक्षसत्संपत्त्योः कालभेदोऽस्ति। येन अथशब्द आनन्तर्यार्थः स्याद्यदि "ब्रह्ममात्रमसन्न हि" इति श्रुत्यनुरोधेन स्वातिरिक्तसर्वासदपह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति तत्त्वज्ञानमेव जायते अथ तदुत्तरक्षणोपलक्षिततद्ज्ञानसमकालमेव सत् ब्रह्ममात्रं स्वावशेषतया संपत्स्यते। सन्मात्रज्ञानस्य निष्प्रतियोगिकत्वेन कर्मत्रयतत्कार्यकलनापह्नवपूर्वकत्वात्। सद्याथात्म्यज्ञानसमकालं सद्भावापत्तिः निरङ्कुशेत्यत्र "स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति", "य एवं निर्बीजं वेद निर्बीज एव स भवति" इत्यादिवेदनसमकालं ब्रह्मभावापत्तिश्रुतेः। स य इत्याद्युक्तार्थम्। येन क्रमेण सत्संपत्तिः तत् दृष्टान्तेन भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्य! इति होवाच पिता इति॥ १४॥

सत्संपत्तिक्रमे मुमूर्षुदृष्टान्तः

पुरुषꣳ सोम्य! उतोपतापिनं ज्ञातयः पर्युपासते जानासि मां जानासि मामिति तस्य यावन्न वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायां तावज्जानाति। अथ यदास्य वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामथ न जानाति। स य एषोऽणिमा ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो! इति भूय एव मा भगवान् विज्ञापयत्विति तथा सोम्य! इति होवाच॥ १५॥

त्वत्प्रश्नानुरोधेन दृष्टान्त उच्यते—पुरुषमिति। हे सोम्य! पुरुषमुत ज्वराद्युपतापिनं मुमूर्षुं ज्ञातयः परिवार्य उपासते। किमिति? तव पितरं पुत्रं वा मां जानासि मां जानासि किम्? इति। स यावन्न वाङ्मनसि संपद्यते इत्युक्तार्थम्। अयं स्वाज्ञमरणक्रमः। परस्यां देवतायां तेजस्यसंपन्ने जानाति। संपन्ने तु न जानाति। अथाविद्वान् मृत्वा स्वकृतकर्म-

निमित्तदेवमनुष्यतिर्यगादिभावं मुहुर्मुहुरविश्रान्तमुपैति। विद्वांस्तु श्रुत्याचार्यप्रसादजनितज्ञानसमकालमेव सत्संपद्यते। अपरब्रह्मविदस्तु मूर्धन्यया नाड्योत्क्रम्य सूर्यद्वारेण सदाख्यमपरं ब्रह्म गत्वा न हि धूमादिमार्गगता इव पुनरावर्तन्त इत्येष सत्संपत्तेः क्रमः। स य इत्यादि समानम्। अविद्वानावर्तते विद्वान्नावर्तत इत्यत्र दृष्टान्तेन भूय एव मा भगवान् विज्ञापयत्विति। तथा सोम्य! इति होवाच पिता इति॥ १९॥

विद्वदविदुषोः अनावर्तनावर्तनयोः चोरदृष्टान्तः

पुरुषꣳ सोम्य! उत हस्तगृहीतमानयन्ति अपहार्षीत् स्तेयमकार्षीत् परशुमस्मै तपतेति स यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते सोऽनृताभिसन्धोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यतेऽथ हन्यते। अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यतेऽथ मुच्यते। स यथा तत्र नादाह्येत ऐतदात्म्यमिदꣳ सर्वं तत्सत्यꣳ स आत्मा तत्त्वमसि श्वेतकेतो! इति तद्धास्य विजज्ञाविति विजज्ञाविति॥ १६॥

यत्त्वया पृष्टं तदुच्यते—पुरुषमिति। हे सोम्य! राजपुरुषाः चौर्यकर्मणि सन्दिह्यमानं पुरुषं निग्रहार्थं उतापि परीक्षणार्थं वा हस्तगृहीतं बद्धहस्तमानयन्ति। अयमस्य धनमपाहार्षीत्। किमनेन भवद्धनमपहृतम्? इति पृष्टा आहुः—स्तेयमकार्षीत् चौर्येण धनमपाहार्षीदिति। तेष्वेवं वदत्सु नाहं तत्कर्तेति चोरस्तदपह्नुते। पुनस्तस्मिन् सन्दिह्यमाना आहुः—त्वमस्य धनस्तेयमकार्षीरिति। पुनस्तदपह्नुवाने परशुमस्मै तपत शोधयात्मानमिति। स यदि तस्य स्तैन्यस्य कर्ता भवति धैर्येण बहिरपह्नुते। स एवंभूतस्तत

एवानृतमन्यथाभूतं सन्तमन्यथात्मानं कुरुते। स तथानृताभिसन्धोऽनृ-तेनात्मानमन्तर्धाय तिरोधानं कृत्वा मोहात् परशुं तप्तं प्रतिगृह्णाति। स दह्यतेऽथ हन्यते। स यथा सत्याभिसन्धो न दह्यते सत्यव्यवधानादथ मुच्यते। अनृतसत्याभिसन्धिनोः हस्ततलतप्तपरशुसंयोगस्य तुल्यत्वेऽपि स्तेय-कर्ता दह्यते अनृताभिसन्धित्वात्। तद्विपरीतस्य सत्याभिसन्धित्वेन स न दह्यते। सत्यव्यवहितहस्तत्वानादाह्येत न दह्यत इत्येवं सद्ब्रह्म। स्वयाथात्म्यज्ञाज्ञयोरत्यन्तशरीराभिमानत्यागकाले सत्संपत्तौ तुल्यायामपि तत्रा-विद्वान् सत् संपद्य पुनर्व्याघ्रादिभावं देवमनुष्यादिभावं वा यथाकर्म यथाश्रुतं प्रतिपद्यते। विद्वांस्तु—

> यावद्यावन्मुनिश्रेष्ठ! स्वयं सन्त्यज्यतेऽखिलम्।
> तावत्तावत् परालोकः परमात्मैव शिष्यते॥

इति श्रुत्यनुरोधेन स्वप्रतिपत्त्यनुरूपं सन्मात्रपर्यवसन्नो भवति। न हि कदाप्यज्ञवत् पुनरावर्तते पुनरावृत्तिहेतुस्वाज्ञानवैरल्यात्। यदज्ञानज्ञानप्रभवौ बन्धमोक्षौ स्वाज्ञादिदृष्ट्या यत्स्वातिरिक्ततेजोऽबन्नादिविकारं जगद्भाति, यज्जाता यत्प्रतिष्ठा यत्पर्यवसानाः सर्वाः प्रजा यदात्मकमिदं सर्वं परमार्थदृष्ट्या-यदेतत्सर्वापह्नवसिद्धं निष्प्रतियोगिकब्रह्ममात्रं तदेव हि परमार्थसत्यम्। स हि तवात्मा स्वमात्रपर्यवसानात्। अतस्तत्त्वमसि श्वेतकेतो! इत्याद्युक्तार्थम्। श्वेतकेतुः पितुरुपदेशात् पुरा स्वातिरिक्तासत्प्रपञ्चकलनापह्नवसिद्धं सत् स्वमात्रमिति न विजज्ञौ। अथेदानीं पित्रा बहुभिर्हेतुभिः प्रत्यक्षानुभूयमान-दृष्टान्तैर्बोधितः तत्त्वमसीत्युपदेशजनितज्ञानसमकालमसदपह्नवसिद्धं यत् प्रकरणादौ सत् एकमेवाद्वितीयमिति प्रपञ्चितं तत् निष्प्रतियोगिकस्वमात्रमिति विजज्ञौ विज्ञातवान्। द्विर्वचनमध्यायपरिसमाप्त्यर्थम्॥ १६॥

इति षष्ठोऽध्यायः

सप्तमोऽध्यायः

स्वात्मतत्त्ववेदनमेव निश्श्रेयसप्राप्तिसाधनम्

अधीहि भगवः! इति होपससाद सनत्कुमारं नारदः तꣳ होवाच यद्वेत्थ तेन मा उपसीद ततस्त ऊर्ध्वं वक्ष्यामीति । स होवाच ऋग्वेदं भगवः! अध्येमि यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहास-पुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्य-मेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यामेतद्भगवः! अध्येमि । सोऽहं भगवः! मन्त्र-विदेवास्मि नात्मवित् श्रुतꣳ ह्येव मे भगवद्दृशेभ्यस्तरति शोक-मात्मविदिति सोऽहं भगवः! शोचामि तं मा भगवान् शोकस्य पारं तारयत्विति तꣳ होवाच यद्वै किंचैतदध्यगीष्ठा नामैवैतत् । नाम वा ऋग्वेदो यजुर्वेदः सामवेद आथर्वणश्चतुर्थ इतिहासपुराणः पञ्चमो वेदानां वेदः पित्र्यो राशिर्दैवो निधिर्वाकोवाक्यमेकायनं देवविद्या ब्रह्मविद्या भूतविद्या क्षत्रविद्या नक्षत्रविद्या सर्पदेवजनविद्या नामैवैतन्नामोपास्स्वेति । स यो नाम ब्रह्मेत्युपास्ते यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति यो नाम ब्रह्मेत्युपास्ते अस्ति भगवः! नाम्नो भूय इति? नाम्नो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ १ ॥

षष्ठाध्यायः परमात्मयाथात्म्यप्रतिपादनपरः सन्मात्रावशेषपर्यवसायित्वेन उपक्षीणत्वात् । तत्रत्यसन्मात्रं निष्प्रतियोगिकमिति ये न जानन्ति तेषां तत्पदारोहाय

नामादिप्राणान्ततत्त्वानि स्थूलसूक्ष्मसूक्ष्मतरसूक्ष्मतमतया सोपानारोहणक्रमेण निर्दिश्य तत्कलनाविरलं सदेव निरतिशयभूमस्वरूपतया निर्देष्टव्यमिति सप्तमाध्याय आरभ्यते। नारदो देवर्षिः सर्वविद्यः कृतकृत्योऽपि सन् यतः स्वात्मानमनात्मज्ञं मत्वा शुशोच, अतः किमु वक्तव्यमल्पवित् जन्तुरनात्मज्ञतया शोचति? इति। अत एव स्वात्मतत्त्ववेदनात् निश्श्रेयसः प्राप्तिसाधनं न किंचिदस्तीत्येतत्प्रदर्शनार्थं सनत्कुमारनारदाख्यायिका विद्यास्तुत्यर्थतयारभ्यते—**अधीहीति**। देवर्षिरिति सर्वत्र विख्यातोऽयं **नारदः** सनत्कुमार एव **सनत्कुमारः**। तं ब्रह्मविद्वरिष्ठं स्वातिरिक्तकलनास्तितावुद्धिजन्यशोकग्रासमात्मयाथात्म्यज्ञानोपायम**धीहि भगवः!** **इति** मन्त्रः। हे भगवन्! अधीष्वेत्यु**पससाद**। ह किल। एवं विधिवदुपसन्नं **तं होवाच**—**यदा**त्मविषये किञ्चि**द्वेत्थ तेन** तत्प्रख्यापनेन **मामुपसीद** इदमहं जान इति वद। **ततो** भवद्विज्ञापनादू**र्ध्वं** तदवष्टम्भ्यात्मयाथात्म्यं **ते** तुभ्यं **वक्ष्यामीत्युक्तवति स होवाच** नारदः—हे **भगवः!** ऋग्वेदमध्येमि यद्वेत्थेति मद्विज्ञानस्य पृष्टत्वात्। ऋग्वेदं स्मरामि। तथा **यजुर्वेदं सामवेदमाथर्वणं चतुर्थं** वेदम्। वेदशब्दस्य प्रज्ञानविषयत्वात्। **इतिहासपुराणं पञ्चमं वेदम्।** पञ्चानां वेदानां **वेदं** भारतं सर्ववेदार्थोपबृंहणत्वात्। यद्वा—वेदानां वेदं व्याकरणम्। तेन हि ऋग्वेदादयः पदादिविभागशो ज्ञायन्ते। **पित्र्यं** श्राद्धकल्पम्। **राशिं** गणितम्। **दैवमु**त्पातज्ञानम्। **निधिं** तद्दर्शनहेतुनिधिशास्त्रम्। **वाकोवाक्यं** तर्कशास्त्रम्। **एकायनं** नीतिशास्त्रम्। **देवविद्यां** देवत्वप्राप्तिनिमित्ताम्। **ब्रह्मविद्यां** ऋग्यजुःसामाख्यस्य ब्रह्मणो विद्या शिक्षादयः। **भूतविद्यां** भूतोत्सारणमन्त्रम्। **क्षत्रविद्यां** धनुर्वेदम्। **नक्षत्रविद्यां** ज्योतिषम्। **सर्पदेवजनविद्यां** तत्र सर्पविषशान्त्यादि सर्पविद्या। गान्धर्वयुक्तं नृत्तगीतवाद्यशिल्पादिविज्ञानं देवजनविद्या। हे **भगवः!** अहमे**तत्सर्वमध्येमि**। एतत्सर्वं जानन्नपि **सोऽहं भगवः! मन्त्रविदेवास्मि** शब्दार्थज्ञानवानस्मीत्याशयः। शब्दराशेरभिधानमात्रत्वेन मन्त्रान्तर्भूतत्वात्। मन्त्रवित् कर्मविदप्यस्मीत्यर्थः। तथा च वक्ष्यति "मन्त्रेषु कर्माणि" इति। **नात्मवित्** स्वात्मप्रकृत्यज्ञत्वात्। अत एवोक्तम्—"आचार्यवान् पुरुषो वेद"

इति । मन्त्रैरात्मा प्रकाश्यते कथं मन्त्रवित् अनात्मवित् ? इति चेन्न ; मन्त्रप्रकाशिताभिधानाभिधेययोरनात्मविकारत्वात् । न ह्यनात्मविकारः आत्मेष्यते । अतोऽनात्मविकारज्ञानवानस्मि । श्रुतं ह्येव मे मया **भगवद्दृशेभ्यः** "तरति शोकं तरति पाप्मानं," "तमेव विदित्वातिमृत्युमेति," "ब्रह्मसंस्थोऽतिमृत्युमेति," "ब्रह्म वेद ब्रह्मैव भवति" इत्यादिश्रुत्यर्थविशारदेभ्यो भवत्सदृशेभ्यो ब्रह्मवित् विद्वान् स्वातिरिक्तदर्शननिमित्तं **शोकं तरत्यतिक्रामतीति** । हे **भगवः** ! **अतोऽहं शोचामि** अनात्मवित्त्वात् । योऽहं स्वाज्ञानाग्निना सन्तप्तोऽस्मि **तं मा** मां **भगवान्** स्वाज्ञानप्रभवशोकसागरस्य **पारम**न्तं स्वात्मयाथात्म्यज्ञानोडुपेन **तारयतु** परमाभयं प्रापयतु । एवमुक्तवन्तं **तं होवाच—यद्वै किंचैतदध्यगीष्ठाः** अर्थवदधीतवानसि "वाचारम्भणं विकारो नामधेयं" इति श्रुत्यनुरोधेन त्वया यदधीतं **नामैवैतत्** । **नाम वा ऋग्वेदो यजुर्वेद** इत्याद्युक्तार्थमेतत् । **सर्वं नामैवैतत्** । प्रतिमादौ विष्ण्वादिबुद्धिवत् ब्रह्मबुद्ध्या **नाम उपास्स्वेति** । **यस्तु नाम ब्रह्मेत्युपास्ते** विद्याफलं **यावन्नाम्नो गतं तत्रास्मि**न्नामविषयस्य उपासकस्य स्वविषये राज्ञ इव **कामचारः** कामचरणं **भवति** । **यो नाम ब्रह्मेत्युपास्ते** इत्युपसंहारः । ब्रह्मदृष्ट्यर्हतया **किमस्ति भगवः ! नाम्नो भूयो**ऽधिकतरम् ? एवं पृष्टः सनत्कुमार आह—**नाम्नो वाव भूयोऽस्तीति** । एवमुक्त आह--**यद्यस्ति तन्मे भगवान् ब्रवीत्विति** ॥ १ ॥

वागेव नाम्नो भूयसीत्युपासनम्

वाग्वाव नाम्नो भूयसी वाग्वा ऋग्वेदं विज्ञापयति यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयाꣳसि च

तृणवनस्पतीन् श्वापदानि आकीटपतङ्गपिपीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं च यद्वै वाक् नाभविष्यत् न धर्मो नाधर्मो व्यज्ञापयिष्यन्न सत्यं नानृतं न साधु नासाधु न हृदयज्ञो नाहृदयज्ञो वागेव एतत्सर्वं विज्ञापयति वाचमुपास्स्वेति । स यो वाचं ब्रह्मेत्युपास्ते यावद्वाचो गतं तत्रास्य यथाकामचारो भवति यो वाचं ब्रह्मेत्युपास्ते अस्ति भगवः! वाचो भूय इति? वाचो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ २ ॥

नाम्नो भूयसी इयमित्याह—**वागिति** । वर्णानामभिव्यञ्जकतया या जिह्वामूलाद्यष्टस्थानेषु स्थिता सेयं **वाग्वाव नाम्नो भूयसी** कार्यापेक्षया कारणस्य भूयस्त्वदर्शनात् । यथा पुत्रात् पिता भूयान् । कथं पुनर्नाम्नो वाचो भूयस्त्वम्? इत्यत्र अयं ऋग्वेदो यजुर्वेद इति **वाग्वा विज्ञापयति** । **सामवेद**मित्याद्युक्तार्थम् । मनःप्रीतिविषयं **हृदयज्ञम्** । तद्विपरीतम**हृदयज्ञम्** । **यत्** यदि **वाक् नाभविष्यत्** वागभावेऽध्ययनाभावः अध्ययनस्य वाङ्निर्वर्त्यत्वात् । अध्ययनाभावे तदर्थश्रवणं न सिद्ध्यति । तदभावे धर्मादि न **व्यज्ञापयिष्यत्** न विज्ञातं अभविष्यदित्यर्थः । यस्मादेवं तस्मात् **वागेवैतत्** शब्दोच्चारणेन **सर्वं विज्ञापयति** । अतो नाम्नो वाग्भूयसी । तस्माद्वाचं **ब्रह्मेत्युपास्स्व** । समानमन्यत् ॥ २ ॥

मन एव वाचो भूय इत्युपासनम्

मनो वाव वाचो भूयो यथा वै द्वे वामलके द्वे वा कोले द्वौ वाक्षौ मुष्टिरनुभवति एवं वाचं च नाम च मनोऽनुभवति स यदा मनसा मनस्यति मन्त्रानधीयीयेति अथाधीते कर्माणि कुर्वीयेति अथ कुरुते पुत्रांश्च पशूंश्चेच्छेयेति अथेच्छते इमं च लोकममुं

चेच्छेयेति अथेच्छते मनो ह्यात्मा मनो हि लोको मनो हि ब्रह्म मन उपास्स्वेति। स यो मनो ब्रह्मेत्युपास्ते यावन्मनसो गतं तत्रास्य यथाकामचारो भवति यो मनो ब्रह्मेत्युपास्ते अस्ति भगवः! मनसो भूय इति ? मनसो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ ३ ॥

वाचो भूयः किम्? इत्यत आह—**मन** इति। मननविषयमन्तःकरणं **मनो वाव वाचो भूयः**। तन्मनो हि वक्तव्यार्थे वाचं प्रेरयति। तेन वाङ्मनस्यन्तर्भवति। यद्यदन्तर्भवति तत्तद्व्यापकं सत् भूयो भवति। **यथा वै** लोके **द्वे वामलके फले द्वे वा कोले** बदरफले **द्वौ वाक्षौ** विभीतकफले **मुष्टि-रनुभवति** फलापेक्षया मुष्टेर्व्यापकत्वात्। **एवमा**मलकादिस्थानीय**वाचं च नाम च मनोऽनुभवति। यदा** यस्मिन् काले **स पुरुषो मनसा मनस्यति** मननव्यापारवान् भवति। तत्कथम्? इत्यत्र **मन्त्रानधीयीय** उच्चारयेयमिति विवक्षित्वाथाधीते। तथा **कर्माणि कुर्वीयेति** चिकीर्षाबुद्धिपूर्वकमथ **कुरुते**। **पुत्रांश्च पशूंश्चेच्छेयेति** तदाप्त्युपायेनाथेच्छते इच्छया पुत्रादीन् प्राप्नोति। **इमं च लोकममुं** चोपायतः **इच्छेयेति** तदाप्त्युपायानुष्ठानम्। अतः **अथेच्छते**। **मनो ह्यात्मा** कर्तृत्वादेर्मनोनिमित्तत्वात्। **मनो हि लोकः** लोकव्यापृतेस्तदायत्तत्वात्। **मनो हि ब्रह्म** मनोवृत्तितानवस्य ब्रह्माप्त्युपायत्वात्। यस्मादेवं तस्मात् **मनः उपास्स्वेति। स यो मन** इत्यादि समानम्॥ ३ ॥

संकल्प एव मनसो भूयान् इत्युपासनम्

संकल्पो वाव मनसो भूयान् यदा वै संकल्पयतेऽथ मनस्यति अथ वाचमीरयति तामु नाम्नि ईरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि। तानि ह वा एतानि संकल्पैकायनानि संकल्पात्मकानि संकल्पे प्रतिष्ठितानि समकॢपतां द्यावापृथिवी समकल्पेतां

वायुश्चाकाशं च समकल्पन्तापश्च तेजश्च तेषाꣳ संक्लृप्त्यै वर्षꣳ संकल्पते वर्षस्य संक्लृप्त्या अन्नꣳ संकल्पतेऽन्नस्य संक्लृप्त्यै प्राणाः संकल्पन्ते प्राणानाꣳ संक्लृप्त्यै मन्त्राः संकल्पन्ते मन्त्राणाꣳ संक्लृप्त्यै कर्माणि संकल्पन्ते कर्मणाꣳ संक्लृप्त्यै लोकः संकल्पते लोकस्य संक्लृप्त्यै सर्वꣳ संकल्पते स एष संकल्पः संकल्पमुपास्स्वेति। स यः संकल्पं ब्रह्मेत्युपास्ते क्लृप्तान् वै स लोकान् ध्रुवान् ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिध्यति यावत्संकल्पस्य गतं तत्रास्य यथाकामचारो भवति यः संकल्पं ब्रह्मेत्युपास्ते अस्ति भगवः! संकल्पाद्भूय इति? संकल्पाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ ४ ॥

मनसो भूयान् कः? इत्यत आह—**सङ्कल्प** इति। **सङ्कल्पो वाव मनसो भूयान्** सङ्कल्पस्य कर्तव्याकर्तव्यविषयविभागसमर्थत्वात्। यदेदं कर्तुं युक्तमयुक्तमिति **सङ्कल्पयतेऽथ मनस्यति** मन्त्रानधीयीयेत्यादिमननं करोति। **अथ** मन्त्राद्युच्चारणे **वाचमीरयति**। नामोच्चारणे **ताञ्च वाचमीरयति। नाम्नि मन्त्राः** सर्व **एकं भवन्ति**। नामसामान्ये शब्दविशेषाः समर्प्यन्ते। विशेषस्य सामान्येऽन्तर्भूतत्वात्। **मन्त्रेषु कर्माण्येकीभवन्ति**। वैदिकैः मन्त्रप्रकाशितानि हि कर्माणि क्रियन्ते। नामन्त्रकं कर्मास्ति "न कर्म मन्त्ररहितं" इति श्रुतेः। लोके त्रयीविहितं कर्मेति प्रसिद्धम्। ऋगादिवेदत्रयं त्रयीशब्दार्थः। "मन्त्रेषु कर्माणि कवयो यान्यपश्यन्" इति श्रुतेः। **तानि ह वा एतानि** मनआदीनि **सङ्कल्पैकायनानि** तेषां सङ्कल्पपर्यवसायित्वात्। **सङ्कल्पात्मकानि** तेषामुत्पत्तौ सङ्कल्पातिरेकेण स्थित्यभावात्। स्थितौ **सङ्कल्पे प्रतिष्ठितानि**। **समकॢपतां द्यावापृथिवीति** द्यावापृथिव्योः सङ्कल्पेनैव निश्चलतया लक्षिततत्वात्। द्यावापृथिव्यावीश्वरेण निश्चलतया

संक्लृप्ते इति वा सङ्कल्पः स्तूयते। सङ्कल्पं कृतवत्याविव समकल्पेताम्। अपि च वायुश्चाकाशश्च। समकल्पन्त—चलाचलत्वेन सङ्कल्पिता इत्यर्थः—स्वेन रूपेणापश्च तेजश्च निश्चलानि लक्ष्यन्ते। यतस्तेषां द्यावापृथिव्यादीनां सङ्क्लृप्त्यै सङ्कल्पनिमित्तं वर्षं सङ्कल्पते समर्थीभवति। तथा वर्षस्य संक्लृप्त्या अन्नं सङ्कल्पते अन्नस्य वर्षनिमित्तत्वात्। अन्नस्य संक्लृप्त्यै प्राणाः सङ्कल्पन्ते प्राणानामन्नायत्तत्वात्। तत्प्राणानां संक्लृप्त्यै मन्त्राः सङ्कल्पन्ते। प्राणवान् हि मन्त्रानधीते। मन्त्राणां संक्लृप्त्यै अग्निहोत्रादिकर्माणि सङ्कल्पन्ते मन्त्रप्रकाशितकर्मणां सफलत्वात्। कर्मणां संक्लृप्त्यै लोकः सङ्कल्पते लोकस्य कर्मफलरूपत्वात्। लोकस्य संक्लृप्त्यै सर्वं जगत् सङ्कल्पते। यद्यत्फलवत् तत्तत् सङ्कल्पनिमित्तम्। यत एवंविशिष्ट एष सङ्कल्पोऽतः सङ्कल्पमुपास्स्वेत्युक्त्वा विद्याफलेन प्ररोचयति—स यः सङ्कल्पं ब्रह्मबुद्ध्या उपास्ते स विद्वान् धात्रा फलत्वेन क्लृप्तान् वै लोकान् संकल्पितानध्रुवापेक्षया ध्रुवान् नित्यान् ध्रुवश्च लोकी तद्दृष्ट्या पशुपुत्राद्युपकरणवत् प्रतिष्ठितान् आत्मीयोपकरणसंपत्त्या स्वयं चापि तत्र प्रतिष्ठितः अमित्रादिवैरल्यादव्यथमानान् स्वयमप्यव्यथमानस्सन् अभिसिद्ध्यति प्राप्नोति। यावत् सङ्कल्पस्य गतं यावत् स्वसङ्कल्पनाशो भवति तावत् तत्रास्य यथाकामचारो भवति। य इत्यादि पूर्ववत्॥ ४॥

चित्तमेव संकल्पात् भूय इत्युपासनम्

चित्तं वाव संकल्पाद्भूयो यदा वै चेतयते अथ संकल्पयते अथ मनस्यति अथ वाचमीरयति तामु नाम्नि ईरयति नाम्नि मन्त्रा एकं भवन्ति मन्त्रेषु कर्माणि। तानि ह वा एतानि चित्तैकायनानि चित्तात्मानि चित्ते प्रतिष्ठितानि तस्मात् यद्यपि बहुवित् अचित्तो भवति नायमस्तीत्येवैनमाहुः यदयं वेद यद्वा अयं विद्वान् नेत्थमचित्तः स्यादिति अथ यद्यल्पवित् चित्तवान् भवति तस्मा एव उत शुश्रूषन्ते

चित्तꣳ ह्येवैषामेकायनं चित्तमात्मा चित्तं प्रतिष्ठा चित्तमुपास्स्वेति । स यश्चित्तं ब्रह्मेत्युपास्ते चित्तान् वै स लोकान् ध्रुवान् ध्रुवः प्रतिष्ठितान् प्रतिष्ठितोऽव्यथमानानव्यथमानोऽभिसिद्धयति यावच्चित्तस्य गतं तत्रास्य यथाकामचारो भवति यश्चित्तं ब्रह्मेत्युपास्ते अस्ति भगवः! चित्ताद्भूय इति? चित्ताद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ ५ ॥

सङ्कल्पात् किं भूयः? इत्यत आह— चित्तमिति । प्राप्तकालानुरूपं यत् चेतयितृ तच्चित्तं वाव संङ्कल्पात् भूयः । यदा वै इदमेवमुपस्थितमिति चेतयते तदादानाय संङ्कल्पयते । अथ मनस्यतीत्यादि पूर्ववत् । तानि सङ्कल्पादिकर्मफलान्तादीनि तत्प्रलये चित्तैकायनानि । उत्पत्तौ चित्तात्मानि । स्थितौ चित्ते प्रतिष्ठितानि । यस्माच्चित्तं सङ्कल्पादिमूलं तस्माद्यद्यपि बहुवित् सकलज्ञोऽपि सन् अचित्तो भवति चेतयितृत्ववैरल्यात्, लौकिकास्तं विद्यमानमपि नायमस्तीत्येवैनमाहुः । तदधीतमपि व्यर्थमिति कथयन्ति । यदि विद्वानेवमचित्तः स्यात् तच्छ्रुतमप्यश्रुतमेवेति भावः । अथाल्पविदपि यदि चित्तवान् भवति तस्मा एव तदुक्तार्थग्रहणायैव उतापि शुश्रूषन्ते तत एव श्रोतुमिच्छन्ति । यस्मात् चित्तं ह्येवैषां संकल्पादीनामेकायनं इत्यादि पूर्ववत् । चित्तमुपास्स्वेत्यादि समानम् ॥ ५ ॥

ध्यानमेव चित्ताद्भूय इत्युपासनम्

ध्यानं वाव चित्ताद्भूयो ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौर्ध्यायन्तीवापो ध्यायन्तीव पर्वता ध्यायन्तीव देवमनुष्याः तस्माद्य इह मनुष्याणां महत्तां प्राप्नुवन्ति ध्यानापादाꣳशा इवैव ते भवन्ति अथ येऽल्पाः कलहिनः पिशुना

उपवादिनस्तेऽथ ये प्रभवो ध्यानापादाꣳशा इवैव ते भवन्ति ध्यानमुपास्स्वेति। स यो ध्यानं ब्रह्मेत्युपास्ते यावद्ध्यानस्य गतं तत्रास्य यथाकामचारो भवति यो ध्यानं ब्रह्मेत्युपास्ते अस्ति भगवः! ध्यानाद्भूय इति? ध्यानाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ ६ ॥

चित्तात् किं भूयः? इत्यत आह—**ध्यानमिति**। शास्त्रोक्तार्थविजातीयानन्तरितदेवतालम्बनाचलप्रत्ययसन्तानतया मनस एकाग्रतया लक्ष्यैकतानत्वं **ध्यानं वाव चित्ताद्भूयः**। यथा योगी ध्यानफलाभिलाषया निश्चलो भवति तथा **पृथिवी ध्यायतीव** निश्चला दृश्यते। **ध्यायतीवान्तरिक्षमित्यादि** समानमन्यत्। देवाश्च मनुष्याश्च **देवमनुष्याः**। यद्वा—धर्मसाम्यात् मनुष्या एव देवाः शमादिगुणसंपन्नत्वात्। ते देवभावं न जहति। यस्मादेवं ध्यानमेतादृशं **तस्मात् य इह** लोके धनतो गुणतो विद्यया **मनुष्याणां महत्त्वां प्राप्नुवन्ति** स्वार्जितधनादिभिर्महत्त्वं लभन्ते। ध्यानस्य पादोऽवयवः कला येषां ते ध्यानफललाभकलावन्त **इवैव ते भवन्ति** निश्चला इव उपलक्ष्यन्ते। **अथ ये** पुनरल्पाः क्षुद्रा धनादिलेशैरल्यात् **कलहिनः** कलहोत्सुकाः **पिशुनाः** परदोषप्रकाशका **उपवादिनः** परस्वभावमनुसृत्य वदनशीला भवन्ति, **अथ ये** धनादिनिमित्तमहत्त्वं प्राप्ता विद्याचार्यराजेश्वरादयः ते परान् परिभवं कुर्वन्तोऽपि सन्तः **ध्यानापादांशा इवैव ते भवन्तीत्युक्तार्थमेतत्**। ध्यानस्य माहात्म्यमीदृशम्। यतः फलतोऽपि चित्तापेक्षया ध्यानं भूयः अतो **ध्यानमुपास्स्वेत्युक्तार्थम्** ॥ ६ ॥

विज्ञानमेव ध्यानाद्भूय इत्युपासनम्

विज्ञानं वाव ध्यानाद्भूयो विज्ञानेन वा ऋग्वेदं विजानाति यजुर्वेदꣳ सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं

पित्र्यꣳ राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्याꣳ सर्पदेवजनविद्यां दिवं च पृथिवीं च वायुं चाकाशं चापश्च तेजश्च देवाꣳश्च मनुष्याꣳश्च पशूꣳश्च वयाꣳसि च तृणवनस्पतीन् श्वापदान्याकीटपतङ्गपिपीलकं धर्मं चाधर्मं च सत्यं चानृतं च साधु चासाधु च हृदयज्ञं चाहृदयज्ञं चान्नं च रसं च इमं च लोकममुं च विज्ञानेनैव विजानाति विज्ञानमुपास्स्वेति । स यो विज्ञानं ब्रह्मेत्युपास्ते विज्ञानवतो वै स लोकान् ज्ञानवतोऽभिसिद्ध्यति यावद्विज्ञानस्य गतं तत्रास्य यथाकामचारो भवति यो विज्ञानं ब्रह्मेत्युपास्ते अस्ति भगवः! विज्ञानाद्भूय इति? विज्ञानाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ ७ ॥

ध्यानादपि किं भूयः? इत्यत आह—**विज्ञानमिति** । शास्त्रीयविषयकज्ञानं **विज्ञानं वाव ध्यानाद्भूयः** विज्ञानस्य ध्यानकारणत्वात् । कथं पुनः तद्ध्यानकारणम्? इत्यत आह—**विज्ञानेनेति** । अयं ऋग्वेद इत्यादि प्रमाणतया **विज्ञानेनैव विजानाति** । **यजुर्वेदमित्यादि समानम्** । पश्वादींश्च शास्त्रप्रमाणसिद्धौ धर्माधर्मौ सत्यासत्ये चाक्षुषाचाक्षुषे । शिष्टमुक्तार्थम् । एतत्सर्वं **विज्ञानेनैव विजानाति** । यतो विज्ञानस्य ध्यानाद्भूयस्त्वमतो **विज्ञानमुपास्स्वेति** । उपासनाफलं—येषु लोकेषु विज्ञानं विद्यते तान् **विज्ञानवतो वै स लोकान् ज्ञानवतश्चाभिसिद्ध्यति** प्राप्नोति । **यावद्विज्ञानस्येत्यादि** पूर्ववत् ॥ ७ ॥

बलमेव विज्ञानाद्भूय इत्युपासनम्

बलं वाव विज्ञानाद्भूयः अपि ह शतं विज्ञानवतामेको बलवानाकम्पयते स यदा बली भवति अथ उत्थाता भवति उत्तिष्ठन्

परिचरिता भवति परिचरन्नुपसत्ता भवति उपसीदन् द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति कर्ता भवति विज्ञाता भवति बलेन वै पृथिवी तिष्ठति बलेनान्तरिक्षं बलेन द्यौर्बलेन पर्वता बलेन देवमनुष्या बलेन पशवश्च वयाꣳसि च तृणवनस्पतयः श्वापदान्या-कीटपतङ्गपिपीलकं बलेन लोकस्तिष्ठति बलमुपास्स्वेति । स यो बलं ब्रह्मेत्युपास्ते यावद्बलस्य गतं तत्रास्य यथाकामचारो भवति यो बलं ब्रह्मेत्युपास्ते अस्ति भगवः! बलाद्भूय इति ? बलाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ ८ ॥

विज्ञानादपि किं भूयः ? इत्यत आह—बलमिति । अन्ननिमित्तमनसो विज्ञेयवस्तुप्रतिभानसामर्थ्यं बलं वाव विज्ञानात् भूयः । अत एवोक्तं अनश्नतः ऋगादीनि "न वै मा प्रतिभान्ति" इति । अतो विज्ञानवतामपि शतमेको बलवानाकम्पयते । यथा मत्तगज एकोऽपि मनुष्यशतमाकम्पयते तथेत्यर्थः । अन्नादिनिमित्ततो यदायं बली भवति अथ उत्थाता उत्थानस्य कर्ता भवति । उत्तिष्ठन् स्वाचार्यादेः परिचरिता शुश्रूषणकर्ता भवति । परिचरन्नुपसत्तान्त-रङ्गो भवति । उपसीदन् एकाग्रतया गुरूक्तद्रष्टा भवति । तदुक्तश्रोता भवति । तत उपपत्तितो मन्ता भवति । मननात् बोद्धा भवति । तदुक्तार्थकर्तानुष्ठाता विज्ञाता विज्ञानफलानुभविता च भवतीत्यर्थः । बलेन वै पृथिवी तिष्ठतीत्यादि स्पष्टार्थम् ॥ ८ ॥

अन्नमेव बलात् भूय इत्युपासनम्

अन्नं वाव बलाद्भूयः तस्माद्यद्यपि दश रात्रीर्नाश्नीयात् यद्यु ह जीवेत् अथवाद्रष्टाश्रोतामन्ताबोद्धाकर्ताविज्ञाता भवति अथान्नस्याये द्रष्टा भवति श्रोता भवति मन्ता भवति बोद्धा भवति

कर्ता भवति विज्ञाता भवति अन्नमुपास्स्वेति । स योऽन्नं ब्रह्मेत्यु-
पास्तेऽन्नवतो वै स लोकान् पानवतोऽभिसिध्यति यावदन्नस्य गतं
तत्रास्य यथाकामचारो भवति योऽन्नं ब्रह्मेत्युपास्ते अस्ति भगवः !
अन्नाद्भूय इति? अन्नाद्वाव भूयोऽस्तीति तन्मे भगवान्
ब्रवीत्विति ॥ ९ ॥

बलादपि किं भूयः? इत्यत आह—**अन्नमिति। अन्नं वाव बलात् भूयः** अन्नस्य बलहेतुत्वात्। तत्कथम्? यस्मादन्नं बलहेतुः **तस्मात् यद्यपि** कश्चित् **दश रात्रीर्नाश्नीयात्** सोऽन्ननिमित्तबलहान्या म्रियते। **यदि उ ह जीवेत्**, मासमप्यनश्नन्तो जीवन्तो दृश्यन्ते। **अथवा** स जीवन्नपि गुरूक्ताद्द्रष्टा **अश्रो-**तेत्यादि पूर्वविपरीतं सर्वं **भवति**। **अथ** यदा बहून्यहानि अनशितो दर्शनादि-क्रियासमर्थः सन् अन्नस्यागमनं आयो यस्य विद्यते सोऽन्नस्यायी। आयीत्येतत् वर्णव्यत्ययेन। अथान्नस्यायै इति पाठः। एवमेव द्रष्टेत्यादि कार्यश्रवणात्। अन्नोपयोगे दृश्यते हि दर्शनादिसामर्थ्यम्। न हि तदभावे दृश्यते। यत एवमतो**ऽन्नमुपास्स्वेति**। उपासनाफलं—**अन्नवतः** प्रभूतान्नान् **वै लोकान्** तथा **पानवतः** अन्नपानाभ्यां नित्यसंयुक्तान् लोकान् **अभिसिध्यती**त्यादि समानमन्यत् ॥ ९ ॥

आप एवान्नात् भूयस्य इत्युपासनम्

आपो वाव अन्नाद्भूयस्यः तस्माद्यदा सुवृष्टिर्न भवति व्याधी-
यन्ते प्राणा अन्नं कनीयो भविष्यतीति अथ यदा सुवृष्टिर्भवति
आनन्दिनः प्राणा भवन्ति अन्नं बहु भविष्यतीति आप एवेमा
मूर्ता येयं पृथिवी यदन्तरिक्षं यत् द्यौः यत् पर्वता यद्देवमनुष्या
यत्पशवश्च वयांꣳसि च तृणवनस्पतयः श्वापदान्याकीटपतङ्गपिपील-

कमाप एवेमा मूर्ता अप उपास्स्वेति। स योऽपो ब्रह्मेत्युपास्त आप्नोति सर्वान् कामाꣳस्तृप्तिमान् भवति यावदपां गतं तत्रास्य यथाकामचारो भवति योऽपो ब्रह्मेत्युपास्ते अस्ति भगवः! अद्भ्यो भूय इति? अद्भ्यो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ १० ॥

अन्नाद्भूयस्यः काः? इत्यत आह—आप इति। आपो वाव अन्नात् भूयस्यः अपामन्नकारणत्वात्। यस्मादेवं तस्मात् यदा सस्यहिता सुवृष्टिर्न भवति तदा प्राणाः प्राणिनो व्याधीयन्ते दुःखिनो भवन्ति। किन्निमित्तम्? अस्मिन्नब्देऽन्नं कनीयोऽल्पतरं भविष्यति इति। अथ पुनर्यदा सुवृष्टिर्भवति तदानन्दिनो हृष्टाः प्राणा भवन्ति अन्नमप्संपत्त्या बहु भविष्यतीति। आप एव इमा मूर्तिभेदपरिणतत्वेन मूर्ता उच्यन्ते— येयं पृथिवीत्यादि। आप एव इमा मूर्ता अतोऽप उपास्स्वेति। फलम्—स योऽपो ब्रह्मेत्युपास्ते काम्यन्त इति सर्वान् मूर्तिमतः कामानाप्नोति। ततः तृप्तिमांश्च भवति। समानमन्यत् ॥ १० ॥

तेज एवाद्भ्यो भूय इत्युपासनम्

तेजो वाव अद्भ्यो भूयः तद्वा एतद्वायुमागृह्याकाशमभितपति तदाहुर्निशोचति नितपति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तदेतदूर्ध्वाभिश्च तिरश्चीभिश्च विद्युद्भिराह्रादाश्चरन्ति तस्मादाहुर्विद्योतते स्तनयति वर्षिष्यति वा इति तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते तेज उपास्स्वेति। स यस्तेजो ब्रह्मेत्युपास्ते तेजस्वी वै स तेजस्वतो लोकान् भास्वतोऽपहततम-

स्कानभिसिध्यति यावत्तेजसो गतं तत्रास्य यथाकामचारो भवति यस्तेजो ब्रह्मेत्युपास्ते अस्ति भगवः! तेजसो भूय इति? तेजसो वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ ११ ॥

अद्भ्यः किं भूयः? इत्यत आह—तेज इति। तेजो वाव अद्भ्यो भूयः तेजसः अप्कारणत्वात्। कथं? यस्मादब्योनिस्तेजः तस्माद्वा एतत् तेजो वायुमागृह्य निश्चलीकृत्याकाशमभितपति अभितस्तपति यदा तदाहुर्लौकिकाः निशोचति सामान्येन सन्तपयति। यतो देहं नितपति अतो वर्षिष्यति वा इति प्रसिद्धं लोके। कारणोदयतः कार्यं भविष्यतीति दर्शनवन्त आहुरित्यर्थः। तेज एव तत्पूर्वं दर्शयित्वाथापः सृजते सृजति। अतोऽद्भ्यो भूयस्तेजः। किञ्च तदेतत्तेजः स्तनयित्नुरूपेण वर्षहेतुर्भवति। तत्कथम? इति। ऊर्ध्वगाभिस्तिर्यग्गाभिः विद्युद्भिश्च सह आह्लादाः स्तनयित्नुशब्दाश्चरन्ति। तस्मात् तन्निमित्तदर्शिनो लौकिका आहुः। विद्योतते स्तनयतीत्याद्युक्तार्थमन्यत्। तेज उपास्स्वेति। तत्फलं—तेजस्वी वै स भवति। तेजस्वत एव लोकान् भास्वतः प्रकाशवतोऽपहततमस्कान् बाह्याध्यात्मिकज्ञानाद्यपनीततमस्कानभिसिध्यति। शिष्टं स्पष्टम् ॥ ११ ॥

आकाश एव तेजसो भूयानित्युपासनम्

आकाशो वाव तेजसो भूयानाकाशे वै सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राण्यग्निः आकाशेनाह्वयत्याकाशेन शृणोत्याकाशेन प्रतिशृणोत्याकाशे रमत आकाशे न रमत आकाशे जायत आकाशमभिजायत आकाशमुपास्स्वेति। स य आकाशं ब्रह्मेत्युपास्ते आकाशवतो वै स लोकान् प्रकाशवतोऽसंबाधानुरुगायवतोऽभिसिध्यति यावदाकाशस्य गतं तत्रास्य यथाकामचारो भवति य

आकाशं ब्रह्मेत्युपास्ते अस्ति भगवः! आकाशाद्भूय इति?
आकाशाद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ १२ ॥

तेजसो भूयान् कः? इत्यत आह—आकाश इति। आकाशो वाव तेजसो भूयान्। आकाशस्य वायुसहिततेजःकारणत्वात्। कथं? आकाशे वै तेजोरूपावुभौ सूर्याचन्द्रमसौ विद्युन्नक्षत्राण्यग्निश्च। यत् यदन्तर्वर्ति तदल्पं "तदधिकरणं भूयः" इति प्रसिद्धेः। किंच अन्यमन्य आकाशेनाह्वयति। आहूतश्चेतर आकाशेन प्रतिश्रृणोति। आकाशेन अन्योक्तशब्दमन्यः प्रतिश्रृणोति। अन्योन्यमाकाशे रमते क्रीडति सर्वम्। तथा न रमते च अन्नबन्ध्वादिवियोगे। मूर्तजातमाकाशे जायते। तथाकाशमभिलक्ष्याङ्कुरादि जायते न हि प्रतिलोमतः। मूर्तेनाकाशं जायते। यत एवमत आकाशमुपास्स्वेति। तत्फलं—स विद्वानाकाशवतो वै अवकाशबहुलान् लोकान् प्रकाशाकाशयोर्नित्यसंबन्धात् प्रकाशवतश्च लोकानसंबाधानन्योन्यसंबाधरहितानुरुगायवतो विस्तीर्णगतीन् लोकानभिसिध्यति। उक्तार्थमितरत् ॥ १२॥

स्मर एव आकाशात् भूयान् इत्युपासनम्

स्मरो वाव आकाशाद्भूयान् तस्माद्यद्यपि बहव आसीरन्न स्मरन्तो नैव ते कंचन श्रृणुयुः न मन्वीरन् न विजानीरन् यदा वाव ते स्मरेयुरथ श्रृणुयुरथ मन्वीरन् अथ विजानीरन् स्मरेण वै पुत्रान् विजानाति स्मरेण पशून् स्मरमुपास्स्वेति। स यः स्मरं ब्रह्मेत्युपास्ते यावत्स्मरस्य गतं तत्रास्य यथाकामचारो भवति यः स्मरं ब्रह्मेत्युपास्ते अस्ति भगवः! स्मराद्भूय इति? स्मराद्वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति ॥ १३ ॥

आकाशादपि भूयान् कः? इत्यत आह—**स्मर** इति। अन्तःकरणधर्मस्मरणव्यापारो हि **स्मरो वाव आकाशात् भूयान्**। स्मरणमित्यत्र स्मर इति लिङ्गव्यत्ययः छान्दसः। स्मर्तुः स्मरणे सति आकाशादि सर्वमर्थवत्। असति स्मरणे सदप्यसदेव। यस्माद्यद्यपि **बहवः** समुदिताः एकस्मिन्नासीरन्नुपविशेयुः, यद्यासीनास्ते परस्परभाषणं **न स्मरन्तश्चेत् नैव ते कञ्चन** शब्दं **शृणुयुस्तथा न मन्वीरन्**। स्मृत्यभावान्न **जानीरन्**। यदा वाव ते स्मर्तव्यं **स्मरेयुः अथ शृणुयुः** श्रोतव्यम्। **अथ** मन्तव्यं **मन्वीरन्**। **अथ** विज्ञातव्यं **विजानीरन्**। एते मम पुत्रा इति **स्मरेण वै पुत्रान्** विजानाति। तथा **स्मरेण पशून्**। अतः स्मरस्य भूयस्त्वात् **स्मरमुपास्स्वे**त्याद्युक्तार्थम्॥ १३॥

आशैव स्मरात् भूयसीत्युपासनम्

आशा वाव स्मराद्भूयसी आशेद्धो वै स्मरो मन्त्रानधीते कर्माणि कुरुते पुत्रांश्च पशूंश्च इच्छते इमं च लोकममुं चेच्छते आशामुपास्स्वेति। स य आशां ब्रह्मेत्युपास्त आशयास्य सर्वे कामाः समृध्यन्ति अमोघा हास्याशिषो भवन्ति यावदाशाया गतं तत्रास्य यथाकामचारो भवति य आशां ब्रह्मेत्युपास्ते अस्ति भगवः! आशाया भूय इति? आशाया वाव भूयोऽस्तीति तन्मे भगवान् ब्रवीत्विति॥ १४॥

स्मराद्भूयसी का? इत्यत आह—**आशे**ति। अप्राप्तवस्तुविषयकतृष्णा ह्याशा **वाव स्मरात् भूयसी**। कथं भूयस्त्वमाशायाः? स्मर्तव्यं स्मरन्नसौ **स्मरो** भवति। अतोऽयम**आशेद्धः** आशया वर्धितः सन् ऋगादीन् **मन्त्रानधीते**। तदर्थानुरोधेन **कर्माणि कुरुते**। तत्फलाशयैव **पुत्रांश्च**

पशूंश्च कर्मफलभूतानि इच्छतेऽभिवाञ्छति । आशयेद्धस्सन् **इमं च लोकममुं चेच्छते** तत्तदुचितसाधनेनेत्यर्थः । स्मरादिनामपर्यन्तं जगच्चक्रमाशापाशबद्धम् । अत **आशामुपास्स्व** । तत्फलं तु—आशाब्रह्मविदः **सर्वे कामाः समृध्यन्ति । अमोघा ह्यस्याशिषः** सर्वा **भवन्ति** चिन्तितकार्यार्थसिद्धिर्भवतीत्यर्थः । शिष्टं पूर्ववत् ॥ १४ ॥

प्राण एव आशाया भूयानित्युपासनम्

प्राणो वा आशाया भूयान् यथा वा अरा नाभौ समर्पिता एवमस्मिन् प्राणे सर्वँ समर्पितं प्राणः प्राणेन याति प्राणः प्राणं ददाति प्राणाय ददाति प्राणो ह पिता प्राणो माता प्राणो भ्राता प्राणः स्वसा प्राण आचार्यः प्राणो ब्राह्मणः । स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वाचार्यं वा ब्राह्मणं वा किंचित् भृशमिव प्रत्याह धिक् त्वा अस्त्विति एवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसि भ्रातृहा वै त्वमसि स्वसृहा वै त्वमसि आचार्यहा वै त्वमसि ब्राह्मणहा वै त्वमसीति । अथ यद्यप्येनानुत्क्रान्तप्राणान् शूलेन समासं व्यतिषं दहेत् नैवैनं ब्रूयुः पितृहासीति न मातृहासीति न भ्रातृहासीति न स्वसृहासीति नाचार्यहासीति न ब्राह्मणहासीति । प्राणो ह्येवैतानि सर्वाणि भवति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन् अतिवादी भवति तं चेत् ब्रूयुरतिवाद्यसीति अतिवाद्यस्मीति ब्रूयात् नापह्नुवीत ॥ १९ ॥

आशाया अपि भूयान् कः? इत्यत आह—**प्राण** इति । कार्यकारणत्वेन उत्तरोत्तरभूयस्तया नामाद्याशान्तमुक्तम् । तत् यत्र पर्यवसन्नं सोऽयं **प्राणो वाव**

आशाया भूयान्। कथं भूयस्त्वम्? इत्यत्र दृष्टान्तमाह--**यथेति**। **यथा** लोके रथचक्रारा **रथनाभौ समर्पिताः** संप्रवेशिताः **एवमस्मिन् प्राणे** यस्मिन्नादर्शादि-प्रतिबिम्बवत् नामरूपव्याकरणार्थं परदेवता प्रविष्टा। "अनेन जीवेनात्मनानु-प्रविश्य नामरूपे व्याकरवाणि" इति। यस्तु राजप्रधानिवदीश्वरः सर्वाधिकारी तस्मिन्नेवमस्मिन् प्राणे **सर्वं समर्पितम्**। तथा च श्रुतिः "तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मा" इति। यत एवमतः क्रिया-कारकफलभेदजातं सर्वं प्राण एव। न हि प्राणादतिरिक्तमस्तीति प्रकरणार्थः। यत् ददाति **प्राणः प्राणं** प्रियवस्तु स्वात्मभूतं यस्मै कस्मैचिद्वा ददाति तत्प्राणः **प्राणायैव ददाति**। न हि पित्राद्याख्यापि प्राणातिरेकेणास्ति। कथं तदाख्या प्राणस्य? इत्यत आह—**प्राणो ह पितेत्यादि**। पित्राद्याख्या कथं प्राणस्य इति चेन्न; आख्यासामान्यस्य प्राणायत्तत्वात्। सति प्राणे पित्रादेः पित्रादित्वम्। विपर्यये विपर्ययात्। अत एव प्राणस्य पित्रादित्वं युक्तम्। प्राणस्य हिरण्यगर्भत्वेन ईश्वराभिन्नत्वात्।

पिताहमस्य जगतो माता धाता पितामहः।

इति स्मृतेः। अत एव **स यः** कश्चित् पित्रादीनामन्यतमं यदि कदाचित् **भृशमिव** तत्तदननुरूपमिव त्वङ्कारादियुक्तं **प्रत्याह, तदैनं** पार्श्वस्था एवमाहुः। किमिति? **धिक् त्वा** त्वां प्रत्यस्त्विति, **पितृहा वै त्वमसीत्यादि**। **अथ यद्यप्येनानुत्क्रान्त-प्राणान्** शवभावं गतपित्रादीन् **शूलेन** साम्परायविधिना **समासं** समन्तकं एव-मसम्भवे **व्यतिषममन्तकं** वा **दहेत्**। समासव्यासादिप्रकारेण दहनमति-क्रूरकृत्यमपि देहसंबन्धतः कुर्वाणं **नैवैनं ब्रूयुः पितृहेत्यादि**। तस्मादन्वय-व्यतिरेकाभ्यां पित्राद्याख्या प्राणस्येत्यवगम्यते। यस्मादेवं तस्मात् **प्राणो ह्येवैतानि** पित्रादिचराणि तद्भोज्यस्थिराणि च **सर्वाणि भवति**। **स वा एष प्राणविदि एवं** फलतः **पश्यन्नेवमुपपत्तितो मन्वान एवं** दृढनिश्चयेन **विजानन् अतिवादी भवति**। अस्यातिक्रान्तनामाद्याशान्तत्वाद्यतिनामाद्या-

शान्तारोपाधिकरणतया वर्तमानप्राणोऽहमस्मीति ब्रुवाणं प्राणविदं अतिवाद्य-सीति ब्रूयुः। तदायं विद्वानतिवाद्यस्मीति ब्रूयात्। न नाहमतिवादीत्यपह्नुवीत। यतः स एष नारदः सर्वात्मानं प्राणं श्रुत्वा किमस्ति भगवः! प्राणाद्भूयः? इति प्रश्नमकृत्वा उपरराम नातःपरमस्तीति अतः प्राणो हिरण्यगर्भ ईश्वरो वा भवितुमर्हतीत्यर्थः ॥ १९ ॥

सत्यस्यैव जिज्ञास्यत्वम्

एष तु वा अतिवदति यः सत्येनातिवदति सोऽहं भगवः! सत्येनातिवदानीति सत्यं त्वेव विजिज्ञासितव्यमिति सत्यं भगवः! विजिज्ञास इति ॥ १६ ॥

एवं सविशेषब्रह्मज्ञानपरितुष्टं कृतार्थं मन्यमानं नारदं तदतिवदनं नामादिसा-पेक्षं मत्वा सर्वापह्नवसिद्धनिर्विशेषब्रह्मपदारोहाय तं सविशेषतः प्रच्यावयन्नाह—एष त्विति। परमार्थतो न हि प्राणविदतिवादीति यमहं वक्ष्यामि तं परमार्थसत्यं भूमानं न त्वं वेद। यस्तं स्वमात्रमिति वेद एष तु वा अतिवदति। यः सत्येन परमार्थेनातिवदति हे भगवः! यस्त्वां प्रपन्नः सोऽहं सत्येनाति-वदानि। तथा नियुनक्तु मां भगवान् यथा सत्येनातिवदानि। यद्येवं सत्येनातिवदितुमिच्छसि तदा सत्यमेव तु तावत् विजिज्ञासितव्यमित्युक्तो नारद आह—हे भगवः! त्वत्तोऽहं सत्यं विजिज्ञासे विशेषेण ज्ञातुमिच्छेय-मित्यर्थः ॥ १६ ॥

सत्यस्य ज्ञानलभ्यत्वम्

यदा वै विजानाति अथ सत्यं वदति नाविजानन् सत्यं वदति विजानन्नेव सत्यं वदति विज्ञानं त्वेव विजिज्ञासितव्यमिति विज्ञानं भगवः! विजिज्ञास इति ॥ १७ ॥

ज्ञानलभ्यं सत्यमित्याह—यदेति। **यदा वै** इदं परमार्थसत्यमिति **विजानाति अथ** स्वाज्ञदृष्टिविकल्पितासत्प्रपञ्चे सत्यसति सदेवैकं सत्यमिति **वदति**। "नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः", "प्राणा वै सत्यं" इति च विकारस्यापि सत्यतावादिश्रुतेः। इन्द्रियसापेक्षत्वेऽपि "प्राणा वै सत्यं तेषामेष सत्यं" इत्युक्त्या परमार्थसत्यप्रबोधोपायत्वात्। इह तु प्राण एव परमार्थसत्यमिति मन्वानं नारदं यत् परमार्थसत्यं भूमाख्यं तद्विज्ञापयिष्यामीति विवक्षितत्वात्। अतो **नाविजानन् सत्यं वदति**। यस्त्वेवमविजानन् सत्यं वदति सोऽयं नामादिप्राणान्तान् परमार्थसद्रूपानेव मन्यमानो वदति। न तु भूमातिरेकेण नामादयः सन्ति। अतो नाविजानन् सत्यं वदति। न च तत्सत्यं ज्ञानं च विजिज्ञासितम्। **विज्ञानं त्वेवादौ विजिज्ञासितव्यमिति**। यद्येवं **भगवः! विज्ञानं विजिज्ञास** इति ॥ १७ ॥

सत्यादिकरोत्यन्तानां पूर्वपूर्वहेतुत्वम्

यदा वै मनुतेऽथ विजानाति न अमत्वा विजानाति मत्वैव विजानाति मतिस्त्वेव विजिज्ञासितव्येति मतिं भगवः! विजिज्ञास इति ॥ १८ ॥

यदा वै श्रद्दधाति अथ मनुते नाश्रद्दधन्मनुते श्रद्दधदेव मनुते श्रद्धा त्वेव विजिज्ञासितव्येति श्रद्धां भगवः! विजिज्ञास इति ॥ १९ ॥

यदा वै निस्तिष्ठति अथ श्रद्दधाति नानिस्तिष्ठन् श्रद्दधाति निस्तिष्ठन्नेव श्रद्दधाति निष्ठा त्वेव विजिज्ञासितव्येति निष्ठां भगवः! विजिज्ञास इति ॥ २० ॥

यदा वै करोति अथ निस्तिष्ठति नाकृत्वा निस्तिष्ठति कृत्वैव निस्तिष्ठति कृतिस्त्वेव विजिज्ञासितव्येति कृतिं भगवः! विजिज्ञास इति ॥ २१ ॥

सत्यादीनां करोत्यन्तानां उत्तरोत्तरेषां पूर्वपूर्वहेतुत्वं द्रष्टव्यमित्याह—यदेति। यदा वै मनुते। यदा वै श्रद्धधाति। यदा वै निस्तिष्ठति। यदा वै करोति इति। मन्तव्यार्थविषयं मननं मतिः। आस्तिक्यबुद्धिः श्रद्धा। गुरुशुश्रूषाद्यप्रमत्तता निष्ठा। इन्द्रियसंयमः चित्तैकाग्रता कृतिः। सत्यां हि कृतौ यथोक्तनिष्ठादीनि विज्ञानावसानानि भवन्ति ॥ १८–२१ ॥

कृतिनिष्पत्तिनिदानकथनम्

यदा वै सुखं लभते अथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति सुखं त्वेव विजिज्ञासितव्यमिति सुखं भगवः! विजिज्ञास इति ॥ २२ ॥

कृतिनिष्पत्तिनिदानं किं? इत्यत आह—यदेति। या उक्ता करणग्रामनिग्रहरूपिणी यदा सेयं कृतिः। यल्लब्धव्यमिति मया वक्ष्यमाणनिरतिशयसुखं लभतेऽथ निश्शेषं सुखावरणकरणग्रामापह्नवं करोति यथेदं दृष्टफलं सुखाकृतिः तथेहापि नासुखं लब्ध्वा करोति। सुखमेव लब्ध्वा करोति। भविष्यदपि फलं लब्ध्वेत्यर्थः। कृत्यादौ सति स्वयमेवाविर्भवति पारमार्थिकसत्यम्। तद्विज्ञानयत्नो न कार्य इत्यत आह—सुखं त्वेव विजिज्ञासितव्यमिति। यत्पारमार्थिकसत्यत्वेन निष्पन्नं परमसुखं तन्निष्प्रतियोगिकस्वमात्रमिति ज्ञातव्यमित्यर्थः। सुखं भगवः! विजिज्ञास इति ॥ २२ ॥

निरतिशयसुखस्य सूक्ष्मताभावः

यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवः! विजिज्ञास इति ॥ २३ ॥

निरतिशयसुखस्य सूक्ष्मत्वेनाल्पतामाशङ्क्याह—यो वा इति। यो वै भूमा स्वातिरिक्तपरिच्छेदत्रयं अस्तिनास्तीतिविभ्रमापह्नवसिद्ध इति यत् तत्सुखम्। नामादिप्राणान्तगतसुखस्य सातिशयत्वेनाल्पत्वमाह—नाल्पे सुखमस्तीति। नामादिप्राणान्तगताल्पसुखावलेः स्वाज्ञानावधिकत्वेन पारमार्थिकसुखावरण-दुःखस्वरूपत्वात् तदल्पसुखदुःखापह्नवसिद्धभूमैव सुखम्। अतो भूमा त्वेव विजिज्ञासितव्य इति। भूमानं भगवः! विजिज्ञास इति॥ २३॥

भूमाल्पयोः याथात्म्यकथनम्

यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा अथ यत्रान्यत् पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पं यो वै भूमा तदमृतमथ यदल्पं तन्मर्त्यꣳ स भगवः! कस्मिन् प्रतिष्ठितः? इति स्वे महिम्नि यदि वा न महिम्नीति। गोअश्वमिह महिमेत्याचक्षते हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानीति नाहमेवं ब्रवीमि ब्रवीमीति होवाच अन्यो ह्यन्यस्मिन् प्रतिष्ठित इति॥२४॥

स्वातिरिक्तयोः भूमाल्पयोः याथात्म्यं किं? इत्यत आह—यत्रेति। यत्र यस्मिन् वस्तुतोऽवस्तुतो वाप्यन्यत् स्वातिरिक्तं तद्ग्राहकमन्यत्करणम्। तथा स्वातिरिक्तद्रष्टावन्यदस्तीति परमार्थदृष्टिर्न कदापि पश्यति। तथा नान्य-च्छृणोति। दर्शनीयश्रोतव्यनामरूपवत् स्वाविद्यापदतत्कार्यापह्नवप्रबोधे जाते पुनः स्वातिरेकेण मन्तव्यं ज्ञातव्यं वा किमवशिष्यते? यत एवमतो नान्यन्मनुते नान्यद्विजानाति स्वान्यविज्ञानप्रतिषेधस्य मननप्रतिषेधपूर्वकत्वात्। एवं स्वातिरिक्तकलनातद्दर्शनश्रवणवेदनापह्नवपूर्वकं यः स्वमात्रमवशिष्यते स भूमेति यत् तत् भूमयाथात्म्यम्।

चिन्मात्रमेव चिन्मात्रमखण्डैकरसं रसम्।
सर्ववर्जितचिन्मात्रं ब्रह्ममात्रमसन्न हि॥

सिद्धान्तोऽध्यात्मशास्त्राणां सर्वापह्नव एव हि ।
नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्रमम् ॥
एकमेवाद्वयं ब्रह्म नेह नानास्ति किञ्चन ।
अनाख्यमनभिव्यक्तं सत् किञ्चिदवशिष्यते ॥

इति भूम्नो निष्प्रतियोगिकत्वेन स्वमात्रसिद्धितावादिश्रुतेः । स्वातिरिक्तयाथात्म्यं किं ? इत्यत आह—**अथेति** । **अथ** स्वाज्ञानानन्तरं **यत्र** स्वातिरिक्ते **अन्यः अन्यत् पश्यति, अन्यः अन्यच्छृणोति, अन्यः अन्यद्विजानातीति** यत् **तदल्पं** वस्तुतः स्वातिरिक्तवैरल्यात् । तद्धि स्वातिरिक्तयाथात्म्यम् । तत्र स्वातिरिक्तयोः **यो वै भूमा** तद्याथात्म्यं **अमृतम्** । **यत्** तदतिरिक्तं तद्याथात्म्यमल्पं **मर्त्यं** स्वाज्ञानावधिकत्वात् मर्त्यमित्युक्तम् । वस्तुतस्तदपह्नवविषयतामपि नार्हतीत्यर्थः । एवं स्वातिरिक्तप्रपञ्चापह्नवसिद्धो यो भूमावशिष्यते हे **भगवः** भगवन् ! **सोऽयं भूमा कस्मिन् प्रतिष्ठितः ?** इत्युक्तवन्तं नारदं भगवान् सनत्कुमारः प्रत्याह—**स्वे महिम्नीति** । स्वस्वरूपे स्वमात्रतया प्रतिष्ठितो भूमेत्यर्थः । **यदि स्वे** स्वात्मीये माहात्म्ये नामादिप्राणान्तस्वविभूतौ वा प्रतिष्ठित इति मन्यसे तदा कस्मिन् प्रतिष्ठितः ? इत्युक्तिर्मृषैव । **महिम्न्यपि** प्रतिष्ठित इति **न** वयं ब्रूमः । भूम्नः स्वमात्रत्वेन कुत्राप्यप्रतिष्ठितत्वात् । महिमा कीदृशः ? इत्यत आह—**गोअश्वमिह महिमेत्याचक्षत** इति । गावश्च अश्वाश्च गोअश्वमिति द्वन्द्वैकवद्भावः । सर्वत्र गवाश्वादि महिमेति प्रसिद्धम् । चैत्रादेस्तदाश्रितत्वेन तत्प्रतिष्ठितत्वम् । यथा **हस्तिहिरण्यं दासभार्यं क्षेत्राण्यायतनानि** प्रतिष्ठाशब्दवाच्यानि तथा **नाहमेवं** चैत्रादिवत् **अन्यो ह्यन्यस्मिन् प्रतिष्ठित इति ब्रवीमीति स होवाच** भगवानित्यर्थः ॥ २४ ॥

भूमयाथात्म्यबुद्ध्यारोहोपायकथनम्

स एवाधस्तात् स उपरिष्टात् स पश्चात् स पुरस्तात् स दक्षिणतः स उत्तरतः स एवेदꣳ सर्वमिति अथातोऽहङ्कारादेश

एवाहमेवाधस्तादहमुपरिष्टादहं पश्चादहं पुरस्तादहं दक्षिणतोऽहमुत्त-
रतोऽहमेवेदꣳ सर्वमिति । अथात आत्मादेश एवात्मैवाधस्तादात्मा
उपरिष्टादात्मा पश्चादात्मा पुरस्तादात्मा दक्षिणत आत्मा उत्तरत
आत्मैवेदꣳ सर्वमिति स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन्
आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराट् भवति
तस्य सर्वेषु लोकेषु कामचारो भवति । अथ येऽन्यथा अतो विदुः
अन्यराजानस्ते क्षय्यलोका भवन्ति तेषाꣳ सर्वेषु लोकेषु अकाम-
चारो भवति ॥ २९ ॥

किन्त्वहं भूमयाथात्म्यबुद्ध्यारोहोपायं ब्रवीमीत्याह— स एवेत्यादि । स्वातिरिक्तकलना यत्रापह्नवतां गता स एव भूमाधस्तादुपरिष्टात् पश्चात् पुरस्ताद्दक्षिणत उत्तरतश्च सर्वत्र स एव सर्वम् । तदतिरिक्तस्वाज्ञविकल्पिताध-ऊर्ध्वादिकलनायाः सम्यज्ज्ञानावधिकत्वात् । यस्माद्भूमैव स्वमात्रमवशिष्टः तस्मिन्नासौ क्वचित्प्रतिष्ठित इत्यर्थः । स एवाधस्तादिति परोक्षनिर्देशतो भूम्नोऽन्यो द्रष्टा स्यादित्यत आह—अथेति । परोक्षवन्निर्देशानन्तरं द्रष्टुरनन्यत्वप्रदर्शनार्थ-महङ्कारेण भूमैव निर्दिश्यत इत्यहङ्कारादेशः ।

आत्ममात्रमिदं सर्वं आत्मनोऽन्यन्न किञ्चन ।

इति श्रुतेः । यद्वा—स एवाधस्तादिति तच्छब्देन स्वातिरिक्तसमष्टिप्रपञ्चारोपा-पवादाधारस्तत्पदार्थः । अस्मच्छब्देन व्यष्टिप्रपञ्चारोपापवादाधारः प्रत्यगात्मा । आत्मशब्देन तत्त्वंपदगताधेयतानिरूपिताधारादिकलनाविरलः परमात्मा उच्यत इत्यर्थः । अथवा स्वाज्ञविकल्पिताधस्तादित्यादिपरिच्छिन्नभावे सम्यग्दृष्ट्यापह्नवतां गते अथ तदहमात्मशब्दगोचरं सदेकमेवाद्वितीयं निष्प्रतियोगिकभूमब्रह्मतत्त्वं स्वमात्रमवशिष्यत इत्यर्थः ।

सर्वग्रहोपसंशान्तौ स्वयमेवावशिष्यते ।

इति खिलश्रुतेः । यः सर्वापह्नवसिद्धो भूमा निष्प्रतियोगिकस्वमात्रमिति वेद **स वा एष** विद्वानेवं भूमाल्पयोर्निष्प्रतियोगिकभावाभावरूपतया **पश्यन्** तयोराधाराधेयाभावं **मन्वानः** स्वमात्रावशेषतां **विजानन्** रतिक्रीडामिथुनहेतुस्वातिरिक्तबाह्यदेहदारादिवैरल्यात् **आत्मरतिरात्मक्रीड आत्ममिथुन आत्मानन्द** इति विशेषणचतुष्टयस्यायमर्थः । स्वातिरिक्ताविद्यापदस्थूलांशप्रविभक्तव्यष्टिसमष्टितदैक्यजाग्रज्जाग्रदाद्योतृविकल्पान्तषोडशकलनागतहेयांशापह्नवसिद्धवस्तुनि स्वमात्रधिया यो रमते स **आत्मरतिः** । तथा तत्सूक्ष्मांशप्रविभक्तस्वप्नजाग्रदाद्यनुज्ञातृविकल्पान्तषोडशकलनाहेयांशापह्नवसिद्धवस्तुनि स्वमात्रतया यः क्रीडति स **आत्मक्रीडः** । तथा तद्बीजांशगतस्वापजाग्रदाद्यनुज्ञैकरसाविकल्पान्तषोडशकलनापह्नवसिद्धवस्तुनि मिथुनमैक्यमपृथग्भावो यस्य सोऽयमात्म**मिथुनः** । तथा तत्तुर्यांशप्रविभक्ततुर्यजाग्रदाद्यविकल्पानुज्ञैकरसान्तद्वादशकलनाहेयांशापह्नवसिद्धतुर्यतुर्यात्मा स्वमात्रमिति नन्दतीत्यात्**मानन्दः** । "एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति" इति श्रुतेः । एवं विशेषणचतुष्टयविशिष्टो विद्वान् स्वमात्रतया राजत इति **स्वराट् स भवति** । जीवन्नेव स्वाराज्यपट्टाभिषिक्तो भवतीत्यर्थः । यस्य निर्विशेषभूममात्रप्रबोधो नोदेति नामादिप्राणान्तबोधो जायते **तस्य** तदुपासनामहिम्ना **सर्वेषु लोकेषु कामचारो भवति** । परिच्छिन्नदृष्टेः कामचारत्वमपि परिच्छिन्नमित्यर्थः । **अथ पुनर्येऽन्यथा** मदुक्तविपरीतात्मानं **विदुः** । अन्यो राजा स्वामी येषां **तेऽन्यराजानो भवन्ति** तेषां नामादिप्राणान्तविज्ञानवैरल्यात् । क्षय्यो लोको येषां ते **क्षीणलोका** भवन्तीत्यर्थः । **ततस्तेषां सर्वेषु लोकेषु अकामचारो भवति** । यथावद्भूमब्रह्मविदां तन्मात्रावस्थानलक्षणकैवल्यं तत्सोपाननामादिप्राणान्तविदां तद्भावापत्त्यनुरूपेण कामचारत्वं भूमसोपानास्पर्शिनां क्षीणलोकत्वमुक्तं भवतीत्यर्थः ॥ २९ ॥

सर्वं भूमब्रह्ममात्रमिति कथनम्

तस्य ह वा एतस्य एवं पश्यत एवं मन्वानस्य एवं विजानत आत्मतः प्राण आत्मत आशा आत्मतः स्मर आत्मत आकाश

आत्मतस्तेज आत्मत आप आत्मत आविर्भावतिरोभावौ आत्मतोऽन्नम् आत्मतो बलमात्मतो विज्ञानं आत्मतो ध्यानमात्मतश्चित्तमात्मतः संकल्प आत्मतो मन आत्मतो वाक् आत्मतो नाम आत्मतो मन्त्रा आत्मतः कर्माणि आत्मत एवेदꣳ सर्वमिति। तदेष श्लोकः—

न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्।
सर्वꣳ ह पश्यः पश्यति सर्वमाप्नोति सर्वशः॥ इति॥
स एकधा भवति त्रिधा भवति पञ्चधा।
सप्तधा नवधा चैव पुनश्चैकादश स्मृतः।
शतं च दश चैकश्च सहस्राणि च विꣳशतिः॥

आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः तस्मै मृदितकषायाय तमसस्पारं दर्शयति भगवान् सनत्कुमारः तꣳ स्कन्द इत्याचक्षते तꣳ स्कन्द इत्याचक्षते॥ २६॥

स्वाज्ञदृष्टिविकल्पितेयं प्राणादिनामान्तकलना भिन्नभिन्नापि विद्वद्दृष्ट्या एतत्सर्वं भूमब्रह्ममात्रं भवतीत्याह—तस्येति। तस्य ह वा एतस्येत्याद्युक्तविशेषणविशिष्टभूममात्रपदारूढविदुषो ब्रह्ममात्रप्रबोधात् पुरा प्राणादिनामान्तकलना स्वभिन्नवद्भाता हि। इदानीं भूममात्रप्रबोधे सति ततः प्राणादिनामान्तभिदाकदम्बमात्मत एव स्वात्मैव संवृत्तम्। "यत्र त्वस्य सर्वमात्मैवाभूत्" इति स्वातिरिक्तदर्शनाद्यसंभवश्रुतेः। किञ्च तदेतस्मिन्नर्थे एष श्लोको मन्त्रो भवति। भूमब्रह्मातिरिक्तं न किञ्चिदस्तीति यः पश्यति स पश्यः।

भूमब्रह्मात्मवित् विद्वान् स्वातिरिक्तं किमपि नेति निश्चयतो देहसंबन्धतो मृत्युं मरणं जरादिरोगमाध्यात्मिकादिदुःखं वा न कदापि **पश्यति**। एतद्विपरीतो नपश्योऽविद्वान् देहात्मभावेन मृत्युं मरणं रोगं दुःखं च न पश्यतीति न, किन्तु पदे पदे पश्यति। घटीयन्त्रवदविश्रान्तं जन्ममरणादि प्राप्नोतीत्यर्थः। स एवेदं सर्वं आत्मैवेदं सर्वमिति यः **पश्यः** सर्वमात्मत्वेन **पश्यति** सोऽयं विद्वान् सर्वं ब्रह्म **सर्वशः** सर्वप्रकारेणाप्नोति। परमार्थतः स्वातिरिक्तसर्वाभावात् स्वयमेव स्वमात्रं भवतीत्यर्थः। किञ्च स विद्वान् स्वयं स्वाज्ञादिदृष्टिमोहे सत्यसति **एकधा** एकरूपोऽपि स्वाज्ञादिदृष्ट्या सृष्टिस्थितिप्रलयवद्विश्वाकारेण **त्रिधेव भवति**। पञ्चब्रह्मरूपेण **पञ्चधेव भवति**। तथा व्याहृतिरूपेण **सप्तधा** प्रजापतिरुद्ररूपेण **नवधा एकादशधा** चेत्याद्यनन्तभेदेन वर्तमानोऽपि स्वदृष्ट्यात्मानमतथाविधमेकमेव मन्यते स्वात्मनो निष्प्रतियोगिकाद्वैतरूपत्वात्। अथेदानीमेतादृशविद्यासाधनमुपदिशति--**आहारेति**। **आहारशुद्धौ** सत्यां **सत्त्वस्या**न्तःकरणस्य **शुद्धि**र्नैर्मल्यं भवति। **सत्त्वशुद्धौ** सत्यां **ध्रुवा स्मृतिः** अनवरतानुसन्धानं भवति। तथाविधस्मृतिलम्भे सति हृदयाश्रितसर्वग्रन्थीनां **विप्रमोक्षो** विनाशो भवति। यत एवमतो मुमुक्षुभिः शुद्धाहारादिनियमः कार्य इत्यर्थः। यदि विद्वान् कृतकृत्यस्तदा न तस्य एतादृशसाधनाकांक्षास्ति। तस्य स्वातिरिक्ताखिलग्रासत्वेन कृतकृत्यत्वात्। स्वज्ञदृष्ट्या रविवन्निर्लिप्तत्वादित्यत्र---

> यथा रविः सर्वरसान् प्रभुङ्क्ते हुताशनश्चापि हि सर्वभक्षः।
> तथैव योगी विषयान् प्रभुङ्क्ते न लिप्यते पुण्यपापैश्च शुद्धः॥
> अहमन्नं सदान्नाद इति हि ब्रह्मवेदनम्।
> ब्रह्मवित् ग्रसति ज्ञानात् सर्वं ब्रह्मात्मनैव तु॥

इति श्रुतेः। एवं शास्त्रार्थमशेषेणोक्त्वा श्रुतिराख्यायिकामुपसंहरति---**तस्मा इति**। श्रुत्याचार्यप्रसादलब्धज्ञानवैराग्यशुद्धोदकेन मृदितः क्षालितः ज्ञानप्रतिबन्धकरूपकषायो यस्य **तस्मै मृदितकषायाय** नारदाय स्वाज्ञानतमसः **पारं परं** परमार्थतत्त्वं **दर्शयति** दर्शितवानित्यर्थः।

उत्पत्तिं प्रलयं चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

इति स्मृत्युक्तधर्मा **भगवान् सनत्कुमारः** । तद्याथात्म्यविदः सन्तः तमेव देवं सनत्कुमारं स्कन्द इत्याचक्षते कथयन्ति । तं स्कन्द इत्याचक्षते तं स्कन्द इत्याचक्षते इति द्विर्वचनं त्वध्यायपरिसमाप्तिद्योतकम् ॥ २६ ॥

इति सप्तमोऽध्यायः

अष्टमोऽध्यायः

दहरोपासनाप्रकारः

अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति । तं चेत् ब्रूयुः यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः किं तदत्र विद्यते ? यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमिति । स ब्रूयात् यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणि यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहितमिति । तं चेत् ब्रूयुरस्मिꣳश्चेदिदं ब्रह्मपुरे सर्वꣳसमाहितꣳसर्वाणि च भूतानि सर्वे च

कामा यदैनज्जरामाप्नोति प्रध्वꣳसते वा किं ततोऽतिशिष्यते ? इति ।
स ब्रूयान्नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्यं
ब्रह्मपुरमस्मिन् कामाः समाहिता एष आत्मापहतपाप्मा विजरो
विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पो यथा
ह्येवेह प्रजा अन्वाविशन्ति यथानुशासनं यं यमन्तमभिकामा भवन्ति
यं जनपदं यं क्षेत्रभागं तं तमेवोपजीवन्ति । तद्यथेह कर्मचितो लोकः
क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते तद्य इहात्मानमननु-
विद्य व्रजन्ति एताꣳश्च सत्यान् कामाꣳस्तेषाꣳ सर्वेषु लोकेष्वकाम-
चारो भवति अथ य इहात्मानमनुविद्य व्रजन्ति एताꣳश्च सत्यान्
कामाꣳस्तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ १ ॥

यद्यपि षष्ठसप्तमयोः सत् एकमेवाद्वितीयं भूमब्रह्मतत्त्वं स्वातिरिक्त-सर्वापह्नवमुखेन निष्प्रतियोगिकतयाभिहितं तस्य दिग्देशकालविभागविरलत्वेन स्वाज्ञानां दिग्देशादिपरिच्छिन्नभावारूढा बुद्धिर्न सहसा परमार्थसद्वस्तु विषयीकर्तुं शक्या । तदधिगमायादौ दहाद्युपासना विधातव्या मन्दानुकम्पया सत्यकामादि-गुणवत्त्वं च वक्तव्यमिति विषयनिरसनहेतुब्रह्मचर्यादिसाधनं सगुणोपासकानां सुषुम्नाद्वारा परब्रह्मगतिरिति वक्तव्येत्यष्टमाध्याय आरभ्यते । दिग्देशगुणगति-फलभेदगन्धविरलं हि परमार्थभूमतत्त्वम् । तन्मन्दबुद्धीनामसदिव प्रतिभाति । तान् शनैरुपायतः सन्मात्रमपि ग्राहयिष्यामीति श्रुतिरादौ दहरोपासनाप्रकारमा-चष्टे—**अथेति** । अथेत्यारम्भार्थः संसारहेयबुद्ध्यानन्तर्यार्थो वा । **यदिदं** वक्ष्यमाणं दहरमल्पं पुण्डरीकसदृशं वेश्मेव वेश्म । हृदयस्य मध्ये लोहितं मांसपिण्डं यस्मिन् तत् दहरं पुण्डरीकम् । "कुमुदमिवानेकधा विकसितं" इति श्रुतेः । **अस्मिन्** द्वारपालादिमति परस्यापरस्य वा ब्रह्मणः पुरे यथा राज्ञः पुरमनेकप्रकृतिमत् तथा इदमनेकेन्द्रियान्तःकरणवृत्तिसहस्रस्वाम्यर्थकारि-

विशिष्टं हि ब्रह्मपुरं शरीरम्। यथा तत्र राज्ञो वेश्म तथास्मिन् ब्रह्मपुरे शरीरे **दहरं वेश्म**। तत्र हि परमपरं वा ब्रह्म उपलभ्यते। अस्मिन् स्वविकारशुङ्गदेहे "अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि" इत्युक्तरीत्या यस्मात् सदाख्यं ब्रह्म दर्पणजलादौ मुखसूर्यादिप्रतिबिम्बवत् प्रविष्टं श्रुतं तस्मादस्मिन् हृदयपुण्डरीकवेश्मनि बाह्यविषयहेयधिया उपरतकरणग्रामब्रह्मचर्यादिसाधनसंपन्नैर्निपुणं वक्ष्यमाणगुणविशिष्टं वा ब्रह्म उपलभ्यते इति प्रकरणार्थसङ्ग्रहः। **दहरोऽल्पतरो** वेश्मनोऽल्पत्वात्तदन्तर्वर्तिनोऽप्यल्पत्वम्। **अस्मिन् अन्तराकाशः** आकाशो ब्रह्मेत्यर्थः। तथा च वक्ष्यति "आकाशो ह वै नाम" इति। आकाशवदमूर्तत्वसूक्ष्मत्वसर्वगतत्वादिसामान्यात्। **तस्मिन्** हृदयपुण्डरीकेऽन्तर्मध्ये **यद्विद्यते तदन्वेष्टव्यम्**। गुरुप्रसादलभ्यश्रवणाद्युपायैः **तद्वाव विजिज्ञासितव्यं** साक्षात्करणीयम्। **तं** चेदेवमुक्तवन्तमाचार्यं यद्यन्तेवासिन एवं **ब्रूयुः यदिदमस्मिन्** परिच्छिन्नब्रह्मपुरे ततोऽपि परिच्छिन्नं **दहरं पुण्डरीकं वेश्म**। ततोऽप्यल्पतरो **दहरोऽस्मिन्नन्तराकाशः**। **किं तदत्र विद्यते?** न किमपीत्यर्थः। तत्र **किमन्वेष्टव्यम्?** किं वा **विजिज्ञासितव्यम्?** तेन किं वा प्रयोजनम्? एवमुक्तस्स आचार्योऽब्रवीदिति श्रुतेः वचनमेतत्। हार्दाकाशस्याल्पत्वं यदुक्तं तदसत् तस्यापरिच्छिन्नत्वात्। यद्दहराकाशमल्पं मन्यध्वे शृणुत तत्रोच्यते—हार्दाकाशपरिच्छिन्नमन्तःकरणं विद्यते। विशुद्धे तस्मिन्नुपसंहृतकरणानां तत्र हि ब्रह्म उपलभ्यते। अत एव दहरोऽस्मिन्नन्तराकाश इति ब्रूमः। तत्रत्यव्योम्नः परिच्छिन्नत्वं तदुपाधिनिमित्तम्। वस्तुतस्तु **यावान् वै** परिमाणतो भौतिकाकाशः **तावानेषोऽन्तर्हृदय आकाशः** यत्रान्वेष्टव्यं विजिज्ञासितव्यं वस्त्वस्तीत्युक्तम्। न हि तद्भूताकाशवत् परिच्छिन्नम्। तद्विना नीरूपि ब्रह्म दृष्टान्तवैरल्यात्। नाप्याकाशसमं ब्रह्म भवितुमर्हति ब्रह्मणोऽव्यक्ताकाशादेरपि कारणत्वात्। निरङ्कुशविभु ब्रह्मेत्यत्र "तस्माद्वा एतस्मादात्मन आकाशः संभूतः", "एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्च", "येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च", "सर्वमावृत्य तिष्ठति" इत्यादिश्रुतेः स्मृतेश्च। किञ्च

ब्रह्माकाशेऽस्मिन्नुभे द्यावापृथिवी स्वाविद्योपाधिवैशिष्ट्यादन्तरेव समाहिते। तत उभावग्निश्च वायुश्चेत्यादि रथनाभावरा इवास्मिन् सर्वं प्रतिष्ठितमित्यर्थः। यच्चास्यात्मन इहात्मीयत्वेनास्ति यच्चैवं नास्ति तत्सर्वमात्मन्येव समाहितमिति। तं चेदेवमुक्तवन्तं अन्तेवासिनो ब्रूयुः। किमिति? यदिदमस्मिन् ब्रह्मपुरे तदुपलक्षितान्तराकाशे सर्वं समाहितम्। सर्वाणि च भूतानि सर्वे च कामाः समाहिताः। आचार्येण कामा नानुगृहीता इति चेन्न; सर्वं समाहितमित्युक्तितः कामानां गृहीतत्वात्। यदा यस्मिन् काले एनत् ब्रह्मपुराख्यं शरीरं जरां वलीपलितादिप्रभववयोहानिं प्राप्नोति शस्त्रादिना वा प्रध्वंसते विनश्यति घटनाशे घटाश्रितक्षीरादिवत् किं ततोऽतिशिष्यते? देहनाशे तदाश्रयमुत्तरोत्तरं पूर्वपूर्वनाशान्नश्यति। ततः किमवशिष्यते? न किञ्चनेत्येवमन्तेवासिभिराक्षिप्तस्स आचार्यो ब्रूयात्। यस्मिन् सर्वं समाहितं तत्कथं ब्रह्म? अस्य देहस्य जरया जीर्यति देहवत् न विक्रियत इत्यर्थः। न चास्य वधेन हन्यते आकाशादेरपि सूक्ष्मत्वात्। देहेन्द्रियादिदोषैर्न स्पृश्यत इत्यर्थः। "अशब्दमस्पर्शमरूपमव्ययम्" इति श्रुतेः। एतत्सत्यं ब्रह्म यत् ब्रह्मोपलब्ध्यर्थं पुरं तदनृतं वाचारम्भणमात्रं मिथ्याभूतदेहशुङ्गे ब्रह्मोपलभ्यत इति। तस्य सर्वव्यवहारास्पदत्वेन व्यावहारिकदृष्ट्या सत्यत्वमङ्गीकृत्यास्मिन् हृदयोपलक्षितब्रह्मपुरे ये बहिः भवद्भिः प्रार्थ्यन्ते ते कामाः स्वात्मन्येव समाहिताः। अतो यूयं बाह्यकामतृष्णां त्यक्त्वा तत्प्राप्त्युपायमेवानुतिष्ठतेत्यर्थः। यत् भवदात्मस्वरूपं वक्ष्यमाणं तच्छृणुत। किं तद्वक्ष्यमाणम्? इत्यत्र एष हि वक्ष्यमाणो भवदात्मा। स किंविशेषणविशिष्टः? इत्यत्र यस्य धर्माधर्माख्यपाप्मापहतो विनाशितः सोऽयमपहतपाप्मा। नास्य जरया एतज्जीर्यति न वधेनास्य हन्यते इत्युक्त्या विजरो विमृत्युरिति पदद्वयं व्याख्यातम्। तत् किमर्थं पुनरुच्यते? देहसंबन्धतो जरामृत्युसंबन्धाभावेऽपि प्रकारान्तरेण ताभ्यां संबन्धः स्यादित्याशङ्कानिरसनार्थत्वात्। मनस्सन्तापराहित्यात् विशोकः। अशनेच्छाभावात् विजिघत्सः। पानेच्छावैरल्यादपिपासः। अपहतपाप्मेत्यादिपञ्चविशेषणतः पापनिमित्तदुःखानामानन्त्यात्

सर्वदु:खप्रतिषेधार्थं विशेषणपञ्चकमित्यर्थः। सत्यकामः ईशस्यासंसारित्वेनावितथकामत्वात्। तथा सत्यसङ्कल्पः सङ्कल्पास्तद्धेतुकामाश्च सत्त्वोपाधिनिमित्ताः। न स्वतः स्वस्य कामसंकल्पाद्यस्पृष्टत्वात्। यथोक्तलक्षण एष आत्मा गुरुतः शास्त्रतश्च विज्ञेयः। सोऽयमात्मा स्वात्मसंवेद्यतया स्वाराज्यकामैर्न विज्ञातव्यश्चेत् का हानिः? इत्यत्र दृष्टान्तमाह—यथेति। यथा ह्येवेह लोके प्रजाः स्वामिनमन्यं मन्यमाना अन्वाविशन्ति यद्यत् स्वाम्यनुशास्ति तत्तथानुवर्तन्ते। किं किं? इत्यत्र यं यं देशं जनपदं क्षेत्रभागं वा तं तमभिकामा अर्थिनो भवन्ति फल्गुविषयमुपजीवन्ति। तन्नश्वरमित्यत्र दृष्टान्तमाह—तद्यथेति। तत्तत्र यथेह लोके स्वाम्यनुशासनानुवर्तिप्रजानां तत्सेवात्मककर्मणा चितः संपादितो लोकः क्षीयतेऽन्तवान् भवति, तथैवमेवाग्निहोत्रादिपुण्यचितो लोकः क्षीयते पुण्यक्षयसापेक्षत्वात्। एवमुक्तोऽयं कामिनां दोषः। तद्विषयं दर्शयति—तद्य इति। तत् तत्र ये इहास्मिन् लोके ज्ञानकर्मणोरधिकृता योग्यास्सन्तः स्वात्मानं श्रुत्याचार्यमुखतोऽननुविद्य अविदित्वास्माद्देहात् व्रजन्ति, एतांश्च सत्यसंकल्पकार्यान् सत्यान् कामान् अननुविद्य व्रजन्ति, तेषां राजानुशासनानुवर्तिप्रजानामिवास्वतन्त्रतया सर्वेषु लोकेषु अकामचारो भवति। अथ येऽन्ये स्वात्मानमिह लोके श्रुत्याचार्यमुखादनुविद्य स्वात्मसंवेद्यतामापाद्य यथोक्तांश्च सत्यान् कामांश्च व्रजन्ति तेषां सार्वभौमस्येव स्वातन्त्र्येण सर्वेषु लोकेषु कामचारो भवति ॥ १ ॥

स्वात्मवेदिनां सर्वलोकेषु कामचारकथनम्

स यदि पितृलोककामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते। अथ यदि मातृलोककामो भवति संकल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन संपन्नो महीयते। अथ यदि भ्रातृलोककामो भवति

संकल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति तेन भ्रातृलोकेन संपन्नो महीयते । अथ यदि स्वसृलोककामो भवति संकल्पादेवास्य स्वसारः समुत्तिष्ठन्ति तेन स्वसृलोकेन संपन्नो महीयते । अथ यदि सखिलोककामो भवति संकल्पादेवास्य सखायः समुत्तिष्ठन्ति तेन सखिलोकेन संपन्नो महीयते । अथ यदि गन्धमाल्यलोककामो भवति संकल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतस्तेन गन्धमाल्यलोकेन संपन्नो महीयते । अथ यदि अन्नपानलोककामो भवति संकल्पादेवास्यान्नपाने समुत्तिष्ठतः तेनान्नपानलोकेन संपन्नो महीयते । अथ यदि गीतवादित्रलोककामो भवति संकल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन संपन्नो महीयते । अथ यदि स्त्रीलोककामो भवति संकल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन स्त्रीलोकेन संपन्नो महीयते । यं यमन्तमभिकामो भवति यं कामं कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति तेन संपन्नो महीयते ॥ २ ॥

कथं पुनस्तेषां सर्वेषु लोकेषु कामचारो भवति ? इत्यत्रोच्यते—स यदीति । योऽयं वक्ष्यमाणब्रह्मचर्यादिसाधनसंपन्नो विद्वान् यथोक्तलक्षणमात्मानं हृदि साक्षात्कृतवान् भवति स त्यक्तदेहो यदि तदा पितरः पितृलोककामाः सुखहेतुभोग्यलोका उच्यन्ते । तेषु लोकेषु यस्य कामो भवति तस्य संकल्पमात्रादेव पितरः समुत्तिष्ठन्ति स्वात्मसंबन्धितामापद्यन्ते । अस्य योगिन ईश्वरस्येव सत्यसङ्कल्पत्वात् । तेन पितृलोकेन पितृगतभोगेन संपन्नः समृद्धो महीयते महिमानमनुभवतीति समानमन्यत् । मातरो जनयित्र्यः । सूकरादिजन्मनिमित्तासु मातृषु योगिन इच्छावशात् ता अपि पुण्यलोका भवन्ति ।

यं यमन्तं प्रदेशमभिकामो भवति यं यं कामं वा कामयते सोऽस्य संकल्पादेव समुत्तिष्ठति । स्वाभिप्रेतार्थप्राप्त्या संपन्नोऽयं महीयते ॥ २ ॥

अविदुषां सत्यकामबाह्यत्वम्

त इमे सत्याः कामा अनृतापिधानाः तेषाꣳसत्यानाꣳ सतामनृतमपिधानं यो यो ह्यस्य इतः प्रैति न तमिह दर्शनाय लभते । अथ ये चास्य इह जीवा ये च प्रेता यच्चान्यदिच्छन्न लभते सर्वं तदत्र गत्वा विन्दते अत्र ह्यस्यैते सत्याः कामा अनृतापिधानाः तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो न विन्देयुः एवमेव इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढाः । स वा एष आत्मा हृदि तस्यैतदेव निरुक्तꣳ हृद्ययमिति तस्माद्धृदयमहरहर्वा एवंवित् स्वर्गं लोकमेति । अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेनं रूपेणाभिनिष्पद्यत एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति तस्य ह वा एतस्य ब्रह्मणो नाम सत्यमिति । तानि ह वा एतानि त्रीण्यक्षराणि सतीयमिति तत् यत् सत् तदमृतं अथ यत् ति तन्मर्त्यं अथ यत् यं तेन उभे यच्छति यदनेन उभे यच्छति तस्मात् यमहरहर्वा एवंवित् स्वर्गं लोकमेति ॥३॥

यथोक्तात्मविदामुत्साहजननार्थमविदुषामनृताभिसन्धित्वेन सत्यकामबाह्यता-माह—त इति । त इमे यथाव्याख्याताः सत्याः कामा अनृतापिधानाः सत्यकामानाप्तिरेव पिधानमिव पिधानम् । किं नामानृतम् ? बाह्यस्त्र्यादिभोगेच्छा-निमित्तमिथ्याज्ञानम् । कथं पुनरनृताभिधानाः कामाः ? तेषामात्माश्रयाणां

सतामित्यत्र तदलाभ एव पिधानमित्युक्तत्वात्। **अस्य जन्तोर्यो यो हि पुत्रो** भ्राता सुहृद्वा **इतोऽस्माल्लोकात् प्रैति** म्रियते तं इष्टबन्धुजनं स्वहृदयाकाशे विद्यमानमपि तदविज्ञाय बाह्यप्रदेशे **तद्दर्शनाय** इच्छन्नपि **न लभते। अथास्य जीवा ये** देहसंबन्धिनो विद्यन्ते **ये चेह प्रेता यदिह लोके** वस्त्रान्नपानादि **इच्छन्न लभते सर्वमत्र** हार्दब्रह्मणि **विन्दते। अत्रास्य** हार्दब्रह्मणि **एते सत्याः कामा** वर्तन्ते। कथमिव तेऽनृतापिधानाः? इत्यत्र दृष्टान्तमाह— **यथेति। यथा** हिरण्यमेव निधातृभिः निधीयत इति निधिः। तं **हिरण्यनिधिं** भूमेरधस्तान्निहितं निक्षिप्तं निधिमत् क्षेत्रमज्ञातवन्तो **ह्यक्षेत्रज्ञास्ते** निधेरुपर्युपरि **संचरन्तोऽपि न विन्देयुः** मन्त्राञ्जनादिभिः वेदितुं शक्यमपि न विजानीयुः। **एवमेवेमाः** स्वाविद्यावृताः **प्रजाः**, हार्दब्रह्मैव लोकः, **तमहरहः** स्वापावस्थायां **गच्छन्त्योऽपि न विन्दन्ति ब्रह्मलोकम्**इदानीमापन्नाः स्म इति नैव जानन्ति। कथं तन्न जानन्ति? इत्यत्र यथोक्ता**नृतेन हि प्रत्यूढाः** स्वाविद्यादृढपटेन सम्यगावृता इत्यर्थः। यतः स्वायत्तमपि ब्रह्म न लभन्ते अतस्तेषां कष्टं वर्तत इत्यर्थः। **स वा एष आत्मा**। वैशब्दः प्रकृतपरामर्शार्थः। अपहतपाप्मेत्यादि-विशेषणविशिष्ट आत्मा **हृदि** हृदयाकाशशब्देनाभिहितः। **तस्य** हार्दब्रह्मणः **एतदेव निरुक्तं** नान्यन्निर्वचनम्। **हृदि अयमात्मा** वर्तत **इति** यस्मात् **तस्माद्धृदयम्**। हृदयनामनिर्वचनप्रसिद्ध्यापि स्वहृदयमात्मेत्यवगन्तव्यम्। **अहरहः** प्रत्यहं **वा** हृदयमात्मेत्येवंवित् **स्वर्गं लोकं** हार्दं ब्रह्म **एति** प्रतिपद्यते। "सता सोम्य तदा संपन्नो भवति" इति श्रुत्यनुरोधेनाविद्वानपि स्वापकाले हार्दं ब्रह्म एति चेत् सत्यम्; विद्वानविद्वानपि सद्ब्रह्मैव। तथाप्यस्ति विशेषः कश्चित्। स्वाचार्येण तत्त्वमसीति बोधितो विद्वान् सदेवास्मीति जानन् सदेव भवति नाविद्वान्। सोऽपि यद्यपि स्वापे सत्संपद्यते तथाप्ययमावृतः सन् तं नैति। एवंवित्तु स्वर्गं लोकमेतीति निरङ्कुशं विद्याफलस्य देहपातेऽप्यवश्यं-भावित्वात्। **यो** जाग्रदाद्यवस्थासु विषयेन्द्रियसंयोगजसुखाभासपराङ्मुखतया स्वेनात्मना सता संपन्नः सम्यक् प्रसीदतीति **सोऽयमेष संप्रसादो** विद्वान् **अस्माच्छरीरा**भिमानात् **समुत्थाय** न पुनर्देहाद्यात्मभावं गत्वा देहाद्युपलक्षित-

स्वाविद्यापदतत्कार्यध्वान्तग्रासं **परं ज्योतिः** स्वमात्रतया **उपसंपद्य** ततः स्वातिरिक्तसर्वकलनापह्नवसिद्धं यत् सन्मात्रमवशिष्यते "सत् किञ्चिदवशिष्यते" इति श्रुतेः, तदेव हि संप्रसादस्वरूपम्। **तेन स्वेन रूपेणाभिनिष्पद्यते** संप्रसादः सन्मात्रतयावशिष्यत इति योऽर्थः "पूर्णमेवावशिष्यते" इत्यादिश्रुतिप्रकटितो विजयते **एष आत्मेति होवाच**। "अन्तेवासिभ्यः स ब्रूयात्" इति श्रुत्या प्रदर्शितोऽयमेवेत्यर्थः। किमेतत्स्वरूपं? इत्यत्र **एतदेव ह्यमृतं** भूमरूपत्वात्। उक्तं चैतत् "यो वै भूमा तदमृतं" इति। अत एव तदभयं भूम्नो भयहेतुद्वयापह्नवसिद्धत्वात्। "द्वितीयाद्वै भयं भवति," "अमृतोऽभयो ब्रह्म" इति श्रुतेः। **एतदमृतमभयं एतद्ब्रह्मेति** यदुक्तं तस्य स्वातिरिक्तनामरूपकलनापह्नवसिद्धत्वेन तदाप्त्युपायाभावमाशङ्क्य तदाप्त्युपायतया निर्नामरूपब्रह्मणो नाम निर्दिशति--तस्येति। **तस्य ह वा एतस्य ब्रह्मणो नामाभिधानं** योग्यं किं? इत्यत्र **सत्यमिति** हि ब्रह्माभिधीयते तस्य स्वाज्ञविकल्पितानृतप्रपञ्चे सत्यसति सन्मात्रतया विद्यमानत्वात्। उक्तं हि "तत् सत्यं स आत्मा" इति, किमर्थं पुनरुच्यते? इति चेन्न; अत्र मन्दप्रतिपत्त्यर्थत्वात्। तथा च **तानि ह वा एतानि त्रीणि ब्रह्मणो नामाक्षराणि सतीयमिति**। "स इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं" इति श्रुतेः। तत्र सकारः सद्ब्रह्म **तत् अमृतं** तस्यामृतवाचकत्वात्। **अथ यत् ति** तकारइकारः **तन्मर्त्यम्**। **अथ यमित्यक्षरममृतम्**। मध्यमं मार्त्यम्। **तदुभे** सकारयकाराख्ये अक्षरे **यच्छति** यमयति वशीकरोतीत्यर्थः। **यस्मात् यमित्येतेन उभे यच्छति तस्मात्** ब्रह्मनामाक्षरस्यामृतत्वादिधर्मवत्त्वं माहात्म्यमुक्तम्। किमु वक्तव्यं नामवतः? इति स्तूयते। एवं ब्रह्मनामनिर्वचनतो नामवद्ब्रह्म बोध्यम्। तस्मात् हार्दं सत्यात्मकं ब्रह्म। **अहरहर्वा एवंवित् स्वर्गं लोकमेतीत्युक्तार्थम्** ॥ ३ ॥

संप्रसादात्मनः सेतुत्वेन स्तुतिः

अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय नैनꣳ सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतꣳ

सर्वे पाप्मानोऽतो निवर्तन्तेऽपहतपाप्मा ह्येष ब्रह्मलोकः । तस्माद्वा एतꣳ सेतुं तीर्त्वान्धः सन् अनन्धो भवति विद्धः सन् अविद्धो भवति उपतापी सन् अनुपतापी भवति तस्माद्वा एतꣳ सेतुं तीर्त्वापि नक्तमहरेवाभिनिष्पद्यते सकृद्विभातो ह्येवैष ब्रह्मलोकः । तद्य एवैतं ब्रह्मलोकं ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकः तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ ४ ॥

ब्रह्मचर्यादिसाधनसंबन्धार्थं यः संप्रसादात्मा विवक्षितः स एष आत्मा पुनरुक्तानुक्तगुणैः स्तूयते—अथेति । अथ पराग्भावतानवानन्तरं य आत्माविर्भवति सोऽयमात्मा तत्तद्वर्णाश्रमादिविहितक्रियाकारकफलासंकीर्णनिमित्तसेतुरिव सेतुर्विधृतिः विधरणः । जगत ईश्वरेण महामण्डूककूर्मशेषादिरूपिणा ध्रियमाणत्वात् किमर्थं सेतुता ? इत्यत आह—एषामिति । एषां कर्तृकर्मफलाश्रयभूरादिलोकानामसंभेदायाविनाशाय । स किं कालपरिच्छेद्यः ? इत्यत आह—नैनं सेतुमहोरात्रे तरतः इति । तस्य देशकालवस्तुपरिच्छेदशून्यत्वात् । अत एव एतं न जरा तरति । तथा न मृत्युर्न शोको न सुकृतं दुष्कृतं धर्माधर्मौ वा नैनं तरति । न हि स्वकार्येण कारणमतिक्रमितुं शक्यम् । य आत्मापहतपाप्मेत्यादिना यद्यपि पुरोक्त एव तथापीहायं विशेषः । न तरतीति प्राप्तिविषयत्वं प्रतिषिध्यते । तत्र विशेषेण जराद्यभावमात्रमुक्तम् । अत्राहोरात्राद्या उक्तानुक्ताः सर्वे पाप्मानोऽतो निवर्तन्ते तमस्पृष्ट्वेत्यर्थः । अपहतपाप्मा ह्येष ब्रह्मैव लोको ब्रह्मलोक उक्तः । यस्माच्छरीरवत एव पाप्मकार्यमान्ध्यादिना शरीरिण आत्मनस्तस्माद्वा एतमात्मानं सेतुं तीर्त्वा प्राप्य देहदृष्ट्यान्धोऽपि सन् स्वदृष्ट्यानन्धो भवति । देहविद्धोऽपि सन् देहाभिमानापाये अविद्धो भवति । तथा रोगाद्युपतापी सन् अनुपतापी भवति । किञ्च यस्मादात्मन्यहोरात्रादिकलना न विद्यते तस्माद्वा एतं सेतुं तीर्त्वा प्राप्य तमोरूपमपि नक्तमहरेवाभिनिष्पद्यते । विदुषः सर्वावस्थातीत-

त्वेन परंज्योतिस्स्वरूपत्वात् । अत एव यथोक्तलक्षणोऽयमेष ब्रह्मलोकः सकृद्विभातः तस्य निरावृतः स्वेन रूपेण सदा विभातत्वात् । तत् तत्र ये एतं यथोक्तलक्षणब्रह्मलोकं स्त्रीविषयतृष्णात्यागलक्षणब्रह्मचर्येण श्रुत्याचार्योपदेशमनुविन्दन्ति तेषां ब्रह्मचर्यादिसाधनवतामेव ब्रह्मलोको नेतरेषाम् । स्त्र्यादिविषयासक्तानां तेषां सर्वेषु लोकेषु कामचारो भवतीत्युक्तार्थम् । तस्मात ब्रह्मविदां ब्रह्मलोकादिसाधनं ब्रह्मचर्यादृते न ह्यस्तीत्यर्थः ॥ ४ ॥

ब्रह्मचर्यस्य यज्ञादिभिः स्तुतिः

अथ यत् यज्ञ इत्याचक्षते ब्रह्मचर्यमेव तत् ब्रह्मचर्येण ह्येव यो ज्ञाता तं विन्दतेऽथ यदिष्टमित्याचक्षते ब्रह्मचर्यमेव तत् ब्रह्मचर्येण ह्येवेष्ट्वात्मानमनुविन्दते । अथ यत् सत्त्रायणमित्याचक्षते ब्रह्मचर्यमेव तत् ब्रह्मचर्येण ह्येव सत आत्मनस्त्राणं विन्दते अथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तत् ब्रह्मचर्येण ह्येवात्मानमनुविद्य मनुते । अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तत् एष ह्यात्मा न नश्यति यं ब्रह्मचर्येणानुविन्दते अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्यमेव तत् तदरश्च ह वै ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि तदैरं मदीयꣳ सरः तदश्वत्थः सोमसवनस्तदपराजिता पूः ब्रह्मणः प्रभुविमितꣳ हिरण्मयम् । तद्य एवैतौ अरं च ण्यं च अर्णवौ ब्रह्मलोके ब्रह्मचर्येणानुविन्दन्ति तेषामेवैष ब्रह्मलोकः तेषाꣳ सर्वेषु लोकेषु कामचारो भवति ॥ ५ ॥

अत एव ब्रह्मलोकाप्तये ज्ञानसहकारिब्रह्मचर्याख्यसाधनस्यावश्यकत्वेन तत् यज्ञादिभिः स्तौति—अथेति । अथ शिष्टाः परमपुरुषार्थसाधनं लोके यज्ञ इत्याचक्षते । तद्ब्रह्मचर्यमेव । ब्रह्मचर्यवान् हि यज्ञफलं लभते । अतो यज्ञोऽपि

ब्रह्मचर्यमुच्यते। कथं ब्रह्मचर्यं यज्ञः? इत्यत्र **यो ज्ञाता ब्रह्मचर्येणैव** हि यज्ञस्यापि पारम्पर्येण फलभूतं **तं** ब्रह्मलोकं **स** विद्वान् **विन्दते**। ज्ञातेति सर्वत्रानुषज्यते। **अथ यत् इष्टमित्याचक्षते ब्रह्मचर्यमेव तत्**। कथं? ब्रह्मचर्यसाधनेनैव ह्यात्मानमीश्वरमिष्ट्वा सकलेषणामात्मविषयां कृत्वा तमात्मान-**मनुविन्दते**। एषणादीष्टमपि ब्रह्मचर्यमेव। **अथ यत् सत्त्रायणमित्याचक्षते तदपि ब्रह्मचर्यमेव**। ब्रह्मचर्यसाधनेन **हि सत आत्मनस्त्राणं** रक्षणं **अथ विन्दते**। सत्त्रायणशब्देनापि ब्रह्मचर्यमेवोच्यते। **अथ यन्मौनमित्याचक्षते ब्रह्मचर्यमेव तत्**। ब्रह्मचर्यसाधनयुक्तश्श्रुत्याचार्यमुखतः **स्वात्मानमनुविद्य मनुते** ध्यायति। अतो **मौनमपि** ब्रह्मचर्यमेव। **अथ यदनाशकायनमित्याचक्षते ब्रह्मचर्यमेव तत्**। अनाशकायनं नाम कृच्छ्रचान्द्रायणादिकमित्यर्थः। तद्वान् **ब्रह्मचर्येण यमात्मानं विन्दते**। इत्थं ब्रह्मचर्यसाधनवतः **स एष ह्यात्मा न नश्यति** तदपि ब्रह्मचर्यमेव। **अथ यदारण्यायनमित्याचक्षते** ब्रह्मचर्यवतो यदयनं तदरण्यायनम्। **ब्रह्मचर्यमेव तत्**। योऽज्ञानाद्यज्ञः स्वात्मेषणामिष्टः सतस्त्राणात् सत्त्रायणं मननान्मौनं निरशनादनाशकायनमरण्ययोर्गमनाद-रण्यायनमित्यादिभिः महद्भिः पुरुषार्थसाधनैः ब्रह्मचर्यस्य स्तुतत्वात् तत् ब्रह्मचर्यमेव नितरां ज्ञानसहकारिसाधनम्। अतः तत् यत्नतो रक्षणीय-मित्यर्थः। **तत्** तत्र हि **अरश्च ह वै** प्रसिद्धौ **ण्यश्च अर्णवौ** समुद्रौ समुद्रोपमे वा सरसि तद्वति **ब्रह्मलोके** भुवमन्तरिक्षं चापेक्ष्य **तृतीया द्यौः**। तस्यां **तृतीयस्यामितोऽस्माल्लोकात्** मौनिमण्डलगण्यमानायां **दिवि**। तत्र इर एव **ऐरः मण्डः**। तेन पूर्णम् **ऐरं मदीयं** तत्रत्यानां प्रहर्षमदकरत्वात्। तादृशं **सरः** पुनस्तत्रैव **सोमसवननामतोऽश्वत्थो** वृक्षः सोमाभिधानामृतप्रस्रवणात्। पुनस्तत्रैव ब्रह्मलोके कैश्चिदपि न जीर्यत **इत्यपराजिता नाम ब्रह्मणः पूः** पुरमस्ति। **प्रभुणा** ब्रह्मणा विशेषेण **मितं** निर्मितं **हिरण्मयं** सौवर्णं मण्डपमिति वाक्यशेषः। **तत्तत्र ब्रह्मलोके ये एतावर्णवौ** यावरण्याख्यवृत्तौ ब्रह्मचर्य-साधनेनानुविन्दन्ति **तेषामेवैष** यो व्याख्यातो **ब्रह्मलोकः**। ब्रह्मचर्यादि-साधनविशिष्टानां ब्रह्मविदामेव **सर्वेषु लोकेषु कामचारो भवति** न हि

ब्रह्मचर्यपराङ्मुखविषयासक्तबुद्धीनामित्यर्थः । ज्ञानसहकारित्वेन स्त्र्यादिविषय-तृष्णानिवृत्तिसाधनं बलवदिति मन्तव्यम् ॥ ९ ॥

हार्दब्रह्मोपासकस्य मूर्धन्यनाड्या गतिकथनम्

अथ या एता हृदयस्य नाड्यः ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येति असौ वा आदित्यः पिङ्गल एष शुक्ल एष नील एष पीत एष लोहितः । तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमं चामुं चैवमेवैता आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमं चामुं चामुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः । तत् यत्रैतत्सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति आसु तदा नाडीषु सृप्तो भवति तं न कश्चन पाप्मा स्पृशति तेजसा हि तदा संपन्नो भवति । अथ यत्रैतदबलिमानं नीतो भवति तमभित आसीना आहुर्जानासि मां जानासि मामिति स यावदस्माच्छरीरादनुत्क्रान्तो भवति तावज्जानाति । अथ यत्रैतदस्माच्छरीरादुत्क्रामति अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते स ओमिति वा होद्वा मीयते स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति एतद्वै खलु लोकद्वारं विदुषां प्रपदनं निरोधोऽविदुषाम् । तदेष श्लोकः—

शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका ।
तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति ।

उत्क्रमणे भवन्ति ॥ ६ ॥

यस्तु ब्रह्मचर्यादिसाधनसंपन्नो विद्वान् त्यक्तबाह्यविषयानृततृष्णः सन् यथोक्तगुणविशिष्टं हार्दं ब्रह्म उपास्ते तस्येयं मूर्धन्यया नाड्या गतिर्वक्तव्येत्युत्तरखण्ड आरभ्यते— **अथेति** । **अथ या एता** वक्ष्यमाणा ब्रह्मोपलब्धिस्थानत्वेन प्रसिद्ध**हृदयस्य** संबन्धिन्यो **नाड्यो** रविमण्डलादिव रश्मयो हृदयाकारमांसपिण्डात् सर्वतो निस्सृताः **पिङ्गलस्य** पिङ्गलवर्णेनाणिम्नः सूक्ष्मरसेन पूर्णास्तावदाकारास्**तिष्ठन्ति** वर्तन्त इत्यर्थः । कफयोगतः **शुक्लस्य** पित्तवातयोगतो **नीलस्य** कफपित्तयोगतः **पीतस्य** शोणितयोगतो **लोहितस्य च** तेषां रसेन पूर्णा इत्यध्याहार्यम् । आदित्यसंबन्धादेव तत्तेजसो नाडीष्वनुगतस्य एते वर्णविशेषा इति श्रुत्यनुरोधेन **असौ वा आदित्यः पिङ्गलो** वर्णतः । **एष आदित्यः शुक्लोऽप्येष नीलः एष पीतः एष लोहितः** । तस्य नाडीभिः कथं संबन्धः ? इत्यत्र दृष्टान्त उच्यते— **तद्यथेति** । **तत्**तत्र **यथा** लोके **महान्** विस्तीर्णः पन्थाः **महापथः आततो** व्याप्तः **उभौ ग्रामौ गच्छति** सन्निहितमिमं च विप्रकृष्टममुं च उभौ ग्रामौ प्रविष्टः **एवमेवैता आदित्यस्य रश्मय** आदित्यमण्डलमिमं पुरुषं **चोभौ लोकौ गच्छन्ति** । कथं ? **ता अमुष्मादादित्यमण्डलात् प्रतायन्ते** आध्यात्मिकपिङ्गलादिवर्णविशिष्टनाडीषु **सृप्ताः** सत्यः सन्तता भवन्तीत्यर्थः । **आभ्यो नाडीभ्यः प्रतायन्ते** प्रवृत्ताः सत्यो रश्मीनामुभयलिङ्गत्वेन **तेऽमुष्मिन्नादित्ये सृप्ताः** । **तत्** तत्रैवं सति **यत्र** यस्मिन् काले जीवो बाह्यव्यापृतिसुप्तः **सुप्तो** भवति तत्र बाह्यविषयसंपर्कवैरल्यात् उपसंहृतसमस्तकरणो भवति । अत एव सम्यक् **प्रसन्नः** संपन्नो भवति । ततः मनस्संकल्पविजृम्भितस्वप्नं **न विजानाति** । यदैवमयं जीवः सुप्तो भवति **तदा** सौरतेजःपूरितनाडीषु **सृप्तः** प्रविष्टः सन् द्वारभूतनाडीभिः हृदयाकाशं गतो **भवति** । नाडीष्विति सप्तमी तृतीयात्वेन विपरिणेया । जीवस्य स्वापकाले सति संपन्नत्वात् । सता संपन्नं **तं** जीवं **न हि कश्चन** धर्माधर्मरूपः **पाप्मा स्पृशति** तदात्मनः स्वरूपावस्थत्वात् । न हि स्वरूपावस्थं पाप्मा स्प्रष्टुं पारयति निर्विषयत्वात् । यदैवं सुषुप्तः **तदा** सर्वतो नाड्यन्तर्गतसौर**तेजसा संपन्नो** व्याप्तो **भवति** । **अथ** यस्मिन् काले

स्वदेहज्वरादिरोगनिमित्तमबलिमानं बलाभावं मुमूर्षुत्वं वा नीतः प्रापितो **भवति तमभितो** वेष्टयित्वासीना ज्ञातयो **जानासि मां** तव पुत्रं **जानासि मां** तव पौत्रमित्याहुः । **सोऽयं** मुमूर्षुः **यावदस्माच्छरीरादनुत्क्रान्तो भवति तावत्** पुत्रादीन् **जानाति । अथ यत्र एतदिति** क्रियाविशेषणम् । **अस्माच्छरीरादुत्क्रामति अथ तैरेव** यथोक्तरश्मिभि**रूर्ध्वं आक्रमते** । यद्यविद्वान् तदा स्वकर्मजनितं लोकं प्रति गच्छति । यद्ययं विद्वान् तदा स्वयथोक्तसाधनसंपन्नः सन् **ओमित्येका**क्षरेणात्मानमनुध्यायन् यथापूर्वं **वा ह एव उत्** ऊर्ध्वं **वा मीयते** गच्छतीत्यर्थः । **स** विद्वानुत्क्रमिष्यन् **यावत् क्षिप्येत्** यावता कालेन मनसः क्षेपः स्यात् तावता काले**नादित्यं गच्छति** । किमर्थं तद्गमनम् ? विदुषा**मेतद्वै खलु** प्रसिद्धं ब्रह्मलोकद्वार**मादित्यः । तेन** हि विद्वान् ब्रह्मलोकं गच्छति । अनेन द्वारेण विद्वान् ब्रह्मलोकं प्रपद्यत इति **विदुषां प्रपदनम् । अविदुषामादित्यान्निरोधो** भवति । अविद्वांसस्तु सौरतेजसा निरुद्धाः सन्तो मूर्धन्यनाड्या नोत्क्रमन्ते "विष्वङ्ङन्याः" इति पृथग्गतिदर्शनात् । तदेतस्मिन्नर्थे **एष श्लोको** मन्त्रो भवति । मांसपिण्डहृ**दयस्य** संबन्धिन्यः **शतं चैका च** एकोत्तरशत**नाड्यः** प्रधानतो भवन्ति । ते ह गतनाडीनामानन्त्यात् । **तासामेका** सुषुम्ना नाडी **मूर्धानमभिनिस्सृता** निर्गता । विद्वान् **तया ऊर्ध्वमायन्नमृतत्वमेति । विष्वङ्** नानागतयः संसारगमनद्वारभूताः **अन्या** नाड्यो नामृतत्वाय भवन्ति । किं तर्हि ? **उत्क्रमणे** उत्क्रान्त्यर्थमेव **भवन्तीत्यर्थः** । प्रकरणपरिसमाप्त्यर्थेयं द्विरुक्तिः ॥ ६ ॥

विद्याग्रहणार्थं ब्रह्मचर्यादिविधिप्रदर्शनम्

य आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वाꣳश्च लोकानाप्नोति सर्वाꣳश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच । तद्धोभये देवासुरा अनुबुबुधिरे ते

होचुः हन्त तमात्मानमन्विच्छामो यमात्मानमन्विष्य सर्वा॑श्च लोकानाप्नोति सर्वा॑श्च कामानिति इन्द्रो हैव देवानामभिप्रवव्राज विरोचनोऽसुराणां तौ हासंविदानावेव समित्पाणी प्रजापतिसकाशमाजग्मतुः। तौ ह द्वात्रि॑शतं वर्षाणि ब्रह्मचर्यमूषतुः तौ ह प्रजापतिरुवाच किमिच्छन्ताववास्तम् ? इति। तौ होचतुर्य आत्मापहतपाप्मा विजरो विमृत्युर्विशोकोविजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः सोऽन्वेष्टव्यः स विजिज्ञासितव्यः स सर्वा॑श्च लोकानाप्नोति सर्वा॑श्च कामान् यस्तमात्मानमनुविद्य विजानातीति भगवतो वचो वेदयन्ते तमिच्छन्तावावास्तमिति। तौ ह प्रजापतिरुवाच य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति अथ योऽयं भगवोऽप्सु परिख्यायते यश्चायमादर्शे कतम एषः ? इति। एष उ एव एषु सर्वेष्वन्तेषु परिख्यायत इति होवाच ॥ ७ ॥

"अथ य एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्म" इति यदुक्तं तत्र कोऽसौ संप्रसादः ? तस्याभिगमनं कथम् ? सोऽयं यथास्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते। संप्रसादात्मा स किंलक्षणः ? तस्य देहावच्छिन्नत्वेन तद्वैलक्षण्यं कथम् ? इत्याद्याशङ्कासमाधानार्थं विद्याग्रहणसंप्रदानब्रह्मचर्यादिविधिप्रदर्शनार्थं च उत्तरो ग्रन्थ आरभ्यते। आख्यायिका तु राजसेवितं पानीयमितिवत् विद्यास्तुत्यर्था—**य आत्मेति**। **य आत्मा अपहतपाप्मे**त्यादिविशेषणाष्टकविशिष्टो भाति यदुपासनार्थं हृत्पुण्डरीकमभिहितं यस्मिन् कामाः समाहिता अविदुषामनृतापिधानाश्च यदुपासनसहभाविब्रह्मचर्य-

साधनमुक्तं यदुपासनफलाप्तये मूर्धन्यनाडीगतिरभिहिता सर्वथा **सोऽन्वेष्टव्यः** श्रुत्याचार्योपदेशतः **स विजिज्ञासितव्यः** स्वसंवेद्यतामापादयितव्य इत्यर्थः । किं तदन्वेषणविज्ञानाभ्यां ? इत्यत आह—**स** इति । **यो** यथोक्तलक्षणं **तमात्मानं** श्रुत्याचार्योपदेशतोऽन्विष्य **विजानाति** स्वसंवेद्यतामापादयति **स सर्वांश्च लोकानाप्नोति । स सर्वांश्च कामानिति** । तस्य सर्वात्मकत्वेन सर्वलोककामाप्तिफलं भवतीति **प्रजापतिरुवाच** । सोऽन्वेष्टव्य इत्यादिरपूर्वविधिरिति चेन्न ; तयोर्दृष्टार्थत्वेन नियमविधिसंभवात् । तथा च वक्ष्यति "नाहमत्र भोग्यं पश्यामि" इति । देहात्मभावविशिष्टस्य स्वरूपाधिगमतो विपरीतभ्रमनिवृत्तेः दृष्टफलत्वेन नियमविधेर्युक्तत्वात् । **तद्ध** किल प्रजापतेः वचनात् देवाश्च असुराश्च **उभये देवासुरा अनुबुबुधिरे** प्रजापतिमुखतोऽनुबुद्धवन्तः । ततस्ते किं कुर्वन्ति ? इत्यत्र **देवासुरास्ते होचुः हन्त** ! यदि प्राजापत्यं वचो भवतां रोचते तदा वयं प्रजापतिनोक्त**मात्मानमन्विष्यामो**ऽन्वेषणं कुर्मः **यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति सर्वांश्च कामानिति** निश्चित्य **देवानां** राजा **इन्द्रो ह वै देवैः** सह स्वपरिकरं सर्वं बहिः स्थापयित्वा स्वदेहात्मावशिष्टः प्रजापतिं प्रति **प्रवव्राज** । तथा**सुराणां** राजा **विरोचनो**ऽपि विद्याफलमिच्छन् प्रवव्राज । **तौ** देवासुरराजौ मिथो**ऽसंविदानावेवा**न्योन्यमीर्ष्यां दर्शयन्तावेव **समित्पाणी प्रजापतिसकाशमाजग्मतुः । तौ ह द्वात्रिंशतं वर्षाणि** प्रजापतिशुश्रूषापरौ भूत्वा **ब्रह्मचर्यमूषतुः** । तयोरभिप्रायज्ञः **प्रजापतिः तावुवाच—किं** प्रयोजन**मिच्छन्तावत्रवास्तमु**षितवन्तौ युवाम् ? इत्युक्तौ **तौ ह ऊचतुः आत्मेत्यादि भगवतो वचो वेदयन्ते** शिष्टाः । अतस्तमात्मानं ज्ञातु**मिच्छन्तावत्रवास्तं** इत्यावामुषितवन्तावित्यर्थः । प्रजापत्युपसदनात् पुरान्योन्यमीर्ष्यायुक्तावभूताम् । ततो विद्याफलगौरवात् त्यक्तमात्सर्यौ भूत्वा प्रजापतौ ब्रह्मचर्यमूषतुः । तावेवं तपस्विनावुपलभ्य **प्रजापतिरुवाच ह** । किमिति ? मृदितावृतित्रययोगिभिः **य एषोऽक्षिणि पुरुषो दृश्यते** अक्ष्याद्युपाध्यपगमे यत् सन्मात्रमवशिष्यते ततो भूमरूपत्वेन **तदमृतम्** । भयहेत्वसम्भवा**दभयम्** । स्वमात्रतता उपबृंहणात् **ब्रह्मेति** प्रजापतिनोक्तं श्रुत्वा तयोः सत्त्वशुद्ध्यभावात्

तद्वुक्तार्थवैपरीत्येन छायापुरुषं जग्रहतुः। पुनस्तद्दृढीकरणाय प्रजापतिं पृष्टवन्तौ। किमिति? अथ योऽयं भगवोऽप्सु परिख्यायते परि समन्तात् ज्ञायते, यश्चायमात्मनः प्रतिबिम्बाकार आदर्शे परिख्यायते, खड्गकांस्यादौ च तत्रभवद्भिः कतम एष उक्तः? सर्वेष्वपि किमयमेक एव? इति पृष्टः प्रजापतिरुवाच---यश्चक्षुषि द्रष्टा मयोक्त एष उ एव सर्वेष्वन्तेष्ववादिषु परिख्यायते इति होवाच। सर्वविदः प्रजापतेः कथं शिष्यविपरीतग्रहणमनुज्ञातुं युक्तम्? इति चेत् सत्यं; तन्निराकरणं कर्तव्यम्। तथापि स्वात्मन्यध्यारोपितपाण्डित्यमहत्त्वप्रथिताविन्द्रविरोचनौ यदि तौ प्रजापतिना यद्युक्तार्थविपरीतग्राहिणौ युवां मूढावित्युक्तौ स्यातां तदा तौ दुःखिनौ भूत्वा निरुत्साहतः पुनः प्रश्नावधारणाशक्तौ स्यातामिति तद्गृहीतोदशरावदृष्टान्तेन तद्विपरीतग्रहः क्रमेण मार्जनीय इति प्रजापतेरभिप्रायः। एष उ एवेत्यनृतमुक्तमिति चेन्न; स्वज्ञदृष्ट्याक्षिपुरुषस्य व्यापकत्वेन शिष्यगृहीतछायात्मन्यप्यन्तरत्वात्। "एष त आत्मा सर्वान्तरः" इति श्रुतेः। प्रजापतिना एष उ एवेत्युक्तम्। अतो नानृतमित्यर्थः ॥ ७ ॥

इन्द्रविरोचनयोरुदशरावे आत्मदर्शनम्

उदशरावे आत्मानमवेक्ष्य यदात्मनो न विजानीथः तन्मे प्रब्रूतमिति तौ ह उदशरावेऽवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथः? इति। तौ होचतुः सर्वमेवेदमावां भगवः! आत्मानं पश्यावः आ लोमभ्य आ नखेभ्यः प्रतिरूपमिति। तौ ह प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वा उदशरावेऽवेक्षेथामिति तौ ह साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वा उदशरावेऽवेक्षांचक्राते तौ ह प्रजापतिरुवाच किं पश्यथः? इति। तौ होचतुः यथैवेदमावां भगवः! साध्वलंकृतौ सुवसनौ परिष्कृतौ

स्व एवमेव इमौ भगवः! साध्वलंकृतौ सुवसनौ परिष्कृताविति एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति तौ ह शान्तहृदयौ प्रवव्रजतुः। तौ हान्वीक्ष्य प्रजापतिरुवाचानुपलभ्यात्मानमननुविद्य व्रजतो यतरे एतदुपनिषदो भविष्यन्ति देवा वासुरा वा ते पराभविष्यन्तीति स ह शान्तहृदय एव विरोचनोऽसुरान् जगाम तेभ्यो हैतामुपनिषदं प्रोवाच आत्मैवेह महय्य आत्मा परिचर्य आत्मानमेवेह महयन्नात्मानं परिचरन् उभौ लोकाववाप्नोति इमं चामुं चेति। तस्मादप्यद्य इहाददानमश्रद्दधानमयजमानमाहुरासुरो बतेति असुराणाꣳ ह्येषोपनिषत् प्रेतस्य शरीरं भिक्षया वसनेनालंकारेणेति सꣳस्कुर्वन्ति एतेन ह्यमुं लोकं जेष्यन्तो मन्यन्ते ॥ ८ ॥

प्रजापतेर्यथार्थाभिधायित्वात् तयोः विपरीतग्रहनिरासमाह---**उदशराव** इति। **उदकपूरितशरावे स्वात्मानमवेक्ष्याथ यदात्मनः** स्वरूपं पश्यन्तौ **न विजानीथस्तद्रूपं मे ब्रूतमाचक्षाथामित्युक्तौ** तथैव **उदशरावेऽवेक्षाञ्चक्राते**। तथा कृतवन्तौ **ह प्रजापतिरुवाच---किं पश्यथः?** इति पृष्टौ स्वानुभूतार्थं **तौ होचतुः---सर्वमेवेदमावां भगवः! आत्मानं पश्यावः आ लोमभ्य आ नखेभ्यः प्रतिरूपमिति**। इत्थं छायात्मप्रत्ययाभिनिवेशतो विपरीतग्राहिणावपि शिष्यावनुपेक्षणीयाविति तद्विपरीतग्रहापनयनाय तत्प्रत्ययं विडम्बयन्तौ **ह प्रजापतिरुवाच---साध्वलङ्कृतावि**त्यादिना। यथा स्वगृहे भूषणादिभिः **साध्वलङ्कृतौ** महार्हसुवसनपरिधानौ छिन्नरोमनखादिभिः **सुपरिष्कृतौ भूत्वा उदशरावेऽवेक्षेथामिति**। उदशराव आत्मानमवेक्ष्य यदात्मनो न विजानीथस्तन्मे प्रब्रूतमिति पुरोक्त्वा पुनस्साध्वलङ्कारपूर्वकमुदशरावेऽवेक्षेथामित्युक्तितः तद्विपरीतग्रहोऽपनीतः स्यात्। साध्वलङ्काराणां देहाश्रयत्वेन देहस्यापि छायाकारत्वेन चावगतम्। किंच देहगतलोमादीनामखण्डितानां नित्यत्वेन

छायाकारत्वं पूर्वमासीत् खलु। पुनश्छिन्नेषु लोमनखादिषु न हि तच्छाया दृश्यते। यत एवमतो लोमादिवत् देहस्यापि आगमापायित्वम्। तत्कथम्? उदशरावदृश्यमानछायायाः तन्निमित्तशरीरस्य च मिथ्यात्वेनानात्मत्वं सिद्धम्। एवमशेषमिथ्याग्रहणनिराकरणनिमित्ते साध्वलंकारादिदृष्टान्ते करुणया प्रजापतिनोक्तेऽपि तयोः सत्त्वशुद्धिवैकल्यात् तद्वाक्यश्रवणतोऽपि विपरीतग्रहालङ्कारछायात्मा तद्गतस्नेहं न मुमोच। यत एवमतस्तौ स्वाज्ञानावृतावभूतामित्यवगम्यते। तादृशदृढात्मप्रत्ययौ तौ पप्रच्छ—**किं पश्यथः? इति**। तथैव **तौ** प्रतिपन्नौ **यथैवेदमिति** पूर्ववत्। यथा साध्वलंकारादिविशिष्टावावां **स्वः एवमेवेमौ** छायात्मानाविति सुतरां विपरीतनिश्चयौ बभूवतुः। पुरा "य आत्मा अपहतपाप्मा" इत्याद्यसाधारणतयात्मनो लक्षणमुक्तम्। विशेषतो "य एषोऽक्षिणि पुरुषो दृश्यते" इति साक्षादात्मनि निर्दिष्टेऽपि स्वचित्तदोषतो विपरीतग्राहिणावालोच्य तद्विपरीतग्रहापनयनाय साध्वलंकारदृष्टान्तेऽभिहितेऽपि तयोर्विपरीतग्रहो नापगतः। द्वयोर्मध्ये क्रमेण देवराट् सिद्धो भविष्यतीति ज्ञात्वा स्वाभिप्रेतमात्मानं मनसि निधाय **एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति** प्रजापतिरुक्तवान्। इत्थं मद्वाक्यमननमेकः करिष्यतीति प्रजापतिनैवं बोधितावपि तदुक्तार्थमगृहीत्वा विपरीतात्मग्रहहर्षेणात्मानं कृतार्थं मन्यमानौ गच्छतामिति प्रजापतिना उपेक्षिताविन्द्रविरोचनौ मिथ्या**शान्तहृदयौ** यथायथं **प्रवव्रजतुः**। **तौ** दूरं गच्छन्तौ **वीक्ष्य प्रजापतिरुवाच**—मया बहुप्रकारं बोध्यमानावपि **स्वात्मानमनुपलभ्य प्रव्रजतः** गच्छेयाताम्। अत **यतरे देवा वा असुरा वा एतदुपनिषद** एवंविज्ञानाः **पराभविष्यन्ति** परमार्थबहिर्भूता भविष्यन्तीत्यर्थः। एवं स्वगृहं गच्छतोरसुरराजः **स ह शान्तहृदय एवासुरान् जगाम**। गत्वाथ **तेभ्यः** शरीरच्छायाबुद्धिः या उपनिषत्तामेतां **उपनिषदं प्रोवाच**। **देह एवात्मा इह** लोके **महनीयः** तथा **परिचरणीयः**। तथात्मानमेवेह **महयन् परिचरंश्चोभौ लोकाववाप्नोति इमं चामुं च**। इहामुत्र लोकयोरेव सर्वे लोकाः कामाश्चान्तर्भवन्तीति राज्ञोऽभिप्रायः। **तस्मादिह** लोके**ऽद्यापि** तत्संप्रदायोऽनुवर्तते। किं तत्? **अददानं** दानमकुर्वाणं **अश्रद्दधानं** सत्कार्यश्रद्धारहितं

यथाशक्त्ययजमानं चाहुस्तेषामासुरप्रकृतित्वात् । यत एवं शिष्टाः खिद्यमानाः सन्तो बतेत्येवमाहुः । हि यस्मादसुराणां अश्रद्दधानतादिलक्षणा उपनिषत् तयोपनिषदा संस्कृताः सन्तः प्रेतस्यापि शरीरं भिक्षया गन्धमाल्याद्यलंकरणलक्षणया वसनादिना ध्वजपताकादिलक्षणेनेत्येवं संस्कुर्वन्ति । एतेन कुणपसंस्कारेण यत्प्रेत्य प्रतिपत्तव्यं अमुं लोकं जेष्यन्तो मन्यन्ते ॥ ८ ॥

इन्द्रस्यात्मतत्त्वावगमप्रयत्नः

अथ हेन्द्रोऽप्राप्यैव देवान् एतद्भयं ददर्श यथैव खल्वयमस्मिन् शरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन् अन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णः अस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति । स समित्पाणिः पुनरेयाय तꣳ ह प्रजापतिरुवाच मघवन् ! यच्छान्तहृदयः प्राव्राजीः सार्धं विरोचनेन किमिच्छन् पुनरागमः ? इति । स होवाच यथैव खल्वयं भगवः ! अस्मिन् शरीरे साध्वलंकृते साध्वलंकृतो भवति सुवसने सुवसनः परिष्कृते परिष्कृत एवमेवायमस्मिन् अन्धेऽन्धो भवति स्रामे स्रामः परिवृक्णे परिवृक्णः अस्यैव शरीरस्य नाशमन्वेष नश्यति नाहमत्र भोग्यं पश्यामीति । एवमेवैष मघवन् ! इति होवाच एतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रिꣳशतं वर्षाणीति स हापराणि द्वात्रिꣳशतं वर्षाण्युवास तस्मै होवाच ॥ ९ ॥

तयोरिन्द्रस्य सत्त्वस्वभावतो विपरीतग्रहे सन्दिहानः सन् पुनः प्रजापतिनिकटं प्राप्य स्वानुभवविज्ञापनपूर्वकं ब्रह्मचर्यमुषित्वा चतुर्थपर्याये प्रजापतिना

पूर्वोक्तमेवात्मतत्त्वमवगम्य इन्द्रः कृतकृत्यतामगमदित्याह—अथेति । अथ स्वसदन-प्रवेशानन्तरमिन्द्रो ह किल स्वात्मतत्त्वमप्राप्यैव दैवीप्रकृतिविशिष्टान् देवान् प्रति वक्ष्यमाणछायात्मग्रहणनिमित्तमेतद्भयं ददर्श दृष्टवान् । आदौ तावदुद-शरावदृष्टान्तेन प्रजापतिना योऽर्थोऽभिहितः तत्र मघवद्बुद्धौ तदेकदेशार्थः प्रत्यभात् । स कीदृशः? इत्यत्र यथैव खल्वयमस्मिन् शरीरे साध्वलंकृते छायात्मापि साध्वलंकृतो भवति । सुवसने सुवसनः परिष्कृते परिष्कृतो भवति । देहावयवीभूतनखलोमाद्यपगमे छायात्मापि नखरोमादिराहित्येन परिदृश्यत इत्यर्थः । नखरोमादीनां देहावयवतुल्यत्वादस्मिन्नन्धे छायात्माप्यन्धो भवति । यस्य चक्षुर्नासिका वा सदा स्रवति स स्रामः । परिवृक्णः छिन्नहस्तः । अस्यैव नाशमन्वेष नश्यति । अतो नाहमस्मिन् छायात्मदर्शने तद्धेतुदेहात्म-दर्शने च स्वात्मभोग्यं फलं पश्यामीत्येवं छायादेहात्मनि दोषमवगम्य समित्पाणिर्ब्रह्मचर्यं वस्तुं पुनरेयाय । तं ह प्रजापतिरुवाच—मघवन्! यच्छान्तहृदयो विरोचनेन सार्धं प्राव्राजीः । जानन्नपि इन्द्राभिप्रायाभिव्य-क्त्यर्थं पप्रच्छ । प्रजापतिनैवं पृष्टः स्वानुभूतार्थदोषं स होवाच—यथैव खल्वयमित्यादिना । प्रजापतिरपि तदन्वमोदत । तुल्यब्रह्मचर्यश्रवणयोर्देवासुर-राजयोरिन्द्रो देहछायामात्मेत्यग्रहीत् । विरोचनस्तु देहमेवात्मेति । तत्र किं निमित्तम्? इत्यत्र इन्द्रस्य प्राजापत्यवाक्यमननतश्छायात्मग्रहणं तद्दोषदर्शनं चाभूत् । न तथा विरोचनस्य । किन्तु तद्वाक्यमननाभावात् छायामूलदेहात्म-दर्शनम् । न हि तत्र दोषदर्शनं जातम् । तयोरेवं दर्शने प्रतिबन्धाल्पत्वं बहुत्वं च निमित्तम् । अल्पप्रतिबन्धो हीन्द्रः स्वग्रहदोषदृष्ट्या पुनः प्राजापत्य-वाक्यार्थयाथात्म्यं विविदिषति । विरोचनस्तु प्रतिबन्धबाहुल्यवशात् स्वग्रहमेव परमार्थं मत्वा न तत्र दोषं जग्राह । तयोरेवं तुल्येऽपि श्रवणे स्वस्वचित्त-दोषानुरोधेन वाक्यार्थावधारणं जातम् । द द द इति दकारत्रयं देवमनुष्यासुराः श्रुत्वा दाम्यत दत्त दयध्वमिति स्वप्रकृतिवैपरीत्यं जगृहिरे यथा एवमेवैष मघवन्! त्वया सम्यगवगतम् । न हि कदापि च्छाया स्वात्मा भवितुमर्हति इति प्रजापतिरुवाच । य एषोऽक्षिणीति यो मयोक्त एतमेवात्मानं तु ते पूर्वं

व्याख्यातमपि भूय एवानुव्याख्यास्यामि । यतोऽज्ञानप्रतिबन्धवशात् मदुक्तार्थं यथावन्न गृहीतवानसि अतस्तत्क्षयाय वसापराणि द्वात्रिंशतं वर्षाणीत्युक्तः स हापराणि द्वात्रिंशतं वर्षाण्युवास । ब्रह्मचर्यतः क्षपितचित्तदोषाय तस्मै होवाच ॥९॥

स्वप्नपुरुषोपदेशेऽपि इन्द्रस्यासम्मतिः

य एष स्वप्ने महीयमानश्चरति एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श तद्यद्यपीद॰ शरीरमन्धं भवति अनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति । न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीवाप्रियवेत्तेव भवति अपि रोदितीव नाहमत्र भोग्यं पश्यामीति । स समित्पाणिः पुनरेयाय त॰ ह प्रजापतिरुवाच मघवन्! यच्छान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागमः ? इति । स होवाच तद्यद्यपि इदं भगवः! शरीरमन्धं भवति अनन्धः स भवति यदि स्राममस्रामो नैवैषोऽस्य दोषेण दुष्यति । न वधेनास्य हन्यते नास्य स्राम्येण स्रामो घ्नन्ति त्वेवैनं विच्छादयन्तीव अप्रियवेत्तेव भवति अपि रोदितीव नाहमत्र भोग्यं पश्यामीति एवमेवैष मघवन्! इति होवाच एतं त्वेव ते भूयोऽनुव्याख्यास्यामि वसापराणि द्वात्रि॰शतं वर्षाणीति स हापराणि द्वात्रि॰शतं वर्षाण्युवास तस्मै होवाच ॥ १० ॥

किमुवाच? इत्यत आह—य एष इति । योऽयमपहतपाप्मेत्यादिविशेषणविशिष्टोऽक्ष्याद्यवभासकत्वेन व्याख्यातः स एष स्वप्ने स्त्र्यादिभिः महीयमानः पूज्यमानः चरति अनेकधा स्वाप्निकभोगाननुभवति। एष आत्मेत्यादि

समानम्। स एवमुक्तः शान्तहृदयः प्रवव्राज। स हाप्राप्यैव पूर्ववत् देवानेतद्भयं ददर्श। कथम्? यत्तदिदं शरीरं यद्यप्यन्धं भवति यः स्वप्नात्मा सोऽनन्धो भवति। इदं शरीरं यदि स्रामं सोऽस्रामश्च भवति। अस्य देहस्य दोषेण नैवैष स्वप्नात्मा दुष्यति। छायात्मवन्नाप्यस्य वधेन हन्यते। न चास्य स्राम्येण स्वप्नात्मा स्रामो भवति। नास्य जरयैतज्जीर्यतीत्यादि यत् अध्यायादावागममात्रेण उपन्यस्तं तदिह न्यायेनोपपादितम्। न तावच्छायात्मवदयं देहदोषयुक्तः किन्तु घ्नन्ति त्वेवैनमिति एवशब्द इवार्थः। घ्नन्ति वैनं केचनेति द्रष्टव्यम्। उत्तरेष्विवशब्ददर्शनात्। न तु घ्नन्त्येव। नास्य वधेन हन्यत इत्युक्तत्वात्। घ्नन्ति त्वेवेति चेन्न; एतदमृतमिति प्रजापतिनोक्तत्वात् कथमिन्द्रः प्राजापत्यं वचो मृषा कुर्यात्? तथा चेत् प्रजापतिनिरूपितछायात्मनि दोषमदधादिति चेन्न; प्रजापतिना अक्ष्यवभासकपुरुषस्योक्तत्वात्। न हीन्द्रः प्रजापतिना छायात्मोच्यत इति मन्यते। यदि स्वपृष्टान्यथार्थं प्रजापतिनोक्तमिति मन्येत तदा कथं पुनः प्रजापतिं प्रमाणीकृत्य समित्पाणिः श्रवणार्थमगच्छत्? तस्मात् स्वदोषमेवेन्द्रो मन्यते न हि प्रजापताविल्यवगम्यते। तथा च य एषोऽक्षिणि पुरुषो दृश्यत इति व्याख्यातम्। तथा विच्छादयन्ति विद्रावयन्तीव। तथा चेष्टबन्धुमरणनिमित्तमप्रियवेत्तेव भवति अपि रोदितीव भवतीति। यत एवमतः छायात्मवत् स्वाप्निकात्मज्ञानेऽपि नाहमत्र भोग्यं फलं पश्यामीत्येवमेवैष इन्द्र उपससाद। मया न्यायतो द्विरुक्तमप्ययं नावधारयति। तस्मादद्याप्यस्य प्रतिबन्धकारणमस्तीति मत्वा तन्मार्जनाय प्रजापतिः पूर्ववत् मघवन्! इति होवाच—एतं त्वेव ते भूयोऽनुव्याख्यास्यामि। वसापराणि द्वात्रिंशतं वर्षाणीति। तथापराणि द्वात्रिंशतं वर्षाण्युवास। यथोक्तकारिणे तस्मै होवाच ॥ १० ॥

इन्द्रस्य प्रजापतावात्मतत्त्वलाभाय एकोत्तरशतवर्षाणि ब्रह्मचर्यवासः

तद्यत्रैतत् सुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानाति एष आत्मेति होवाच एतदमृतमभयमेतद्ब्रह्मेति स ह शान्तहृदयः

प्रवव्राज स हाप्राप्यैव देवानेतद्भयं ददर्श नाह खल्वयमेवꣳ संप्रत्या-त्मानं जानाति अयमहमस्मीति नो एवेमानि भूतानि विनाश-मेवापीतो भवति नाहमत्र भोग्यं पश्यामीति । स समित्पाणिः पुनरेयाय तꣳह प्रजापतिरुवाच मघवन्! यच्छान्तहृदयः प्राव्राजीः किमिच्छन् पुनरागमः ? इति । स होवाच नाह खल्वयं भगवः! एवꣳ संप्रत्यात्मानं जानाति अयमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति नाहमत्र भोग्यं. पश्यामीति । एवमेवैष मघवन्! इति होवाच एतं त्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्र एतस्माद्वसापराणि पञ्च वर्षाणीति स हापराणि पञ्च वर्षाण्यु-वास तान्येकशतꣳ संपेदुः एतत्तत् यदाहुरेकशतꣳ ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच ॥ ११ ॥

किमुवाच ? इत्यत आह—तद्यत्रैतदिति । तद्यत्रैतदिति यत तत्र पर्यायद्वयेऽभिहितं य एषोऽक्षिणि द्रष्टा स्वप्ने महीयमानश्चरतीति स एष सुषुप्तः समस्तः संप्रसन्नः स्वप्नं न विजानात्येष आत्मेति होवाच एतदमृतम-भयमेतद्ब्रह्मेति । स ह शान्तहृदयः इत्यादि समानम् । तृतीयपर्यायेऽपि दोषं ददर्श । तत्कथं ? नाह खल्वयं नैवैतं सुषुप्तोऽपि संप्रतीदानीमयमहमस्मीति स्वात्मानं जानाति । नो एवेमानि भूतानि स्वभेदेन वेत्तीत्यत्र—

नात्मानं न परं चैव न सत्यं नापि चानृतम् ।
प्राज्ञः किंच न संवेत्ति तुर्यं तत्सर्वदृक् सदा ॥

इति खिलश्रुतेः । यतो जाग्रत्स्वप्नयोरिवायं न वेत्त्यतो विनाशमेव—पूर्ववदेवकार इवार्थः—अपीतो अपिगतो नष्ट इव भवति । ज्ञातुः सद्भावस्य ज्ञानसापेक्षत्वात् । न हि प्राज्ञे ज्ञानं दृश्यते । अतो विनष्ट इव । न तु विनाशमेवात्मनो मन्यते ।

कुतः ? अमृताभयवचनप्रामाण्यात् । शिष्टं पूर्ववत् । इत्थं त्रिभिः पर्यायैः मयोक्तोऽपि तमेवैतं यथावन्नो वेदैव । एतस्मात् मदुक्तात्मनोऽन्यत्रान्यन्न किंचन विद्यत इति तमेव तु व्याख्यास्यामि । हे मघवन्! तव स्वल्पदोषो विद्यते । तावन्मात्रापनोदनाय **वसापराणि पञ्च वर्षाणीत्युक्तः स तथा चकार** । ततो व्याविद्धसर्वकल्मषाय तस्मै मघवते जाग्रदाद्यवस्थादोषास्पृष्टमपहतपाप्मत्वादि-लक्षणमात्मतत्त्वं होवाच । **तान्येकशतं वर्षाणि संपेदुः** । लोके शिष्टास्तु **एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवासेत्याहुः** ॥ ११ ॥

इन्द्राय प्रजापतिनात्मज्ञानोपदेशः तन्महिमा फलञ्च

मघवन्! मर्त्यं वा इदꣳशरीरमात्तं मृत्युना तदस्यामृतस्या-शरीरस्यात्मनोऽधिष्ठानमात्तो वै सशरीरः प्रियाप्रियाभ्यां न वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः । अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराण्ये-तानि तद्यथैतान्यमुष्मादाकाशात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन स्वेन रूपेणाभिनिष्पद्यन्ते । एवमेवैष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा नोपजनꣳ स्मरन् इदꣳ शरीरꣳ स यथा प्रयोग्य आचरणे युक्त एवमेवायमस्मिञ्छरीरे प्राणो युक्तः । अथ यत्रैतदाकाशमनु-विषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेद इदं जिघ्राणीति स आत्मा गन्धाय घ्राणमथ यो वेद इदमभिव्याहरा-णीति स आत्माभिव्याहाराय वाक् अथ यो वेद इदꣳ शृणवानीति

स आत्मा श्रवणाय श्रोत्रम्। अथ यो वेद इदं मन्वानीति स आत्मा मनोऽस्य दिव्यं चक्षुः स वा एष एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते। य एते ब्रह्मलोके तं वा एतं देवा आत्मानमुपासते तस्मात्तेषाꣳ सर्वे च लोका आत्ताः सर्वे च कामाः स सर्वाꣳश्च लोकानाप्नोति सर्वाꣳश्च कामान् यस्तमात्मानमनुविद्य विजानातीति ह प्रजापतिरुवाच प्रजापतिरुवाच ॥ १२ ॥

त्रिलोकेश्वरेणेन्द्रेणापि एकोत्तरशतवर्षकृतायासेनात्मज्ञानं प्राप्तम्। यत एवमतो नातः परं पुरुषार्थोऽस्तीत्यात्मज्ञानं महीकरोति—मघवन्निति। हे मघवन्! यदिदं शरीरं पश्यसि तन्मर्त्यं वै मरणशीलत्वेन विनाशित्वात्। तत्कथम्? मृत्युनात्तं मृत्युग्रस्तमित्यर्थः। तदात्माभिमानतो देह्यपि मृत्युमेति। ततस्तदात्माभिमतिः मुमुक्षुभिस्त्याज्या। यन्मृत्युग्रस्तमित्युक्तं तच्छरीरमस्य संप्रसादस्य शरीरत्रयसंबन्धाभावादमृतस्य सावयवमूर्तिमद्वाय्वादिविलक्षणत्वेनाशरीरस्यात्मनोऽधिष्ठानं भोगायतनत्वात्। यत् तेजोऽवन्नादिक्रमेणोत्पन्नमधिष्ठानमनेन जीवेनेति प्रविश्य स एव तदधितिष्ठति। एवं प्रियाप्रियवदधिष्ठानशरीरमात्तोऽधिष्ठितः सशरीरो भवति। तदभिमानादयं प्रियाप्रियाभ्यामात्तो ग्रस्तः सशरीरस्य सतः प्रसिद्धमेतत्। न ह वै मम बाह्यसुखदुःखरूपप्रियाप्रिययोरपहतिरस्तीति यो मन्यते तन्निवर्तितस्वाज्ञानमशरीरं सन्तं प्रियाप्रिये न स्पृशतः तद्धेतुस्वाज्ञानस्य निवृत्तत्वात्। प्रकृत्या शरीरोऽयमात्मा स्वाविद्ययाशरीरीव भानात्। ततः समुत्थाय स्वेन रूपेण यथा निष्पत्तिस्तथा वक्तव्येति दृष्टान्त उच्यते—अशरीर इति। अशरीरो हि वायुः शिरःपाण्यादिवैरल्यात्। तथाभ्रं विद्युत् स्तनयित्नुरित्येतान्यशरीराणि वर्षणादिप्रयोजनावसाने तद्यथैतानि यथोक्तानि वाय्वादिरूपेणागृह्यमाणानि सन्ति। आकाशरूपतामापन्नानि पुनरमुष्मादाकाशात समुत्थाय सवित्रं परं ज्योतिरुपसंपद्य पुनः प्रावृडागमे वाय्वभ्रविद्युत्स्तनयित्नवः पुरोवातहस्त्याद्याकारचलज्ज्योतिर्लतागर्जनादि स्वेन स्वेन

रूपेणाभिनिष्पद्यन्ते। तथा **एवमेव संप्रसादोऽस्माच्छरीरात् समुत्थाय** देहात्मभावनां हित्वा **स्वेन रूपेणाभिनिष्पद्यते** इति पुरस्तादेव व्याख्यातम्। यः संप्रसादस्वभावं गतः स उत्तमश्चासौ पुरुषश्चेत्युत्तमः **पुरुषः** क्षराक्षरविलक्षणत्वात्।

क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥

इति स्मृतेः। य उत्तमपुरुषभावमापन्नः सोऽयं विद्वान् यदि जीवन्मुक्तिलीलामनुभवितुमीहते तदा तद्दशामवलम्ब्य सर्वात्मभूतः **पर्येति**। क्वचित् स्वसंकल्पविजृम्भितेन्द्राद्यात्मना तथाविधभोगान् **जक्षन्** क्वचित् संकल्पविकल्पितवयस्यैः **क्रीडन्** क्वचित्तथाविधस्त्रीयानज्ञात्यादिभिः **रममाणश्च** मनसैव न कायतः। कायस्य स्त्रीपुरुषान्योन्यतः संपर्कजन्यत्वादु**पजनमिदं शरीरं** स्मर्तुमप्यरमणीयमिति तन्न **स्मरन्** स्वभावतः कालं नयेत्। यद्वा—सोऽयं विद्वान् तत्र स्वे महिम्नि पर्येत्य तत्प्रपञ्चाधारदृष्ट्या समन्ताद्वर्तते व्याप्नोति। न स्वदृष्ट्या स्वस्य व्याप्यव्यापकताविरलात्ममात्रसंस्थत्वात्। यद्यत्प्राप्तं तत्तत परदृष्ट्या जक्षत् व्याविद्धात्मात्मीयाभिमानतो मिथ्यादृष्ट्या स्त्रिया न ज्ञातिवयस्यादिभिः क्रीडन् रममाण इव भासमानोऽपि पूर्ववदुपजनमिदं शरीराभासमात्मात्मीयाभिमानास्पदतयास्तिनास्तीति न हि कदाचिदपि स्मरन्नवतिष्ठते। इत्थं ब्रह्मभावमापन्नस्य विस्मृतदेहस्मृतित्वेन ब्रह्ममात्रदृक्त्वात्। स तिष्ठतु। जीवन्मुक्तिदशारूढयोगिनोऽपि ब्रह्मपरायणत्वात् तस्यापि चलनादिकं कथं सेद्धुं पारयति? इत्यत्र दृष्टान्तमाह—**स यथेति**। **यथा** लोकेऽश्वो बलीवर्दो वा रथानसोः प्रयुज्यत इति **प्रयोग्यः**। रथोऽनो वा आचरन्त्यनेनेत्याचरणः। तदाकर्षणाय तस्मिन्न**ाचरणे युक्तः**। **एवमस्मिन्** रथस्थानीये **शरीरे** करणग्रामोज्जीवकक्रियाज्ञानशक्तिद्वयसंपन्नपञ्चवृत्तिविशिष्टप्रज्ञात्मकप्राणो **युक्तः**। तस्य करणग्रामव्यापृतिप्रवर्तकत्वेन ईश्वरेण सृष्टत्वात्। तदुपजीवत्वेन करणग्रामस्यापि सृष्टत्वात्। **यत्र** चक्षुर्गतकृष्णतारोपलक्षितमाकाशं शरीरच्छिद्रमनुविषण्णमनुषक्तं स प्रकृतः शारीर आत्मा यश्चक्षुषश्चक्षुः **स चाक्षुषः**। तस्य **दर्शनाय** रूपोपलब्धये **चक्षुः** करणम्। तस्य संहतत्वेन परार्थत्वात्। असंहतो हि पर अक्षिणि दृश्यत इति प्रजापति-

नोक्तत्वात् संप्रसादात्मनोऽसंहतत्वं सिद्धम्। संप्रसादस्य सर्वकरणविषयोपलब्धृत्वे समानेऽपि "य एषोऽक्षिणि पुरुषो दृश्यते" इत्यक्षिणि विशेषो दृश्यते। "चक्षुषा यत्पश्यति तत्सत्यं भवति" इति श्रुतेः। सर्वविषयोपलब्धृत्वं कथं? इत्यत्र—**अथ योऽस्मिन्** कार्यकरणसंघाते सुरभि दुर्गन्धि च **जिघ्राणीति वेद स ह्यात्मा** तस्य गन्धविषयोपलब्धये घ्राणम्। **अथ योऽभिव्याहराणीति वेद स ह्यात्मा**। तस्य तत्क्रियासिद्धये **वाक्**। **अथ यः शृणवानीति वेद स आत्मा। श्रवणाय श्रोत्रम्। अथ यो मन्वानि** मननव्यापारं करोमीति **वेद स ह्यात्मा**। इत्येवं सर्वत्र सर्वदा वेदनमेवास्य रूपमित्यवगम्यते। "यथा यः पूर्वाग्नेयादिदिक्षु विदिक्षु च ऊर्ध्वं च प्रकाशयति स सविता" इत्युक्त्या प्रकाशमात्रत्वमवगम्यते। तथा चक्षुरादिप्रतिकरणमात्मा। तत्प्रवृत्तिनिमित्तं जानातीत्युक्त्यात्मनो ज्ञप्तिमात्रत्वमवगम्यते। तद्व्यापृततया ज्ञानकर्तृत्वमिति चेन्न; सत्तास्वरूपेण ज्ञप्तिमात्रत्वात्। सवितृवत् तदुपलब्धिकरणं **मनोऽस्य दिव्यं चक्षुः**। तस्य सर्वविषयोपलब्धिकरणत्वात् मनसो दिव्यत्वम्। **स एष वै** संप्रसादो विद्वान् स्वाविद्याकृतदेहेन्द्रियमनोवियुक्तसर्वात्मभावमेत्य मनआदिकरणग्रामप्रवृत्तिनिमित्तं भूत्वा स्वभास्य**दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते। य एते ब्रह्मलोके** प्रजापतिनोक्त आत्मा इन्द्रात् **देवास्तं** श्रुत्वा **उपासते**। तदुपासनाच्च **तेषां सर्वे च लोका अत्ताः सर्वे च कामाः**। यदर्थं हीन्द्र एकशतं वर्षाणि प्रजापतौ ब्रह्मचर्यमुवास देवैरपि तत्फलं प्राप्तमित्यर्थः। इदानींतनोऽपि **यस्तमात्मानमनुविद्य विजानाति सोऽपि सर्वान् लोकान् सर्वांश्च कामानाप्नोति**। अतः सर्वेषामात्मज्ञानं तत्फलञ्च तुल्यमित्यर्थः। द्विरुक्तिः प्रकरणसमाप्त्यर्था ॥ १२ ॥

मन्त्राम्नायकथनम्

श्यामाच्छबलं प्रपद्ये शबलाच्छ्यामं प्रपद्ये अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीत्यभिसंभवामीति ॥१३॥

मन्त्राम्नाय उच्यते—**श्यामादिति**। श्याम इव श्यामो गम्भीरवर्णः। हार्दब्रह्मध्यानेन तज्जित्वा तस्मात् **श्यामात्** शबल इव शबलो ब्रह्मलोकः। सर्वकाममिश्रत्वादस्य शाबल्यम्। शरीरपातादूर्ध्वं **शबलं** ब्रह्मलोकं **प्रपद्ये**। तद्विपर्ययेण नामरूपव्याकरणाय **शबलात्** ब्रह्मलोकात् **श्यामं** हार्दभावं **प्रपद्ये**। कथं शबलं प्रपद्ये? इत्यत आह—**अश्व इवेति**। यथाश्वो **रोमाणि विधूय** स्वगतपांसुजालं श्रमं चापनयति निर्मलो भवति तथैवमेव हार्दब्रह्मजयेन धर्माधर्मनिमित्तं पुण्यं **पापञ्च** विधूय यथा च राहुग्रस्तचन्द्रो **राहुमुखात् प्रमुच्य** प्रच्याव्य स्वभावभारूपतामेति तथैव शरीरग्रस्तः संप्रसादः राहुस्थानीयं **शरीरं धूत्वा** यत् ध्यातव्यं तद्ध्यानेन **कृतात्मा** कृतकृत्यः सन् **अकृतं ब्रह्मलोकमभिसंभवामीति**। द्विरुक्तिर्मन्त्रसमाप्त्यर्था॥ १३॥

ध्यानार्थं ससाधनब्रह्मस्वरूपनिर्देशः

आकाशो वै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतꣳ स आत्मा प्रजापतेः सभां वेश्म प्रपद्ये यशोऽहं भवामि ब्राह्मणानां यशो राज्ञां यशो विशां यशोऽहमनुप्रापत्सि स हाहं यशसां यशः श्वेतमदत्कमदत्कꣳ श्वेतं लिन्दु माभिगां लिन्दु माभिगाम्॥ १४॥

ध्यानार्थं ससाधनब्रह्मस्वरूपं निर्दिशति—**आकाश** इति। आकाशो नाम श्रुतिषु प्रसिद्ध आत्मा। आकाशवदशरीरत्वात् सूक्ष्मत्वात् व्यापकत्वाच्च। **स आकाशो नाम** स्वात्मस्थजगद्बीजभूत**नामरूपयोर्निर्वहिता**। **ते** नामरूपे **यदन्तरा** यन्मध्ये विकल्पिते रज्जुसर्पवत् यत्सत्तां विना सद्रूपे यत्सत्तया सत्यवदवभासमाने तदारोपापवादाधिकरणं यत् **तद्ब्रह्म** स्वाधेयसापेक्षाधारतावैरल्यात्। **तदमृतं** सन्मात्ररूपत्वात्। तदेव स्वाज्ञदृष्टिविकल्पितसर्वजन्तुषु स्वज्ञदृष्ट्या तद्धृदयगतकामादिवृत्तिसहस्रभावाभावप्रकाशकप्रत्यग्रूपेण

योऽवभासते स ह्यात्मा । ब्रह्मैवात्मेत्यत्र "सत्यमात्मा ब्रह्मैव ब्रह्मात्मैवात्र ह्येव न विचिकित्स्यं" इति श्रुतेः । इत ऊर्ध्वं मन्त्रः **प्रजापतेश्चतुर्मुखस्य सभां** मौनिमण्डलमण्डितां यत्प्रभुविमितमित्युक्तं **तद्वेश्म प्रपद्ये** । किंच **यशो** नामात्माहं **भवामि** । विशेषतस्तं ब्राह्मणा उपासत इति **ब्राह्मणानां यशो**ऽहमात्मा **भवामि** । तथा **राज्ञां विशां** च । तयोरप्यधिकृतत्वात्तद्यश आत्मा भवामि । इत्थं सर्वजन्तूनां **यशोऽहमनुप्रापत्सि** । **स ह्यहं यशसां** सर्वजन्तूनामपि हृदयासनप्रत्यगात्माभिधान**यशो** भवामीत्यर्थः । कदापि **श्वेतं** वर्णतो रोहितमिश्र-पक्वबदरोपमं तद्वादत्कं दन्तहीनमपि **अदत्कम**खिलप्राण्यायुःप्रज्ञासत्त्वादिभक्ष-यितृ । तादृशश्वेतं स्त्रीत्वव्यञ्जकं **लिन्दु** पिच्छिलं माभिगच्छेयम् । **माभिगां माभिगामि**ति द्विरुक्तिः सर्वानर्थप्रदर्शनार्था ॥ १४ ॥

विद्यापरम्परा उक्तार्थसंक्षेपश्च

तद्धैतत् ब्रह्मा प्रजापतय उवाच प्रजापतिर्मनवे मनुः प्रजाभ्यः आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानो धार्मिकान् विदधदात्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्य अहिंसन् सर्वभूतानि अन्यत्र तीर्थेभ्यः स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते न च पुनरावर्तते ॥ १९ ॥

एतद्विद्यापरम्परामनुक्रामति—तदिति । **तद्धैतत्** सोपासनं सोपकरणमात्म-ज्ञानं तद्वाचकत्वेन ओमित्येतदक्षरमित्याद्यष्टाध्यायलक्षणग्रन्थरूपेण **ब्रह्मा** चतुरा-ननः **प्रजापतये** कश्यपा**योवाच** । असावपि **मनवे मनुः प्रजाभ्य** इत्येवं संप्रदायपरम्परयागतमिदमुपनिषद्विज्ञानमद्यापि विद्वन्मुखतः प्रवर्तते । षष्ठाध्या-यादिप्रकाशितपरविद्यैव सफला नापरविद्येति प्राप्तानर्थपरिजिहीर्षया इयमपरब्रह्म-विद्यापि विद्वदनुष्ठीयमाना यदि तदा ब्रह्मलोकाप्तिद्वारा परविद्यतामेत्य सफला

भवेदितीदमुच्यते—**आचार्येति**। मुमुक्षुः स्मृत्युक्तनियमतो यथाविधानमाचार्य-**कुलात्** सहार्थतो **वेदमधीत्य** धर्मजिज्ञासामावृत्य धर्मजिज्ञासां समापयित्वा गुर्वनुज्ञया न्यायतः स्वकुलानुरूपान् दारानाहृत्य **कुटुम्बे** गार्हस्थ्योचितकर्मणि स्थित्वा विविक्ते **शुचौ देशे** यथावदासीनः **स्वाध्यायमधीयानः** नियमतो यथाशक्ति ऋगाद्यभ्यासं कुर्वन् **धार्मिकान्** पुत्रान् शिष्यांश्च **विदधत्** नियमयन् स्वहार्दे ब्रह्मणि **सर्वेन्द्रियाणि संप्रतिष्ठाप्य** तन्निर्वर्त्यकायिकवाचिकमानसकर्माणि च संन्यस्य स्थावरजङ्गमप्रविभक्त**सर्वभूतान्यहिंसन्**, भिक्षानिमित्तपर्यटनतो भूत-हिंसा स्यादित्यत्राह—**अन्यत्र तीर्थेभ्य** इति। तीर्थानि नाम तत्तदाश्रमोचित-श्रुतिस्मृतिविहितकर्माणि। तेभ्यो**ऽन्यत्राहिंसन्निति** यथोक्तप्रकारेण **यावदायुष-मेवं वर्तयन्** देहान्ते निर्वासनो भूत्वा **ब्रह्मलोकमभिसंपद्यते**। तदुपसंपद्य तन्मुखात् परब्रह्मविद्यामवाप्य **न च पुनरावर्तते** पुनरावृत्तिहेतुस्वाज्ञानतत्प्रभव-वासनावैरल्यात् तल्लोकस्थितिपर्यन्तं तत्रोषित्वा चतुष्पदैक्यसमये तेन साकं कैवल्यमेतीत्यर्थः। औपनिषदविद्यापरिसमाप्त्यर्थेयं द्विरावृत्तिः॥ १९॥

इति अष्टमोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
छान्दोग्यस्य विवरणं लिखितं स्यात् स्फुटं लघु॥
छान्दोग्योपनिषद्व्याख्याग्रन्थसंख्यानमुच्यते।
अष्टसप्तत्यधिकाष्टशताधित्रिसहस्रकम्॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे नवसंख्यापूरकं छान्दोग्योपनिषद्विवरणं सम्पूर्णम्

बृहदारण्यकोपनिषत्

पूर्णमदः—इति शान्तिः

प्रथमोऽध्यायः [1]

प्रथमं अश्वब्राह्मणम्

अश्वमेधविज्ञानाय अश्वविषयदर्शनम्

उषा वा अश्वस्य मेध्यस्य शिरः सूर्यश्चक्षुर्वातः प्राणो व्यात्तमग्निर्वैश्वानरः संवत्सर आत्माश्वस्य मेध्यस्य । द्यौः पृष्ठमन्तरिक्षमुदरं पृथिवी पाजस्यम् । दिशः पार्श्वे अवान्तरदिशः पर्शव ऋतवोऽङ्गानि मासाश्चार्धमासाश्च पर्वाण्यहोरात्राणि प्रतिष्ठा नक्षत्राण्यस्थीनि नभो माꣳसानि । ऊवध्यꣳ सिकताः सिन्धवो गुदा यकृच्च क्लोमानश्च पर्वता ओषधयश्च वनस्पतयश्च लोमानि उद्यन् पूर्वार्धो निम्लोचन् जघनार्धो यद्विजृम्भते तद्विद्योतते यद्विधूनुते तत स्तनयति यन्मेहति तद्वर्षति वागेवास्य वाक् ॥ १ ॥

[1] अयमध्याय उपनिषदि प्रथमोऽपि आरण्यकक्रमेण तृतीयः एवमुपरिष्टादपि

काण्वीयोपनिषद्विद्याकमलाभाग्यगौरवम् ।
कैवल्यानन्दसाम्राज्यं स्वमात्रं कलयेऽन्वहम् ॥

इह खलु वाजसनेयान्तर्गतकाण्वीये शुक्लयजुर्वेदे शतपथब्राह्मणे सप्तदश-काण्डे "उषा वा अश्वस्य" इत्यादिषडध्यायगर्भितेयं बृहदारण्यकोपनिषत् आम्नाता । तस्याः पाठतोऽर्थतोऽपि बृहत्त्वात् आरण्यकमध्ये पठितत्वात् आरण्यै-र्वनियतिभिः पठ्यमानत्वाद्वा बृहदारण्यकम् । तथा च महावार्तिकेऽभिहितं—

अर्थतः पाठतश्चैव बृहत्त्वात् बृहदुच्यते ।
आरण्यैः पठ्यमानत्वादारण्यकमिति स्मृतम् ॥

इति। बृहदारण्यकसंज्ञिकेयमुपनिषत् ब्रह्मविद्यातत्पराणां स्वाज्ञानावसादनात् उपनि-पूर्वस्य सदेरर्थानुगमात् तादर्थ्येन ग्रन्थोऽप्युपनिषत् । विशुद्धसत्त्वो ह्यत्राधिक्रियते । सत्त्वशुद्धेः सत्कर्मानुष्ठानप्रभवत्वात् ।

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।

इति स्मृतेः । पूर्वकाण्डे तावत् दर्शपूर्णमासादि वाजिमेधान्तं कर्माणि विहितानि । समस्तकर्माश्रयभूतेश्वरोपासनानि चाभिहितानि । केवलं कर्म तदध्यक्षेशज्ञानं वा तदुभयं समुच्चित्य वा सम्यगनुष्ठितं सत् सकामस्य पुनरावृत्त्यर्हदक्षिणमार्गप्रापकं भवति । तच्च्युतेः पुण्यक्षयसापेक्षत्वात् "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इति स्मृतेः । निष्कामस्य तु तद्भावानुरोधेनार्चिरादिमार्गेणापुनरावृत्तिलक्षण-ब्रह्मलोकाप्तिः । तथा च वक्ष्यति "तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः" इति । यथोक्तमार्गद्वयबहिष्कृतानां तिर्यग्भावापत्तिं वक्ष्यति "य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकं" इति । न ह्युक्तलक्षणलक्षितगतित्रयेऽपि ब्रह्मभावापत्तिरिष्यते । तद्भावापत्तिस्तु स्वातिरिक्त-प्रपञ्चगन्धविरलनिष्प्रतियोगिकाद्वैतात्मावगतिसमकालमवगम्यते । तदवगतेः क्रिया-कारकफलस्पृहोपमर्दनपूर्वकत्वात् । "नान्यः पन्था अयनाय विद्यते" इति श्रुतेः ।

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।

"ज्ञानी त्वात्मैव मे मतं" इत्यादिस्मृत्यनुरोधेन स्वकृतसत्कर्मफलार्पण-सन्तुष्टेश्वरप्रसादप्रादुर्भूतचित्तशुद्धिनित्यादिसाधनचतुष्टयालङ्कारपारमहंस्यधर्ममुपेयुषः कस्यचिदेव निष्प्रतियोगिकब्रह्ममात्रजिज्ञासा उदेति। तथाविधजिज्ञासोः "आत्मानमेवावेत् अहं ब्रह्मास्मीति," "विज्ञानमानन्दं ब्रह्म," "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः," "अजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति," "अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत् परमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यं" इत्यादिवक्ष्यमाणश्रुतिसिद्धब्रह्ममात्रावगतिहेतुतया इयं बृहदारण्यकोपनिषदारब्धा। न हि ब्रह्मदर्शनादन्यत्र ब्रह्मभावापत्तिरस्ति ज्ञानस्य स्वातिरिक्तभ्रमनिरासकत्वात्। तथा चेत् "उषा वा" इत्यत्र विराडुपासनाभिधीयते। "य एष एतस्मिन् मण्डले पुरुषः," "मनोमयोऽयं पुरुषः," "विद्युद्ब्रह्मेति," "वाचं धेनुमुपासीत" इत्याद्यङ्गोपासनानि च निष्फलानि स्युरिति चेन्न; तेषां निष्कामस्य सत्त्वशुद्धिहेतुत्वेन ब्रह्मावगत्युपकारकत्वात् न हि निष्फलत्वं वक्तुं युक्तम्। विशुद्धसत्त्वस्य हि ब्रह्मावगतिरुदेति। यत एवमतो विराडादितदङ्गोपासनानि तत्सहकारिकर्माणि च विशिष्टाधिकारिप्राप्यब्रह्मज्ञानं चेत्येतत्सर्वं यत्र पौष्कल्यमर्हति तस्या बृहदारण्यकोपनिषदो यथोक्तजिज्ञासुप्रतिपत्त्यर्थमल्पग्रन्थतो विवरणमारभ्यते—**उषा वा अश्वस्य** इत्यादिना। अश्वमेधविज्ञानाय उषा वेत्यादि। अश्वमेधक्रतोः प्राजापत्यात्मकत्वात्। उषाशब्देन ब्राह्मोऽयं मुहूर्त उच्यते। **वै**शब्दः प्रसिद्धं कालं स्मारयति। **अश्वस्य** याज्ञीयत्वेन **मेध्यस्य** सर्वावयवानां शिरःप्राधान्यात्। तस्य **उषाः शिर** इव **शिरः**। शिरआद्यवयवेषु कालादिदृष्टिः पशुसंस्कारार्थेत्यर्थः। प्रतिमादौ विष्ण्वादिदृष्टिवत् पशौ काललोकदेवतात्मकवैराजदृष्टिः कार्या। क्रतोः प्राजापत्यत्वात्। शिरसोऽनन्तरत्वात्। **सूर्यश्चक्षुः** चक्षुषः सूर्याधिष्ठितत्वाद्वा। **वातो ह्यस्य प्राणः**। "वायुः प्राणः" इति श्रुतेः। **अयमग्निर्वैश्वानरोऽस्य व्यात्तं** विवृतं मुखम्। "आस्यमाहवनीयः" इति श्रुतेः। **संवत्सर आत्मा**। निमेषादिकालावयवानां संवत्सरस्य शरीरत्वात्। द्वादशमासात्मकः संवत्सरोऽय-

मात्मा शरीरम् । "मध्यं ह्येषामङ्गानामात्मा" इति श्रुतेः । सर्वत्रानुषङ्गार्थम-श्वस्य मेध्यस्येति पुनर्वचनम् । ऊर्ध्वत्वसामान्यात् **द्यौः पृष्ठम्** । सुषिरत्व-सामान्यादन्तरिक्षमुदरम् । पादस्यमिति वर्णव्यत्ययेन **पाजस्यम्** । पृथिवी पादस्थानमित्यर्थः । दिशां पार्श्वसंबन्धात् पूर्वादिचतस्रो **दिशः पार्श्वे** । दिक्पार्श्वयोः सङ्ख्यावैषम्यमिति चेन्न; अस्य सर्वतोमुखत्वेन पार्श्वाभ्यामेव सर्वदिशां संबन्धात् । आग्नेयाद्यवान्तरदिशो हि **पर्शवः** पार्श्वास्थीनि । **ऋतवोऽङ्गानि** ऋतूनां संवत्सरावयवत्वेनाङ्गसाधर्म्यम् । **पर्वाण्यङ्गसन्धयो मासाश्चार्धमासाश्च** भवेयुः । **प्रतिष्ठा** पादाः **अहोरात्राणि** प्राजापत्य-दैवपित्र्यमानुषाभिधानपादैः प्रतिष्ठितत्वात् बहुवचनम् । कालात्मनोऽहोरात्रैः प्रतिष्ठितत्वात् । **अस्थीनि नक्षत्राणि** शुक्लत्वसामान्यात् । पुरान्तरिक्षस्य उद-रत्वाभिधानात् **नभो** नभःस्था मेघा **मांसानि** जलरुधिरसेचनसामान्यात् । **सिकता ऊवध्यं** उदरस्थार्धपक्वाशनं विशिष्टावयवत्वसामान्यात् । **गुदाः सिन्धवो** नद्यः स्यन्दनसामान्यात् । गुदा इति तद्गतनाड्यभिप्रायेण बहु-वचनम् । **यकृच्च क्लोमानश्चेति** हृदयदक्षिणोत्तरमांसखण्डौ । क्लोमान इति नित्यबहुवचनम् । यकृत्क्लोमैकदेशे **पर्वताः** काठिन्योच्छ्रितत्वसामान्यात् । **ओषधयश्च वनस्पतयश्च** क्षुद्राल्पस्थावराः **लोमानि** केशाश्च । **उद्यन् सविता** अश्वस्य **पूर्वार्धः** । नाभेरूर्ध्वं **निम्लोचन्** अस्तमयन् सविता अश्वस्य **जघनार्धः** पूर्वापरत्वसामान्यात् । **यद्विजृम्भते** गात्राणि विक्षिपति **तद्विद्योतते** मुखवनविदारणसामान्यात् । **यद्विधूनुते** गात्रकम्पनं करोति **तत् स्तनयति** गर्जनसामान्यात् । अश्वो **यन्मेहति** मूत्रयति **तद्वर्षति** तत्सेचन-सामान्यात् । **वाक्** शब्दराशिरेवास्य अश्वस्य वाक् इति ॥ १ ॥

अश्वस्य उत्पत्तिः स्तुतिश्च

अहर्वा अश्वं पुरस्तान्महिमान्वजायत तस्य पूर्वे समुद्रे योनी रात्रिरेनं पश्चान्महिमान्वजायत तस्यापरे समुद्रे योनिरेतौ

वा अश्वं महिमानावभितः संबभूवतुः । हयो भूत्वा देवानवहत् वाजी गन्धर्वानर्वासुरानश्वो मनुष्यान् समुद्र एवास्य बन्धुः समुद्रो योनिः ॥ २ ॥

अहरेवास्य सुवर्णरजतमहिमाग्रहावित्याह—अहरिति । अहर्वाहरेव सौवर्णः दीप्तिसामान्यात् । अहर्वा अश्वं पुरस्तात् महिमान्वजायत अश्वस्य प्रजापतित्वेन सौराह्वा लक्ष्यमाणत्वात् । वृक्षमनु विद्योतत इतिवत् । अश्वं लक्षयित्वा महिमा जायते । तस्य ग्रहस्य पूर्वे पूर्वः समुद्रे समुद्रः विभक्ति-व्यत्ययेन द्रष्टव्यः । तस्य मेघयोनित्वात् योनिरित्यासादनस्थानम् । तथा रजतो ग्रहो रात्रिः जघनवर्णसामान्यात् । एनमश्वं पश्चात् पृष्ठतोऽन्वजायत । तस्यापरे समुद्रे योनिरश्वस्य महतो महिमा विभूतिरित्यर्थः । यत्सौवर्ण-राजतग्रहावुभयतः स्थाप्येते तावेतौ वै महिमानौ । ग्रहावश्वमभितः संब-भूवतुरिति पुनर्वचनं स्तुत्यर्थम् । हयो भूत्वेत्यादिरपि स्तुत्यर्थ एव । हिनोतेः गतिकर्मविशिष्टत्वात् । हयो भूत्वा देवानवहत देवानां वोढाभवत् । प्रजापति-त्वात् देववोढृत्वं युज्यते । वाहत्वं निन्दा स्यादिति चेन्न ; स्वाभाविकत्वात् । न हि स्वाभाविकी वृत्तिः निन्दनाय कल्पते । अस्य देवादिसंबन्धः स्तुतिरेवेत्यर्थः । तथा जातिविशेषा वाज्यादयः । वाजी भूत्वा गन्धर्वानवह-दित्यनुषज्यते । तथार्वा भूत्वासुरान् अश्वो भूत्वा मनुष्यानवहत् । समुद्र एवास्य बन्धुः । समुद्रशब्देन परमात्मोच्यते । विराडादेस्तत्रैव बध्यमान-त्वात् । स्वोत्पत्तिं प्रति समुद्रो योनिः कारणम् । एवं शुद्धयोनित्वे-नाश्वः स्तूयते । अश्वस्य समुद्रयोनित्वं प्रसिद्धमेव "अप्सुयोनिर्वाश्वः" इति श्रुतेः ॥ २ ॥

इति प्रथमं ब्राह्मणम्

द्वितीयं अग्निब्राह्मणम्

आदौ अप्सृष्टिः

नैवेह किंचनाग्र आसीत् मृत्युनैव इदमावृतमासीत्। अशनायया अशनाया हि मृत्युस्तन्मनोऽकुरुत आत्मन्वी स्यामिति। सोऽर्चन् अचरत् तस्यार्चत आपोऽजायन्तार्चते वै मे कमभूदिति तदेवार्कस्यार्कत्वं कᳬ ह वा अस्मै भवति य एवमेतदर्कस्यार्कत्वं वेद ॥ १ ॥

अथाश्वमेधोपयोग्यग्नेरुत्पत्तिं तद्दर्शनं तत्फलं च प्रकटयितुं द्वितीयब्राह्मणमारभ्यते—**नैवेति**। **अग्रे** सृष्टेः प्राक् **इह** स्वाज्ञविकल्पितसंसारचक्रे **किञ्चन** किञ्चिदपि नामरूपविकल्पजातं **नैवासीत्** न बभूवेत्यर्थः। सृष्टेः प्रागिदमसत्तया शून्यमेव स्यादिति चेन्न; तदा स्वाज्ञदृष्ट्यास्य जगतो बीजात्मना विद्यमानत्वात् न हि शून्यता स्यात्। तथा चेत् किं न दृश्यते? इति चेत्; मृत्युनावृतत्वात्। एवमावारको मृत्युः किंविशेषणविशिष्ट इत्यत आह—**अशनाययेति**। अशितुमिच्छा **अशनाया**। सैव मृत्युः सर्वप्राणिलिङ्गशरीराभिमानी हिरण्यगर्भः। तेन **मृत्युना इदं** कार्यजातं मृदा घटादिवत् **आवृतमासीत्**। कथं पुनरशनायाया मृत्युत्वं? इत्यत आह—**अशनाया हि मृत्युरिति**। हिशब्दः प्रसिद्ध्यर्थः। यः परस्वमशितुमिच्छति तदनन्तरमेव हि परान् हन्ति। तेनासावशनायया लक्षितो **मृत्यु**र्हिरण्यगर्भो यत् वक्ष्यमाणकार्यालोचनक्षमं तत् सङ्कल्पादिलक्षणं **मनो**ऽन्तःकरणम**कुरुत** कृतवानित्यर्थः। केनाभिप्रायेण? इत्यत आह— **आत्मन्वी स्यामिति**। लिङ्गव्यत्ययेनात्मवान् भवेयमिति। **स** मृत्युरभिव्यक्तमनसा समनाः सन् आत्मानम**र्चन्** कृतार्थोऽस्मीति पूजयन् **अचरत्** चरणमकरोत्। एवमात्मानम**र्चतः** पूजयतो मृत्योः पूजाङ्गत्वेन रसात्मिका **आपोऽजायन्त** उत्पन्नाः। आकाशादिभूतत्रयसृष्ट्यनन्तरमप्सृष्टिरिति

मन्तव्या। "आत्मन आकाशः संभूतः" इति श्रुत्यन्तरात् विकल्पासम्भवाच्च सृष्टिक्रमस्य। **अर्चते वै** पूजां कुर्वते मे मह्यं **कं** उदकम**भूदित्य**मन्यत। यतो मृत्युस्तदेव तस्मादेव हेतोरश्वमेधक्रतूपयोगिकस्यार्कस्याग्नेरर्कत्वे हेतुरित्यर्थः। अग्नेरर्कनामनिर्वचनमेतद्गौणं अर्चनात् सुखहेतुपूजाकारणादप्संवन्धाच्च। **य एवमर्कस्याग्नेरर्कत्वं वेद अस्मा** एवंविदे नामसामान्यात कं उदकं सुखं वा **ह** वा इत्यवधारणात् **भवत्येवे**त्यर्थः॥ १॥

अपामर्कत्वं पृथिवीसृष्टिश्च

आपो वा अर्कस्तद्यदपाꣳ शर आसीत् समहन्यत सा पृथिव्यभवत् तस्यामश्राम्यत् तस्य श्रान्तस्य तप्तस्य तेजोरसो निरवर्तताग्निः॥ २॥

कः पुनरसावर्कः? इत्यत्र आह—**आप** इति। या अर्चनाङ्गभूतास्ता **एवापो वा अर्कः** अपां तद्धेतुत्वात्। अप्सु अग्निः प्रतिष्ठितः। "आपो वाग्नेर्योनिः" इति श्रुतेः। न पुनः साक्षादर्कता अग्निप्रकरणात्। तथा च वक्ष्यति "अयमग्निरर्कः" इति। तत्तत्र यदपां **शर** इव शरो दधिक्षीरादिमण्डवत् मण्डभूतमासीत् तत् **समहन्यत** सम्यक् घातमापद्यत। लिङ्गव्यत्ययः छान्दसः। योऽपां शरः स समहन्यत। **सा पृथिव्यभवत्**। तयाप्छरपृथिव्या निर्वृत्तमिदमण्डमित्यर्थः। **तस्या**मेवमुत्पादितायां स मृत्युर**श्राम्यत्** यथान्यो गुरुतरकार्यं कृत्वा श्राम्यति तथायं श्रमयुक्तो बभूवेत्यर्थः। एवं **तस्य श्रान्तस्य** खिन्नस्य मृत्योः शरीरात् **तेज** एव **रसः** सारोऽग्निः प्रथमजो विराट् **निरवर्तत** प्रादुर्बभूवेत्यर्थः। "स वै शरीरी प्रथमः" इति स्मृतेः॥ २॥

विराडात्मनः त्रेधा विभजनम्

स त्रेधात्मानं व्यकुरुतादित्यं तृतीयं वायुं तृतीयꣳ स एष प्राणस्त्रेधा विहितः। तस्य प्राची दिक् शिरोऽसौ चासौ च ईर्मौ।

अथास्य प्रतीची दिक् पुच्छमसौ चासौ च सक्थ्यौ दक्षिणा च उदीची च पार्श्वे द्यौः पृष्ठमन्तरिक्षमुदरमियमुरः स एषोऽप्सु प्रतिष्ठितो यत्र क्वचैति तदेव प्रतितिष्ठत्येवं विद्वान् ॥ ३ ॥

स विराडात्मानं त्रिधा व्यभजदित्याह––स इति। स प्रथमजः स्वयमेव कार्यकारणसंघातमात्मानं त्रेधा त्रिप्रकारं व्यकुरुत व्यभजदित्यर्थः। कथम्? अग्निवाय्वपेक्षयादित्यं तृतीयं अकुरुतेत्यनुवर्तते। तथाग्न्यादित्यापेक्षया वायुं तृतीयम्। तथा वाय्वादित्यापेक्षयाग्निं तृतीयमिति संख्यापूरणम्। त्रयाणां समवीर्यत्वात्। स एष सर्वभूतान्तर्यामी प्राणोऽग्निवाय्वादित्यरूपेण त्रेधा विहितः स्वेनैव मृत्युरूपेण त्रेधा विभक्त इत्यर्थः। न हि विराट्-स्वरूपोपमर्देन। तस्याश्वमेधोपयोगिकाग्निस्वरूपत्वात्। इत्थमसौ शुद्रजन्मेति यः स्तूयते तस्य प्राची दिक् शिरः वैशिष्ट्यसामान्यात्। असौ चासौ च ऐशान्याग्नेय्यौ ईर्मौ बाहू। ईरयतेर्गतिकर्मार्थत्वात्। अथास्याग्नेः पुच्छं प्रतीची दिक्। पूर्वाभिमुखस्य जवन्यभागसंवन्धात्। असौ चासौ च वायव्यनैर्ऋत्यौ सक्थ्यौ पृष्ठकोणत्वसामान्यात्। दक्षिणा च उदीची च पार्श्वे उभयदिक्संबन्धसामान्यात्। द्यौः पृष्ठमन्तरिक्षमुदरमिति पूर्ववत्। इयमुरः अधोभागसामान्यात्। स एषोऽग्निर्विश्वात्मकोऽप्सु प्रतिष्ठितः। "इमे लोका अप्स्वन्तः" इति श्रुतेः। य एवमग्नेरप्रतिष्ठितत्वं विद्वान् सोऽयं यत्र कच एति यस्मिन् कस्मिंश्चिद्देशे गच्छति तदेव प्रतितिष्ठति तत्रैव स्थितिं लभत इत्युपासनाफलमेतत् ॥ ३ ॥

मिथुनसंवत्सरादिसृष्टिः

सोऽकामयत द्वितीयो म आत्मा जायेतेति स मनसा वाचं मिथुनꣳ समभवदशनाया मृत्युस्तद्यत् रेत आसीत् स संवत्सरोऽभवत्। न ह पुरा ततः संवत्सर आस तमेतावन्तं कालमबिभः।

यावान् संवत्सरस्तमेतावतः कालस्य परस्तादसृजत । तं जातमभिव्याददात् स भाणकरोत् सैव वागभवत् ॥ ४ ॥

सोऽबादिक्रमेणात्मानमसृजतेत्युक्तम् । स किंव्यापारस्सन्नकुरुत ? इत्याकाङ्क्षायामाह—**सोऽकामयतेति** । यो मृत्युरित्युक्तः **सोऽयं द्वितीयो मे** ममात्मा शरीरं **जायेतेति अकामयत** कामितवान् । स एवं कामयित्वा पूर्वोत्पन्न**मनसा** त्रयीलक्षणां **वाचं मिथुनं समभवत्** मनसा त्रयीं तद्विहितसृष्टिक्रमं चान्वालोचयदित्यर्थः । अन्यत्र एतत्प्रसङ्गो मा भूदित्युक्तार्थमेव परामृशति—**अशनाया मृत्युरिति** । अशनायालक्षित इत्यर्थः । तत्तत्र मिथुने प्रथमशरीरिप्रजापतिकारणं **यद्रेत आसीत्** तद्बीजभूतरेतसाप्सु अनुप्रविश्याण्डाकारेण गर्भितः सन् **स संवत्सरोऽभवत्** संवत्सरादिकालनिर्माता प्रजापतिरभवत् । संवत्सरनिर्मातृप्रजापतेः **ततः न ह पुरा संवत्सरः** काल **आस** न बभूव । **तं** संवत्सरनिर्मातृगर्भं प्रजापतिं यावान् कालोऽभवत् एतावन्तमेतावत्संवत्सरपरिमाणं **कालं अबिभः** भृतवान् **यावान् संवत्सर** इह प्रसिद्धः । ततः परस्तात् किं कृतवान् ? **तं एतावतः** संवत्सरमात्रकालस्य **परस्ताद्**ूर्ध्वं प्रथमजम**सृजत** । **तमेतं** जातमशनायावत्त्वात् मृत्युर**भिव्याददात्** स्वमुखविदारणं कृतवान् तमत्तुमित्यर्थः । **सोऽयं** कुमारो भीतस्सन् स्वभावविद्यायुक्तो **भाण्** इत्येवं शब्दम**करोत्** । **सैव वा**क् शब्दोऽ**भवत्** ॥ ४ ॥

तस्य जगत्सृष्टिः तद्भक्षणप्रवृत्त्या अदितित्वम्

स ऐक्षत यदि वा इममभिमꣳस्ये कनीयोऽन्नं करिष्य इति स तया वाचा तेनात्मना इदꣳ सर्वमसृजत यदिदं किंच ऋचो यजूꣳषि सामानि छन्दाꣳसि यज्ञान् प्रजाः पशून् । स यद्यदेव असृजत तत्तदत्तुमध्रियत सर्वं वा अत्तीति तददितेः अदितित्वꣳ

सर्वस्यैतस्य अत्ता भवति सर्वमस्यान्नं भवति य एवमेतददितेरदि-
तित्वं वेद ॥ ५ ॥

ततः किं? इत्यत आह—स इति। स मृत्युर्भीतरवं पुत्रमैक्षत अशनायावानपीक्षितवान्। यदि कदाचित् वा इमं कुमारं अभिमंस्ये हिंसिष्ये—अभिपूर्वमन्यतेर्हिंसार्थत्वात्—तदा कनीयोऽल्पतरमन्नं करिष्य इत्येवमीक्षित्वा एतन्मात्रभक्षणे कनीयोऽन्नं स्यात्। दीर्घकालभक्षणार्थं बह्वन्नं कर्तव्यमिति मनीषया स्वकुमारभक्षणादुपरराम। स बह्वन्नार्थी सन् तयैव पूर्वोक्तत्रयीरूप-वाचात्मना मनसा मिथुनीभावमालोच्य इदं सर्वं यदिदं किञ्च यत्किञ्चेदं स्थावरजङ्गमं चासृजत। किं तत्? ऋचो यजूंषि सामानि गायत्र्यादीनि सप्तछन्दांसि स्तोत्रशस्त्रादिकर्माङ्गत्रिविधमन्त्रान् विशेषतो यज्ञांश्च तत्साध्यप्रजाः च कर्मसाधनभूतग्राम्यारण्यपशूंश्च। स प्रजापतिरेवमन्नवृद्धिं बुद्ध्वा यद्यदेव क्रिया-कारकफलजातमसृजत तत्तत्सर्वमत्तुमध्रियत सर्वान्नग्रसनाय मनो धृतवान्। यस्मादयं सर्वमत्ति तस्मादयमदितिः। तस्यादितिनाम्नो मृत्योरदितित्वं प्रसिद्धम्। "अदितिर्द्यौरदितिरन्तरिक्षं" इत्यादि मन्त्रवर्णनात्। य एवमेतददितेरदितित्वं वेद तस्यैतत् फलम्। सोऽयं सर्वात्मना सर्वस्य एतस्यान्नभूतजगतोऽत्ता भवति। एकस्य सर्वात्तृत्वं विरुद्धमिति चेन्न; एकस्य सर्वात्मकत्वेन सर्वात्तृत्वो-पपत्तेः। सर्वमस्यान्नं भवति सर्वात्मायं भवतीत्यर्थः ॥ ५ ॥

तस्य यजनकामः

सोऽकामयत भूयसा यज्ञेन भूयो यजेयेति सोऽश्राम्यत् स तपोऽतप्यत तस्य श्रान्तस्य तप्तस्य यशो वीर्यमुदक्रामत् प्राणा वै यशो वीर्यं तत्प्राणेषु उत्क्रान्तेषु शरीरꣳ श्वयितुमध्रियत तस्य शरीर एव मन आसीत् ॥ ६ ॥

अश्वमेधनिर्वचनाय इदमाह— **सोऽकामयत भूयसा यज्ञेनेति** । प्रजापतिर्भवान्तरेऽश्वमेधेनायजत । कल्पादौ तद्भावभावितः सन् तदपेक्षया **भूयसा यज्ञेना**श्वमेधेन भूयः पुनरपि **यजेये**ति स प्रजापति**रकामयत** । महत्कार्यकर्तृलोकवत् **सोऽश्राम्यत्** श्रान्तिमगमत् । **स तपोऽतप्यत** । एवं श्रान्तस्य तप्तस्य पूर्ववत् **यशो वीर्यमुदक्रामत्** इत्यर्थं श्रुतिः स्वयमेवाह—**प्राणा वै यशो वीर्यमिति** । चक्षुःप्राणानां यशोहेतुत्वात् । तेषु हि सत्सु यशो वीर्यं च भवति । न हि उत्क्रान्तप्राण उत्क्रान्तिं प्राप्तः प्राणः यशस्वी बलवान् भवति । तस्मादस्मिन् शरीरे प्राणा वै यशो वीर्यम् । प्रजापतेर्यशोवीर्यभूतप्राणेषूत्क्रान्तेषु **तत् शरीरं श्वयितुमु**च्छूनभावं गन्तु**मध्रियत** अमेध्यमभवत् । **तस्य** शरीरान्निर्गतस्य **तस्मिञ्छरीरे मन आसीत्** । यथा प्रेयोविषयं त्यक्त्वा दूरं गतस्यापि तद्विषयस्पर्शि मनो भवति तथेत्यर्थः ॥ ६ ॥

अश्वोत्पत्तिः अश्वमेधनिर्वचनं च

सोऽकामयत मेध्यं म इद९ स्यात् आत्मन्वी अनेन स्यामिति ततोऽश्वः समभवत् यदश्वत् तन्मेध्यमभूदिति तदेवाश्वमेधस्याश्वमेधत्वम् । एष ह वा अश्वमेधं वेद य एनमेवं वेद तमनवरुद्ध्यैवामन्यत त९ संवत्सरस्य परस्तादात्मन आलभत पशून् देवताभ्यः प्रत्यौहत् तस्मात् सर्वदेवत्यं प्रोक्षितं प्राजापत्यमालभन्ते । एष ह वा अश्वमेधो य एष तपति तस्य संवत्सर आत्मायमग्निरर्कस्तस्येमे लोका आत्मानस्तावेतौ अर्काश्वमेधौ सोपुनरेकैव देवता भवति मृत्युरेवाप पुनर्मृत्युं जयति नैनं मृत्युराप्नोति मृत्युरस्यात्मा भवति एतासां देवतानामेको भवति ॥ ७ ॥

स्वशरीरसंलग्नमनाः किमकरोत् ? इत्यत्राह—**स** इति । सोऽयं प्रजापतिः मे मम इदं शरीरं यज्ञार्हतया मेध्यं मेधार्हं स्यादित्यकामयत । किं तेन ? इत्यत

आह— **आत्मन्वीति**। **अनेन शरीरेणात्मवान् स्यामिति**। यद्वियोगात् गतयशोवीर्यं सत् अश्वत् अश्वयत् तत् पुनः प्रविवेश। **ततस्तस्मादश्वः समभवत्**। ततः साक्षादश्वनामा प्रजापतिरिति स्तूयते। स्वप्रवेशात् पुरा यदमेध्यं जातं स्वप्रवेशतस्तदेव **मेध्यमभूत्**। यस्मादेवं **तस्मादश्वमेधक्रतोरश्व-मेधत्वम्**। सोऽयं क्रतुः प्रजापतिरेवेति स्तूयते—"उषा वा अश्वस्य" इत्यादिना। तस्याश्वरूपप्राजापत्याग्नेः क्रतुफलत्वेन उपासनं विधातव्यमित्यारब्धम्। यः कश्चिदश्वमर्कञ्च यथावद्वेद स **एषोऽश्वमेधं वेद** नान्यः। कथमेतद्दर्शनं पशुविषयं? इत्यत्र "भूयसा यज्ञेन भूयो यजेय" इति कामयित्वा प्रजापतिः स्वात्मानमेव मेध्यपशुत्वेन विभाव्य पुनस्तं **पशुमनवरुध्यैव** अवरोधमकृत्वैव मुक्तप्रग्रहं **पशुममन्यत**ाचिन्तयदित्यर्थः। **स तं पशुं संवत्सरस्य परस्तादूर्ध्व-मात्मन आलभत** प्रजापतिदेवताकत्वेनेत्येतदालम्भनं **कृतवान्**। **ग्राम्यानारण्यांश्च पशून् यथादेवतं प्रत्यौहत्** विभागशः प्रतिगमितवान्। यथैवं प्रजापतिस्तथा-न्योऽप्युक्तप्रकारेणात्मानं मेध्यपशुं भावयित्वाहमेव सर्वस्वरूपः इतरे पशवो मदवयवभूताभ्य एवेति विद्यात्। अत एवेदानीं याज्ञिकाः **सर्वदेवत्यं प्राजापत्यं प्रोक्षितमालभन्ते**। **एष ह वाश्वमेधो य एष तपति** यः पशुसाधनोऽसौ क्रतुः स एष फलत्वेन निर्दिश्यते। य एष सविता तपति स्वतेजसा जगदवभासयति स एष ह वा अश्वमेधः। **तस्यास्य** क्रतुतत्फलात्मनः प्रजापतेरात्मा शरीरं **संवत्सरः** तस्य तन्निर्वर्त्यत्वात्। तस्य क्रत्वात्मनो**ऽयमग्निरर्कः** क्रतुसाधनभूतः। **तस्य** क्रतुचितार्कस्य **इमे त्रयो लोकाः** स्वावयवाः। तथा व्याख्यातं "तस्य प्राची दिक्" इत्यादिना। **तावग्न्यादित्यावर्काश्वमेधौ**। तत्र योऽर्कः पार्थिवोऽग्निः क्रतोरग्निसाध्यत्वात् तद्रूपेण निर्देशः। फलस्य क्रतुसाध्यत्वात् क्रतुरूपेण निर्देशः। इत्थं क्रतुफलभूतावग्न्यादित्यौ। **सोपुनर्भूय एकैव देवता भवति**। का सा देवता? **मृत्युरेव** पूर्वमप्येकैवासीत्। क्रियाफलसाधनभेदं पुरस्कृत्य "स त्रेधात्मानं व्यकुरुत" इति त्रिधा विभक्ता। पुनरपि सा क्रियानिर्वृ-त्त्युत्तरकाले एकैव देवता भवति। यः फलभूतो मृत्युः स एवाश्वमेध इत्यश्वमेधं मृत्युं चैकां देवतां वेद, अहमेव मृत्युरस्मि अश्वमेध एका देवता

मद्रूपाश्वाग्निसाध्येति यस्य बोधो जायते **सोऽप पुनर्मृत्युं जयति** सकृत् मृत्वा मरणाय पुनर्न जायत इत्यर्थः। पुनरेनं मृत्युराप्नुयादित्यत आह—**नैनं मृत्युराप्नोतीति**। कुतः? **मृत्युरस्यात्मैव भवति**। किञ्चायं मृत्युरेव सन् **एतासां देवतानामेको भवती**त्युपासनाफलमेतत् ॥ ७ ॥

इति द्वितीयं ब्राह्मणम्

तृतीयं उद्गीथब्राह्मणम्

प्राजापत्यानां देवासुराणां स्पर्धा

द्वया ह प्राजापत्या देवाश्चासुराश्च ततः कानीयसा एव देवा ज्यायसा असुराः त एषु लोकेष्वस्पर्धन्त ते ह देवा ऊचुः हन्त असुरान् यज्ञ उद्गीथेनात्ययामेति ॥ १ ॥

ज्ञानसहितकर्मणां परा गतिरुक्ता। अथ मृत्वात्मभावसाधनकर्मज्ञानोत्पादकोद्गीथब्राह्मणमारभ्यते---**द्वया हेति**। ज्ञानकर्मफलं मृत्युना एकत्वम्। उद्गीथस्य तद्भिन्नं फलं वक्तव्यमिति चेन्न; उद्गीथफलस्याग्न्यादित्यात्मभावत्वात्। "एतासामेव देवतानामेको भवति" इति पुरस्तादेवोक्तत्वात् न हि फलभेदोऽस्ति। मृत्युमतिक्रान्त इति श्रुतिविरोध इति चेन्न; मृत्योरतिक्रमणस्य पाप्मासङ्गविषयत्वात्। पाप्मासङ्गमृत्युः कीदृशः? कुतस्तदुत्पत्तिः? केन वा तदतिक्रमणं? इत्याद्यर्थप्रकाशनाय इयमाख्यायिका। केयं? **द्वया हे**त्यत्र हकारो द्विप्रकार इति वृत्तावद्योतकः वर्तमानप्रजापतेः पूर्ववृत्तद्योतकत्वात्। प्रजापतेरपत्यानि **प्राजापत्याः**। के ते? **देवाश्चासुराश्च** वागादिप्राणाः। तेषां देवासुरत्वं कथं? इत्यत्र ये शास्त्रविहितकर्मज्ञानद्योतनात् देवा भवन्ति त एव तद्विपरीताश्चेत् असुरा

भवन्ति। यतोऽशास्त्रीयप्रवृत्त्यारूढा असुराः ततः कनीयांस एव कानीयसाः—स्वार्थे वृद्धिः—अल्पा एव देवाः। ज्यायसा असुराः प्राणिनामशास्त्रप्रवृत्तिबाहुल्यात् ज्यायस्त्वम्। शास्त्रीयप्रवृत्तेः दुर्लभत्वात् कनीयस्त्वम्। इत्थं विरुद्धस्वभावा देवाश्चासुराश्च प्रजापतिशरीरस्थाः सन्तः त एषु लोकेष्वस्पर्धन्त शास्त्रीयाशास्त्रीयविषयेषु स्पर्धां कृतवन्तः। तेषां स्पर्धानिमित्तं किं? इत्यत्र—यदा देवाभिधानप्राणानां शास्त्रीयकर्मज्ञानरूपा वृत्तिरुदेति तदा दैवी वृत्तिरासुरीं ग्रसति। तदानीं देवानां जयः असुराणां पराजयो भवति। कदाचिदासुर्या दैवी वृत्तिरभिभूयते। तदासुराणां जयो देवानां पराजयो भवति। धर्माधर्मभूयस्त्वमेव तेषां जयाजयहेतुस्पर्धानिमित्तम्। यथोक्तधर्मोत्कर्षे प्रजापतित्वप्राप्तिः। तदपकर्षे स्थावरत्वाप्तिः। तदुभयसाम्ये मनुष्यत्वप्राप्तिः। असुराणां भूयस्त्वात् तैरभिभूता देवाः किं कृतवन्तः? इत्यत आह—त इति। असुरार्दितास्ते ह देवा ऊचुः। किमिति? हन्त इदानीं ज्योतिष्टोमेऽस्मिन् यज्ञे उद्गीथेन कर्मज्ञानाश्रयप्रणवेन असुरानत्ययाम अतिगच्छाम। असुरान् जित्वा शास्त्रप्रकाशितस्वस्वभावं प्रतिपद्यामह इत्यर्थः ॥ १ ॥

देवानां संभूय कथनम्

ते ह वाचमूचुः त्वं न उद्गायेति तथेति तेभ्यो वागुदगायत् यो वाचि भोगस्तं देवेभ्य आगायत् यत् कल्याणं वदति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यः स पाप्मा यदेवेदमप्रतिरूपं वदति स एव स पाप्मा ॥ २ ॥

ते देवाः संभूय वाचमूचुरित्याह—ते हेति। ते ह देवा वाचं वागभिमानिदेवतामूचुः। त्वं नोऽस्मभ्यं उद्गायेति। औद्गात्रकर्मणो वाङ्निर्वर्त्यत्वात्। एवं देवैरुक्ता वाक् तथेति तेभ्योऽर्थाय उदगायत् उद्गानं कृतवतीत्यर्थः। वाङ्निर्वर्त्यौद्गानकर्मविशेषः कः? इत्यत्र—यो निमित्तभूतायां वाचि वाग्देवतानिर्वर्त्यो भोगः तं भोगं देवेभ्योऽर्थायागायत्। तिसृषु पवमानेषु

तदवशिष्टेषु नवसु स्तोत्रेषु यत् वाचनिकमार्त्विज्यं कल्याणं वदति सुष्ठु वर्णानभिनिर्वर्तयति—सम्यग्वर्णोच्चारणस्य वाङ्निर्वर्त्यत्वात्—यत्सङ्घातोपकारकत्वेन वदनकार्यं तदात्मने मह्यमेवेति देवा मेनिरे। देवकृतस्वपराभवकृत्यमसुरास्ते विदुः। कथम्? ते देवा अनेन उद्गात्रास्मान् स्वाभाविकप्रवृत्तान् शास्त्रीयकर्मज्ञानगोचरज्योतिषा अत्येष्यन्तीति अतिगमिष्यन्तीति विज्ञाय तमुद्गातारमभिद्रुत्याभिगम्य स्वेन पाप्मनाविध्यन् अनृतेन संयोजितवन्तः। ततः पूर्वजन्मावस्थप्रजापतिवाचि क्षिप्तः स यः स पाप्मा यदेवेदमप्रतिरूपं शास्त्रप्रतिषिद्धमनृतमपि वदति स एव स पाप्मा। यतः प्रजापतिवागप्यनृतविद्धा ततस्तत्कार्यभूतप्रजापूगवाच्यपि तदनुवर्तते कार्यस्य कारणानुवृत्तेरित्यर्थः॥ २॥

घ्राणादीनामसामर्थ्ये मुख्यप्राणवरणम्

अथ ह प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः प्राण उदगायत् यः प्राणे भोगस्तं देवेभ्य आगायत् यत् कल्याणं जिघ्रति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यः स पाप्मा यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा॥ ३॥ अथ ह चक्षुरूचुः त्वं न उद्गायेति तथेति तेभ्यश्चक्षुरुदगायत् यश्चक्षुषि भोगस्तं देवेभ्य आगायत् यत्कल्याणं पश्यति तदात्मने ते विदुरनेन वै न उदात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यः स पाप्मा यदेवेदमप्रतिरूपं पश्यति स एव स पाप्मा॥ ४॥ अथ ह श्रोत्रमूचुः त्वं न उद्गायेति तथेति तेभ्यः श्रोत्रमुदगायत् यः श्रोत्रे भोगस्तं देवेभ्य आगायत् यत्कल्याणꣳ शृणोति तदात्मने ते विदुरनेन वै न उद्गात्रात्येष्य-

न्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यः स पाप्मा यदेवेदमप्रति-
रूपꣳ शृणोति स एव स पाप्मा ॥ ५ ॥ अथ ह मन ऊचुः त्वं न
उद्गायेति तथेति तेभ्यो मन उदगायत् यो मनसि भोगस्तं देवेभ्य
आगायत् यत् कल्याणꣳ संकल्पयति तदात्मने ते विदुरनेन वै न
उद्गात्रात्येष्यन्तीति तमभिद्रुत्य पाप्मनाविध्यन् स यः स पाप्मा
यदेवेदमप्रतिरूपꣳ संकल्पयति स एव स पाप्मा एवमु खल्वेता
देवताः पाप्मभिरुपासृजन् एवमेनाः पाप्मनाविध्यन् ॥ ६ ॥ अथ
ह इममासन्यं प्राणमूचुः त्वं न उद्गायेति तथेति तेभ्य एष प्राण
उदगायत् ते विदुरनेन वै न उद्गात्रात्येष्यन्तीति तमभिद्रुत्य
पाप्मनाविव्यत्स्यन् स यथाश्मानमृत्वा लोष्टो विध्वꣳसेत एवꣳ हैव
विध्वꣳसमाना विष्वञ्चो विनेशुस्ततो देवा अभवन् परा असुरा
भवत्यात्मना परास्य द्विषन् भ्रातृव्यो भवति य एवं वेद ॥ ७ ॥

यथा कल्याणवदनशीलां वाचमुद्गातृत्वेन वृत्वासुरसंबन्धतः परित्यजन्ति तथैव प्राणचक्षुःश्रोत्रमनसामुद्गीथनिर्वर्तकत्वेन निश्चित्यासुरसंबन्धत उद्गीथ-निर्वर्तनासामर्थ्यमवगम्य तत्यजुरित्याह—अथेत्यादिना। एवं वा प्राणचक्षुः-श्रोत्राद्युक्तासु देवतासु अनुक्तत्वगादिदेवतासु चासुरपाप्मभिः विद्धासु सतीषु देवाः किं कुर्वन्ति ? इत्यत्र मुख्यप्राणं स्वशरणं मत्वा तमुद्गातृत्वेन वव्रुरित्याह—**अथेति। अथ ह इममास्ये भवमासन्यं प्राणमूचुः—त्वं न उद्गायेति। तथेति** मुख्यप्राण उदगायदित्यादि समानम। वागादिवत् **तमभिद्रुत्य पाप्मनाविव्यत्स्यन्** दोषासंसर्गिणं मुख्यप्राणं वेधनं कर्तुमुद्युक्तास्तेऽसुरा वागादिवत एनं मत्वा संसिसृक्षमाणाः सन्तो विनेशुः स्वयमेव विनष्टा बभूवुः। कथमिव ? इत्यत्र दृष्टान्तमाह-—**स यथेति**। यथा लोके पांसुपिण्डःऽश्मानं

पाषाणं ऋत्वा प्राप्य स्वयमेव **विध्वंसेत** चूर्णीभवेत् **एवं हैव** असुरा **विध्वंसमाना विष्वञ्चो** नानागतयो **विनेशुः** विनष्टा बभूवुः। **ततः परं** मुख्यप्राणाश्रयबलात् वागादयो **देवा अभवन्** पुरासुरसंबन्धतः पिण्डमात्राभिमाना आसन्। ततस्त आसुरवियोगानन्तरं व्याविद्धपिण्डाभिमानाः सन्तः शास्त्रसमर्पितवागाद्यभिमाना बभूवुः। तत्प्रतिपक्षिणोऽसुराः **परा अभवन्नित्यनुवर्तते** विनष्टा इत्यर्थः। य एतामाख्यायिकारूपां श्रुतिं दृष्ट्वानेन क्रमेण वागादिदेवानासुरविद्धत्वेनापोह्य निःसपत्नं प्राणमात्मत्वेन उपगम्य पिण्डाभिमानं हित्वा वैराजपिण्डाभिमानिनं शास्त्रप्रकाशितं प्रजापतिं प्रतिपन्नो भवति तथैवायं यजमानः प्रजापत्यात्मना **भवति। परा चास्य** प्रजापतेः प्रतिपक्षभूतः पाप्मा **भ्रातृव्यो भवति** स्वात्मतिरस्करणहेतुत्वात्। स पाषाणक्षिप्तलोष्टवत् **पराभवति** विशीर्यत इत्यर्थः। **य एवं वेद** तस्य फलमेतत् ॥ ३–७ ॥

मुख्यप्राणस्य सशरीरकरणात्मत्वम्

ते होचुः क नु सोऽभूत् यो न इत्थमसक्त इति ? अयमास्येऽन्तरिति सोऽयास्य आङ्गिरसोऽङ्गानाꣳ हि रसः ॥ ८ ॥

योऽयं मुख्यप्राण इति ख्यातः स एव सशरीरकरणात्मेत्येतमर्थं श्रुतिराख्यायिकया दर्शयति—**ते होचुरिति**। ते ह प्राजापत्याः प्राणाः मुख्यप्राणप्रापितस्वस्वरूपाः सन्त ऊचुः। किमिति ? **क नु** इतिशब्दो वितर्कार्थः। **यो नोऽस्मानित्थमेवमसक्त** देवभावायासञ्जितवान् स्वात्मभावमुपगमितवान् क नु कस्मिन्नु **सोऽभूत** ? एवं लोके स्मरन्ति हि केनचिदुपकारिताः स्वोपकारिणम्। तदियत्तां विचारयमाणा देवास्तमात्मन्येव उपलब्धवन्तः। यथा लोको विचार्याध्यवस्यति तथा देवाः। **अयमास्येऽन्तरिति**। अस्य आस्याकाशान्तरुपलभ्यमानत्वात्। यस्मादेवं तस्मात् **स प्राण अयास्यो** हि विशेषानाश्रयत्वात् वागादीन् असक्त आसञ्जितवान्। अत **एवाङ्गिरसः**

कार्यकारणरूपाणामङ्गानां हि रसः सार आत्मेत्यर्थः । प्राणस्याङ्गरसत्वे तदपाये प्राणहानिः स्यादिति चेन्न ; प्राणस्याङ्गानाश्रयत्वात् । जाग्रदादौ वागादिसत्त्वे तद्रसत्वम । स्वापादौ तदभावे स्वात्मरसरूपेण प्राणोऽवशिष्यत इत्यर्थः ॥ ८ ॥

प्राणस्याङ्गिरसत्वेऽपि शुद्धत्वम्

सा वा एषा देवता दूर्नाम दूरꣳ ह्यस्या मृत्युः दूरꣳ ह वा अस्मात् मृत्युर्भवति य एवं वेद ॥ ९ ॥

प्राणस्याङ्गिरसत्वेऽङ्गसंपर्कादशुद्धता स्यादित्यत्र शुद्धो हि प्राण इत्याह— सेति । यमाप्य अश्मप्राप्तलोष्टवदसुरा विध्वस्तास्सेति स हि परामृश्यते । येयं वर्तमानशरीरस्था "अयमास्येऽन्तः" इति देवैरवधारिता सैषा देवता दूर्नाम दूरित्येवं ख्यापिता । तस्मादस्या विशुद्धिः प्रसिद्धा । दूर्नामत्वात् । कुतोऽस्य दूर्नामत्वम् ? यस्मादस्याः प्राणदेवताया दूरं दूरे हि मृत्युरासुरः पाप्मा । प्राणस्य तत्संश्लेषवैरल्यात् । तस्मात् प्राणस्य दूरित्येवं ख्यातिर्युज्यते । एवंविदः फलमुच्यते—दूरं ह वा अस्मात् मृत्युर्भवति विशुद्धिगुणोपेतप्राणोपासकस्येत्यर्थः ॥ ९ ॥

प्राणोपासकस्य विमृत्युत्वम्

सा वा एषा देवता एतासां देवतानां पाप्मानं मृत्युमपहत्य यत्रासां दिशामन्तस्तद्गमयांचकार तदासां पाप्मनो विन्यदधात् तस्मान्न जनमियात् नान्तमियात् नेत्पाप्मानं मृत्युमन्ववायानीति ॥

उपासनं नाम देहात्मप्रत्ययवत् देवतात्माभिमतिः । कथमेवंवित् विमृत्युर्भवति ? इत्यत आह—सेति । सा वा एषा देवता इत्युक्तार्थम् । एतासां वागादिदेवतानां स्वाभाविकाज्ञानप्रयुक्तं पाप्मानं मृत्युं केवलप्राणात्माभिमानतोऽपहत्य तदपहन्ता प्राणः विदुषः प्राणभावारूढत्वेन तद्दृष्ट्या मृत्युर्दूरं

गतो भवति । एवं विद्वद्देवतानां प्राप्मानमपहत्य किं पुनश्चकार ? इत्यत आह—**यत्रेति** । यत्र स्थित्वासां प्राच्यादिदिशामन्तोऽवसानं तत्र **गमयाञ्चकार** । दिशामनन्तत्वात् तदन्तगमनं कथं ? इत्यत्र दिशां श्रौतविज्ज्ञकल्पितत्वात् । तदितरदिशामन्तो देशान्तरमित्यर्थः । तत्तत्र गमयित्वासां देवतानां—**पाप्मन** इति द्वितीयाबहुवचनं—**विन्यदधात्** विविधन्यद्भावमधात् । प्राणाभिमानविकलान्यजनेषु तदेतत्पाप्मानं प्राणदेवता स्थापितवती । यतः पाप्मा इन्द्रियसंसर्गजः **तस्मात् तमन्यजनं नेयात्** । न हि तं संभाषणदर्शनादिभिः संसृज्येत । तत्संसर्गे पाप्मनायं संसर्गी स्यात् । पाप्माश्रयो हि सः । तज्जननिवासस्थानमेवान्तं दिगन्तशब्दवाच्यं **नेयात्** । प्राणात्मभावहीनो देशः सजनो वा विजनो वा भवतु । तत्प्रदेशवियोगः कार्यः । **नेत्** इति निपातः परिभवार्थः । इत्थंभूतजनसंसर्गे मृत्युमन्ववायानि अनुगच्छेयमिति भीतो **न जनमन्तं चेयादिति** पूर्वेण संबन्धः ॥ १० ॥

प्राणस्यापहतपाप्मत्वम्

सा वा एषा देवता एतासां देवतानां पाप्मानं मृत्युमपहत्य अथैना मृत्युमत्यवहत् ॥ ११ ॥

सा वा एषा देवता इति । सा वा एषा देवतेति पूर्ववत् । वागादीनामग्न्याद्यात्मत्वं प्राणात्मज्ञानकर्मसमुच्चयफलम् । **अथ** तेनैना **मृत्युमत्यवहत्** आध्यात्मिकादिपरिच्छेदकरो हि मृत्युः । प्राणात्मज्ञानेन सोऽपहतः । यत एवमतः प्राणोऽपहतपाप्मेत्यर्थः । एना देवताः प्रकृतमृत्युमतीत्यावहत् स्वं स्वमपरिच्छिन्नाग्न्यादिभावं प्रापयदित्यर्थः ॥ ११ ॥

प्राणेनाग्नेरपरिच्छिन्नत्वप्रापणम्

स वै वाचमेव प्रथमामत्यवहत् सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवत् सोऽयमग्निः परेण मृत्युमतिक्रान्तो दीप्यते ॥ १२ ॥

तत्कथं ? इत्यत्राह—स इति । स वै प्राणो वाचमेवोद्गीथकर्मणि इतर-करणापेक्षया प्रधानतः प्रथमामत्यवहत् मृत्युतोऽतिवहनं कृतवान् । तदा विमृत्यु वचः किंरूपं ? इत्यत्र—यदा वाक् मृत्युमत्यमुच्यत प्राणेन मोचिता तदा स्वयमेव सोऽग्निरभवत् । पुरापि वागग्निरेव मृत्युनावृता सती वागित्यभिधां गतेव भाता । पुनः स्वावारकमृत्य्वपगमतोऽग्निरेवाभवत् । सोऽयं परेण परस्मान्मृत्योरतिक्रान्तोऽग्निर्दीप्यते । मृत्युप्रतिबन्धतोऽध्यात्मवागात्मना परिच्छेद आसीत् । नेदानीमिव दीप्यते । इदानीं मृत्युवियोगान्निरावृतस्सन् दीप्यत इत्यर्थः ॥ १२ ॥

प्राणेन घ्राणादीनां स्वस्वभावेन प्रकाशनम्

अथ ह प्राणमत्यवहत् स यदा मृत्युमत्यमुच्यत स वायुरभवत् सोऽयं वायुः परेण मृत्युमतिक्रान्तः पवते ॥ १३ ॥ अथ चक्षुरत्यवहत् तद्यदा मृत्युमत्यमुच्यत स आदित्योऽभवत् सोऽसावादित्यः परेण मृत्युमतिक्रान्तस्तपति ॥ १४ ॥ अथ श्रोत्रमत्यवहत् तद्यदा मृत्युमत्यमुच्यत ता दिशोऽभवꣳस्ता इमा दिशः परेण मृत्युमतिक्रान्ताः ॥ १५ ॥ अथ मनोऽत्यवहत् तद्यदा मृत्युमत्यमुच्यत स चन्द्रमा अभवत् सोऽसौ चन्द्रः परेण मृत्युमतिक्रान्तो भाति एवꣳ ह वा एनमेषा देवता मृत्युमतिवहति य एवं वेद ॥ १६ ॥

प्राणेन विमृत्युपदं प्रापिता प्राणचक्षुःश्रोत्रमनआख्या देवता वाय्वादित्यदिक्चन्द्रप्राप्यस्वस्वभावतः प्रकाशन्त इत्याह—अथेत्यादिना । यथा पूर्वयजमानं वागाद्यग्न्यादिभावेन मृत्युमत्यवहत् तथैवं वर्तमानयजमानमपि ह वा एषा प्राणदेवता मृत्युमतिवहति । यो वागादिपञ्चकविशिष्टं प्राणं वेद सोऽतिमृत्युर्भवति "तं यथा यथोपासते तदेव भवति" इति श्रुतेः ॥ १३–१६ ॥

प्राणकृतमात्मार्थमागानं तत्फलञ्च

अथात्मनेऽन्नाद्यमागायत् यद्धि किंचान्नमद्यतेऽनेनैव तदद्यत इह प्रतितिष्ठति ॥ १७ ॥

प्राणस्य वागाद्यनुग्राहकत्वेन तत्कृतमात्मार्थमागानं तत्फलं च प्राणस्येत्याह—अथेति। **अथात्मन** आत्मार्थं यथा वागादिभिरागानं कृतं तथा मुख्योऽपि प्राणः सर्वप्राणसाधारणं प्राजापत्यफलमागानं कृत्वा त्रिषु पवमानेषु, अथानन्तरमवशिष्टनवस्तोत्रेष्वात्मने आत्मार्थमन्नं च तदद्यं चेत्य**न्नाद्यमागायत्**। तदन्नाद्यं प्राणेनागीतमित्यवगम्यते। तत्र हेतुः। हीति हेतौ। यत्किञ्चेति सामान्यान्नमात्रपरामर्शार्थः। यस्माल्लोके प्राणिभिः यत्किंचिदन्नमद्यते। अन इति प्राणस्याख्या प्रसिद्धा। **अनेन प्राणेनैव तदद्यत** इत्यर्थः। अनशब्दः सान्तश्चेत् शकटवाची। यस्त्वन्यः स्वरान्तः स प्राणपर्यायः। न केवलं प्राणेनाद्यते, किन्तु शरीराकारपरिणतेऽन्नाद्ये इह प्राणः **प्रतितिष्ठति**। तस्मादात्मनः प्रतिष्ठार्थमन्नाद्यमागीतं वागादिवदस्यापापविद्धत्वात्। वागादीनामन्नोपकरणत्वेनानेनैव तदद्यत इत्यवधारणमयुक्तमिति चेन्न; वागाद्युपकरणतायाः प्राणनिमित्तकत्वादवधारणं युक्तमेवेत्यर्थः॥ १७॥

वागादीनां प्राणद्वारकत्वं तद्वेदनफलं च

ते देवा अब्रुवन् एतावद्वा इदꣳ सर्वं यदन्नं तदात्मन आगासीः अनु नोऽस्मिन् अन्ने आभजस्वेति ते वै माभिसंविशतेति तथेति तꣳ समन्तं परिण्यविशन्त तस्मात् यदनेनान्नमत्ति तेनैतास्तृप्यन्ति एवꣳ ह वा एनꣳ स्वा अभिसंविशन्ति भर्ता स्वानाꣳ श्रेष्ठः पुर एता भवति अन्नादोऽधिपतिर्य एवं वेद य उ हैवंविदꣳ स्वेषु प्रति प्रतिबुभूषति न हैवालं भार्येभ्यो भवति अथ य एवैत-

मनु भवति यो वैतमनु भार्यान् बुभूर्षति स हैवालं भार्येभ्यो भवति ॥ १८ ॥

कथं वागादीनां प्राणद्वारकता ? इत्यत आह—**ते देवा** इति । ते वागादयो देवता **अब्रुवन्** । किमिति ? मुख्यप्राणचैतन्यमिदम**तावत्** । नातोऽधिकमस्ति । **वै** इति स्मरणार्थः । **इदं तत्सर्वमेतावदेव** । किं तत् ? लोके **यदन्नमद्यते** तत्सर्वमात्मने आत्मार्थ**मागासीः**रागीतवानसि अन्नागानेनात्मसात्कृतमित्यर्थः । वयमप्यन्नं विना स्थातुं नोत्सहामहे । **अतोऽनु** पश्चा**न्नोऽस्मानस्मिन्** स्वार्थे **अन्ने आभजस्व** आभजयस्व । णिचोऽश्रवणं छान्दसम् । अस्मानप्यन्नानुभागिनः कुरु । तद्वाक्यानुरूपं प्राण आह—यदि ते यूयमन्नार्थिनस्तदा **मा वै** मामेवा**भिसंविशत** । इत्येवमुक्तवति प्राणे **तथेति** तं प्राणं परि **समन्तात् न्यविशन्त**ाविशन्त । प्राणानुज्ञया एवं निविष्टानां देवतानां प्राणेनैवाद्यमानमन्नं तृप्तिकरं भवति । न हि वागादीनां स्वातन्त्र्येणान्नसंबन्धः । **तस्मादनेनैव** तदद्यत इत्यवधारणं युक्तमेव । "वागादयः प्राणाश्रयाः" इति वागाद्याश्रयणं प्राणं यो वेद तमप्येवंविदं **ह वै** वागादयः प्राणमिव **स्वा** ज्ञातयः **अभिसंविशन्ति** स ज्ञातीनामाश्रयणीयो भवति । **स्वानां** सन्निविष्टानां वागादीनामिव स्वान्नेन **भर्ता** भवति । तथा सर्वेषामपि **श्रेष्ठः** । यथा वागादीनां प्राणोऽग्रेसरस्तथा स्वानामयं **पुर** एता गन्ता **भवति** । **अन्नादः** अनामयावी **अधिपतिर्वा**गादीन् प्राणवदधिष्ठाय पालयिता स्वतन्त्रो भवति । इत्थं प्राणं **यो वेद** तस्यैतत् यथोक्तं फलं भवति । किंच **य एवं** प्राण**विदं प्रति** स्वज्ञातिमध्ये **प्रति** प्रातिकूल्येन **बुभूषति** प्रतिस्पर्धी भवितुमिच्छति सोऽयं प्राणप्रतिकूलासुरवत् **भार्येभ्यः** स्वेन भरणीयेभ्यो भर्तुं **न** पर्याप्तो **भवति** । अथ पुनर्**यः** स्वज्ञातिमध्ये **एतमेवं**विदं वागादयः प्राणमिव **अनु** अनुगतो **भवति**, यश्चैनमनुवर्तयन्नेव **भार्यान् बुभूर्षति** भर्तुमिच्छति, यथा वागादयः प्राणमनुसृत्यात्मबुभूर्षवः आसन् **स हैव भार्येभ्यो** भर्तुम**लं** पर्याप्तो **भवति** । नेतरः स्वतन्त्रः ॥ १८ ॥

प्राणस्याङ्गिरसत्वं तस्यैव उपास्यत्वं च

सोऽयास्य आङ्गिरसोऽङ्गानाꣳ हि रसः प्राणो वा अङ्गानाꣳ रसः प्राणो हि वा अङ्गानाꣳ रसः तस्मात् यस्मात्कस्माच्चाङ्गात् प्राण उत्क्रामति तदेव तच्छुष्यति एष हि वा अङ्गानाꣳ रसः ॥ १९ ॥

सर्वमेतत् प्राणज्ञानफलमुक्तम् । प्राणस्य संघातात्मनिदर्शनाय " सोऽयास्य आङ्गिरसः " इत्यादि आङ्गिरसत्वमभिहितम् । तत्र हेतुर्नोक्तः । तदर्थमिदमारभ्यते—स इति । **सोऽयास्य आङ्गिरस** इत्यादि **प्राणो वा अङ्गानां रस** इत्यन्तं व्याख्यातम् । तत् पुनः स्मारयति—**प्राणो हीति** । हिशब्दः प्रसिद्ध्यर्थः । प्राणस्याङ्गिरसत्वं प्रसिद्धमेतत् , न वागादीनाम् । तस्माद्युक्तं **प्राणो हीति** स्मरणम् । यस्मादवयवात् कस्मादनुक्तविशेषणात् **यस्मात्कस्मात्** यतः कुतश्चिच्च **अङ्गात्** शरीरावयवासाकल्यात् ततः **प्राण उत्क्रामति** तदङ्गं **शुष्यति** शोषमुपैति । **तस्मादेष हि वा अङ्गानां रस** इत्युपसंहारार्थः । अतः संघातात्मा प्राण इति सिद्धम् । यतः प्राणापाये मृतिः स्यादतः सर्वे प्राणिनः तेनैव जीवन्ति । तस्माद्वागादीनपास्य प्राण एव उपास्य इति समुदायार्थः ॥ १९ ॥

प्राणस्य ऋगात्मत्वं महीकरणं च

एष उ एव बृहस्पतिः वाक् वै बृहती तस्या एष पतिः तस्मादु बृहस्पतिः ॥ २० ॥

न केवलमयं सङ्घातात्मा किन्तु ऋग्यजुःसाम्नामपीति सर्वात्मकत्वेन प्राणं महीकरोति—**एष** इति । **एष उ एव** प्रकृतः आङ्गिरसः प्राणो **बृहस्पतिः** । तत्कथम् ? **वाग्वै बृहती** । बृहत्यां हि सर्वा ऋचोऽन्तर्भवन्तीति प्राणस्य

स्तुतत्वात् । "प्राणो वै बृहती प्राण ऋच इत्येव विद्यात्" इति श्रुतेः । ऋचां वागात्मकत्वेन प्राणेऽन्तर्भावो युक्तः । यत एष वाचो बृहत्याः पतिः तन्निर्वर्तकत्वात् । प्राणेन हि वाक् पाल्यते । न ह्यप्राणस्य शब्दोच्चारणसामर्थ्यमस्ति । तस्मादु प्राणो बृहस्पतिः । ऋगात्मायमित्यर्थः ॥ २० ॥

प्राणस्यैव यजुर्वेदत्वम्

एष उ एव ब्रह्मणस्पतिर्वाक् वै ब्रह्म तस्या एष पतिः तस्मादु ब्रह्मणस्पतिः ॥ २१ ॥

तथा यजुषामित्याह—एष इति । **एष उ एव ब्रह्मणस्पतिः** । **वाग्वै** यजुर्वेदवाच्यं **ब्रह्म** । **तस्या** वाचो यजुषो ब्रह्मण **एष पतिः** । **तस्मादु ब्रह्मणस्पतिः** ॥ २१ ॥

प्राणस्यैव सामत्वम्

एष उ एव साम वाक् वै साम एष सा च अमश्चेति तत्साम्नः सामत्वं यद्वेव समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण तस्माद्वेव सामाश्नुते साम्नः सायुज्यꣳ सलोकतां जयति य एवमेतत्साम वेद ॥ २२ ॥

ऋग्यजुःसामोद्गीथशब्दानां प्राणविशेषणत्वेन सामाप्येष एवेत्याह—एष इति । **एष उ एव साम** । तत्कथम्? **वाग्वै साम** स्त्रीलिंगसामान्यं सेतिशब्दार्थः । पुंलिंगसामान्यं अमशब्दार्थः । **एष** एव प्राणः **सा च अमश्चेति** । "केन पौंस्यानि नामान्याप्नोषि? प्राणेनेति ब्रूयात् केन स्त्रीनामानि इति? वाचा इति" इत्यादिश्रुतेः । वाक्प्राणनिर्वर्त्यस्वरादिसमुदायमात्रगीतिर्हि साम । यत एवमतो न प्राणव्यतिरेकेण साम नामास्ति । किञ्चित्स्वरवर्णादेरपि प्राणनिर्वर्त्यत्वात् । यस्माद्वाक् प्राणात्मिकेयं सा च अमश्चेति द्विरुक्तिः तस्मात् स्वरादि-

समुदायगीतिरूपसाम्नः **सामत्वमिति** भुवि प्रगीतम् । यत् उ एव **यद्वेव** वक्ष्यमाणप्रकारेण तुल्यस्तस्माद्वाव सामेति वक्ष्यमाणेन संबन्धः । केन प्राणस्य समत्वं ? इत्यत्र **प्लुषिणा** पुत्तिकादिशरीरेण परमाणुतुल्येन **समः** । तथा **मशकनाग**हस्तिशरीरेण **समः** । तथा **एभिः त्रिभिः लोकैः** त्रैलोक्यशरीर-विराजापि **समः** । हैरण्यगर्भरूपेणापि **समः** । पुत्तिकादिहिरण्यगर्भान्तेना**नेन सर्वेण सम** इति प्राणस्य समत्वम् । न हि शरीरमात्रपरिमाणता सर्वत्र चित्रपटवत् संकोचविकासता वा समत्वं भवति । न ह्याकाशवत् सर्वानुस्यूतस्य शरीरमात्रपरिमाणता सङ्कोचविकासता वा सेद्धुं पारयति । "त एते सर्व एव समाः सर्वेऽनन्ताः" इति श्रुतेः । ईशभावमापन्नप्राणस्यामूर्तत्वेन सर्व-समत्वम् । "प्राणोऽस्मि प्रज्ञात्मा" इतिश्रुतिप्रकटितसमभावमापन्नं सामाख्यं प्राणं यो वेद तस्यैतत् फलमुच्यते । यस्मात् सा च अमश्चेति प्राणः सर्वसमः **तस्मात्** उपासकोऽपि **उ एव साम अश्नुते** व्याप्नोति । किंच **साम्नः** प्राणस्य **सायुज्यं** सयुग्भावं **सालोक्यं** समानलोकतां **जयति** प्राप्नोति । **य एवमेतत् साम वेद** आप्राणमुपास्ते स यथोक्तफलभाक् भवतीत्यर्थः ॥ २२ ॥

प्राणस्य उद्गीथशब्दवाच्यत्वमपि

एष उ वा उद्गीथः प्राणो वा उत् प्राणेन हीद१ँ सर्व-मुत्तब्धं वागेव गीथा उच्च गीथा चेति स उद्गीथः ॥ २३ ॥

तथा उद्गीथशब्दवाच्योऽपि प्राण इत्याह—एष इति । **एष उ वा** प्राण एव सामावयवभक्तिविशेषरूपेण **उद्गीथः** । तत्कथम् ? **प्राणो वा उत्** । **प्राणेन हि** यस्मादिदं **सर्वं** जगदुत्तब्धं ऊर्ध्वं स्तम्भितं विधृतमित्यर्थः । प्राण-गुणाभिधायकोऽयमुच्छब्दः । तस्मात् उत् प्राणः । **वागेव गीथा** शब्दवै-शिष्ट्यात् । उद्गीथभक्तेः शब्दार्थत्वात् । न हि शब्दव्यतिरेकेण उद्गीथभक्ति-रुपलभ्यते । तस्मात् वागेव गीथेत्यवधारणं युक्तम् । **उच्च** प्राणो **गीथा चे**त्युभयं प्राणतन्त्रतया एकेन शब्देनाभिधीयते—**उद्गीथ** इति ॥ २३ ॥

उद्गीथार्थदार्ढ्यार्थमाख्यायिकाकथनम्

तद्धापि ब्रह्मदत्तश्चैकितानेयो राजानं भक्षयन् उवाचायं त्यस्य राजा मूर्धानं विपातयतात् यदितोऽयास्य आङ्गिरसोऽन्येन उदगायदिति वाचा च ह्येव स प्राणेन च उदगायदिति ॥ २४ ॥

उद्गीथार्थदार्ढ्यार्थं इयमाख्यायिकारभ्यते—तद्धापीति। **तत्** तत्र एतस्मिन् उक्तार्थे आख्यायिकापि श्रूयते **ह** स्म। नामतोऽयं **ब्रह्मदत्तः** चिकितानस्यापत्यं चैकितानः। तदपत्यं **चैकितानेयो** यज्ञे **भक्षयन्** सन् सोमं **राजानमुवाच**। किमिति? यद्यहमनृतवादी स्यां तदा चमसस्थो मया भक्ष्यमाणो **राजा त्यस्य** तस्य ममानृतवादिनो **मूर्धानं** शिरो **विपातयतात्** विस्पष्टं पातयतु। कथमनृतवादित्वम्? **यत्** यदि **इतोऽ**स्मात् प्रकृतात् वाक्संयुक्तप्राणात् **अयास्यो** मुख्यप्राणाभिधायकेनायास्य **आङ्गिरस**शब्देनाभिधीयते। विश्वसृजां सत्रे उद्गाता यः **सोऽन्येन** वाक्प्राणातिरेकेण **उदगायत्** उद्गानं कृतवान्। ततोऽहमनृतवादी स्याम्। तस्य देवताविपरीतप्रतिपत्तुः मम मूर्धानं विपातयतु इत्येवं शपथं चकारेति यत् तत् ज्ञानदार्ढ्यायेति। तमिममाख्यायिकानिर्धारितार्थं श्रुतिरुपसंहरति—वाचेति। प्राणप्रधानया **वाचा च प्राणेन च सोऽ**यास्य आङ्गिरस उद्गाता **उदगायदि**त्येषोऽर्थः शपथेन निर्धारित इत्यर्थः ॥ २४ ॥

साम्नः सुस्वरवत्त्वमेव धनम्

तस्य हैतस्य साम्नो यः स्वं वेद भवति हास्य स्वं तस्य वै स्वर एव स्वं तस्मादार्त्विज्यं करिष्यन् वाचि स्वरमिच्छेत तया वाचा स्वरसंपन्नया आर्त्विज्यं कुर्यात् तस्मात् यज्ञे स्वरवन्तं दिदृक्षन्ते एव अथो यस्य स्वं भवति भवति हास्य स्वं य एवमेतत् साम्नः स्वं वेद ॥ २५ ॥

एवं सामविदः फलं प्रकटयति—तस्येति। **तस्य ह** प्रकृतस्य **एतस्य** मुख्यप्राणस्य **साम्नो यः स्वं** धनं **वेद** तस्यास्य **भवति ह स्वं** इति फलेनाभिमुखीकृत्य, साम्नः स्वं किं ? इत्याकांक्षायां **स्वर** इति कण्ठगतमाधुर्यम्। तदेवास्य **स्वं** भूषणम्। यस्मादेवं **तस्मादार्त्विज्यं** ऋत्विक्कर्म उद्गानं **करिष्यन् वाचि** वागाश्रितं **स्वरमिच्छेत**। उद्गाता साम्नः स्वरवत्तामिच्छेत्। इदं तु प्रासङ्गिकं विधीयते। साम्नः सौस्वर्येण स्वरवत्प्रत्यये कर्तव्ये इच्छामात्रेण सौस्वर्यं न भवति, किन्तु दन्तधावनघृतपानादिसामर्थ्यात् कर्तव्यमित्यर्थः। एवं संस्कृतया **तया वाचा स्वरसंपन्नया आर्त्विज्यं कुर्यात्**। यस्मात् साम्नः स्वभूतः स्वरः तेन हि भूषितं साम। **तस्मात् यज्ञे स्वरवन्तमुद्गातारं दिदृक्षन्ते** धनिनमिव लौकिकाः तं द्रष्टुमिच्छन्त्येव। **अथो** अपि **यस्य स्वं** धनं **भवति** तं दिदृक्षन्त इति लोके प्रसिद्धम्। फलमुपसंहरति—**भवतीति। य एवमेतत् साम्नः स्वं वेद भवति हास्य स्वमिति** ॥ २५ ॥

तस्यैव सुवर्णवैशिष्ट्यकथनम्

तस्य हैतस्य साम्नो यः सुवर्णं वेद भवति हास्य सुवर्णं तस्य वै स्वर एव सुवर्णं भवति हास्य सुवर्णं य एवमेतत्साम्नः सुवर्णं वेद ॥ २६ ॥

पूर्वोक्तसौस्वर्यं कण्ठगतमाधुर्यं तस्यैव सुवर्णवैशिष्ट्यमुच्यते—तस्येति। **तस्य ह एतस्ये**त्यादि समानम्। स्वरसुवर्णयोः शब्दसामान्यात्। लौकिकमेव **सुवर्णं** गुणविज्ञानफलम्। पूर्ववत् सर्वम् ॥ २६ ॥

तस्यैव प्रतिष्ठागुणवदुपासनम्

तस्य हैतस्य साम्नो यः प्रतिष्ठां वेद प्रति ह तिष्ठति तस्य वै वागेव प्रतिष्ठा वाचि हि खल्वेष एतत्प्राणः प्रतिष्ठितो गीयतेऽन्न इत्यु हैक आहुः ॥ २७ ॥

तस्यैव प्रतिष्ठागुणवदुपासनमाह—तस्येति। **तस्य हैतस्य साम्नो यः** प्रतितिष्ठत्यस्मिन्निति प्रतिष्ठा, तां **प्रतिष्ठां** साम्नो गुणधिया **वेद** सोऽयं विद्वान् **प्रति तिष्ठति**। "तं यथा यथोपासते तदेव भवति" इति श्रुतेः तद्गुणत्वं युक्तम्। का प्रतिष्ठा? इत्यत आह—**तस्येति**। **तस्य** साम्नो जिह्वामूलादिस्थानानां वागित्याख्या। सा **वागेव प्रतिष्ठा**। **एष प्राणो वाचि प्रतिष्ठितः** सन् एतद्गानं **गीयते**। तस्मात् साम्नः प्रतिष्ठिता वाक्। **एक एवमाहुः अन्ने** प्रतिष्ठितो गीयत **इति**। वाचि प्रतिष्ठितो गीयत इत्यपरे। वाग्वा प्रतिष्ठा अन्नं वेति। एकीयपक्षस्याप्यनिन्दितत्वात्। येन केन वा विकल्पेन प्रतिष्ठागुणविज्ञानं कुर्यात् ॥ २७ ॥

एवंविदे जपकर्मविधानम्

अथातः पवमानानामेवाभ्यारोहः स वै खलु प्रस्तोता साम प्रस्तौति स यत्र प्रस्तुयात् तदेतानि जपेत् असतो मा सद्गमय तमसो मा ज्योतिर्गमय मृत्योर्माऽमृतं गमयेति स यदाह असतो मा सद्गमयेति मृत्युर्वा असत् सदमृतं मृत्योर्माऽमृतं गमय अमृतं मा कुर्वित्येव एतदाह तमसो मा ज्योतिर्गमयेति मृत्युर्वै तमो ज्योतिरमृतं मृत्योर्माऽमृतं गमयामृतं मा कुर्वित्येव एतदाह मृत्योर्माऽमृतं गमयेति नात्र तिरोहितमिवास्ति। अथ यानीतराणि स्तोत्राणि तेष्वात्मनेऽन्नाद्यमागायेत् तस्मादु तेषु वरं वृणीत यं कामं कामयेत त१ँ स एष एवंविदुद्गातात्मने वा यजमानाय वा यं कामं कामयते तमागायति तद्धैतल्लोकजिदेव न हैवालोक्यताया आशास्ति य एवमेतत् साम वेद ॥ २८ ॥

एवंविदे जपकर्म विधित्सन्नाह—**अथेति**। वाक् प्रतिष्ठा अन्नं प्रतिष्ठेति यद्विज्ञानवतो जपकर्मण्यधिकारः तदर्थं जपकर्म विधित्स्यते। **अथानन्तरं** यतो विदुषा प्रयुज्यमानं जपकर्म तदभ्यारोहफलदं **अतस्तद्विधीयते**। तस्य उद्गीथसंबन्धात् **पवमानानामिति** वचनात्। त्रिष्वपि पवमानेषु कर्तव्यतायां प्राप्तायां पुनः कालसंकोचनं करोति। **स वै खलु प्रस्तोता साम प्रस्तौति। स यत्र** यस्मिन् काले साम **प्रस्तुयात्** तस्मिन् काले **एतानि जपेत्। अभ्यारोह** इत्यस्याख्या स्यात्। अनेन जपकर्मणा देवभावमाभिमुख्येन अभ्यारोहतीत्यभ्यारोहः। एतानीति बहुवचनात् त्रीणि यजूंषि ब्राह्मणोत्पन्नानि। स्वरस्तु यथापठित एव। मन्त्रो मौनं जपकर्म चेत्येतानि तानि यजूंषि। **असतो मा सद्गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मा अमृतं गमय इति**। मन्त्रत्रयार्थस्य तिरोहितवद्भानात् स मन्त्रो यदाह तदर्थं ब्राह्मणं व्याचष्टे—**मृत्युरिति**। स्वाभाविककर्मज्ञानाश्रयो **मृत्युरसत्**। तस्यैवाधोगतिहेतुत्वात्। असत्त्वं सच्छास्त्रीयधर्मविज्ञानाश्रय**ममृतं सत्** अमरणहेतुत्वात्। तस्मादसतः कर्मणोऽज्ञानात् शास्त्रीयकर्मविज्ञाने गमय देवभावसाधनात्मभावमापादयेति। वाक्यार्थस्तु **अमृतं मां कुर्विति एवैतदाहे**ति। तथा **तमसो मा ज्योतिर्गमये**त्यत्र **मृत्युर्वै तमः**। तस्य स्वाज्ञानावृतिरूपत्वेन मरणहेतुत्वात् तमसो मृत्युत्वम्। **ज्योतिरमृतं** देवतारूपस्य ज्योतिस्स्वरूपत्वेनामृतस्वरूपत्वात्। तमसो मा ज्योतिर्गमयेति पूर्ववत्। **मृत्योर्मा अमृतं गमयेति। अमृतममृत्युं** मा मां **कुर्वित्येवैतदाह**। फलभूतप्राजापत्यभावमापादयेत्यर्थः। पूर्वमन्त्रः साधनपरः। द्वितीयः साध्यपरः। तृतीयः तयोः समुच्चयपरः। **न हि** पूर्वमन्त्रयोरिव तृतीयमन्त्रे **तिरोहितार्थोऽस्ति** यथाश्रुतार्थत्वात्। **अथानन्तरं यानीतराण्यव**शिष्टानि **स्तोत्राणि** प्राणवित् उद्गाता प्राणभूतः **तेष्वात्मनेऽन्नाद्यमागायेत्**। यस्मात् स एष उद्गाता यथोक्तकाममागातुं समर्थः **तस्मात्** यजमानप्रयुज्यमानस्तोत्रेषु **उ वरं वृणीत**। यजमानो **यं कामं कामयेत** उद्गाता तं वरं वृणीत। यस्मादेवंविदुद्गाता **आत्मने वा यजमानाय वा यं कामं कामयते तमागायति** गानेन तं साधयत्येव। इत्थं ज्ञानकर्मभ्यां प्राणभावापत्ति-

रुक्ता । न तत्राशङ्कास्ति । कर्मापाये तदापत्तिर्भवति न वेत्याशङ्कायां तत्परिहार उच्यते— **तद्धैतल्लोकजिदेवेति** । तदेतत् केवलप्राणदर्शनं लोकजिदेव स्वेप्सितलोकगमकत्वात् । **न हैवालोक्यतायै** अलोकत्वाय **आशा** आशंसनं प्रार्थनं **नैवास्ति** । न हि प्राणात्माविष्टाभिमानस्य तत्प्राप्त्याशङ्का भवति । न हि ग्रामस्थोऽरण्यस्थवत् कदा ग्रामं एमि ? इत्याकाङ्क्षते तद्वदित्यर्थः । **यो** व्याविद्धपाप्मा यस्त्वासुरपाप्मभ्यो वागादिपञ्चकं मोचयित्वाग्न्यादिभावमनीनयत् यः सर्वभूतानामाङ्गिरसः य ऋग्यजुःसामोद्गीथाश्रय आत्मा यः साम्नो भूषणं सौस्वर्यं ततोऽप्यन्तरतरं सौवर्ण्यं यो वागन्नादिप्रतिष्ठागुणः यः पुत्तिकादिशरीरेष्वमूर्तभावेन समतया व्याप्तः **एवमेतत्** यथोक्तलक्षणं **साम** प्राणमनिर्धारितमहिमानं अयमहमस्मीति **वेद** उपास्ते तस्य तद्भावापत्तिरेव परमफलमित्यर्थः ॥ २८ ॥

चतुर्थं पुरुषविधब्राह्मणम्

प्रजापतेः स्वातन्त्र्यादिविभूतिप्रकटनम्

आत्मैवेदमग्र आसीत् पुरुषविधः सोऽनुवीक्ष्य नान्यदात्मनोऽपश्यत् सोऽहमस्मीत्यग्रे व्याहरत् ततोऽहंनामाभवत् तस्मादप्येतर्हि आमन्त्रितोऽहमयमित्येवाग्र उक्त्वा अथान्यन्नाम प्रब्रूते यदस्य भवति स यत्पूर्वोऽस्मात् सर्वस्मात् सर्वान् पाप्मन औषत् तस्मात् पुरुष ओषति ह वै स तं योऽस्मात्पूर्वो बुभूषति य एवं वेद ॥ १ ॥

समुच्चितज्ञानकर्मभ्यां प्राजापत्याप्तिरुक्ता । "तद्धैतल्लोकजिदेव" इत्यादिना केवलप्राणदर्शिनोऽपि तदाप्तिरभिहिता । इदानीं फलभूतप्रजापतेः जगत्सृष्टिस्थिति-

संहारेषु स्वातन्त्र्यादिविभूतिप्रकटनपूर्वकं वैदिकज्ञानकर्मणोः फलोत्कर्षप्रकटनाय इदं ब्राह्मणमारभ्यते—**आत्मैवेदमिति**। आत्मैव असावेव प्रजापतिस्तस्य प्रथमजत्वेन ज्ञानकर्मसमुच्चयफलरूपत्वात्। तथाविधात्मैवेदं नानाविधशरीरभेदजातं शरीरान्तरोत्पत्तेः प्रागग्रे प्राजापत्यशरीराविभक्तमासीत्। पुरुषाकारशिरःपाण्यादिमत्त्वात्। **सोऽयं पुरुषविधो** विराट् प्रथमशरीर्यनुवीक्ष्य स्वात्मनोऽतिरिक्तं **नापश्यत्** न ददर्श। सर्वमात्मानमेवापश्यत्। **सोऽहं** सर्वात्माहमस्मीत्यग्रे **व्याहरत्**। ततोऽग्रे स्वात्मानमेवाहमित्यभ्यधात्। तस्मादहंनामाभवत्। यस्मात् कारणे प्रजापतावेवं वृत्तं **तस्मात्** तत्कार्यभूतेषु प्राणिषु **एतर्हि** एतस्मिन् काले स्वयमामन्त्रितः कस्त्वं ? इत्युक्तः सन् **अयमहमस्मी-त्येवाग्र उक्त्वा** कारणात्माभिधानेनाग्रे स्वात्मानमभिधाय पुनर्विशेषाकाङ्क्षायामन्यन्नाम प्रब्रूते। अथानन्तरं देवदत्तो यज्ञदत्त इत्यादि कथयति। यन्मातापितृकृतं तदेव कथयति। स भवान्तरे ज्ञानकर्मसाधनदशायां प्राजापत्यप्रतिपित्सूनां प्रथमस्सन् **अस्मात्सर्वस्मात्** प्रजापतित्वप्रतिपित्सुसमुदायात् पूर्वमेव प्राजापत्याप्तिप्रतिबन्धकपाप्मन **औषत्** अदहत्। यस्मादेवं तस्मात् पूर्व औषदिति पुरुषः। स्वाप्तिप्रतिबन्धकौषणात **पुरुषः** प्रजापतिरभवत्। एवमन्योऽपि कर्मज्ञानाग्निना केवलज्ञानाग्निना वा सर्वान् पाप्मन **ओषति** भस्मीकरोति। **योऽयमस्माद्विदुषः पूर्वः** प्रजापतित्वं **बुभूषति** स तं दर्शयति। **योऽयं** ज्ञानकर्मप्रभावतो **वेद** स प्रजापतिरेव भवतीत्यर्थः ॥ १ ॥

प्राजापत्यप्रबोधं विना संसारदुःखस्यानतिक्रमणम्

सोऽबिभेत् तस्मादेकाकी बिभेति स हायमीक्षांचक्रे यन्मदन्यन्नास्ति कस्मान्नु बिभेमीति तत एवास्य भयं वीयाय कस्माद्धि अभेष्यत द्वितीयाद्वै भयं भवति ॥ २ ॥

इत्थं प्राजापत्यप्रबोधं विना संसारदुःखं नातिक्रामतीति इममर्थं दर्शयति—स इति। **सोऽयं** प्रथमशरीरी **अबिभेत्** अस्मदादिवत् भीतवान्। स्वनाशहेतु-

विपरीतदर्शनादित्यर्थः। यस्मादेवं तस्मात् सामान्यादेकाकी बिभेति। सोऽयं प्रजापतिः स्वभीनिरसनहेतु यथाभूतात्मदर्शनमीक्षांचक्रे ह स्म। तत्कथं? इत्यत्र—यन्मदन्यत् भयकारणं नास्ति स्वात्मनाशहेत्वभावे कस्मान्नु बिभेमि? इति। तत एवास्य प्रजापतेर्भयं वीयाय यथाभूतात्मदर्शनात् विस्पष्टं भयमपगतवत्। भयं स्वाज्ञाननिमित्तं, स्वज्ञाने तदनुपपन्नमित्याह—कस्माद्धि अभेष्यत्? इति। भयहेतुस्वातिरिक्तवस्त्वभावात्। यतो द्वितीयाद्वै भयं भवति। द्वितीयस्याविद्यामात्रत्वेन भयहेतुमोहो नास्तीत्यत्र—

तत्र को मोहः कः शोक एकत्वमनुपश्यतः।

इति श्रुतेः॥ २॥

प्रजापतेः मिथुनीभावः मनुष्यसृष्टिश्च

स वै नैव रेमे तस्मादेकाकी न रमते स द्वितीयमैच्छत् स हैतावानास यथा स्त्रीपुमाꣳसौ संपरिष्वक्तौ स इममेवात्मानं द्वेधापातयत् ततः पतिश्च पत्नी चाभवतां तस्मादिदमर्धबृगलमिव स्वः इति ह स्माह याज्ञवल्क्यः तस्मादयमाकाशः स्त्रिया पूर्यत एव ताꣳ समभवत् ततो मनुष्या अजायन्त॥ ३॥

प्रजापतेः स्वदृष्ट्याद्वयत्वेऽपि बहुभवननिमित्तमेकात्मत्वेन रतिरस्य जातेत्याह—स वा इति। लोकदृष्ट्या स वै प्रजापतिः आत्मरतिरपि सन् स्वमात्रे नैव रेमे लोकवदरत्याविष्टोऽभूदित्यर्थः। यस्मादेवं तस्मादिदानीमप्येकाकी न रमते। रतिर्नाम इष्टार्थसंयोगजा क्रिया। तद्विपरीतेयमरतिः। तदपनोदनाय स द्वितीयं स्त्रीवस्तु ऐच्छत् गर्धिमकरोत। तस्य स्त्रीविषयेच्छया तया परिष्वक्तजनवत् तद्विषयभावो बभूव। स हैतावानास एतत्परिमाणवान् बभूव। तत्र दृष्टान्तमाह—यथेति। यथा लोकेऽरत्यपनोदनाय स्त्रीपुमांसौ संपरिष्वक्तौ यत्परिमाणौ स्यातां तथा तत्परिमाणो बभूव। तदानीं स्वातिरिक्त-

जनाभावात् **स** प्रजापतिः **एकमेवात्मानं द्वेधापातयत्** आपातितवान्। ततस्तस्मात् पातनात् **पतिश्च पत्नी चाभवताम्। तस्मादिदं** शरीरमात्मनोऽर्धं च तत् बृगलं विदलं **चेत्यर्धबृगलमिव** कार्यार्थत्वान्न वस्तुनः स्वात्मनोऽर्धबृगलत्वमस्तीत्यत्र **ह स्माह याज्ञवल्क्यः** यज्ञवल्कस्यापत्यम्। **यस्मादयं पुरुषोऽर्ध आकाशः** स्त्र्यर्धशून्यः पुनरुद्वहनेन **तस्मात् पूर्यते**। स्त्र्यर्धेन पुनः संपुटीकरणेनेव विदलार्धरूपा या **तां** मन्वाख्यः स प्रजापतिरात्मनो दुहितरं शतरूपाख्यां पत्नीत्वेन **समभवत्** मिथुनीभावमुपगतवान्। **ततस्तस्मा**दुपगमनात् **मनुष्या अजायन्त**। ततः प्रभृति मनुष्यसृष्टिरित्यर्थः ॥ ३ ॥

प्रजापतिना नानाविधसृष्टिकथनम्

सो हेयमीक्षांचक्रे कथं नु मात्मान एव जनयित्वा संभवति ? हन्त तिरोऽसानीति सा गौरभवत् ऋषभ इतरस्ताᳵं समेवाभवत् ततो गावोऽजायन्त वडवा इतराभवदश्ववृष इतरो गर्दभी इतरा गर्दभ इतरस्ताᳵं समेवाभवत् तत एकशफमजायत अजा इतराभवत् बस्त इतरोऽविरितरा मेष इतरस्ताᳵं समेवाभवत् ततोऽजावयोऽजायन्त एवमेव यदिदं किंच मिथुनमापिपीलिकाभ्यस्तत्सर्वमसृजत ॥ ४ ॥

सेयं शतरूपा कथं प्रजापतिर्मां जनयित्वा श्रुतिस्मृतिनिषिद्धाचरणं कृतवान्? इति जुगुप्सया स्वयं तिरोभूत्वा गवादिबहुरूपतामियात्। तदाशये सोऽपि वृषभादिबहुरूपतामियात्। ततो नानाविधसृष्टिरासीदित्याह— सेति। **सा उ ह इयं सो हेयं** शतरूपा दुहितृगमनप्रतिषेधमनुस्मरन्ती सती **ईक्षाञ्चक्रे। कथन्नु मामात्मनो जनयित्वायं संभवत्युपगच्छति?** निर्घृणोऽयं भाति। तथापि **हन्त** इदानीमहं जात्यन्तरेणात्मानं **तिरोऽसानि** स्वात्मानं तिरस्कृता भवामि इत्येवमीक्षित्वा **सा गौरभवत्**। तस्या उत्पाद्यप्राणिकर्मभिश्चोद्यमानत्वात्। तदानीमि**तर ऋषभो** भूत्वा **तां समेवाभव**दित्यादि पूर्ववत्। **ततस्ताभ्यां**

गावोऽजायन्त । तथा **बडबा इतराभवत्** । **अश्ववृष इतरः** । **गर्दभी इतरा** । **गर्दभ इतरः** । तत्र बडबाश्ववृषादीनां समागमात् **ततोऽश्वाश्वतरगर्दभाख्यं त्रयमेकशफं खुरमजायत** । तथा **अजा इतराभवत्** । **बस्तश्छाग इतरः** । तथा **अविरितरा मेष इतरः तां समेवाभवत्** । **ततोऽजाश्च** अवयश्चा- जावयः **अजायन्त** । **एवमेव यदिदं किञ्च मिथुनं** स्त्रीपुरुषलक्षणं द्वन्द्वं **आपिपीलिकाभ्यः** । स ह्यानेन न्यायेन **तत् सर्वमसृजत** । स एवं प्रजापतिः सर्वमिदं जगत्सृष्ट्वा कृतकृत्यवदभवदित्यर्थः ॥ ४ ॥

स्रष्टुः तस्य कृतकृत्यताकथनम्

सोऽवेदहं वाव सृष्टिरस्मि अहꣳ हीदꣳ सर्वमसृक्षीति ततः सृष्टिरभवत् सृष्ट्याꣳ हास्यैतस्यां भवति य एवं वेद ॥ ५ ॥

तस्य कृतकृत्यता कथं ? इत्यत आह—**सोऽवेदिति** । **सोऽयं** प्रजापति- रहमेव सृष्टं जगदस्मीत्यवेत् । मत्सृष्टजगतो मदभिन्नत्वादहमेव इदमस्मि । न हि तन्मत्तोऽतिरिच्यते । यतो**ऽहं सर्वं** जगद**सृक्षि** सृष्टवानस्मि तस्मादित्यर्थः । यस्मादयं सृष्टिमात्मत्वेनाभ्यधात् तस्मात् **तत्सृष्टिरभवत्** । **य एवं** प्रजापति- वत् कृत्स्नं जगदहमस्मीति वेद सोऽयं ह्यस्य प्रजापतेरिव **सृष्ट्यामेतस्यां** एतस्मिन् जगति प्रजापतिवत् स्रष्टा **भवति** प्रजापतिरेव स भवतीत्यर्थः ॥ ५ ॥

प्रजापतेरतिसृष्टिः तद्वेदनफलं च

अथेत्यभ्यमन्थत् स मुखाच्च योनेर्हस्ताभ्यां चाग्निमसृजत तस्मादेतदुभयमलोमकमन्तरतोऽलोमका हि योनिरन्तरतस्तद्यदिदमा- हुरमुं यजामुं यजेत्येकैकं देवमेतस्यैव सा विसृष्टिरेष उ ह्येव सर्वे देवा अथ यत्किंचेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदꣳ सर्वमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नादः सैषा ब्रह्मणोऽति-

सृष्टिर्यच्छ्रेयसो देवानसृजत अथ यन्मर्त्यः सन् अमृतानसृजत तस्मादतिसृष्टिरतिसृष्टयाᳬ हास्यैतस्यां भवति य एवं वेद ॥ ६ ॥

इत्थं प्रजापतिः मिथुनात्मकं जगदिदं सृष्ट्वाथ ब्राह्मणादिवर्णानुग्राहक-देवताः सिसृक्षुः अतिसृजतीत्याह--**अथेति**। अभिनयप्रदर्शनार्थमथेतिशब्द-द्वयम्। सोऽयं प्रजापतिरनेन प्रकारेण स्वमुखे हस्तौ प्रवेशयित्वाभ्यमन्थत्। स्वमुखं हस्ताभ्यां मथित्वा **मुखाच्च हस्ताभ्यां च योनेर्योनिभ्यां** ब्राह्मण-जातेरनुग्रहकर्तारम**ग्निमसृजत**। यस्माद्दाहकाग्नेर्मुखं हस्तौ चेत्येतदुभयं योनिः **तस्मादेतदुभयमप्यलोमकमन्तरतः**। उभयस्यास्ति हि योन्या सामान्यम्। स्त्रीणां **योनिरन्तरतोऽलोमका** हि। तथा प्रजापतेर्मुखादेव ब्राह्मणोऽपि जज्ञे। तत्राग्निर्ज्येष्ठः। ब्राह्मणः कनीयान्। तयोरप्येकयोनित्वेन ज्यायसा कनीया-ननुगृह्यते। "आस्यमाहवनीयः," "ब्राह्मणोऽस्य मुखमासीत्" इति,

ब्राह्मणस्त्वग्निदैवत्यो मुखवीर्यो महाद्युतिः।

इति च श्रुतेः स्मृतेश्च। इह क्षत्रियादिसर्गमनुक्तमपि वक्ष्यमाणमुक्तवदुपसंहर्त-व्यमिति। बाहुभ्यां क्षत्रियमूरुभ्यां वैश्यं पद्भ्यां शूद्रमसृजतेति श्रुतिस्मृतिप्रसिद्धेः। तथा प्रजापतिरेव सर्वमित्यर्थः। सृज्यमानचेतनाचेतनात्मकजगतः स्रष्टुरनन्य-त्वात्। एवं व्यवस्थितेऽपि यज्ञकाले केवलयाज्ञिका यदिदं वचनमाहुः **अमुमग्निं यज अमुमिन्द्रं यज** इत्यादिना तयोः स्तोत्रकर्मादिभिन्नत्वात् एकैकमन्यमाहुः। तन्न तथा विद्यात्। तस्मादेतस्यैव प्रजापतेः **सा विसृष्टिः** देवभेदः सर्वः। **एष उ एव** प्रजापतिरेव प्राणः **सर्वे देवाः**। "एष ब्रह्मा एष इन्द्र एष प्रजापतिरेते सर्वे देवाः" इति श्रुतेः। तस्मात् प्रजापतेरेकस्यात्त्रादिभेदो विवक्षितः। "तत्राग्निरत्ता अद्यः सोमः" इति। तदिहाप्युच्यते--अथेति। लोके **यत्किंचेद-मार्द्रं तदात्मनो रेतसो** बीजाद**सृजत** "रेतस आपः" इति श्रुतेः। अबा-त्मकश्च सोम एतावान्। नातोऽधिकं सर्वम्। तस्मात्प्रजापतिना यदार्द्रं रेतसः सृष्टं **तदु सोम** एवाभवत्। **सोम एवान्नं** द्रवात्मकत्वात्। **अन्नादश्चाग्नि**रौष्ण्यात्

रूक्षत्वाच्च। यदद्यतेऽन्नं तत्सोम एव। य एवात्ता स एवाग्निरिति अर्थबलादवधारणम्। एवमग्नीषोमात्मकं जगत् आत्मत्वेन पश्यन्निर्दोषः प्रजापतिरेव भवति। सैषा ब्रह्मणः प्रजापतेरतिसृष्टिः। यस्मादात्मनः सकाशात् श्रेयसः प्रशस्यतरान् देवानसृजत येयं सृष्टिः यस्मादुक्ता तस्मात् सैषा देवसृष्टिः अतिसृष्टिः। कथमात्मनोऽतिसृष्टिः ? इत्यत आह—अथेति। अथ यत् यस्मात् स्वयं मर्त्यः सन् अमृतान् देवानसृजत कर्मज्ञानवह्निना निष्पापविद्वान् सृष्टवानिति याभिहिता सेयमतिसृष्टिः ज्ञानोत्कृष्टफलमित्यर्थः। यस्तस्मात्प्राजापत्यामतिसृष्टिं वेद स एतस्यामतिसृष्ट्यां प्रजापतिरेव भवतीत्यर्थः ॥ ६ ॥

पुरा जगतोऽव्याकृतत्वकथनम्

तद्धेदं तर्हि अव्याकृतमासीत् तन्नामरूपाभ्यामेव व्याक्रियते असौनामायमिदꣳरूप इति तदिदमप्येतर्हि नामरूपाभ्यामेव व्याक्रियते असौनामायमिदꣳरूप इति स एष इह प्रविष्ट आ नखाग्रेभ्यो यथा क्षुरः क्षुरधानेऽवहितः स्यात् विश्वंभरो वा विश्वंभरकुलाये तं न पश्यन्ति। अकृत्स्नो हि स प्राणन्नेव प्राणो नाम भवति वदन् वाक् पश्यꣳश्चक्षुः शृण्वन् श्रोत्रं मन्वानो मनः तान्यस्यैतानि कर्मनामान्येव स योऽत एकैकमुपास्ते न स वेदाकृत्स्नो हि एषोऽत एकैकेन भवति आत्मेत्येवोपासीत अत्र ह्येते सर्व एकं भवन्ति तदेतत्पदनीयमस्य सर्वस्य यदयमात्मानेन ह्येतत्सर्वं वेद। यथा ह वै पदेनानुविन्देत् एवं कीर्तिꣳ श्लोकं विन्दते य एवं वेद ॥ ७ ॥

इत्थं व्याकरणात् पुरा इदमव्याकृतमासीदित्याह—तद्धेदमिति। तद्धेदं तर्हि अव्याकृतमासीदित्यत्र ससाधनवैदिकज्ञानकर्मलक्षणमनेककर्तृकारकाद्यपेक्षं

प्राजापत्यफलावसानमिदं जगत् एवं व्याकरणात्पुरा बीजावस्थायामव्याकृतमनभिव्यक्तनामरूपमासीदिति। हकार ऐतिह्यार्थः। तदिदंशब्दवाच्ययोः व्याकृताव्याकृतजगतोः सामानाधिकरण्यादेकत्वमवगम्यते तदेवेदं इदमेव तत् इति। यत एवमतो नासत उत्पत्तिर्न सतो विनाश इत्यवधृतम्। तदेवंभूतं जगत् अव्याकृतं सत् **नामरूपाभ्यामेव व्याक्रियत**। व्याक्रियतेति कर्मकर्तृप्रयोगात् स्वयमेव नामरूपविशेषवत् व्यक्तीभावमापद्यत। देवदत्तो यज्ञदत्त इति वा नाम अस्येति **असौनामायम्**। तथा इदं शुक्लमिदं कृष्णमिति वा रूपमस्येति इदंरूपः। **तदिदमव्याकृतवस्तु** एतस्मिन्नपि काले **नामरूपाभ्यामेव व्याक्रियते असौनामायं इदंरूप इति**। सर्वशास्त्रारम्भो यदर्थः यत्र यदज्ञानतः कर्तृकारकाद्यध्यारोपः यस्तु सर्वजगत्कारणं यदात्मके नामरूपे शुद्धसलिलफेनादिवद्व्याकृते यस्तद्विलक्षणो नित्यशुद्धबुद्धस्वभावः **स एषोऽव्याकृतनामरूपे** व्याकुर्वन् ब्रह्मादिस्तम्बान्तकर्मफलाश्रयाशनायादिमद्देहेषु मूर्धानमारभ्य **आ नखाग्रेभ्योऽनुप्रविष्टः**। यथोक्तकालेऽव्याकृतं स्वयमेव व्याक्रियत इत्युक्त्वा पुनः पर एवाव्याकृतं व्याकुर्वन् इह प्रविष्ट इति विरुद्धमुच्यत इति चेन्न; परस्याव्याकृतजगदात्मत्वेन विवक्षितत्वात् तदिदंशब्दसामानाधिकरण्याच्च। त्वदाक्षिप्तनियन्तृकर्तृक्रियादिनिमित्तमव्याकृतं जगत् व्याक्रियते। न वस्तुत एकत्वात्। "तत्सृष्ट्वा तदेवानुप्राविशत्" इति सृष्टिप्रवेशश्रुतेरात्मैकत्वप्रदर्शनार्थत्वात् न कोपि विरोधः संभवति। कार्योपलब्धिरेव प्रवेश इत्युपचर्यते आलोमभ्य आनखेभ्यः चैतन्योपलब्धिदर्शनात्। तत्कथं? इत्यत्र दृष्टान्तमाह—यथेति। **यथा** लोके **क्षुरो** धीयतेऽस्मिन्निति क्षुरधानम्। तस्मिन् नापितोपकरणाभिधाने क्षुरः प्रवेशितोऽन्तरुपलभ्यते। यथा विश्वस्य भरणात् **विश्वम्भरोऽग्निः** कुलाये नीडे काष्ठादाववहित इत्यनुवर्तते। न तत्राग्निः स्वयमुपलभ्यते। तत्रायं मथ्यमान उपलभ्यते। यथा क्षुरः क्षुरधान एकदेशस्थितः यथा चाग्निः काष्ठादौ सर्वतो व्याप्य स्थितः तथैवमयमात्मा सामान्यतो विशेषतश्चावस्थितः। तत्र हि प्राणनादिक्रियावान् दर्शनादिक्रियावांश्च उपलभ्यते। तस्मात् तत्रैवायं प्रविष्ट इव प्रविष्टः। तस्मात् **तमात्मानं** प्राणनादिक्रियाविशिष्टं **न पश्यन्ति**। तथादर्शने हेतुमाह—

अकृत्स्नो हीति। असमस्त इत्यर्थः। कथमकृत्स्नत्वम्? **सोऽयमात्मा प्राणन्नेव** प्राणनक्रियामेव कुर्वन् **प्राणो नाम भवति।** प्राणक्रियाकर्तृत्वेन हि प्राणः प्राणितीत्युच्यते नान्यां क्रियां कुर्वन्। याचकपाचकादिवत् क्रियान्तरानुपसंहारात् अकृत्स्नो हि सः। तथा वदनक्रियां कुर्वन् **वाक्** नानारूपनानाशब्दजालं **पश्यंश्चक्षुः शृण्वन् श्रोत्रं** प्राणिति वदतीत्यनेन क्रियाशक्तिमत्त्वं पश्यति शृणोतीत्यनेन विज्ञानशक्तिमत्त्वं उक्तं भवति। विज्ञानशक्तेर्नामरूपविषयत्वात्। त्रयं वा इदं नामरूपं कर्मेति हि वक्ष्यति। ज्ञानशक्तिरूपेण मनसा मनुत इति मनः। अनेन मनुत इति मननकर्ता **मन्वानो मन** उच्यते। **तानि** प्राणनादीन्ये**तानि अस्यात्मनः कर्मनामानि** कर्मनिमित्तत्वात्। न च वस्तुमात्रविषयाणि। अतो न कृत्स्नात्मावद्योतकानि। एवं ह्यसावात्मा प्राणनादिक्रियाजनितनामरूपाभ्यां व्याक्रियमाणोऽपि **स योऽतोऽस्मात्** प्राणनादिक्रियासमुदायादेकैकं मनसायमात्मेत्युपास्ते। **न स वेद** स तु ब्रह्म न जानाति तस्याकृत्स्नवित्त्वात्। **अकृत्स्नो ह्येष** आत्मा प्राणनादिसमुदायप्रविभक्त एकैकविशेषणविशिष्ट इतरधर्मान्तरानुपसंहारात्। पश्यामि शृणोतीत्यादि यावदयमेवं वेद तावत्कृत्स्नमात्मानमयं न वेद। कथं पश्यन् वेद? इत्यत आह—**आत्मेति।** प्राणनादिविशेषणानि यान्युक्तानि यान्यनुक्तानि तानि सर्वाणि "इदं सर्वं यदयमात्मा" इति श्रुत्यनुरोधेन येन स्वात्मतया व्याप्तानि सोऽयमात्मेत्युच्यते। एवं कृत्स्नविशेषणोपबृंहणात् कृत्स्नो भवति। तस्मादेतत्सर्वमात्मेत्येवोपासीतेति। एवं चेदयं स्वेन रूपेण कृत्स्नो भवति। तत्कथं? इत्यत्र **अत्र** ह्यस्मिन्निरुपाधिकात्मनि जलसूर्यप्रतिबिम्बभेदाः सूर्य इव प्राणनादिकर्मजविकारा **ह्येते सर्वे एकम**भिन्नतां **भवन्ति।** "आत्मेत्येवोपासीत" इति नायमपूर्वविधिः पक्षे प्राप्तत्वात्। "यत् साक्षादपरोक्षात् ब्रह्म य आत्मा" इत्यादि श्रुतिमुखादेवात्मावगतेः सिद्धत्वादर्थादात्मातिरिक्तमनात्मेति निरसितं स्यात्। पारिशेष्यादात्मैवावशिष्टपक्षेण तदुपासनमप्राप्तत्वाद्विधातव्यम्। आत्मन उपास्यत्वेनावगमात्। अवगम्यते हि कार्त्स्न्येनात्मा उपास्यत्वेन। **तदेतत् पदनीयमस्य सर्वस्य यदयमात्मा,** "आत्मैव सर्वं" "आत्मनोऽन्यन्न

किंचन '' इत्यनेन उपायेन ह्येतत्सर्वं वेद। कथं पुनरेतत् पदनीयं? इत्यत्र यथेह लोके गवादिखुराङ्कितो देशः पदमित्युच्यते। तेन पदेनान्विष्यमाणो नष्टं लिप्सितं पदार्थमनुविन्देत् लभेत। ज्ञानस्य प्रकृतत्वादप्रकृतलाभः कथं? इति चेन्न; ज्ञानलाभयोरेकार्थत्वेन विवक्षितत्वात्। ज्ञानं ह्यात्मलाभहेतुः। विन्देदिति विदेः लाभार्थत्वात् गुणविज्ञानफलमिदमुच्यते। य एवं वेदेति यथायमात्मा नामरूपानुप्रवेशेन ख्यातिं गत आत्मेत्यादिनामरूपाभ्यां प्राणादियोगतः श्लोकं प्राप्तवानिति वेदनानुरूपं फलं स्वेष्टैः सह कीर्तिं श्लोकं च विन्दते लभते। सविशेषात्मवेदनफलमेतादृशमित्यर्थः॥ ७॥

आत्मा सर्वप्रेमास्पदत्वेन वेदितव्यः

तदेतत् प्रेयः पुत्रात् प्रेयो वित्तात् प्रेयोऽन्यस्मात् सर्वस्मादन्तरतरं यदयमात्मा स योऽन्यमात्मनः प्रियं ब्रुवाणं ब्रूयात् प्रियꣳ रोत्स्यतीति ईश्वरो ह तथैव स्यादात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रियमुपास्ते न हास्य प्रियं प्रमायुकं भवति॥ ८॥

यतो ज्ञेयमात्ममात्रमनादृत्य विशेषवद्वेदनफलं परिच्छिन्नं अतः सर्वप्रेमास्पदत्वेनात्मा निर्विशेषतया वेदितव्य इत्याह---तदेतदिति। तदेतत् आत्मतत्त्वं प्रेयः निरतिशयानन्दरूपत्वात्। कथं पुनरात्मतत्त्वस्य प्रेयोमात्रत्वं प्रेयोऽन्तरसत्त्वात्? इत्यत्र सर्वस्मादपि प्रेयस्त्वमात्मनो दर्शयति---पुत्रादित्यादिना। लोके तावत् पुत्रोऽपि प्रियः। तथा वित्तं हिरण्यरत्नादि प्रियत्वेन प्रसिद्धम्। तस्मात् पुत्रात् वित्ताच्च इदमात्मतत्त्वमेव प्रेयः। किंच लोके यद्यत् प्रियत्वेन प्रसिद्धं तस्मात् सर्वस्मादपि आत्मतत्त्वमेव प्रियतरं न प्राणादिः। तस्य बाह्यपुत्रवित्ताद्यपेक्षया प्रियतरत्वेऽपि तस्मादप्यान्तरतमत्वेन सन्निकृष्टत्वात्। यदेतदात्मतत्त्वं तत्प्राणादप्यन्तरतरं यन्निरतिशयप्रेमरूपं बहुलतरप्रयत्नेनापि तल्लाभे यत्न आस्थेय इति भावः। स यः कश्चिदन्यमनात्मविषयं पुत्रादिकमात्मनः सकाशात् प्रियतरं ब्रुवाणमात्ममात्रप्रियवादी ब्रूयात्। किमिति?

किं तवाभिमतं **प्रियं** पुत्रवित्तादिलक्षणम् ? तत् किं त्वां **रोत्स्यति** आवृणोति ? तदा भवान् प्राणसंरोधनं प्राप्स्यति । स कस्मादेवं ब्रवीति ? **यस्मादीश्वर** एवं वक्तुं समर्थस्तस्मात् **तथैव स्यात्** यत्तेनोक्तं प्राणसंरोधं प्राप्स्यतीति तदन्यथा न भवेत् । स हि यथाभूतवादी । तस्मादात्मातिरिक्तप्रियपुत्रवित्तादिमुज्झित्वा **स्वात्मानं** पुत्राद्यनात्मारोपापवादास्पदमेव **प्रियमुपासीत** स्वात्मैव प्रियो नान्योऽस्तीति । **स य आत्मानमेव प्रियमुपास्ते न हास्यैवंविदः प्रियं** पुत्रवित्तादिकं **प्रमायुकं** प्रमापणशीलं **भवतीति** यत् तदात्ममात्रप्रियविषयस्तुत्यर्थं गुणफलविधानार्थं वा । यथाभूतात्मविदस्तु स्वात्ममात्रगोचरप्रियमेव प्रमायुकं भवतीत्यर्थात् सिद्धमित्यर्थः ॥ ८ ॥

ब्रह्मविद्यास्वरूपकथनम्

तदाहुर्यद्ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तद्ब्रह्मावेत् यस्मात् तत्सर्वमभवदिति ॥ ९ ॥

"आत्मेत्येवोपासीत" इति या ब्रह्मविद्या सूत्रिता यत्प्रयोजनाभिधित्सया सर्वे वेदान्ता आरब्धाः तदियत्ता कीदृशी ? इत्याकाङ्क्षायामाहुरित्याह— **तदाहु-रिति** । यद्विद्ययैव वेदनीयं तदिति वक्ष्यमाणं वस्तु ब्राह्मणा आहुः । किमिति ? जनिमृतिचक्रभ्रमणकृतायाससंसारसागरप्लवभूतदेशिकचरणप्रतिपित्सवो धर्माधर्म-तत्फललक्षणपराग्भावसंसारनिर्विण्णा ब्रह्म विविदिषवो **यद्विद्यया** कृतकृत्या भवेयुः सेयं विद्या कीदृशी ? इत्यत्र— यया यत्परमं ब्रह्म निष्प्रतियोगिकस्वमात्रतया विद्योतते सेयं ब्रह्मविद्या । तया स्वाज्ञदृष्टिविकल्पितसर्वकलनाविरलं **सर्वं** निष्प्रतियोगिकचिन्मात्रं **भविष्यन्तो** भविष्याम इत्येवं **मनुष्या मन्यन्ते** । मनुष्यग्रहणस्याधिकारख्यापनार्थत्वात् । अभ्युदयनिःश्रेयसार्थयोः मनुष्या एवाधि-कृता भवन्ति । यथा प्रेयोविषये फलाप्तिर्ध्रुवेति कामिनो मन्यन्ते तथा श्रेयोविषये चिन्मात्राप्तिर्ध्रुवेत्यकामिनः तयोः श्रुतिप्रामाण्याविशेषात् । तत्र परमपरं वा **किमु तद्ब्रह्मावेत् यस्मात् तत्सर्वमभवदिति** ब्रवीषि ?

यत्सर्वदोषोत्थितं यद्वेदनात्सर्वभावापत्तिरिति पृच्छाम इति। मनुष्या मन्यन्त इति मनुष्याधिकारादपरं ब्रह्म भवितुमर्हतीत्याकांक्षायां "यदेव साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तरः", "तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्ममयमात्मा ब्रह्म", "अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्" इत्यादिस्वातिरिक्ताविद्यापदतत्कार्यजातस्थूलसूक्ष्मादिभागचतुष्टयासंभवतावादिश्रुत्यर्थसंजातप्रबोधानामपरब्रह्म अस्तिनास्तीतिविभ्रमवैरल्यात् परमेव ब्रह्म मनुर्वेदान्तपूगः, तदर्थज्ञानसमकालं निष्प्रतियोगिकस्वमात्रं भविष्याम इति मननादध्यवसायान्मनुष्याः ब्रह्मविदादयो मन्यन्त इति यत् तत्परमेव ब्रह्म। न हि तत्र संशयोऽस्ति ॥ ९ ॥

ब्रह्मस्वरूपं तद्वेदनफलं च

ब्रह्म वा इदमग्र आसीत् तदात्मानमेवावेत् अहं ब्रह्मास्मीति तस्मात्तत् सर्वमभवत् तत् यो यो देवानां प्रत्यबुध्यत स एव तदभवत् तथा ऋषीणां तथा मनुष्याणां तद्धैतत् पश्यन् ऋषिर्वामदेवः प्रतिपेदेऽहं मनुरभवꣳ सूर्यश्चेति तदिदमप्येतर्हि य एवं वेदाहं ब्रह्मास्मीति स इदꣳ सर्वं भवति तस्य ह न देवाश्चनाभूत्या ईशते आत्मा ह्येषाꣳ स भवति अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवꣳ स देवानां यथा ह वै बहवः पशवो मनुष्यं भुञ्ज्युः एवमेकैकः पुरुषो देवान् भुनक्ति एकस्मिन्नेव पशावादीयमानेऽप्रियं भवति किमु बहुषु तस्मादेषां तन्न प्रियं यदेतन्मनुष्या विद्युः ॥ १० ॥

"किमु तद्ब्रह्मावेत् यस्मात्तत् सर्वमभवत्" इति यत्त्वया पृष्टं सोपायं तत्रेदमुच्यते—ब्रह्म वा इदमिति। ब्रह्म वा इदमाविद्यकपदतत्कार्यजातं स्वप्र-

बोधादग्रे प्राक् तत्तदुपाध्यनुगतमिव विभाव्यमानमासीत्। तदेव ब्रह्म स्वातिरिक्तोपाध्यसम्भवप्रबोधसमकालं निष्प्रतियोगिकमात्मानमेवावेत् विदितवत्। किमिति ? अहं ब्रह्मास्मीति। यत् पुरा स्वाज्ञदृष्टिविकल्पितस्वातिरिक्तनानोपाधितदवच्छिन्नजीववत् स्वज्ञदृष्ट्या तदपवादास्पदत्वेन तद्भावाभावप्रकाशकप्रत्यग्रूपेण भातं तदहंशब्दार्थः परमार्थदृष्ट्या तदेव पराग्भावाप्रकाशसापेक्षप्रत्यक्प्रकाशगतविशेषांशापायोपबृंहितं ब्रह्मास्मि निष्प्रतियोगिकस्वमात्रमिति भातीत्यर्थः। यस्मादेवं तस्मात् ब्रह्म सर्वकलनाविरलं सर्वं स्वमात्रमभवत्। तत्तत्र देवानां मध्ये यो यः स्वात्मानमेव ब्रह्मेति प्रत्यबुध्यत प्रतिबुद्धवान् सोऽयं प्रतिबुद्धात्मा तत् ब्रह्म अभवत्। तथा ऋषीणां तथा मनुष्याणां मध्येऽपि यः कोऽप्येवमात्मानं निष्प्रतियोगिकब्रह्ममात्रमिति प्रत्यबुध्यत सोऽपि तन्मात्रतयावशिष्यते। देवर्षिमनुष्याद्युपाधिषु ब्रह्मानुप्रवेशस्य तुल्यत्वात्। तथा च वक्ष्यति "पुरः पुरुष आविशत्" इति।

स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपतः।

इति खिलश्रुत्यनुरोधेन प्रबोधात् प्रागपि इदं सर्वं ब्रह्मैव स्वाज्ञानतोऽब्रह्मवद्भातम्। पुनः स्वज्ञानतः स्वाज्ञानापाये पुरानुभूतं सर्वं ब्रह्मैवाभवदिति ब्रह्मज्ञानस्य सर्वात्मभावापत्तिः फलमित्यस्मिन्नर्थे श्रुतिर्मन्त्रानुदाहरति स्वोक्तार्थद्रढिम्ने। किं तत् ? इत्यत्र वामदेवाख्यो ऋषिः यत् स्वाज्ञादिदृष्टिमोहे सत्यसति निष्प्रतियोगिकस्वमात्रतया विजृम्भते स्वात्मानमेव तद्ब्रह्माहमस्मीति पश्यन् तद्दर्शनसमकालमेव तत् ब्रह्म प्रतिपेदे। ह किल। तद्दर्शनवेलायामयमेतान् मन्त्रान् ददर्श—अहं मनुरभवं सूर्यश्चेति। तत्र पश्यन्निति ब्रह्मविद्या परामृश्यते। अहं मनुरभवं सूर्यश्चेत्यादिना ब्रह्मविद्याफलत्वेन सर्वात्मभावापत्तिः परामृश्यते। पश्यन् प्रतिपेद इति वर्तमानप्रयोगात् भुञ्जानस्तृप्यतीतिवत् दर्शनसमकालं तद्भावापत्तिरवगम्यते। प्राक्कालीनानां देवर्षीणां वीर्यातिशयादेवं स्यादेव, नेदानीमैदंयुगीनानाम्। विशेषतो मनुष्याणामल्पवीर्यत्वात् ब्रह्मदर्शनं तद्भावापत्तिर्वा दुर्लभेति चेन्न; तद्भावापत्तेः निष्प्रतियोगिकब्रह्ममात्रज्ञाननिमित्तत्वात्। मनुष्ये-

ष्वपि यः कश्चित् स्वातिरिक्तास्तिताभ्रमं निरस्य स्वात्मानमेवावेत् **अहं ब्रह्मास्मीति**ज्ञानतो ब्रह्मैव भवति। न हि प्राक्कालीनमहावीर्येषु वामदेवादिषु हीनवीर्यत्वेन वार्तमानिकमनुष्येषु वा ब्रह्मणस्तद्विज्ञानस्य वा विशेषोऽस्ति। तथापि वार्तमानिकमानुषात्तब्रह्मविद्याफलं वह्वन्तरायविशिष्टमित्यत आह— **तस्येति**। **तस्य** यथोक्तब्रह्मविदः कृते **देवा** महावीर्या अपि तदात्तब्रह्मभावस्या**भूत्यै** अभवनाय **नेशते** न समर्था भवन्ति। देवैरपि विघ्नं कर्तुमशक्येऽर्थे किमुतान्ये विघ्नं कर्तुं शक्ताः स्युः? न केऽपीत्यर्थः। ये ज्ञानफलं विघ्नं कुर्युरिति ब्रवीषि ब्रह्मविदोऽस्य एषामप्यात्मभूतत्वात्। **सोऽयमेषामप्यात्मा भवति हि**। न हि स्वात्मनि स्वयमुपकर्तुमपकर्तुं वेच्छति कर्मकर्तृविरोधात्। "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते" इति श्रुतिप्रामाण्यतो देवर्षिपितृवर्गऋणानपाकरणतस्ते ज्ञानतत्फलविघ्नं कुर्वन्तीति चेन्न; ऋणतदपाकरणादेरविद्वद्विषयत्वात्। निर्विशेषब्रह्ममात्रावगतेः सर्वान्तरायमूलस्वाज्ञानापह्नवपूर्वकत्वात्। ज्ञानसमकालमुक्तब्रह्ममात्रविदि काप्याशंका सेद्धुं पारयति "ब्रह्म वेद ब्रह्मैव भवति", "ज्ञानसमकालमेव मुक्तः कैवल्यं याति" इत्यादिश्रुतेः। तथा चेत् "त्रिभिः ऋणवा जायते" इतिश्रुतेः का गतिः? इति चेत्; अब्रह्मविदि सा श्रुतिर्गतिमर्हत्येव। तथा चेत् कोऽयमब्रह्मवित् इति? उच्यते। **अथ** स्वाज्ञोऽहमिति विभ्रमानन्तरं **यः** कश्चिदब्रह्मवित् आत्मनोऽन्यां कांचि**द्देवतामन्योऽसावन्योऽहमस्मीति** सेव्यसेवकतया स्तुतिनमस्कारप्रणिधानादिना **उपास्ते सोऽयमित्थंप्रत्ययः** स्वात्मानं जात्वपि **न वेद**। तस्य स्वाज्ञानदृढपटावृतत्वात्। न केवलमेवम्। किं तर्हि? **यथा** लोके गृहमेधिनां **पशु**र्गवादिः वाहनदोहनाद्युपकारैः उपभुज्यते तथायमेवं **देवा**दीनामिज्याद्यनेकोपकारैरुपभोग्यत्वमेत्य स्वस्वामिगृहाङ्कणस्थाणुरज्जुबद्धपशुवत् कर्मतत्फलदृढपाशबद्धः सन् विविधकर्मस्वधिकृतो भवति। एवं सकामनिष्कामतया कर्मकाण्डवशवर्त्यविदुषः कर्मफलं दक्षिणोत्तरमार्गाभ्यामावृत्त्यनावृत्तिलक्षणचन्द्रब्रह्मलोकौ भवतः। शास्त्रविपरीतस्वाभाविककर्मफलं तु तिर्यक्स्थावराद्यापत्तिः ज्ञेयम्। यथा चैतत् तथा कृत्स्नाध्यायशेषेण ब्रह्मविद्याफलं तद्भावापत्तिः अविद्या-

फलमपि ब्रह्मलोकादिस्थावरान्तापत्तिरित्येवमीशाद्यष्टोत्तरशतवेदान्तपटलं विद्याविद्यातत्फलं प्रकाशयित्वा स्वयमपि ब्रह्ममात्रपर्यवसन्नं भवेदिति परमोऽयं सिद्धान्तः। यस्मादेवं तस्मात् देवादयः स्वाविद्यावन्तं पुरुषं प्रत्येव निग्रहमनुग्रहं वा कर्तुमीशत इत्येतमर्थं दर्शयति—**यथेति**। **यथा ह वै** लोके **बहवो** गवादयः **पशवो मनुष्यं** स्वाधिष्ठातारं **भुञ्ज्युः** पालयेयुः **एवं** बहुपशुस्थानीय **एकैकः पुरुषो**ऽविद्वान्—**देवानिति** पित्राद्युपलक्षणार्थं—**भुनक्ति** पालयतीत्यर्थः। इन्द्रादयः त्वमर्त्याः ममेशितारोऽहमेषां स्तुतिनमस्कारेज्यादिनाराधनं कृत्वा तद्दत्ताभ्युदयनिःश्रेयसफलं प्राप्स्यामीत्यभिसन्धिमान् हि मर्त्यः। तत्र लोके बहुपशुमतः कुटुम्बिनो यथा **एकस्मिन्नेव पशौ** व्याघ्रादिना **वादीयमाने** अपह्रियमाणे महदप्रियं **भवति** तथा बहुपशुस्थानीये एकस्मिन् पुरुषे पशुभावादुत्तिष्ठति सति अप्रियं भवतीति किं वक्तव्यम्? **तस्मादेषां** देवानां **तन्न प्रियं** ब्रह्मात्मतत्त्वं **मनुष्या विद्युरिति यत्**। तथा च स्मर्यते—

> क्रियावद्भिर्हि कौन्तेय! देवलोकः समावृतः।
> न चैतदिष्टं देवानां मर्त्यैरुपरि वर्तनम्॥

इति। अतो देवा अब्रह्मविदं ब्रह्मवित्पदमारोढुमिच्छन्तं तत्पदानारोहाय अश्रद्धादिप्रदानतो विघ्नमाचरन्ति। यं मुमोचयिष्यन्ति तं श्रद्धादिसाधनैर्योक्ष्यन्ति। तस्मान्मुमुक्षुर्ब्रह्मविद्यां प्रति श्रद्धाभक्तिपुरस्सरं देवानाराध्य तत्प्रसादतः चित्तशुद्धिमेत्य ब्रह्मविद्याभिमुखो भूयात्॥ १०॥

ब्राह्मणरूपेण ब्रह्मणा क्षत्रियसृष्टिः देवाधिपसृष्टिश्च

ब्रह्म वा इदमग्र आसीदेकमेव तदेकꣳ सत् न व्यभवत्तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणि इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति तस्मात् क्षत्रात्परं नास्ति तस्मात् ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो

दधाति सैषा क्षत्रस्य योनिर्यद्ब्रह्म तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं य उ एनꣳ हिनस्ति स्वाꣳ स योनिमृच्छति स पापीयान् भवति यथा श्रेयाꣳसꣳ हिꣳसित्वा ॥ ११ ॥

आदौ तावत् "आत्मेत्येवोपासीत" इति शास्त्रार्थः सूत्रितः। तदर्थवादेन "तदाहुः यद्ब्रह्मविद्यया" इति संबन्धादिरभिहितः। विदुषः "स्वात्मानमेवावेत् अहं ब्रह्मास्मि" इति वेदनसमकालं ब्रह्माप्तिर्दर्शिता। अथ "योऽन्यां देवतामुपास्ते" इत्यादिना विदुषो देवोपजीव्यताभिहिता। सोऽयमविद्वान् देवादिकर्मकर्तव्यतया पशुवत् ऋणी परतन्त्र इत्युक्तः। किं पुनर्देवादिकर्मकर्तव्यत्वे निमित्तम्? वर्णाश्रमादिमूलं स्वाज्ञानमेव, यन्निमित्तमयं परतन्त्रपशुवत् सर्वकर्मस्वधिकृतः संसरति। एतदर्थप्रदर्शनायाग्निसर्गानन्तरमिन्द्रादिसर्गो नोक्तः। प्राजापत्यसर्गपूरणायाग्निसर्गो दर्शितः। अयं च इन्द्रादिसर्गोऽपि क्षत्रविट्छूद्रसर्गोपन्यासेनात्रैव सूचितः। तच्छेषतया इहाविदुषः कर्माधिकारहेतुप्रकटनाय इदमारभ्यते—**ब्रह्मेति। ब्रह्म वा इदमग्र आसीदिति।** यदग्निं सृष्ट्वा तद्भावापन्नं ब्रह्म ब्राह्मणजात्यभिमानवद्भवति तद्ब्रह्मैवेत्यभिधीयते वै। इदं क्षत्रियादिजातं ब्रह्माभिन्नमेवासीत्। तदानभिव्यक्तत्वादेकमेव नासीत्। स्वयमेकमपि पालयित्रा रहितं **सत् न व्यभवत्** न विभूतवत् कर्मणो न पर्याप्तमासीत्। ततस्तत् ब्राह्मणोऽस्मीति तज्जातिनिमित्तकर्मचिकीर्षया **श्रेयोरूपं क्षत्रमत्यसृजत** अतिशयेन सृष्टवत्। व्यक्तिभेदेन तत् प्रदर्शयति—**यानीति।** लोके **यान्येतानि** प्रसिद्धानि **देवत्रा** देवेषु **क्षत्राणीति** जात्याख्यायां पक्षे बुहुवचनस्मरणात्। कानि पुनस्तानि? इत्याकांक्षायां विशेषतस्तत्राभिषिक्ता एव निर्दिश्यन्ते—**इन्द्र** इत्यादिना। देवानां राजा **इन्द्रः**। यादसां **वरुणः**। ब्राह्मणानां **सोमः**। पशूनां **रुद्रः**। विद्युदादीनां **पर्जन्यः**। पितॄणां **यमः**। रोगादीनां **मृत्युः**। भासामीशान इत्येवमादीनि देवेषु क्षत्राणि। सोमसूर्यवंश्यानि मानुषक्षत्राणि पुरूरवेक्ष्वाकुप्रभृतीनि सृष्टानीति। देवक्षत्रसर्गस्तदर्थं

एव प्रस्तुतः। यस्मात् क्षत्रं ब्राह्मणातिशयेन सृष्टं **तस्मात् क्षत्रात् परं नास्ति**। क्षत्रस्य ब्राह्मणजातेरपि नियन्तृत्वात्। यस्मादेवं **तस्मात् ब्राह्मणः क्षत्रस्य** कारणभूतोऽपि **स्वयमधस्तात्** व्यवस्थितः सन् उपरि स्थितं **क्षत्रियमुपास्ते। राजसूये क्षत्र एव तदात्मीयं यशः ब्रह्म दधाति**। किञ्च राजसूयाभिषिक्तेन आसन्द्यासनस्थितराज्ञा ऋत्विक् ब्रह्मन्! इति निमन्त्रितः सन् पुनस्तं प्रत्याह—किमिति? हे राजन्! त्वं ब्रह्मासीति। अत एव क्षत्र एव तद्यशो दधातीति सम्यगुक्तम्। **सैषा क्षत्रस्य योनिः** प्रकृता **यद्ब्रह्म**। **तस्माद्यद्यपि राजा** राजसूयाभिषेकतः **परमतां** विभूतिं **गच्छति ब्रह्मैव** ब्राह्मणजातिमेवान्ते कर्मसमाप्तावुपनिश्रयति पुरोहितादीन् प्रणमति। **य उ** यस्तु पुनः बलाभिमानात् **एनमेनां स्वां योनिं** ब्राह्मणजातिं **हिनस्ती**त्यन्यद्भावेन पश्यति **सोऽयं** स्वात्मीयामेव **योनिमृच्छति। स** एवंकृत् **पापीयान् भवति**। पूर्वमपि क्षत्रियः पाप एव तस्य क्रौर्यविशिष्टत्वात्। आत्मप्रसवहिंसया सुतरां पापतरो भवति। **यथा** लोके **श्रेयांसं हिंसित्वा** परिभूय पापतरो भवति तथा-यमपीत्यर्थः॥ ११॥

वैश्यसृष्टिः देवगणसृष्टिश्च

स नैव व्यभवत् स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति॥ १२॥

इत्थं क्षत्रं सृष्ट्वाथ वित्तोपार्जयितारं वैश्यमसृजदित्याह—**स** इति। सृष्टेऽपि क्षत्रे वित्तोपार्जयित्रभावात् **स नैव व्यभवत्**। कर्मसाधनवित्तोपार्जनाय **स विशमसृजत**। कः पुनरसौ विट्? **यान्येतानि देवजातानि गणशो** गणं गणमा**ख्यायन्ते** प्रायेण विशो गणप्राया हि। वित्तोपार्जने संहता हि समर्थाः। नैकैकशो वित्तार्जनसामर्थ्यमस्ति। तत्कथम्? अष्टौ **वसव** एको गणः। तथा एकादश **रुद्राः**। द्वादश **आदित्याः**। विश्वाया अपत्यानि दश **विश्वेदेवाः**। **मरुतस्**सप्त। इत्थं गणशो वैश्यजातिः सृष्टेत्यर्थः॥ १२॥

शूद्रसृष्टिः पूषादिसृष्टिश्च

स नैव व्यभवत् स शौद्रं वर्णमसृजत पूषणमियं वै पूषा इयꣳ हीदꣳ सर्वं पुष्यति यदिदं किंच ॥ १३ ॥

त्रैवर्णिकानां परिचरणार्थं चतुर्थजातिमसृजतेत्याह—स इति। त्रैवर्णिकानां परिचारकाभावे तत्तत्स्थितिलोपो भवेदिति पुनरपि स नैव व्यभवत्। शूद्र एव शौद्रः स्वार्थे वृद्धिः। स शौद्रं वर्णमसृजत। कः पुनरसौ? इत्यत्र पुष्यतीति पूषा। पूषणं शौद्रवर्णविशेषणम्। कः पुनरसौ पूषा? इत्याकाङ्क्षायां श्रुतिः तदर्थं स्वयमेव निर्वक्ति—पूषेयं पृथिवी हीदं सर्वं पुष्यति यदिदं किञ्च ॥१३॥

तत्तद्वर्णोचितधर्मसृष्टिः धर्मप्रशंसा च

स नैव व्यभवत् तच्छ्रेयोरूपमत्यसृजत धर्मं तदेतत् क्षत्रस्य क्षत्रं यद्धर्मस्तस्माद्धर्मात्परं नास्ति अथो अबलीयान् बलीयाꣳ समाशꣳसते धर्मेण यथा राज्ञा एवं यो वै स धर्मः सत्यं वै तत् तस्मात् सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तꣳ सत्यं वदतीति एतद्ध्येव एतदुभयं भवति ॥ १४ ॥

तत्तद्वर्णोचितधर्मानप्यसृजतेत्याह—स इति। स चतुरो वर्णान् सृष्ट्वापि नैव व्यभवत्। क्षत्रस्योग्रत्वेन नियन्तृसापेक्षत्वात् शमायेति तच्छ्रेयोरूपमत्यसृजत। किं तत्? धर्मं हि तच्छ्रेयोरूपम्। तद्धि क्षत्रस्य क्षत्रम्। तस्मादप्युग्रत्वात्। यद्धर्मो यो धर्मः। तस्मात् क्षत्रियस्यापि नियन्तृ धर्मात् परं नास्ति। तेन हि सर्वे नियम्यन्ते। तत् कथम्? अथो अपि अबलीयान् दुर्बलतमो यः स स्वात्मनो बलीयांसं बलवत्तरमप्याशंसते बलवद्धर्मेण जेतुमिच्छति। यथा लोके सर्वबलवत्तमेन राज्ञा कुटुम्बिकः तथैवं धर्मबलेन सर्वं जेयमित्यर्थः। तस्मात् धर्मस्य सर्वस्मात् बलवत्तमत्वं नियन्तृत्वं च

सिद्धमित्यर्थः। यो वै लौकिकवैदिकव्यवहारलक्षणो धर्मः स सत्यं वै तत्। यच्छास्त्राविरुद्धतया ज्ञेयं तत् सत्यं भवति। यस्मादेवं तस्मात् धर्माधर्मविवेककुशला यथाशास्त्रार्थं सत्यं वदन्तं धर्मं वदतीत्याहुः। तथा विपर्ययेण धर्मं वा वदन्तं सत्यं वदतीति। यदेतदुभयं ज्ञायमानमनुष्ठीयमानं च स धर्म एव भवति हि ॥ १४ ॥

ब्रह्मणा तत्तद्देवतारूपप्राप्तिः

तदेतद्ब्रह्म क्षत्रं विट् शूद्रस्तदग्निनैव देवेषु ब्रह्माभवद्ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो वैश्येन वैश्यः शूद्रेण शूद्रस्तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येष्वेताभ्याꣳ हि रूपाभ्यां ब्रह्माभवत्। अथ यो ह वा अस्माल्लोकात् स्वं लोकमदृष्ट्वा प्रैति स एनमविदितो न भुनक्ति यथा वेदो वाननूक्तोऽन्यद्वा कर्माकृतं यदिह वा अप्यनेवंवित् महत्पुण्यं कर्म करोति तद्धास्य अन्ततः क्षीयत एव आत्मानमेव लोकमुपासीत स य आत्मानमेव लोकमुपास्ते न हास्य कर्म क्षीयते अस्माद्ध्येवात्मनो यद्यत् कामयते तत्तत् सृजते ॥ १५ ॥

यदेतद्ब्रह्म स्वसृष्टब्रह्मक्षत्रादीन् धर्मतो नियमयति तदेतद्ब्रह्म अग्न्यादितत्तज्जात्यभिमानिदेवतां निमित्तीकृत्य तत्तद्रूपतां प्राप्तवत् भातीत्याह—तदेतदिति। येन ब्रह्म क्षत्रं विट् शूद्र इति चातुर्वर्ण्यं सृष्टं तदेतत् ब्रह्म अग्निनैव रूपेण निमित्तभूतेन देवेषु ब्रह्म ब्राह्मणजातिरभवत्। मनुष्येषु ब्राह्मणरूपेण ब्रह्माभवत्। ब्राह्मणेतरवर्णेषु विकृतिमाप्य क्षत्रियेण क्षत्रियोऽभवत्। इन्द्रादिदेवतामवष्टभ्येत्यर्थः। तथा वैश्येन वैश्यः शूद्रेण शूद्रः। यस्मात् क्षत्रियादिषु विकारापन्नमग्नौ ब्राह्मणे चाविकृतं ब्रह्मासीत्

तस्मादग्नावेव देवेषु देवमध्येऽग्निसंबन्धकर्म कृत्वा तत्कर्मफलभूतलोकमिच्छन्ति। तदर्थमेव हि ब्रह्म कर्माधिकरणाग्निरूपेण व्यवस्थितम्। तस्मात् तस्मिन्नग्नौ कर्म कृत्वा तत्फलप्रार्थनमुपपन्नं भवति। तथा ब्राह्मणे मनुष्येषु मनुष्याणां मध्ये ब्राह्मण एवाग्निः। तेषां कर्मफलेच्छया अन्नाग्न्यादिनिमित्तापेक्षास्ति। जातिमात्रस्वरूपप्रतिलम्भनस्य पुरुषार्थप्रापकत्वात्। यत्र पुरुषार्थसिद्धिः देवताधीना तत्राग्न्यादिसंबन्धक्रियाकांक्षास्ति। तथा च स्मर्यते—

जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः।
कुर्यादन्यत् न वा कुर्यात् मैत्रो ब्राह्मण उच्यते॥ इति।

तस्मात् ब्राह्मणाग्निरूपाभ्यां यत् स्रष्टृ ब्रह्म तत् साक्षादभवत्। अत्राग्नौ ब्राह्मणे च परमात्मलोकमिच्छन्ति इति चेन्न; वर्णाश्रमविभागस्याविद्याधिकारत्वेन प्रस्तुतत्वात्। यदि ह्यत्र परविशेषणात् लोकशब्दतः पर एवात्मा स्यात् तदा परेण विशेषणमनर्थकं स्यात्। स्वं लोकमदृष्ट्वेत्यग्न्यधीनलोकः स्वलोकव्यतिरिक्तश्चेत् ततः स्वमिच्छतीति विशेषणं युक्तं स्यात्। ब्रह्मणा कर्मार्थं वर्णाश्रमादिव्यवस्था सृष्टा। तेनैव कर्मणा स्वशब्दवाच्यः परलोकोऽविदितोऽपि तत्प्राप्यत इत्यत आह—अथेति। अथशब्दः पक्षव्यावृत्त्यर्थः। यः कश्चित् ह वा अस्माल्लोकात् पिण्डलक्षणात् स्वमात्मानं "अहं ब्रह्मास्मि" इत्यदृष्ट्वा प्रैति म्रियते यद्यपि स्वाविद्याव्यवहितत्वेन स्वो लोकः स्व इव विदितो भवति तदा स एवमात्मानमविदितो न भुनक्ति न पालयतीत्यत्र दृष्टान्तमाह—यथेति। लोके यथा वेदोऽननूक्तो नाधीतः कर्माद्यवबोधनतो न भुनक्ति, अन्यद्वा कृष्यादि लौकिकं कर्माकृतमात्मीयफलप्रदानेन भुनक्ति, एवमात्माप्यविदितो न भुनक्त्येव। इष्टफलनिमित्तकर्मणो बाहुल्यात् तदेवाक्षयफलप्रापकं भविष्यतीत्यत आह—यदीति। यदि ह वास्मिन् संसारचक्रे कश्चिन्महानप्यनेवंवित् यथावत् स्वं लोकमविदित्वा बह्वश्वमेधादिपुण्यं कर्म करोति तस्य स्वाज्ञानकलितत्वेन तत्फलमन्तवद्भवति। तत्कर्म तु स्वविद्यावृतं सत् भुक्तावस्यां गतायां ततस्तत्फलभोगानन्तरं क्षीयत एव। हि यस्मात् पुण्यकर्मानुष्ठानतोऽप्यानन्त्याशास्ति तस्मादत एव स्वात्मानमेव स्वातिरिक्तकलनाविरलतया लोक्यत इति लोक-

मात्ममात्रमुपासीत । स य आत्मानमेव लोकमुपास्ते न हास्याविद्वत्कृत- कर्मवत् तत्कृतकर्म **क्षीयते** तस्याक्षयात्मलोकदृष्टित्वात् । स्वात्मातिरिक्तं न किंचिदस्तीति **अस्माद्ध्येवात्मन** उपासनादात्ममात्रचिन्तनात् सोऽयमात्मैव भव-तीति स्थितौ **यद्यत्कामयते तत्तदस्मादात्मनः सृजत** इति स्वलोकोपासनस्तुतिः । वस्तुतस्तेन न किंचित् कांक्षणीयमस्ति । तस्यात्मस्वरूपत्वेनावाप्तसमस्तकामत्वात् । "एषोऽस्य परमो लोकः" इति श्रुतेः ॥ १९ ॥

आत्मानात्मलोकैयत्ताकथनम्

अथो अयं वा आत्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लोकोऽथ यदनुब्रूते तेन ऋषीणामथ यत्पितृभ्यो निपृणाति यत् प्रजामिच्छते तेन पितृणामथ यन्मनुष्यान् वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणामथ यत्पशुभ्यस्तृणोदकं विन्दति तेन पशूनां यदस्य गृहेषु श्वापदा वयाꣳस्यापिपीलिकाभ्य उपजीवन्ति तेन तेषां लोको यथा ह वै स्वाय लोकायारिष्टिमिच्छेत् एवꣳ हैवंविदे सर्वाणि भूतान्यरिष्टिमिच्छन्ति तद्वा एतद्विदितं मीमाꣳसितम् ॥ १६ ॥

स्वात्मलोकस्वरूपं दर्शयित्वाथात्मानात्मलोकैयत्तां विशदयति--**अथो** इति । अथोशब्दो वाक्योपन्यासार्थः । पुरा विद्वान् देवादिकर्मकर्तव्यतया परतन्त्र इत्युक्तम् । यत्कर्तव्यतयायं परतन्त्रो भवति तत्कर्तव्यकर्माणि कानि ? येषामयं स्वकृतकर्मभिः पशुवदुपकरोति के वा ते देवादयः ? कथं वै तत्सर्वं विदुष आत्मैव भवति ? इत्यत्र यः प्रकृतोऽयं गृही कर्माधिकृतः पिण्डा आत्मेत्युच्यते । स हि **सर्वेषां** पिपीलिकादिब्रह्मान्तभूतानां भोग्यत्वेन लोक्य इति **लोको** भवति । अस्य वर्णाश्रमादिविहितकर्मभिः सर्वभूतोपकारित्वात् । कथं पुनरय-

मेतेषां लोक इति ? उच्यते । स गृही स्वत्वपरित्यागपूर्वकं देवतामुद्दिश्य यत् जुहोति यद्यजते तेन होमयागलक्षणकर्मणावश्यकर्तव्यतया विधिपारतन्त्र्यमेत्य पशुवत् बध्यते । तेनायं देवानां लोकः । अथाहरहर्यदनुब्रूते स्वाध्यायमधीते तेन ऋषीणामयं लोकः । अथ यत् पितृभ्यः पिण्डोदकादि निपृणाति प्रयच्छति, यत् प्रजामिच्छते—इच्छायाश्चोत्पत्त्युपलक्षणार्थत्वात्—प्रजाः चोत्पादयति तेनायं पितॄणां लोकः । तद्भोज्यत्वे परतन्त्रत्वात् । अथ यत् स्वगृहे स्थलोदकप्रियवचनादिना मनुष्यान् वासयते यदेभ्यो वसद्भ्योऽशनं ददाति तेनायं मनुष्याणां लोकः । अथ यत् पशुभ्यस्तृणोदकं विन्दति प्रदास्यति तेनायं पशूनां लोकः । यदस्य गृहेष्वापिपीलिकाभ्यः श्वापदा वयांसि च वलिभाण्डसंक्षालनादिना उपजीवन्ति तेनायं तेषां लोकः । यस्मादयमेतादृशकर्म कुर्वन् देवादिभ्य उपकरोति तस्मात् यथा ह वै स्वाय लोकाय स्वस्मै देवादिपिपीलिकान्ताधाराय सर्वाणि देवादीनि भूतानि स्वत्वाप्रच्युत्यै अरिष्टिमविनाशमिच्छन्ति । कुटुम्बिन इव पशून् सर्वतः संरक्षन्ति । यस्मात् देवादयो विद्वद्भिरेवमुपकृताः तस्मात् तदूर्ध्वपदारोहणमेषां तन्न प्रियमित्युक्तम् । एवंप्रायेष्वनेकेषु सत्सु कस्यचित् पुरुषधौरेयस्य “ आत्मानमेवावेदहं ब्रह्मास्मि ” इति स्वातिरिक्तानात्मासंभवप्रबोधसिद्धात्ममात्रज्ञानमुदेति । तदा पुरा विद्वद्दशायां यद्यत् देवादि तल्लोकादि भावितं तत्सर्वमात्मैवाभूत् । स्वात्मातिरिक्तं न भवतीत्यत्र “ यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् ” इत्यादिस्वातिरिक्तानात्मासंभवात्ममात्रश्रुतेः । तद्वा एतत् यथोक्तकर्मणामृणिवदवश्यकर्तव्यत्वं देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति श्रुतिसिद्धपञ्चमहायज्ञप्रकरणे कर्तव्यतया विदितं मीमांसितं विचारितं चेत्यर्थः ॥१६॥

विद्वदविदुषोः कृत्स्नाकृत्स्नात्मापत्तिः

आत्मैवेदमग्र आसीत् एक एव सोऽकामयत जाया मे स्यात् अथ प्रजायेय अथ वित्तं मे स्यात् अथ कर्म कुर्वीय इत्येतावान्

वै कामो नेच्छꣳश्चनातो भूयो विन्देत् तस्मादप्येतर्हि एकाकी कामयते जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति स यावदप्येतेषामेकैकं न प्राप्नोति अकृत्स्न एव तावन्मन्यते तस्यो कृत्स्नता मन एवास्यात्मा वाक् जाया प्राणः प्रजा चक्षुर्मानुषं वित्तं चक्षुषा हि तद्विन्दते श्रोत्रं दैवꣳ श्रोत्रेण हि तच्छृणोति आत्मैवास्य कर्म आत्मना हि कर्म करोति स एष पाङ्क्तो यज्ञः पाङ्क्तः पशुः पाङ्क्तः पुरुषः पाङ्क्तमिदꣳ सर्वं यदिदं किंच तदिदꣳ सर्वमाप्नोति य एवं वेद ॥ १७ ॥

पशुभावात् विद्वान् मुच्यते। अविद्वान् बध्यते। तयोः कृत्स्नाकृत्स्नात्मापत्तिः भवतीत्येतत्प्रदर्शनार्थमिदमारभ्यते—आत्मैवेति। यो ह्यात्मा स्वातिरिक्तानात्मासंभवबोधतो निष्प्रतियोगिकैकरूपेणावशिष्टः सोऽयमात्मैव देहदाराध्यारोपादग्रे पुरा इदं दारादिभेदरूपं नासीत्। स एव एक आसीत्। जायाद्येषणाबीजाविद्यातत्कार्यमात्मन्यध्यस्य तदवष्टभ्य सोऽकामयत। कथं कामितवान्? इत्यत्र कर्म कर्तुम्। मे मम कर्माधिकारहेतुभूतजायाभावे यतः कर्मण्यनधिकारी स्यां अतः कर्माधिकारसंपत्तये जाया स्यात्। किमर्थं जाया? इत्यत्र अथाहं प्रजायेय प्रजारूपेण उत्पद्येय। अथ मे यत् कर्मसाधनं गवादिलक्षणं तद्वित्तं स्यात्। येनाहमनृणी भूत्वा देवादिपदं प्राप्नुयां अथ तत्कर्म कुर्वीय। पुत्रवित्तस्वर्गादिसाधनानि काम्यानि एतावद्विषयपरिच्छिन्नत्वात्। एतावान् वै कामः "पराचः कामाननुयन्ति बालाः" इति, "काम एष क्रोध एषः" इत्यादिश्रुतिस्मृतिसिद्धलोकत्रयकामना एषणात्रयम्। मनुष्यलोकः पितृलोको देवलोक इति लोकत्रयं एषणाफलभूतम्। अत्रैव ह्यविद्यानवशात् कोशकारवदात्मानं वेष्टयति। तथाभूतो न स्वात्मानं प्रति जानाति। तथा च श्रुतिः "अग्निमुग्धो हैव धूमतान्तः स्वं लोकं न प्रतिजानाति" इति। एतावानिति कथमवधारणं

"नैव हि कामस्यान्तोऽस्ति" इति श्रुत्यनुरोधेन कामानामनन्तत्वात् ? इत्यत्र हेतुमाह—**नेच्छंश्चनातो भूय** इति। तिष्ठत्वेवं कामानामनन्तता। स्वाविद्यापरिकल्पितत्वादितोऽधिकतरमिच्छन्नपि **न विन्देत्** न लभेत। सर्वकामानामत्रैवान्तर्भूतत्वादित्यवधारणं युज्यते। यत एवं परिच्छित्तिरुक्ता कामानामतो विद्वानेषणात्रयतत्फलतो व्युत्थाय पशुभावात् विमुक्तस्सन् स्वात्मलोकः कृत्स्नात्मा भवति। तद्विपरीतोऽविद्वानत्रैव बद्धस्सन् आभूतसंप्लवं पशुरेव भवति। इयमेव हि लोकस्थितिः। तथा च पुरायं प्रजापतिः कामप्रयुक्तस्सन् तदुपभोगाय स्त्रियमैच्छत्। तां समभवत्। ततः सर्गोऽयमासीदित्युक्तं ननु। **तस्मादेतर्हि** एतस्मिन्नपि काले दारादिक्रियातः प्राक् **एकाकी** सन् **कामयते**। किमिति ? **जाया मे स्यात्**। **अथ प्रजायेय**। **अथ वित्तं मे स्यात्**। **अथ कर्म कुर्वीय**। इत्युक्तार्थमेतत्। **स** एवं जायादीन् कामयमान **एतेषामेकैकमपि न प्राप्नोति**। ततोऽयम**कृत्स्नोऽ**स्मीत्यात्मानं **मन्यते**। ततस्तानेवैतान् संपादयति। तदास्य स्वदृष्ट्याकृत्स्नता भवति। यदा त्वयं कृत्स्नतां संपादितुं न शक्नोति तदास्य कृत्स्नत्वसंपादनायाह—**तस्येति**। **तस्य उ** अकृत्स्नताभिमानिनः **इयमेव कृत्स्नता** भवति। कथम् ? तत्कार्यकरणसंघातानुग्राहकं यत् तन्मन **एवात्मै**वात्मा प्रधानत्वात्। यथा जायादीनां पतिः कृत्स्नतायै परिकल्प्यते तथा **वाक् जाया** वाचो मनोवृत्तिसामान्यात्। चोदनादिलक्षणः शब्दो हि वाक् मनसा श्रोत्रद्वारेण गृह्यते। यतस्तत्प्रवृत्तिर्मनोऽधीना अतो मनसो जायेव वाक्। ताभ्यां जायापतिस्थानीयवाङ्मनोभ्यां कर्मार्थं **प्राणः** प्रसूयते। स **प्रजे**व चेष्टादिलक्षणं कर्म करोति। यत् दृष्टवित्तसाध्यं भवति तत् **चक्षुर्मानुषं वित्तम्**। मानुषमितरच्चेति तत् द्विविधम्। गवादि मनुष्यसंबन्धि वित्तं चक्षुर्ग्राह्यम्। चक्षुस्तु साक्षान्मानुषं वित्तम, यस्मात् **चक्षुषा हि** मानुषवित्तं गवादि **विन्दते**। किं पुनरितरत् वित्तम् ? **श्रोत्रं दैवं** वित्तम्, यस्माद्दैवं वित्तं विज्ञानं **शृणोति** विज्ञानस्य श्रोत्राधीनत्वात्। पुनरेतैरात्मादिवित्तान्तैः निर्वर्त्यं कर्मेत्युच्यते। शरीरमात्मेत्युच्यते कर्महेतुत्वात्। कथम् ? यत **आत्मना हि कर्म करोति**। अकृत्स्नाभिमानिन एवं कृत्स्नता संपन्ना। यस्मादेवं तस्मात् यः पञ्चभिः

निर्वर्तितः **स एष पाङ्क्तो यज्ञः** । कथमस्य पञ्चसंख्यायोगेन पाङ्क्तत्वम् ? यतो बाह्योऽपि यज्ञः पशुपुरुषसाध्यः स पशुः पुरुषश्च पाङ्क्त एव । किं बहुना ? कर्मसाधनं फलं च **यत्किंचेदं सर्वं पाङ्क्तमेव** । यज्ञात्मानं यः संपादयति सोऽयं विद्वानिदं **सर्वं** जगत् आत्मत्वेन **आप्नोति** । **य एवं वेद** सोऽप्येवं विश्वात्मा भवतीत्यर्थः ॥ १७ ॥

इति चतुर्थं ब्राह्मणम्

पञ्चमं सप्तान्नब्राह्मणम्

जगतः कार्यकारणतया विभावनम्

यत्सप्तान्नानि मेधया तपसाजनयत्पिता । एकमस्य साधारणं द्वे देवानभाजयत् । त्रीण्यात्मनेऽकुरुत पशुभ्य एकं प्रायच्छत् तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा । यो वैतामक्षितिं वेद सोऽन्नमत्ति प्रतीकेन स देवानपि यच्छति स ऊर्जमुपजीवतीति श्लोकाः ॥ १ ॥

अत्र " अन्योऽसावन्योऽहमस्मि " इत्यविद्वान् सर्वत्रात्मात्मीयाभिमानी सन् कर्मकर्तव्यतया प्रसक्तः । स हि कामनाधिया देवादीनामुपकुर्वन् तेषां लोक इति पुरैवाभिहितम् । प्रजापतिना एवं यः सृष्टः सोऽयं सर्वं जगत् भोज्यत्वेनासृजत । एवमेकैकस्वकर्मज्ञानानुरूपेण सर्वजगद्भोक्ता भोज्यं च कर्ता कार्यं च भवति । येनेदं विभावितं तेनेदं जगत् कार्यकारणतया विभाव्यत इत्यस्मिन्नर्थे संक्षेपतः सूक्ष्मसूत्रभूता इमे मन्त्रा भवन्तीत्याह—

यत्सप्तान्नानीति। यत्सप्तान्नानि यत् अजनयदिति क्रियाविशेषणम्। मेधया प्रज्ञया तपसा कर्मणा च। मेधातपःशब्दवाच्ये ज्ञानकर्मणी तयोः प्रकृतत्वात्। जायादिसाधनं कर्म पाङ्क्तं हि। तदनन्तरं ज्ञानं प्रकृतं य एवं वेदेति। अतो मेधातपःशब्दवाच्यज्ञानकर्मभ्यां पिता सप्तान्नानि जनितवानित्येतत्सर्वं ब्राह्मणे स्पष्टं भविष्यतीति पदशो न व्याख्यातम् ॥ १ ॥

पूर्वोक्तमन्त्रार्थप्रकाशनम्

यत्सप्तान्नानि मेधया तपसाजनयत्पितेति मेधया हि तपसाजनयत्पिता एकमस्य साधारणमिति इदमेवास्य तत्साधारणमन्नं यदिदमद्यते स य एतदुपास्ते न स पाप्मनो व्यावर्तते मिश्रꣳ ह्येतद्द्वै देवानभाजयदिति हुतं च प्रहुतं च तस्माद्देवेभ्यो जुह्वति च प्र च जुह्वति अथो आहुर्दर्शपूर्णमासाविति। तस्मान्नेष्टियाजुकः स्यात् पशुभ्य एकं प्रायच्छदिति तत्पयः पयो ह्येवाग्रे मनुष्याश्च पशवश्च उपजीवन्ति तस्मात् कुमारं जातं घृतं वै वाग्रे प्रतिलेहयन्ति स्तनं वानुधापयन्ति अथ वत्सं जातमाहुरतृणाद इति। तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेति पयसि हीदꣳ सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च न। तद्यदिदमाहुः संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयतीति न तथा विद्यात् यदहरेव जुहोति तदहः पुनर्मृत्युमपजयति एवंविद्वान् सर्वꣳ हि देवेभ्योऽन्नाद्यं प्रयच्छति। कस्मात्तानि न क्षीयन्तेऽद्यमानानि सर्वदा इति? पुरुषो वा अक्षितिः स हीदमन्नं पुनः पुनर्जनयते यो वैतामक्षितिं वेदेति पुरुषो वा अक्षितिः स हीदमन्नं धिया धिया जनयते। कर्मभिर्यद्धैतन्न कुर्यात् क्षीयेत

ह सोऽन्नमत्ति प्रतीकेनेति मुखं प्रतीकं मुखेनेत्येतत् स देवानपि-
गच्छति स ऊर्जमुपजीवतीति प्रशꣳसा ॥ २ ॥

प्रायशो मन्त्रार्थस्य दुर्विज्ञेयत्वेन तिरोहितत्वात् तदर्थप्रकाशनाय ब्राह्मणं प्रवृत्तमित्याह—**यत्सप्तेति । यत्सप्तान्नानि मेधया तपसाजनयत् पितेति** मन्त्रार्थ उच्यते । हिशब्देन मन्त्रार्थः प्रसिद्ध इति द्योत्यते । यत् पिताजनयदिति तत् प्रसिद्धमेव हि । अतो ब्राह्मणमाह—**मेधया हि तपसाजनयत्पितेति** । अस्यार्थस्य कथं प्रसिद्धता ? इत्यत्र "जाया मे स्यात्" इत्यादिना जायादिसाधनानां देवादिलोकफलहेतुत्वात् । पितृत्वं तावत् प्रत्यक्षमवगम्यते । तत्र च फलभूतलोकसाधनं दैवं वित्तं विद्या कर्म पुत्रश्च कार्यत्वेन प्रतीयते । तस्मात् मेधयेत्यादि वक्तुं युक्तम् । लोके जायाद्येषणा फलविषयत्वेन प्रसिद्धा । "एतावान् वै कामः" इत्यनेनाशास्त्रीयस्वाभाविकप्रज्ञातपोभ्यां जगत्स्रष्टृत्वमुक्तमेव भवति । तिर्यक्स्थावरान्तानिष्टफलस्य स्वाभाविककर्मज्ञाननिमित्तत्वात् । इत्थं-भूतकर्मसामान्यस्य स्वाविद्याविकल्पितत्वेन कारणतुल्यधिया विरक्तस्य ब्रह्म-विद्यारभ्येति सप्तान्नविभागोपक्रमः । **एकमस्य साधारणमिति** मन्त्रपदं व्याचष्टे । **अस्य** भोक्तृसमुदायस्य साधारणमिदमेकमन्नम् । किं तत् ? **यदिदमहन्यहनि सर्वप्राणिभिरद्यते तत् साधारणमन्नं** सर्वप्राण्यर्थमकल्पयत् पिता । **स य एतत्** पितृसृष्टसाधारणमिति **अन्नमुपास्ते** तस्य शरीरस्थितिरेव दृष्टफलम् । **न स पाप्मनोऽ**ज्ञानात् **व्यावर्तते** न मुच्यते । "मोघमन्नं विन्दते" इति मन्त्रवर्णात् ।

तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ।

इति स्मृतेः ।

कस्मात् पुनः पाप्मनो न व्यावर्तते ? **मिश्रं ह्येतत्** । सर्वेषां हि तदविभक्तं सर्वभोज्यत्वात् । तथा सति अतिथिभ्योऽदत्वा केवलकुक्षिम्भरस्य स्वात्मग्रासश्रुतेः " अहमन्नमन्नमदन्तमाद्मि " इति । यस्मादेवं तस्मात् वैश्वदेवपुरस्सरमतिथितृप्तिं कृत्वा तच्छिष्टं यो भुंक्ते स एव पाप्मनो व्यावर्तते । तथा च स्मर्यते—

यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः ।

"यान्ति ब्रह्म सनातनम्" इति च। **द्वे देवानभाजयत्** इति मन्त्रपद-स्यायमर्थः। अग्नौ हवनं हुतं च, हुत्वा बलिहरणं प्रहुतं च हुतप्रहुते। द्वे अन्ने सृष्ट्वा पिता देवानभाजयत्। **तस्मात् गृहिणः** काले देवेभ्य इदमिति मन्यमाना **जुह्वति च प्र च जुह्वति** हुत्वा बलिहरणं च कुर्वत इत्यर्थः। **अथो अप्यन्य एवमाहुः**। किं तत्? इति। **दर्शपूर्णमासावेव** हुतप्रहुते इति मन्त्रप्रदर्शितत्वात् दर्शपूर्णमासयोर्देवान्नत्वं प्रसिद्धतरमेव। तस्मात् द्वे देवान-भाजयत् इति तयोरेव ग्रहणं युक्तम्। **तस्मात्** तयोः देवार्थत्वाविवाताय **इष्टियाजुको** यजनशीलः काम्येष्टियजनप्रधानो **न स्यात्** ताच्छील्यप्रत्यय-योगात्। इष्टिशब्देन शातपथिकाः काम्येष्टय उच्यन्ते। तत्प्रधाने महाननर्थः स्यादिति। **पशुभ्य एकं प्रायच्छदिति**। यत् पशुभ्यः प्रायच्छत् पिता किं पुनस्तदन्नम्? **पयः** पशुमनुष्योपजीवकत्वात्। **तस्मात् मनुष्याश्च पशवश्च** पयसैव जीवन्तीति युक्तम्। एवमादौ पित्रा नियोगः कृतः। **तस्मात् जातं कुमारं** जातकर्मणि त्रैवर्णिका **घृतं वै वाग्रे प्रतिलेहयन्ति** प्राशयन्ति। **स्तनं वानुधापयन्ति** पश्चात् पाययन्ति। मनुष्यान्यपशूनां **अथ वत्सं जातं**, कियत्प्रमाणो वत्सः? इति पृष्टा **अतृणादः** पयसैवाद्यापि वर्तत **इत्याहुः**। यच्चाग्रे जातकर्मादौ घृतमुपजीवन्ति यच्चेतरे पय एव सर्वथापि सर्वे पय एव उपजीवन्ति घृतस्यापि पयोविकारत्वात्। कस्मात् पुनः सप्तमं सत् पश्वन्नं चतुर्थत्वेन व्याक्रियते? पयसः कर्मसाधनत्वात्। वक्ष्य-माणान्नत्रयस्य वित्तसाध्यत्वम्। यथा पूर्वोक्तदर्शपूर्णमासौ द्वे अन्ने। कर्मपक्षत्वात् कर्मणा सह पिण्डीकृत्य उपदेशः, साधनत्वाविशेषादर्थसंबन्धात् आनन्तर्यम विवक्षितं प्रतिपत्तिसौकर्याच्च। सुखं हि नैरन्तर्येण व्याख्यातुं शक्यते। व्याख्यातानि च तानि सुखं प्रतीयन्ते। तस्मात् **तस्मिन् सर्वं प्रतिष्ठितं यच्च प्राणिति यच्च नेत्यस्यायमर्थः**। तस्मिन् पश्वाद्यन्ने **पयसि** सर्वमाध्यात्मिकादि कृत्स्नं जगत् **प्रतिष्ठितं यच्च** प्राणिति चेष्टावत्, **यच्च नेति** शैलादि। **हिशब्दः** प्रसिद्ध्यर्थः। कथं पयसः प्रतिष्ठात्वं? तस्य कारण-त्वोपपत्तेः। तत् कथम्? अग्निहोत्रादिकर्मसमवायित्वात्। अग्निहोत्राद्याहुति-

विपरिणामात्मकं जगदिति वक्ष्यति। तथा च श्रुतिस्मृत्यन्तरेष्वपि। अतो हिशब्देन व्याख्यातं युक्तमेव। ब्राह्मणान्तरेष्वपीदमाहुः—**संवत्सरं पयसा जुह्वदप पुनर्मृत्युं जयति इति**। संवत्सरमात्मानं प्रजापतिं प्राप्य न हि पुनर्म्रियते। एवमाहुः केचन—**न तथा विद्यात् यदहरेव जुहोति तदहः पुनर्मृत्युमपजयति** न संवत्सराभ्यासमपेक्षते "अहोरात्रे वै प्रजापतिः" इति श्रुतेः। यदुक्तं पयसि हीदं सर्वं प्रतिष्ठितं पयःपरिणामात्मकत्वादित्येवं **विद्वान्** तदेकेनैवाह्ना जगदात्मतां प्रतिपद्यते। अप पुनः मृत्युं जयति। सकृन्मृत्वा प्रजापतिभावमेत्य न पुनः परिच्छिन्नशरीरं गृह्णाति। **सर्वं हि देवेभ्योऽन्नाद्यं प्रयच्छति**। सायंप्रातराहुतिप्रक्षेपेण सर्वदेवान्नरूपेण सर्वदेवभावमेत्य न हि पुनर्म्रियते। **कस्मात् तानि न क्षीयन्ते अद्यमानानि सर्वदा इति?** यदा पित्रा पृथक् पृथक् सप्तान्नानि सृष्ट्वा भोक्तृभ्यः प्रदत्तानि तदा प्रभृति तैरद्यमानानि कस्मात् पुनः तानि न क्षीयन्ते? इति प्रश्नः। तत्प्रतिवचनं—**पुरुषो वा अक्षितिः**। यदासौ पिता पूर्वमन्नस्रष्टासीत् मेधया जायादिसाधननिष्पन्नपाङ्क्तकर्मणा येभ्यो दत्तान्यन्नानि तेऽपि तेषां भोक्तारः पितर एव। मेधया तपसा च यतोऽन्नानि जनयन्तीति यत् तदेतदभिधीयते। यः **पुरुषो वा** अन्नानां भोक्ता सोऽक्षितिः अक्षयहेतुत्वात्। तत् कथम्? **स हि** यस्मादिदं भुज्यमानसप्तविधान्नं **पुनः पुनः जनयते धिया धिया** उत्पादयति तस्मात् पुरुषोऽक्षितिः। तस्य सन्ततकर्तृत्वेन तद्भुज्यमानमन्नं न क्षीयते। धिया धिया जनयत इत्युक्त्या गन्धर्वनगरादिवत् कल्पनामात्रता द्योत्यते। एवंविदुषस्तत्र वैराग्यमुदेति। **कर्मभिर्यद्धैतन्न कुर्यात् क्षीयेत हेति**। ह्यस्मात् विरक्तानां चतुर्थमुखेन ब्रह्मविद्यारब्धव्येति। यो वैतामक्षितिं वेद इति वक्ष्यमाणान्नत्रयमपि व्याख्यातमेवेति कृत्वा तेषां याथात्म्यज्ञानफलमुपसंहरति—**यो वैतामक्षितिं वेद** इति। अक्षितिहेतुं यो वेद सोऽन्नमत्ति। यथाज्ञो गुणभूतः सन् अन्नमत्ति न तथा विद्वान् अत्तैव भवति। अविद्वानिव नान्नभावमापद्यते। **स देवानपिगच्छति स ऊर्जमुपजीवतीति**। सोऽयं विद्वान् देवानपिगच्छति देवात्मभावं प्रतिपद्यते। ऊर्जममृतं च उपजीवतीति यदुक्तं सा पूर्वोक्तार्थप्रशंसा ॥२॥

उत्क्रष्टान्नख्यापनम्

त्रीण्यात्मनेऽकुरुतेति मनो वाचं प्राणं तान्यात्मनेऽकुरुत अन्यत्रमना अभूवं नादर्शमन्यत्रमना अभूवं नाश्रौषमिति मनसा ह्येव पश्यति मनसा शृणोति। कामः संकल्पो विचिकित्सा श्रद्धाश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव तस्मादपि पृष्ठत उपस्पृष्टो मनसा विजानाति यः कश्च शब्दो वागेव सा एषा ह्यन्तमायत्ता एषा हि न प्राणोऽपानो व्यान उदानः समानः अन इत्येतत्सर्वं प्राण एव एतन्मयो वा अयमात्मा वाङ्मयो मनोमयः प्राणमयः ॥ ३ ॥

पाङ्क्तकर्मफलत्वेन त्रीण्यन्नान्यपनीतानि। तदुत्कृष्टान्नव्याख्यानार्थमाब्राह्मणसमाप्तेरुत्तरो ग्रन्थ आरभ्यते—त्रीणीति। **त्रीण्यात्मनेऽकुरुत**ेत्यस्यायमर्थः। मनो वाक् प्राणः एतानि त्रीण्यन्नानि। **तानि मनो वाचं प्राणमात्मन** आत्मार्थम**कुरुत** कृतवान् सृष्ट्यादौ पितेत्यर्थः। यदुक्तमन्नत्रयं तत्र मनो नाम न किञ्चिदस्तीत्यत्र अस्ति तावन्मनः श्रोत्रादिबाह्यकरणानुग्राहकम्। कथं तत्? किं त्वयेदं रूपं दृष्टं? किं त्वया मदीयं वचः श्रुतं? इति पृष्टोऽन्यो वदति। अन्यत्र विषयान्तरे मे मनो गतं व्यापृतम्। सोऽह**मन्यत्रमनाः** सन् **नादर्शम्**। तथा**न्यत्रमनाः अभूवं नाश्रौषमिति** वदति। तदुक्तविषये मनसि सति पश्यति शृणोति च। तस्मादस्ति मनो नामान्तःकरणम्। तस्मात् सर्वो हि लोको **मनसा ह्येव पश्यति मनसा शृणोति**। एवमन्वयव्यतिरेकाभ्यां दर्शनादिव्यापृतेः मनोनिमित्तत्वेन सर्वकरणानुग्राहकं मनोऽस्त्येव। अस्तु नाम तत्, किं तत्स्वरूपं? इत्यत आह—काम इति। स्त्रीव्यतिकराभिलाषः **कामः**। शुक्लनीलादिभेदेन उपस्थितविषयविकल्पनं **सङ्कल्पः**। संशयज्ञानं **विचिकित्सा**। श्रुत्याचार्यवाक्यार्थास्तिक्यबुद्धिः **श्रद्धा**। तद्विपरीतबुद्धि**रश्रद्धा**। सर्वं साधयामीति धैर्यं **धृतिः**। तद्विपरीतमधैर्य**मधृतिः**। लज्जा **ह्रीः**। प्रज्ञा **धीः**। भयं **भीः**। **इत्येतत् सर्वं मन एव**। इतश्च मनोऽस्तित्वे हेत्वन्तरमुच्यते। **तस्मादप्य**-

चाक्षुषः **पृष्ठत उपस्पृष्टो मनसा विजानाति**। तत्स्पर्शवेदनस्य त्वचापि ज्ञातुं शक्यत्वात् किं मनसा? इति चेन्न; तद्विवेकस्यापि मनोनिमित्तत्वात् तत्प्रतिपत्तिहेतुर्मनोऽस्त्येव। तस्मात् मनसा सह त्रीण्यन्नानि फलभूतानि मनोवाक्प्राणाख्यानि। तत्र अध्यात्ममधिभूतमधिदैवं च व्याचिख्यासितानि। तत्राध्यात्मिकानां मनो व्याख्यातम्। अथ वाक्स्वरूपमुच्यते। लोके **यः कश्चन** प्राणिताल्वादिव्यङ्ग्यवर्णादिशब्दो ध्वनिः इतरो मेघवादित्रादिनिमित्तः सर्वोऽपि ध्वनिः **वागेव सा**। एवमिदं वाक्स्वरूपमुक्त्वा तत्कार्यमुच्यते—**सैषा वाक् हि** यस्मादन्तमभिधेयावसानमायत्तानुगता नैषा पुनरभिधेयवत् प्रकाश्या। किन्तु तत्प्रकाशिकैव प्रदीपवत् प्रकाशात्मकत्वात्। तथा च श्रुतिः वाचः प्रकाश्यतां परिहरति—**एषा हि नेति**। प्रकाशकत्वं वाचः कार्यमित्यर्थः। अथ प्राणस्वरूपमुच्यते—हृदयास्यनासिकावर्तित्वेन प्रणयनात् प्राणः। अधोवृत्त्या मूत्रपुरीषादेरपनयनादपानः। आनाभ्यासनो वीर्यवद्व्यायमनकर्मकर्ता व्यानः। आपादमस्तकस्थानः ऊर्ध्ववृत्तिरुदानः। अशितपीतसमानयनात् अन्नपक्ता समानः। एवं प्राणादिवृत्तिजातमेतत्सर्वं प्राण एव। न हि साक्षादाध्यात्मिकप्राणो नोक्तः, किन्तु तद्वृत्तिभेदतः कर्मैव व्याख्यातम्। एवमाध्यात्मिकत्वेन मनोवाक्प्राणान्नानि व्याख्यातानि। **एतन्मयो वायमात्मा** प्रजापतिः प्राजापत्यवाङ्मनःप्राणारब्धत्वात्। एतन्मय इत्युक्तस्य विशेषणं **वाङ्मयो मनोमयः प्राणमय इति** ॥ ३ ॥

मनआदिप्राजापत्यान्नानामाधिभौतिकत्वम्

त्रयो लोका एत एव वागेवायं लोको मनोऽन्तरिक्षलोकः प्राणोऽसौ लोकः ॥ ४ ॥ त्रयो वेदा एत एव वागेव ऋग्वेदो मनो यजुर्वेदः प्राणः सामवेदः ॥ ५ ॥ देवाः पितरो मनुष्या एत एव वागेव देवा मनः पितरः प्राणो मनुष्याः ॥ ६ ॥ पिता माता प्रजा एत एव मन एव पिता वाङ्माता प्राणः प्रजा ॥ ७ ॥

विज्ञातं विजिज्ञास्यमविज्ञातमेत एव यत् किंच विज्ञातं वाचस्तद्रूपं वाक् हि विज्ञाता वागेनं तद्भूत्वावति ॥ ८ ॥ यत्किंच विजिज्ञास्यं मनसस्तद्रूपं मनो हि विजिज्ञास्यं मन एनं तद्भूत्वावति ॥ ९ ॥ यत्किंचाविज्ञातं प्राणस्य तद्रूपं प्राणो ह्यविज्ञातः प्राण एनं तद्भूत्वावतिं ॥ १० ॥

पुनस्तेषामेव प्राजापत्यान्नानामाधिभौतिकत्वमभिधीयते—त्रय इति । भूरादित्रयो लोका एत एव वाङ्मनःप्राणाः । विशेषस्तु वागेवायं लोक इत्यादिः । तथा त्रयो वेदादयोऽप्येत एवेत्याह—त्रय इति । ऋज्वर्थमेतत्खण्ड-त्रयम् । किञ्च—विज्ञातं इति । विज्ञातं विजिज्ञास्यं अविज्ञातमेत एव । तत्र विशेषस्तु यत्किञ्चिद्विस्पष्टं ज्ञातं वाचस्तद्रूपम् । तत्र हेतुः वाक् हि विज्ञातेति प्रकाशात्मकत्वात् । यः अन्यान्यपि विज्ञापयति । तथा च वक्ष्यति "वाचा वै सम्राट् बन्धुः प्रज्ञायते" इति । एवंविदः फलं एतत्—वागेवैनं तद्भूत्वावति पिता पालयति । विज्ञातरूपेणास्यान्नं भोज्यतां प्रतिपद्यते । किञ्च—यत्किञ्च इति । यत् किञ्च विज्ञातुमिष्टं विजिज्ञास्यं तत् सर्वं मनसो रूपं सन्दिह्यमानाकारत्वात् । मनो हि विजिज्ञास्यम् । विद्याफलम्—मन एवनं भूत्वावति विजिज्ञास्यरूपेणास्यान्नमापद्यते । किञ्च—यत्किञ्च इति । तथा यत् किञ्चाविज्ञातं विज्ञानागोचरं प्राणस्य तद्रूपम् । प्राणो ह्यविज्ञातः तस्यानिरुक्तत्वात् । प्राण एनं तद्भूत्वावति अविज्ञात-रूपेणास्यान्नं भवति ॥ ४–१० ॥

वाङ्मनःप्राणानामाधिदैविकत्वम्

तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निस्तद्यावत्येव वाक् तावती पृथिवी तावानयमग्निः ॥ ११ ॥ अथैतस्य मनसो द्यौः शरीरं ज्योतीरूपमसावादित्यः तद्यावदेव मनस्तावती द्यौस्ता-

वानसावादित्यः तौ मिथुन॰ समैतां ततः प्राणोऽजायत स इन्द्रः स एषोऽसपत्नो द्वितीयो वै सपत्नो नास्य सपत्नो भवति य एवं वेद ॥ १२ ॥ अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रस्तद्यावानेव प्राणस्तावत्य आपस्तावानसौ चन्द्रस्त एते सर्व एव समाः सर्वेऽनन्ताः स यो ह एतानन्तवत उपास्तेऽन्तवन्त॰ स लोकं जयति अथ यो ह एताननन्तानुपास्तेऽनन्त॰ स लोकं जयति ॥ १३॥

वाङ्मनःप्राणानामाधिभौतिको विकारो व्याख्यातः। अथाधिदैविकार्थोऽयमारम्भः—**तस्या** इति। **तस्यै** एतस्या **वाचः** प्राजापत्यान्नत्वेन स्तुतत्वात् **पृथिवी शरीरं** बाह्याधारत्वात्। **ज्योतीरूपं** प्रकाशात्मकत्वात् पृथिव्याधेयभूतोऽयं पार्थिवोऽग्निः। प्रजापतेरियं वाक् द्विरुपा हि। कार्यमाधारः प्रकाशः करणं चाधेयम्। तदुभयं पृथिव्यग्नी प्रजापतेर्वागेव। **तत्** तत्र **यावत्येव** यावत्परिमाणा **वाक्** भवति तत्र सर्वाधारत्वेन या व्यवस्थिता सेयं **पृथिवी तावती** भवति। ज्योतीरूपेण करणरूपः **तावानयमग्निः** पृथिवीमनुप्रविश्य तावानेव भवति ॥ ११ ॥ **अथैतस्य** इति। **अथैतस्य** प्राजापत्यान्नमनसो **द्यौः शरीरं** कार्यमाधारः। **ज्योतीरूपं** करणमाधेयः **सोऽसावादित्यः**। तत्राध्यात्ममधिभूतं **मनो यावत्परिमाणं तावती द्यौः** मनस आधारत्वात्। **तावानसावादित्यो ज्योतीरूपं** करणमाधेयम्। **ताव**ग्न्यादित्यौ वाङ्मनसे आधिदैविके मातापितरौ **मिथुनं** इतरेतरसंसर्गं **समैतां** समगच्छताम्। मनसादित्येन पित्रा वाचाग्निना मात्रा च प्रसूतं प्रकाशितं कर्म करिष्यामीत्यन्तरा रोदस्योः **ततस्तयोरेव** सङ्गमनात् स्पन्दनादिशक्तिमान् **प्राणो** वायु**रजायत**। एवं यो जातः **स इन्द्रः** परमेश्वरः। न केवलमिन्द्र एवायं, यस्य सपत्ना न विद्यन्ते **सोऽयमसपत्नः**। **सपत्न**स्तु स्वप्रतिपक्षित्वेन **द्वितीयः**। प्राणं प्रति द्वितीयत्वेऽपि वाङ्मनसे न हि सपत्नत्वं भजेते, किन्तु गुणभूते अध्यात्माविशेषात्। **एवं** विदुषो **न** हि **सपत्नः** प्रतिपक्षो **भवति**। एवमसपत्नं प्राणं **यो वेद** स विद्वान् प्राजापत्यं पदमश्नुते ॥ १२ ॥

किञ्च—**अथैतस्य** इति। **अथैतस्य** प्राजापत्यान्नत्वेन प्रकृतप्राणस्य **आपः शरीरम्**। करणाधारज्योतीरूपं **असौ चन्द्रः**। तत्र **यावानेव प्राणो**ऽध्यात्मादिभेदेषु **तावत्** व्याप्तिमत्य **आपः**। **तावानसौ** अबाधारश्चन्द्रः। एतान्येतानि त्रीण्यन्नानि पाङ्क्तेन कर्मणा सृष्टानि। समस्तं जगत् एतैरेव व्याप्तम्। तेभ्योऽतिरिक्तं कार्यात्मकं कारणात्मकं वा न किञ्चिदस्ति। त एते वाङ्मनःप्राणाः **सर्व एव समाः**। तत एवानन्ताः। यावत् संसारभावित्वेनानन्तत्वम्। न हि कार्यकरणकलनाविरलदृष्टेः संसारलेशोऽप्यस्ति। अत एव कार्यकरणात्मका हि ते। **स यः** कश्चन ह प्रजापतेरात्मभूतान् वाङ्मनःप्राणान् अध्यात्मादिरूपेणान्तवत उपास्ते सोऽयं तदनुरूपमन्तवत् फलमन्तवन्तं लोकं जयति। परिच्छिन्नतयायं जायते। न हि तेषामात्मभूतो भवति। अथ पुनर्य **एताननन्तान्** सर्वप्राण्यात्मत्वेनापरिच्छिन्नानुपास्ते सोऽनन्तदेवलोकं जयति ॥ १३ ॥

वित्तकर्मसंभावना

स एष संवत्सरः प्रजापतिः षोडशकलस्तस्य रात्रय एव पञ्चदशकला ध्रुवैवास्य षोडशी कला स रात्रिभिरेव आ च पूर्यतेऽप च क्षीयते सोऽमावास्याꣳ रात्रिमेतया षोडश्या कलया सर्वमिदं प्राणभृदनुप्रविश्य ततः प्रातर्जायते तस्मादेताꣳ रात्रिं प्राणभृतः प्राणं न विच्छिन्द्यादपि कृकलासस्य एतस्या एव देवताया अपचित्यै ॥१४॥

सर्वपितृभूतः प्रजापतिः पाङ्क्तेन कर्मणा सप्तान्नानि सृष्ट्वा तत्रान्नत्रयमात्मार्थमकरोदित्युक्तं तद्व्याख्यातं च। तत्र पृथिव्यग्नी माता दिवादित्यौ पिता तयोः प्राणः प्रजेति व्याख्यातम्। तत्र वित्तकर्मणी संभावितव्ये इत्ययमारम्भः—**स एष** इति। योऽयं त्र्यन्नात्मा प्रजापतिः प्रकृतः स एष **संवत्सरः** तदात्मना निर्दिश्यते। यस्यावयवाः षोडश कलाः सोऽयं **षोडशकलः**। तस्य संवत्स-

रात्मनः कालस्वरूपत्वेन **रात्रय** एवाहोरात्राणि तिथयः **पञ्चदश कलाः**। **अस्य** प्रजापतेः **ध्रुवैव** नित्यैव **षोडशी कला** संख्यापूरणात्। **स रात्रिभिः** कलोत्तरतिथिभिरेव **आपूर्यतेऽपक्षीयते च**। शुक्लप्रतिपदारभ्य पौर्णमास्यान्तं चन्द्रमाः प्रजापतिरुपचीयमानकलाभिः वर्धते। तथा कृष्णप्रतिपदारभ्यामावास्यान्तमपचीयमानकलाभिः सोऽयमपक्षीयते। अमायामपि या कला क्षीणतयावशिष्टा तयावशिष्टध्रुवाख्यषोडश्या **कलया स** प्रजापतिः **सर्वमिदं प्राणभृत्** प्राणिजातम**नुप्रविश्य** यदपः पिबति यदोषधीरश्नाति तत् सर्वमोषध्यात्मना व्याप्य अमारात्रिमास्थाय परेद्युः **प्रातर्जायते** द्वितीयकलासंयुक्तो भवति। तत्र दिवादित्यौ मनः पिता पृथिव्यग्नी माता। तयोः प्रजा प्राणः। कलास्तु चान्द्रमस्यस्तिथयः। तासां वित्तवदुपचयापचयत्वात् वित्तत्वमुक्तम्। तासां कालावयवकलानां जगत्परिणामहेतुत्वं कर्मैवेत्येष कृत्स्नः प्रजापतिः जायादिकर्मान्तैषणानुरूपपाङ्क्तकर्मफलत्वेन संवृत्तः कार्यस्थितेः कारणानुविधायित्वात्। यस्मादेष चन्द्रमा एतां रात्रिं सर्वप्राणिजातमनुप्रविश्यावशिष्टकलान्वितो यतो वर्तते **तस्मात्** हेतोः **एताममावास्यां रात्रिं प्राणभृतः** प्राणिनः **प्राणं न विच्छिन्द्यात्** न प्रमापयेत् इत्येतदपि **कृकलासस्य**। कृकलासो हि पाप्मस्वभावेनैव प्राणिभिर्हिंस्यते। "अहिंसन् सर्वभूतानि" इति हिंसायाः प्रतिषिद्धत्वात् इति चेन्न; बाढं, प्रतिषिद्धा, तथापि "अन्यत्र तीर्थेभ्यः" इत्युक्तत्वात् न ह्यमावास्याया अन्यत्रेत्यदोषः। **इदमेतस्याः** सोमदे**वताया अपचित्यै** पूजार्थम्॥ १४॥

परोक्षत्वेन कथितस्य प्रत्यक्षतया प्राप्तिः

यो वै स संवत्सरः प्रजापतिः षोडशकलोऽयमेव स योऽयमेवंवित् पुरुषस्तस्य वित्तमेव पञ्चदश कला आत्मैवास्य षोडशी कला स वित्तेनैव आ च पूर्यतेऽप च क्षीयते तदेतन्नभ्यं यदयमात्मा प्रधिर्वित्तं तस्माद्यद्यपि सर्वज्यानिं जीयत आत्मना चेज्जीवति प्रधिनागादित्येवाहुः॥ १५॥

यः परोक्षत्वेनाभिहितस्तस्य प्रत्यक्षेणाप्युपलब्ध्यर्थमिदमुच्यते—**यो वा इति**। यः त्र्यन्नात्मकं प्रजापतिं वेत्ति **स एवंवित् पुरुषः**। **तस्य** गवादि-**वित्तमेव पञ्चदश कला** उपचयापचयधर्मित्वात्। वित्तसाध्यं च कर्म तस्य विदुषः कृत्स्नताहेतुः। **आत्मा** देह **एव** समग्रकलापूरणी चन्द्रमसो ध्रुवेव **षोडशी कला**। लोके प्रसिद्धं **वित्तेन पूर्यतेऽपक्षीयत** इति च। तदेतन्नभ्यं नाभ्यं नाभ्यै हितं नाभिं वार्हति। तत् किं? इत्यत्र **यदयमात्मा** पिण्डः। **प्रधिः** बाह्यपरिवारस्थानीयं **वित्तं** चक्रस्येवारनेम्यादिः। **तस्मात् यद्यपि सर्वज्यानिं** सर्वापहरणं **जीयते** हीयते, चक्रस्थानीयेनात्मना प्राप्नोति, बाह्यपरिवारेणात्मना **प्रधिनागात्**। यदि **जीवति** तदा तन्नेमिवियुक्तचक्र-मिवाहुः॥ १९ ॥

पुत्रादीनां साध्यसाधनविशेषसंबन्धद्योतनम्

अथ त्रयो वाव लोका मनुष्यलोकः पितृलोको देवलोक इति सोऽयं मनुष्यलोकः पुत्रेणैव जय्यो नान्येन कर्मणा कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानाꣳ श्रेष्ठस्तस्माद्विद्यां प्रशꣳसन्ति ॥ १६ ॥

विद्याविशिष्टपाङ्क्तकर्मणा त्र्यन्नात्मकः प्रजापतिः भवतीत्युक्तम्। ततो जायादिवित्तं तत्परिवारस्थानीयमित्यभिहितम्। तत्र पुत्रकर्मापरविद्यानां लोकादि-साधनमात्रमवगतं न पुत्रादीनाम्। पुनस्तेषां साध्यसाधनविशेषसंबन्धद्योतनार्थ-मुत्तरखण्डारम्भः—**अथेति**। अथेति वाक्योपन्यासार्थः। **त्रयो वा**। वेत्यव-धारणतः त्रय एव। न न्यूना नाधिका इति द्योत्यते। के ते **लोकाः**? **मनुष्यलोकः पितृलोको देवलोक इति**। तत्र **सोऽयं मनुष्यलोकः** तत्साधनीभूत**पुत्रेणैव जय्यो** जेतव्यः **नान्येन कर्मणा**। विद्यया वा जेतव्य इत्यर्थः। केवलाग्निहोत्रादिलक्षणकर्मणा **पितृलोको** जेतव्यः न हि पुत्रेण विद्यया वा। केवलविद्यया **देवलोकः**; न हि पुत्रेण नापि कर्मणा। **देवलोको**

वै लोकत्रयाणां श्रेष्ठः प्रशस्यतमत्वात्। यस्माद्विद्या तदाप्तिसाधनतामर्हति तस्मात् विद्यां विद्वांसः प्रशंसन्ति ॥ १६ ॥

पुत्रस्य लोकजयहेतुत्वकथनम्

अथातः संप्रत्तिर्यदा प्रैष्यन् मन्यतेऽथ पुत्रमाह त्वं ब्रह्म त्वं यज्ञस्त्वं लोक इति स पुत्रः प्रत्याहाहं ब्रह्माहं यज्ञोऽहं लोक इति यद्वै किंचानूक्तं तस्य सर्वस्य ब्रह्मेत्येकता। ये वै केच यज्ञास्तेषाᳬ सर्वेषां यज्ञ इत्येकता ये वै केच लोकास्तेषाᳬ सर्वेषां लोक इत्येकता एतावद्वा इदᳬ सर्वमेतन्मा सर्वᳬ सन्नयमितोऽभुनजदिति तस्मात् पुत्रमनुशिष्टं लोक्यमाहुस्तस्मादेनमनुशासति स यदैवंवित् अस्माल्लोकात्प्रैति अथ एभिरेव प्राणैः सह पुत्रमाविशति स यद्यनेन किंचिदक्ष्णया अकृतं भवति तस्मादेनᳬ सर्वस्मात् पुत्रो मुञ्चति तस्मात्पुत्रो नाम स पुत्रेणैवास्मिँल्लोके प्रतितिष्ठति अथैनमेते दैवाः प्राणा अमृता आविशन्ति ॥ १७ ॥

पुत्रकर्मविद्या मनुष्यादिलोकसाधनत्वेनाभिहिता। जायायाः पुत्रकर्मार्थत्वेन सा न पृथगभिहिता। वित्तस्यापि कर्मसाधनत्वेन न पृथक्साधनता उक्ता। स्वात्मप्रतिलम्भेनैव विद्याकर्मणोः लोकजयहेतुत्वं प्रसिद्धमेव। पुत्रस्याक्रियात्मकत्वात् तस्य लोकजयहेतुत्वं केन प्रकारेण भवति? इति न ज्ञायते। तदवबोधाय इदमारभ्यते—अथेति। अथ कर्मविद्यागतिज्ञानानन्तरं यतो लोकजयहेतुत्वेन पुत्रो न ज्ञातः अतोऽस्य विचारः क्रियते। पिता पुत्रे स्वात्मव्यापारसंप्रदानं करोतीति संप्रत्तिः तत्संज्ञं कर्म। तत् कदा कर्तव्यं? इत्यत्र स पिता स्वात्महानिसूचकारिष्टदर्शनेन यदा प्रैष्यन् मरिष्यामीति मन्यते, अथ तदा पुत्रमाहूय तं त्वं ब्रह्म त्वं यज्ञः त्वं लोक इत्याह।

एवं स पित्रोक्तः पुत्रः प्रत्याह। किमिति? **अहं ब्रह्म अहं यज्ञः अहं लोक इति।** एतद्वाक्यत्रयार्थस्तिरोहित इति तद्व्याख्यानाय श्रुतिः प्रवर्तते। **यद्वै किञ्चानूक्तमधीतमनधीतं च तत्सर्वस्यैव ब्रह्मेत्येतस्मिन् पदे एकता** एकत्वम्। एतावन्तं कालं मत्कर्तव्यतया योऽध्ययनव्यापार आसीत् स इत ऊर्ध्वं त्वं ब्रह्म त्वत्कर्तृकोऽस्ति। तथा **ये वै केचन यज्ञाः** मयानुष्ठेया अनुष्ठिताश्च **तेषां यज्ञ इत्येकस्मिन् पदे एकत्वम्।** मत्कर्तृका यज्ञा य आसन् ते इत ऊर्ध्वं त्वत्कर्तृका भवन्तु। मया जिता अजिताश्च **ये वै के च लोकाः सन्ति तेषां लोक इत्येतस्मिन् पदे एकता।** इत ऊर्ध्वं त्वं लोकः। त्वया लोका जेतव्याः। एवं कर्तव्यक्रतुः त्वयि समर्पितः। अहं तु कर्तव्यताबन्धात् विमुक्तोऽस्मि। स एवं पित्रानुशिष्टः पुत्रस्तथेति सर्वं प्रतिपन्नवान्। तत्र श्रुतिः पितुरभिप्रायमिममाचष्टे। **एतावत्परिमाणं वा इदं सर्वं** मयापि वेदास्त्वध्येतव्याः। यज्ञा यष्टव्याः। लोकाश्च जेतव्याः। एतावत् खलु गृहिणा कर्तव्यम्। **एतन्मा सर्वं सन्नयं** सर्वं भारं मदधीनं हि **इतोऽस्माल्लोकात्** मामभुनजत् पालयिष्यतीति। लृडर्थे लङ्। छन्दसि नियमाभावात्। यस्मादेवं संपन्नः पुत्रः पितरमस्मात् लोकात् कर्तव्यबन्धात् मोचयिष्यति, **तस्मात् पुत्रमनुशिष्टं लोक्यमाहुः** ब्राह्मणाः। **तस्मादेनं** लोक्योऽयं स्यादित्य**नुशासति।** **स यदैवं** पुत्रसमर्पितकर्तव्यक्रतुः पिता **अस्मात् लोकात् प्रैति** म्रियते **अथ** तदा **एभिः** प्रकृतवाङ्मनःप्राणैः **पुत्रमाविशति** पितुर्वाङ्मनःप्राणभावित्वात्। यस्यैवमनुशिष्टः पुत्रो भवति स पितास्मिन्नेव लोके पुत्ररूपेण वर्तते। न हि मृत इति मन्तव्यः। तथा च श्रुतिः— "सोऽस्यायमितर आत्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते" इति। अथेदानीं सत्पुत्रलक्षणमाह—**यदीति।** **स** पुत्रो **यदि** कदाचित् **अनेन** पित्राक्षणया कोणच्छिद्रतोऽन्तरा **अकृतं भवति तस्मात्** पितृकृतलोकप्राप्तिप्रतिबन्धकरूपात् **पुत्रो मुञ्चति** मोचयति। पित्रा यत् कर्तव्यं तत् सर्वं स्वेन पूरयित्वा पितरं त्रायते। यस्मादेवं **तस्मात्** पुत्रस्य **पुत्रत्वम्।** **पुत्रो नाम भवति** यत् पितुः छिद्रं पूरयित्वा त्रायते। मृतोऽपि स पिता पुत्ररूपेण सन् **अमृतोऽस्मिन्**

लोके प्रतितिष्ठति। एवमसौ पिता पुत्रेण मनुष्यलोकं जयति। न तथा विद्याकर्मभ्याम्। अथ कृतसंप्रत्तिकमेनं पितरमेते वागादयः प्राणा दैवा अमृता आविशन्ति ॥ १७ ॥

कृतसंप्रत्तिके पितरि वागादीनामावेशः

पृथिव्यै चैनमग्नेश्च दैवी वागाविशति सा वै दैवी वाक् यया यद्यदेव वदति तत्तद्भवति ॥ १८ ॥ दिवश्चैनमादित्याच्च दैवं मन आविशति तद्वै दैवं मनो येनानन्द्येव भवति अथो न शोचति ॥१९॥ अद्भ्यश्चैनं चन्द्रमसश्च दैवः प्राण आविशति स वै दैवः प्राणो यः संचरꣳश्चासंचरꣳश्च न व्यथते अथो न रिष्यति स एवंवित् सर्वेषां भूतानामात्मा भवति यथैषा देवता एवꣳ स यथैतां देवताꣳ सर्वाणि भूतान्यवन्ति एवꣳ हैवंविदꣳ सर्वाणि भूतान्यवन्ति यदु किंचेमाः प्रजाः शोचन्ति अमैवासां तद्भवति पुण्यमेवामुं गच्छति न ह वै देवान् पापं गच्छति ॥ २० ॥

तत् कथं? इत्यत आह--पृथिव्या इति। पृथिव्यै पृथिव्याश्च एनमग्नेश्च दैवी आधिदैवात्मिका वाक् आविशति। सर्वेषामुपादानभूता हि पृथिव्यग्निलक्षणा वाक्। सा च दैवी वाक् अनृतादिदोषरहिता। अत एव यया वाचा दैव्या यद्यदात्मने परस्मै वा वदति तत्तत् भवति। अमोघा हीयं वाक्। दिव इति। तथा दिवश्चैनमादित्याच्च दैवं मन आविशति। स्वभावनिर्मलत्वात् तद्वै दैवं मनः, येन मनसा आनन्द्येव भवति सुख्येव भवति। अथो अप्यसौ न शोचति शोकनिमित्ताभावात्। अद्भ्यश्चैनं इति। अथाद्भ्यः प्राणं चन्द्रमसः च दैवः प्राण आविशति। स वै दैवः प्राणः किंलक्षणः? इत्यत्र—यो व्यष्टिसमष्टिरूपेण जङ्गमस्थावरेषु संचरंश्च असंचरंश्च

न व्यथते निमित्ताभावात् । अथो अपि न रिष्यति न हि हिंसामापद्यते । स यः त्र्यन्नात्मदर्शनं यथावद्वेत्ति स सर्वेषां भूतानामात्मा वाङ्मनःप्राणरूपो भवति । सर्वभूतात्मतया सर्वज्ञो भवति सर्वकृच्च भवतीत्यर्थः । यथैषा हिरण्यगर्भदेवता न ह्यस्याः सर्वभूतात्मत्वे सर्वकृत्त्वे वा क्वचित् प्रतिघातोऽस्ति । स इति दृष्टान्तनिर्देशः । यथैतां हिरण्यगर्भदेवतां इज्यादिभिः सर्वाणि भूतान्यवन्ति पालयन्ति, एवं हैवंविदं सर्वाणि भूतान्यवन्ति इज्यादिकं प्रयुञ्जत इत्यर्थः । सर्वप्राणिनामात्मा भवतीत्यन्तम् । तथात्वे सर्वप्राणिसुखदुःखैः संबध्यत इति चेन्न ; तस्य सर्वात्मकत्वेनापरिच्छिन्नदृष्टित्वात् । यथा लोकानामात्मात्मीयनिमित्तसुखदुःखाद्युपजायते नैवमीश्वरस्य सुखदुःखादिनिमित्तात्मीयविभ्रमालङ्कारस्वाज्ञानमस्ति । तदेतदुच्यते—यत् उ किञ्च यत् किञ्चेमाः प्रजाः शोचन्ति आसां प्रजानां अमैव सहैव शोकादिर्भवति तद्गतदृष्टेः परिच्छिन्नत्वात् । सर्वात्मनः प्रजापतेः केन सह संयोगो वियोगो वा भवेत् ? येनास्य शोकहर्षौ स्यातां तन्निमित्तमेव नास्तीत्यर्थः । यथा प्रजापतिः तथा प्राजापत्यपदे निषण्णममुं स्वकृतनिरतिशयपुण्यतत्फलमेव गच्छति । न ह वै देवान् पापं गच्छति पापतत्फलावकाशवैरल्यात् ॥१८–२० ॥

वाङ्मनःप्राणानामुपास्यत्वे विशेषः

अथातो व्रतमीमाꣳसा प्रजापतिर्ह कर्माणि ससृजे तानि सृष्टान्यन्योन्येनास्पर्धन्त वदिष्याम्येवाहमिति वाक् दध्रे द्रक्ष्याम्यहमिति चक्षुः श्रोष्याम्यहमिति श्रोत्रमेवमन्यानि कर्माणि यथाकर्म तानि मृत्युः श्रमो भूत्वा उपयेमे तान्याप्नोत् तान्याप्त्वा मृत्युरवारुन्ध तस्मात् श्राम्यत्येव वाक् श्राम्यति चक्षुः श्राम्यति श्रोत्रमथेममेव नाप्नोत् योऽयं मध्यमः प्राणस्तानि ज्ञातुं दध्रिरे अयं वै नः श्रेष्ठो यः संचरꣳश्चासंचरꣳश्च न व्यथतेऽथो न रिष्यति हन्तास्यैव

सर्वे रूपमसामेति त एतस्यैव सर्वे रूपमभवꣳस्तस्मादेत एतेनाख्या-
यन्ते प्राणा इति तेन ह वाव तत्कुलमाचक्षते यस्मिन्कुले भवति य
एवं वेद य उ हैवंविदा स्पर्धतेऽनुशुष्यति अनुशुष्य हैवान्ततो
म्रियत इत्यध्यात्मम् ॥ २१ ॥

वाङ्मनःप्राणानामुपास्यत्वमुक्तं, तद्गतविशेषो नोक्तः। तदर्थमियं मीमांसेत्याह—अथेति। अथानन्तरं व्रतस्य मीमांसा उपासनकर्मविचारणा। किमिति? एषां वागादीनां कस्य कर्म व्रतत्वेन धारयितव्यं? इति मीमांसा प्रसक्तेत्यर्थः। तत्र प्रजापतिर्ह किल प्रजाः सृष्ट्वाथ कर्माणि ससृजे वागादिकरणानां कर्मार्थत्वात्। तानि पुनः सृष्टानि अन्योन्येन परस्परमस्पर्धन्त स्वात्मप्रशंसया स्पर्धां चक्रुः। कथं तत्? निरन्तरं वदिष्याम्येवाहमिति वाक् अभिमतिं दध्रे धृतवती। तथा द्रक्ष्याम्यहमिति चक्षुः। श्रोष्याम्यहमिति श्रोत्रम्। एवमन्यानि कर्माणि करणानि यत् यस्य कर्म यथाकर्म तानि करणानि मृत्युः मारकः श्रमः श्रमरूपी भूत्वा उपयेमे करणानि उपसंजग्राह। कथम्? स्वव्यापारप्रवृत्तकरणानि मृत्युः श्रमरूपेणाप्नोत्। तान्येवमाप्त्वावारुन्ध स्वस्वव्यापृतितोऽवरोधं कृतवान्। यस्मादेवं तस्मात् स्वकर्माव्यप्रापि वाक् श्राम्यति श्रमरूपमृत्युनाक्रान्तेयं स्वव्यापृतितः प्रच्याव्यते। तथैव श्राम्यति चक्षुः। श्राम्यति श्रोत्रम्। अथेममेव मुख्यप्राणं नाप्नोत्। श्रमरूपी मृत्युः योऽयं मध्यमः प्राणः न कदापि श्रान्तः स्वकर्मणि प्रवर्तते। एवं तं तानि करणानि ज्ञातुं दध्रिरे मनो धृतवन्ति। अयं वै नोऽस्माकं मध्ये श्रेष्ठः यः संचरंश्च असंचरंश्च न व्यथते। अथो न रिष्यति। हन्त! इदानीं सर्वे वयमस्यैव प्राणस्य रूपमसाम तदात्मतया प्रतिपद्येमहि। इत्येवं निश्चित्य ते सर्वे प्राणमेवात्मत्वेन प्रतिपद्य प्राणव्रतमेव दध्रिरे। यस्माच्चलनात्मकप्राणरूपेण रूपवन्ति करणानि तस्मादेते वागादय एतेन प्राणाभिधानेनाख्यायन्ते प्राणा इत्येवमभिधीयन्ते। य एवं सर्वकरणानां प्राणात्मतां वेत्ति प्राणशब्दाभिधेयत्वं च तेन ह वाव विदुषा तत्कुलमाचक्षते

लौकिकाः। यस्मिन् कुले स विद्वान् जातो भवति तत् कुलमपि विद्वन्नाम्नैव प्रथितं भवति। अमुष्य कुलमेतदिति विख्यातं भवतीत्यर्थः। य एवं वेद तस्यैतत् फलम्। किञ्च यः कश्चित् उ ह य एवंविदा स्पर्धते सोऽस्मिन्नेव शरीरे अनुशुष्यति। अनुशुष्य हैवान्ततो म्रियते। इत्येवमुक्तमध्यात्मम्। इतिशब्दः उपसंहारार्थः॥ २१॥

अधिदैवतदर्शनम्

अथाधिदैवतं ज्वलिष्याम्येवाहमित्यग्निर्दध्रे तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमा एवमन्या देवता यथादैवतꣳ स यथैषां प्राणानां मध्यमः प्राण एवमेतासां देवतानां वायुः म्लोचन्ति ह्यन्या देवता न वायुः सैषानस्तमिता देवता यद्वायुः॥ २२॥

अथाधिदैवतदर्शनमुच्यते—अथेति। अथानन्तरं कस्य देवताविशेषस्य व्रतधारणं श्रेयः? इति मीमांस्यते। अध्यात्मपरिच्छिन्नवागादिवत् सर्वं ज्वलिष्याम्येवाहमिति अग्निर्दध्रे। तप्स्याम्यहमित्यादित्यो भास्याम्यहमिति चन्द्रमाः। एवमन्या देवताः। यथादैवतं सोऽध्यात्मवागादिप्राणानां मध्ये यथा प्राणो मध्यमः एवमेतासामग्न्यादिदेवतानां मध्ये वायुरपि प्राणवन्न म्लोचति। इतरास्तु म्लोचन्ति अस्तं यन्ति स्वकर्मभ्य उपरमन्ते। यथाध्यात्मं वागादिदेवता अग्न्याद्या न वायुरस्तं याति। यथाध्यात्मं मध्यमः प्राणः। अथ सैषानस्तमिता देवता यो वायुर्यद्वायुः। एवमध्यात्ममधिदैवतं च मीमांसित्वा निर्धारितम्। प्राणवाय्वात्मनो व्रतं प्राजापत्यपदप्रापकमित्यर्थः॥ २२॥

प्राणस्यैव उपास्यत्वकथनम्

अथैष श्लोको भवति यतश्चोदेति सूर्योऽस्तं यत्र च गच्छतीति प्राणाद्वा एष उदेति प्राणेऽस्तमेति तं देवाश्चक्रिरे धर्मꣳ

स एवाद्य स उ श्व इति यद्वा एतेऽमुर्हि अध्रियन्त तदेवाप्यद्य कुर्वन्ति । तस्मादेकमेव व्रतं चरेत् प्राण्याच्चैवापान्याच्च नेन्मा पाप्मा मृत्युराप्नुवदिति यद्यु चरेत् समापिपयिषेत् तेनो एतस्यै देवतायै सायुज्यꣳ सलोकतां जयति ॥ २३ ॥

उक्तार्थे मन्त्रोऽपि भवतीत्याह—**अथेति**। **यतश्च** यस्मात् वायोः **सूर्य उदेति** प्राणादेवोद्गच्छतीत्यर्थः। **यत्र च** वायौ प्राणे **चास्तं गच्छति** पुरुषस्यापरसन्ध्यासमये स्वापसमये च सूर्यः चक्षुश्चादर्शनतां गच्छति। **तं** धर्मभूतं वागादयोऽग्न्यादयो देवाः प्राणव्रतं वायुव्रतं च **चक्रिरे** धृतवन्तः। यः पुरा मीमांसितः स एवाद्येदानीं श्वो भविष्यत्यपि कालेऽनुवर्तते वर्तिष्यते च। तत्रेमं मन्त्रं संक्षेपतो विवृणोति—**प्राणादिति**। **प्राणाद्वा एष सूर्य उदेति प्राणेऽस्तमेति**। **तं देवाश्चक्रिरे धर्मं स एवाद्य स उ श्वः** इत्यस्यार्थः। **यद्वा एते** एतद्व्रतम**मुर्हि** अमुष्मिन् काले वागादयोऽग्न्यादयश्च प्राणव्रतं वायुव्रतं च**अध्रियन्त**। **तदेवाद्याप्य**न्येऽनुवर्तन्ते। तैरप्याचरितव्रतमभग्नमेव भवति। मुख्यं प्राणं विना यत्तु वागादिव्रतमग्न्यादिव्रतं चाभग्नमिति ये कर्तुं वाञ्छन्ति तेषामस्तमनकाले स्वापकाले च वायौ प्राणे च निम्लुक्तिर्भवतीत्यत्र—यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं मनः प्राणं चक्षुः प्राणं श्रोत्रमिति यदायं प्रबुध्यते तदा वागादयः पुनः प्राणादेव जायन्ते। यथेद-मध्यात्मं तथाधिदैवतमपि। यदा वा वायुमग्निरनुगच्छति तदायमनूद्वाति। तस्मादेनमुदवासीदित्याहुः। यदादित्योऽस्तमेति वायुं तर्हि प्रविशति। वायुं चन्द्रमा वायुं दिशः पुनर्वायोरेवाधिजायन्त इति यस्मादेतदेव व्रतं वागादिष्व-ग्न्यादिषु चानुगतं यदेतत् वायोः प्राणस्य च परिस्पन्दात्मकत्वं तत् व्रतं सर्वदेवैरनुवर्त्यम्। **तस्मा**दन्योऽप्ये**कमेव व्रतं चरेत्**। किं तत्? **प्राण्याच्च अपान्याच्च** प्राणनापाननव्यापारं कुर्यात्। न हि प्राणापानव्यापारयोः उपर-मोऽस्ति। तस्मात् तदेवैकं व्रतं चरेत्। इन्द्रियादिव्यापारान्तरं हित्वा मुख्यप्राणो-पासनमेव कुर्यादित्यर्थः। **नेत्** मा न हि मां **पाप्मा** श्रमरूपी **मृत्युराप्नुवत्**

आप्नुयात्। यद्यहमस्मात् व्रतात् प्रच्युतः स्यां तदा मृत्युना ग्रस्तो भवामीति भिया यावदायुषं प्राणव्रतमेव धारयेदित्याशयः। **यदि** कदाचित् **उ चरेत्** प्रारभेत यदि वा प्राणव्रतं **समापिपयिषेत्** समापयितुमिच्छेत् तदा प्राणः परिभूतः स्यात् देवाश्च। तस्मात् समापयेदेव। तेनानेन व्रतेन सर्वभूतेषु वागादयोऽग्न्यादयश्च मदात्मका एव। अहं तु प्राणात्मा सर्वपरिस्पन्दकृत्त्वात्। **तेन उ** व्रतधारणेन **एतस्याः** प्राणदेवतया **एव सायुज्यं** सयुग्भावं **सलोकतां** एकस्थानत्वं स्वविज्ञानापेक्षमेतत् **जयति** प्राप्नोतीत्यर्थः ॥ २३ ॥

इति पञ्चमं ब्राह्मणम्

षष्ठं उपसंहारब्राह्मणम्

सर्वनामग्रासं ब्रह्मैव

त्रयं वा इदं नाम रूपं कर्म तेषां नाम्नां वागित्येतदेषामुक्थमतो हि सर्वाणि नामान्युत्तिष्ठन्ति एतदेषाꣳ साम एतद्धि सर्वैर्नामभिः सममेतदेषां ब्रह्म एतद्धि सर्वाणि नामानि बिभर्ति ॥ १ ॥

यदेतदाविद्यकं जगत् प्रस्तुतं तस्य व्याकृतत्वेन नामरूपकर्मात्मकत्वात् एतस्य ब्रह्मविकल्पितत्वेन ब्रह्मातिरिक्तसत्तावैरल्यात् एतत् सर्वं ब्रह्मैव नेतरत् इति प्रकटयितुं षष्ठं ब्राह्मणमारभ्यते—त्रयमिति। यदेतत् ब्रह्माज्ञानविजृम्भितं तदिदं जगत् कतिविकारविशिष्टं? इत्यत्र **नाम रूपं कर्म** चेति विकारत्रयविशिष्टमित्यर्थः। **त्रयं वा**—वेत्यवधारणात् नामरूपकर्मातिरिक्तविकृतिः नास्तीति द्योत्यते। **तेषां नाम्नां** शब्दविकाराणां कारणं वागित्युच्यते। "यः कश्च शब्दो वागेव" इति श्रुतेः। **एतदेषां** नामविशेषाणां **उक्थं** कारणम्। **अतो**

हि अस्मात् नामसामान्यात् यज्ञदत्त इत्यादिसर्वाणि नामान्युत्तिष्ठन्ति। यथा लवणाचलात् लवणकणाः प्रविभज्यन्ते तथा कारणात् कार्याणि विशेषाणां सामान्यनिमित्तत्वात्। तत् कथं सामान्यविशेषभावः? तयोः एतच्छब्द-सामान्यात् एषां विशेषाणां नाम साम समत्वात् सामान्यम्। एतत् हि यस्मात् सर्वैः नामभिः समं नामविशेषाणां आत्मलाभाविशेषात्। यस्य यत् आत्मलाभहेतुः तेनायमप्रविभक्तो लोके दृष्टः। घटस्य मृदा यथा-प्रविभक्तता तथा वाच्यवाचकयोरविभक्ततेत्यर्थः। यत एतदेषां वाक्छब्दवाच्यं ब्रह्म अतो नाम्नां आत्मलाभः शब्दार्थयोरविनाभूतत्वात्। यस्मादेवं तस्मात् सर्वनामार्थभूतं ब्रह्मैव स्वाभेदेन सर्वाणि नामानि बिभर्ति नाम्नां शब्द-मात्रत्वेन मिथ्यात्वात् तदर्थस्य तत्संबन्धास्पृष्टत्वात् परमार्थतः सर्वनामग्रासं ब्रह्ममात्रमवशिष्यत इत्यर्थः ॥ १ ॥

रूपसामान्यग्रासं च ब्रह्मैव

अथ रूपाणां चक्षुरित्येतदेषामुक्थमतो हि सर्वाणि रूपाण्यु-त्तिष्ठन्ति एतदेषाꣳ साम एतद्धि सर्वै रूपैः सममेतदेषां ब्रह्म एतद्धि सर्वाणि रूपाणि बिभर्ति ॥ २ ॥

रूपकर्मणोरप्येवमेव योज्यमित्याह—अथेति। अथ शुक्लकृष्णादिनाना-रूपाणां चक्षुर्विषयसामान्यं प्रकाश्यमात्रं यत् तत् प्रकाशकम्। तस्मादेव हि सर्वाणि रूपाण्युत्तिष्ठन्ति। एतदेषां साम। एतद्धि सर्वैः रूपैः समम्। एतदेषां ब्रह्म। एतद्धि स्वाङ्गदृष्ट्या सर्वाणि रूपाणि बिभर्तीव बिभर्ति। वस्तुतः स्वातिरिक्तरूपवैरल्यात् रूपसामान्यग्रासं ब्रह्ममात्रमवशिष्यते ॥ २ ॥

स्वारोपितकर्मसामान्यं स्वयमेव

अथ कर्मणामात्मेत्येतदेषामुक्थमतो हि सर्वाणि कर्मा-ण्युत्तिष्ठन्ति एतदेषाꣳ साम एतद्धि सर्वैः कर्मभिः सममेतदेषां ब्रह्म

एतद्धि सर्वाणि कर्माणि बिभर्ति तदेतत्त्रयꣳ सदेकमयमात्मात्मो एकः सन् एतत्त्रयं तदेतदमृतꣳ सत्येन छन्नं प्राणो वा अमृतं नाम-रूपे सत्यं ताभ्यामयं प्राणश्छन्नः ॥ ३ ॥

स्वारोपितकर्मसामान्यं स्वयमेवेत्याह— अथेति । अथेदानीं मनोवाक्काय-निर्वर्त्यत्वेन सर्वकर्मविशेषाणामात्मना कर्तुमकर्तुमन्यथाकर्तुं शक्यत्वात् क्रिया-सामान्यमात्रमात्मनिमित्तम् । तत् कथमिति ? आत्मना शरीरेण हि कर्म करोति । सर्वं कर्म शरीरे ह्यभिव्यज्यते । तस्मात् कर्मसामान्यमात्रं सर्वेषामुक्थमित्यादि पूर्ववत् । तदेतन्नामरूपकर्मत्रयं इतरेतराश्रयं केनात्मना एकत्वमेति ? इत्यत्र कार्यकारणादिसङ्घातोऽयमात्मा । तथा चोक्तं "एतन्मयो वा अयमात्मा" इति । एतावद्धीदं सर्वं व्याकृतमव्याकृतं च । नामरूपकर्मात्मकमात्माज्ञान-विकल्पितत्वेनानात्ममात्रमिदं सर्वं जगत् । तदारोपापवादाधिकरणममृतं तद्या-थात्म्यं सत्येन नामरूपादिविकारेण छन्नं आवृतवदावृतम् । वस्तुतो निरावृतं हि तत् । आवृतित्रयावृतदृशां तु प्राणो वा करणग्रामानुग्राहक एवामृतम् । वस्तुतः तद्गतहेयांशापाये तस्याविनाशित्वेनामृतरूपत्वात् । एवमजानतां नाम-रूपे सत्यम् । ताभ्यां मार्त्यनामरूपाभ्यां छन्नोऽप्रकाशीकृत इत्येवं तृतीयाध्याये प्राधान्यतः स्वाविद्यातत्कार्यसंसारतत्त्वं प्रदर्शितम् । अत्रैव "आत्मेत्येवो-पासीत", "आत्मानमेवावेदहं ब्रह्मास्मि इति" परविद्यापि प्रदर्शिता ॥ ३ ॥

इति षष्ठं ब्राह्मणम्

इति प्रथमोऽध्यायः

द्वितीयोऽध्यायः

प्रथमं बालाकिब्राह्मणम्

गार्ग्याजातशत्रुसंवादः

दृप्तबालाकिर्हानूचानो गार्ग्य आस स होवाचाजातशत्रुं काश्यं ब्रह्म ते ब्रवाणीति स होवाचाजातशत्रुः सहस्रमेतस्यां वाचि दद्मो जनको जनक इति वै जना धावन्तीति ॥ १ ॥

"आत्मेत्येवोपासीत" इति तृतीयेऽध्याये यत् सूत्रितं यदन्वेषणमात्रतः सर्वमन्विष्टं स्यात् तस्य परप्रेमास्पदतया तदेवान्वेष्टव्यम्। "आत्मानमेवावेत् अहं ब्रह्मास्मीति" परमात्मतत्त्वं विद्याविषयत्वेन विभाति। एवं यो न जानाति स हि स्वाज्ञः। "अथ योऽन्यां देवतामुपास्तेऽन्योसावन्योऽहमस्मि इति न स वेद यथा पशुः" इत्यविद्याविषयः। "एकधैवानुद्रष्टव्यं", "विज्ञानमानन्दं ब्रह्म", "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिभिः विद्याविद्याविषयौ प्रविभक्तौ। एवमेव सर्वोपनिषत्स्वपि। तत्रादौ तृतीयाध्याये साध्यसाधनादिभेदविशेषेण अविद्याविषयो व्याख्यातः। इत ऊर्ध्वं यः परविद्यैकविषयः स आत्मैवाधिगन्तव्य इति चतुर्थाध्याय आरभ्यते। पूर्वपक्ष-सिद्धान्तरूपेयमाख्यायिका वक्ष्यमाणब्रह्मविद्यास्तुत्यर्था—दृप्तबालाकिरिति। तत्रा-विद्याशबलब्रह्मवित् तस्यासम्यग्दर्शित्वेन दृप्तो गर्वितः बलाकाया अपत्यं बालाकिः। दृप्तश्चासौ बालाकिश्चेति दृप्तबालाकिः। हकार ऐतिह्यार्थः। अनुवचनसमर्थो वाग्मी अनूचानः। गर्गगोत्रजो गार्ग्यः। आस बभूव। कश्चित् कालविशेषे अजातशत्रुनामानं काशीदेशाधिपतिं काश्यमधिगम्य स होवाच। किमिति? ब्रह्म ते ब्रवाणि कथयानीति। तेनैवमुक्तोऽजातशत्रु-रुवाच। किमिति? ब्रह्म ते ब्रवाणीति या वागुक्ता तस्यामेतस्यां वाचि गवां सहस्रं दद्मः। ब्रवाणीति तावन्मात्रमेव गोसहस्रप्रदाननिमित्तं परिच्छिन्नं

च। वाक् हि निमित्तमपेक्षते। राज्ञोऽभिप्रायं श्रुतिराह। किमिति? **जनको जनक इति**। जन्म च नाशं च न कस्याप्यस्ति सर्वस्याजत्वादमृतत्वाच्चेति ज्ञानजनकः परमार्थविदित्यर्थः। यद्वा—जनको दाता जनकः श्रोतेति पदद्वयमभ्यस्यते जनको जनक इति। वैशब्दः एवं प्रसिद्धिद्योतकः—जनको दित्सुः जनको ब्रह्म विवक्षुः इति। तं प्रति स्वाभिप्रेतार्थसिद्धये जना धावन्ति अभिगच्छन्ति ॥ १ ॥

आदित्यादिषु ब्रह्मोपासना, तत्प्रत्याख्यानं च

स होवाच गार्ग्यो य एवासावादित्ये पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठा अतिष्ठाः सर्वेषां भूतानां मूर्धा राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽतिष्ठाः सर्वेषां भूतानां मूर्धा राजा भवति ॥ २ ॥ स होवाच गार्ग्यो य एवासौ चन्द्रे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठा बृहन् पाण्डरवासाः सोमो राजेति वा अहमेतमुपास इति स य एतमेवमुपास्तेऽहरहर्ह सुतः प्रसुतो भवति नास्यान्नं क्षीयते ॥ ३ ॥ स होवाच गार्ग्यो य एवासौ विद्युति पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठास्तेजस्वीति वा अहमेतमुपास इति स य एतमेवमुपास्ते तेजस्वी ह भवति तेजस्विनी हास्य प्रजा भवति ॥ ४ ॥ स होवाच गार्ग्यो य एवायमाकाशे पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठाः पूर्णमप्रवर्तीति वा अहमेतमुपास इति स य एतमेवमुपास्ते पूर्यते प्रजया

पशुभिर्नास्यास्माल्लोकात् प्रजा उद्वर्तते ॥ ५ ॥ स होवाच गार्ग्यो
य एव वायौ पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा
मैतस्मिन् संवदिष्ठा इन्द्रो वैकुण्ठोऽपराजिता सेनेति वा अहमेत-
मुपास इति स य एतमेवमुपास्ते जिष्णुर्हापराजिष्णुर्भवति अन्यत-
स्त्यजायी ॥ ६ ॥ स होवाच गार्ग्यो य एवायमग्नौ पुरुष एतमेवाहं
ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठा विषा-
सहिरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते विषासहिर्ह
भवति विषासहिर्हास्य प्रजा भवति ॥ ७ ॥ स होवाच गार्ग्यो
य एवायमप्सु पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा
मैतस्मिन् संवदिष्ठाः प्रतिरूप इति वा अहमेतमुपास इति स य
एतमेवमुपास्ते प्रतिरूपꣳ हैवैनमुपगच्छति नाप्रतिरूपमथो प्रति-
रूपोऽस्माज्जायते ॥ ८ ॥ स होवाच गार्ग्यो य एवायमादर्शे पुरुष
एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठा
रोचिष्णुरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते रोचिष्णुर्ह
भवति रोचिष्णुर्हास्य प्रजा भवति अथो यैः सन्निगच्छति सर्वाꣳ-
स्तानतिरोचते ॥ ९ ॥ स होवाच गार्ग्यो य एवायं यन्तं पश्चा-
च्छब्दोऽनूदेति एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा
मैतस्मिन् संवदिष्ठा असुरिति वा अहमेतमुपास इति स य
एतमेवमुपास्ते सर्वꣳ हैवास्मिँल्लोक आयुरेति नैनं पुरा कालात्
प्राणो जहाति ॥ १० ॥ स होवाच गार्ग्यो य एवायं दिक्षु पुरुष

एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठा द्वितीयोऽनपग इति वा अहमेतमुपास इति स य एतमेवमुपास्ते द्वितीयवान् ह भवति नास्माद्गणश्छिद्यते ॥ ११ ॥ स होवाच गार्ग्यो य एवायं छायामयः पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठा मृत्युरिति वा अहमेतमुपास इति स य एतमेवमुपास्ते सर्वँ हैवास्मिँल्लोक आयुरेति नैनं पुरा कालान्मृत्युरागच्छति ॥ १२ ॥ स होवाच गार्ग्यो य एवाय-मात्मनि पुरुष एतमेवाहं ब्रह्मोपास इति स होवाचाजातशत्रुर्मा मैतस्मिन् संवदिष्ठा आत्मन्वीति वा अहमेतमुपास इति स य एतमेवमुपास्त आत्मन्वी ह भवति आत्मन्विनी हास्य प्रजा भवति स ह तूष्णीमास गार्ग्यः ॥ १३ ॥

एवं राजानं स्ववक्ष्यमाणब्रह्म शुश्रूषुं मत्वा तं प्रत्येवमुवाच—स हेति । स होवाच गार्ग्यः । य एवासावादित्ये चक्षुषि चैकोऽभिमानी चक्षुरिन्द्रिय-द्वारा हृदयं प्रविश्य कर्तृत्वादिकलनामवलम्ब्य योऽवतिष्ठते तमेवाहं ब्रह्म पश्यामि अस्मिन् कार्यकरणसङ्घाते तमेवाहमुपासे । तमेव तुभ्यं ब्रवीमि । त्वमपि तमुपास्स्वेति । तमेवमुक्तः प्रत्युवाचाजातशत्रुः । किमिति ? मा मेति द्विर्वचनमसङ्गतार्थम् । यत् त्वयोक्तं तस्मिन् ज्ञेये मा संवदिष्ठाः मा संवादं कार्षीः । यद्यन्यत् जानासि तद्वक्तुमर्हसि । यद्येवं ब्रह्ममात्रं जानीषे न तु तद्विशेषणोपासनफलानीति न हि मन्तव्यम् । सर्वमेतदप्यहं जाने । यथाहं जाने तथा त्वं न जानासि । तत् कथम् ? अतिष्ठाः सर्वभूतानि अतीत्य स्थितत्वात् । सर्वेषां प्राणिनां मूर्धा शिरः दीप्तिगुणविशिष्टत्वात् । इत्थं विशेषणविशिष्टं एतत् ब्रह्म अस्मिन् संघाते कर्तृ भोक्तृ चेत्यहमेतमुपास इति । एवं विशिष्टोपासकस्य फलमपि जानामि । स य एतमेवमुपास्ते अतिष्ठाः सर्वेषां

भूतानां मूर्धा शिरो **राजा भवति**। यथागुणमुपास्ते तथागुणो भवतीत्यर्थः। एवमादित्यब्रह्मणि प्रत्याख्याते ब्रह्मान्तरमाह—**स** इति। **स होवाचे**त्यादि सर्वत्र समानम्। **य एवासौ** चन्द्रमस्येकः **पुरुषः** भोक्तृत्वादिगुणविशिष्टः इत्यादि पूर्ववत्। विशेषस्तु **बृहन्** महान् पाण्डरं शुक्लं वासो यस्य सोऽयं **पाण्डरवासाः** प्राणस्याप्शरीरत्वात्। यश्चान्नभूतोऽभिष्ठूयते यज्ञे लतात्मकः सन् तावेतावेकीकृत्य एतमेवाहं ब्रह्मोपासे। **एवं** यथोक्तगुणं **य उपास्ते** तस्याहरहः सोमो यज्ञेऽभिषुतः सुतविकारेषु **प्रसुतश्च**। **अस्यान्नं न क्षीयते** अन्नात्मोपासनात्। किञ्च—**स** इति। तथा **विद्युति** त्वचि हृदये चैका देवता। तद्विशेषणं **तेजस्वी**ति। **तेजस्वी भवती**ति। तत्फलं—**तेजस्विनी हास्य प्रजा भवती**ति च। विद्युतां बहुत्वात् तत्प्रजाया अपि बहुत्वम्। किञ्च—**स होवाचे**ति। तथा बाह्यान्तराकाशयोरपि देवतैका। **पूर्णमप्रवर्ती**ति **वा** इति विशेषणद्वयं पूर्णफलद्योतनार्थम्। **पूर्यते प्रजया पशुभिः** अप्रवर्तीति विशेषणतः न **ह्यस्मात् लोकात् प्रजा उद्वर्तते** नास्य सन्ततिविच्छेदो भवतीत्यर्थः। किञ्च—**स होवाचे**ति। तथा **वायौ** प्राणे हृदि चैका देवता। विशेषणं तु, **इन्द्रः** परमेश्वरः। अप्रसह्यो **वैकुण्ठः**। न हीतरैर्जितपूर्वा **अपराजिता सेना** मरुतां गणत्वप्रसिद्धेः। उपासनाफलं तु जयशीलो **जिष्णुः**। न हि परैः जितपूर्वो**ऽपराजिष्णु**स्वभावो **भवति**। **अन्यतस्त्यानां** सपत्नानां **जायी** जयशीलो भवतीत्यर्थः। **स होवाचे**ति। **अग्नौ** वाचि हृदि चैका विशेषणं **विषासहिः** परेषां मर्षयिता अग्निबाहुल्यात् फलबाहुल्यम्। **स होवाचे**ति। **तथाप्सु** रेतसि हृदये चैका विशेषणं **प्रतिरूपो**ऽनुरूपः। श्रुतिस्मृत्यप्रतिकूलतः तच्छासनानु**रूपमेवैनमुपगच्छति** तद्वंश्यस्तथाविध एवोपजायते। **स होवाचे**ति। स्वच्छा**दर्शे** खड्गादौ हार्दे च देवतैका। विशेषणं **रोचिष्णुः** दीप्तिस्वभावः। फलबहुत्वं रोचनाधारबाहुल्यम्। **स होवाचे**ति। **यन्तं** गच्छन्तं **य एवायं शब्दः** पृष्ठतो**ऽनूदे**ति जीवनहेतुः अध्यात्मप्राणस्तमेकीकृत्य **असुरि**त्याह। गुणस्तु प्राणो जीवनहेतुः। तत्फलं तु **अस्मिन् लोके सर्वमायुरेती**ति। कर्मफलपरिच्छिन्नकालात् पुरा रोगादिभिः

एनं प्राणो न जहाति । **स होवाचेति** । **दिक्षु** कर्णयोर्हृदि चैका अविनाभूतावश्विनौ देवौ । गुणस्तु **द्वितीयवत्त्वं अनपगत्वं** अन्योन्यमवियुक्तता च । उपासकफलं तदेव गुणाविच्छेदो द्वितीयवत्त्वम् । **स होवाचेति** । बाह्यतमोरूपच्छायायामध्यात्मं चावरणाज्ञाने हृदि चैका देवता । मृत्युस्तदधिकरणं फलम् । शिष्टं पूर्ववत् । विशेषस्तु—मृत्युवीक्षणाभावात् रोगादिपीडाभावः । **स होवाचेति** । **आत्मनि** प्रजापतौ बुद्धौ हृदि चैका देवता । विशेषणमात्मन्वी आत्मवानिति । फलं तु **आत्मन्वी ह भवति** । **आत्मन्विनी हास्य प्रजा भवति** । एवमजातशत्रुणा स्वेनोपन्यस्तब्रह्मसु प्रत्याख्यातेषु क्षीणप्रज्ञः अवाक्शिराः निरुत्तरो **गार्ग्यस्तूष्णीमास** ॥ २–१३ ॥

गार्ग्येण शिष्यवदुपगमनम्

स होवाचाजातशत्रुरेतावन्नू ३ इति एतावद्धीति नैतावता विदितं भवतीति स होवाच गार्ग्य उप त्वायानीति ॥ १४ ॥

स होवाचेति । **स होवाचाजातशत्रुः** । **एतावन्नू** इति विडम्बनार्थः । किं एतावत् ब्रह्म विज्ञातं, आहोस्वित् एतत्सदृशमधिकं किमस्ति? इतर आह—**एतावद्धीति** । विदितेनैतावता **न** हि ब्रह्म **विदितं भवति** । ब्रह्म ते ब्रवाणीति किमर्थं गर्वितोऽसि? परब्रह्म यथावत् त्वया न विदितमित्यर्थः । **अजातशत्रुः** मुख्यब्रह्मवित् । अयं अमुख्यब्रह्मवित् । मुख्यब्रह्मविदा अमुख्यब्रह्मवित् प्रतिषेधितुं युक्त एव । यद्यमुख्यब्रह्मविज्ञानमपि प्रत्याख्यायेत तदा नैतावतेति न हि ब्रूयात् । न किञ्चित् त्वया विज्ञातमित्येवं ब्रूयात् । तस्मादपरब्रह्मविद्याविषयं वस्त्वस्त्येव परब्रह्मविज्ञानस्यापरब्रह्मविज्ञानपूर्वकत्वात् । नैतावता विदितं भवतीति युक्तमुक्तम् । यावदविद्यावद्विषयं नामरूपकर्माख्यं तृतीयाध्याये प्रदर्शितं ततो नैतावता विदितं भवतीति ब्रुवता इतोऽप्यधिकं ब्रह्म विज्ञातव्यमस्तीति दर्शितं भवति । तच्च तावत् यथावदनुपसन्नाय न वक्तव्यमिति आचारविधिज्ञो **गार्ग्यः** स्वाधीतविद्याप्रभवाचार्यताभिमतिं दूरतः त्यक्त्वा शिष्य-

भावमेत्य **स होवाच—उप त्वा यानीति**। यथान्यः शिष्यः गुरुं तथा त्वामुपगच्छामीति ॥ १४ ॥

तयोः सुप्तं पुरुषं प्रति गमनं तत्प्रबोधनं च

स होवाचाजातशत्रुः प्रतिलोमं चैतत् यद्ब्राह्मणः क्षत्रियमुपेयात् ब्रह्म मे वक्ष्यतीति व्येव त्वा ज्ञपयिष्यामीति तं पाणावादाय उत्तस्थौ तौ ह पुरुषꣳ सुप्तमाजग्मतुः तमेतैर्नामभिरामन्त्रयांचक्रे बृहन् पाण्डरवासः सोम राजन्! इति स नोत्तस्थौ तं पाणिनापेषं बोधयांचकार स होत्तस्थौ ॥ १५ ॥

तदभिप्रायानुरोधमजातशत्रुरुवाच—स इति। **स होवाचाजातशत्रुः**। **प्रतिलोमं** विपरीतम। किं तत्? **यत् ब्राह्मण** उत्तमवर्णः स्वयमाचार्यपदमारूढः सन् अनाचार्यस्वभावं **क्षत्रियं ब्रह्म मे वक्ष्यतीति** शिष्यवृत्त्या **उपेयात्** उपगच्छेदिति यत् तत विधिशास्त्रविरुद्धम्। तस्मादाचार्य एव सन् तिष्ठ त्वम्। त्वामहं **विज्ञपयिष्यामि** यत् मुख्यं ब्रह्म वेद्यं यद्वेदनात् ब्रह्म विदितं भवति तथा प्रतिपादयामीत्यर्थः। सलज्जं तं गार्ग्यमालक्ष्य तद्विस्रम्भजननाय **तं पाणावादाय उत्तस्थौ**। **तौ ह** गार्ग्याजातशत्रू **पुरुषं** क्वचित् प्रदेशे **सुप्तमाजग्मतुः**। आगतौ तौ तं सुप्तं प्राप्य **बृहन्! पाण्डरवासः! सोम! राजन्!** इत्येतैः **नामभिः आमन्त्रयाञ्चक्रे**। एवमामन्त्र्यमाणोऽपि **स नोत्तस्थौ**। तथाविधं **तं पाणिनापेषं** आपिष्यापिष्य **बोधयाञ्चकार**। तेन **स होत्तस्थौ** प्रबुद्धः सन् उत्थितवान्। एतेनास्मिन् शरीरे कर्ता भोक्ता ब्रह्मेति गार्ग्येण यदुक्तं तत् प्रत्याख्यातमित्यर्थः। तत्प्रत्याख्याने किं अवशिष्यते? इत्यत्र शबलं ब्रह्म तेनोपन्यस्तम्। अजातशत्रोरभिप्रेतं ब्रह्म निर्विशेषम्। निर्विशेषे सविशेषं समाप्यते। तस्य स्वेतरग्रासत्वेन स्वमात्रत्वात्। एतदेव हि परमपुरुषार्थत्वेन विजिज्ञापयिषितम्। तदवगते स्वाज्ञदृष्टिविकल्पि-

तादित्याद्यात्मान्तगतविशेषप्रविलापनपूर्वकत्वात्। तथा च वक्ष्यति--"स एष नेति नेत्यात्मा" इति ॥ १९ ॥

तत आत्मस्वरूपप्रतिपादनम्

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषः क्वैष तदाभूत् कुत एतदागादिति तदु ह न मेने गार्ग्यः ॥ १६ ॥

एवं विशेषनिरसनसिद्धं ब्रह्मेति निश्चित्य तत्स्वरूपं क्रमेण प्रतिपादयितव्यमिति तं प्रत्युवाचेत्याह--स इति। **सोऽयमजातशत्रुः** सर्वविकारास्पृष्टं ब्रह्म विवक्षुः **गार्ग्यमुवाच**। किं तत्? इति। **यत्र** यस्मिन् काले **स एष विज्ञानमयः पुरुषः** पाणिपेषणप्रबोधनात् प्राक् **एतत्**स्वापावृतः **सुप्तोऽभूत्**। पुनः प्रबोधात् विज्ञायतेऽनेनेति विज्ञानमन्तःकरणम्। तन्मयः तत्प्रायः **विज्ञानमयः**। किं पुनः तत्प्रायत्वम्? तदुपलब्धृत्वात्। "अयमात्मा ब्रह्म विज्ञानमयः" इत्यादौ प्रायार्थप्रयोगो दृश्यते। तत्र विकारत्वस्याप्रसिद्धत्वात् अवयवोपमार्थयोरपि सुतरामसंभवाच्च। तत् कथम्? तस्य निरवयवत्वेन निरूपमत्वात् पारिशेष्यात् प्रायार्थतैव। तस्मात् संकल्पादिवृत्तिमत् अन्तःकरणं तद्वृत्तिसहस्रभावाभावप्रकाशकतया पुरि शयनात् स्वभासा तत् सर्वं पूरणाद्वा **पुरुषः**। तत्स्वभावविजिज्ञापयिषया प्रबोधात् प्राक् **क्व एष तदाभूत्?** इति प्रश्नः। तदात्मनः क्रियाकारकफलविपरीतबोधगम्यत्वात्। न हि प्रबोधात् प्राक् धर्मादिकार्यं सुखादिर्वा विद्यते। तदा कर्मसामान्याभावात् तत्स्वभाव आत्मनोऽवगम्यते। यत्स्वभावोऽयमभूत् पुनर्यत्स्वभावात् प्रच्युतः संसारी भवेत् इत्येतद्विवक्षया **क्व एष तदाभूत्? कुत एतदागात्?** इत्येतदुभयं गार्ग्येण हि प्रष्टव्यम्। तेनापृष्टमपि ज्ञपयिष्याम्येवेति प्रतिज्ञातत्वात् तत्राजातशत्रुः नोदास्ते, बोधयितव्य एवेति प्रवर्तते। एवमसौ गार्ग्यो व्युत्पाद्यमानोऽपि

प्रबोधात् प्राक् यत्रैष आत्माभूत् कुत एतदागात ? इति तदुभयं प्रष्टुमवगन्तुं वा न मेने न ज्ञातवान् गार्ग्यः ॥ १६ ॥

आत्मनः स्वरूपावस्थत्वम्

स होवाचाजातशत्रुर्यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषस्तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते तानि यदा गृह्णाति अथ हैतत्पुरुषः स्वपिति नाम तद्गृहीत एव प्राणो भवति गृहीता वाक् गृहीतं चक्षुर्गृहीतं॰ श्रोत्रं गृहीतं मनः ॥ १७ ॥

तथापि विवक्षितार्थसमर्पणाय स होवाचेत्याह—स इति । **स होवाचाजातशत्रुः । यत्रैष एतत्सुप्तोऽभूत् य एष विज्ञानमयः पुरुषः** क्व एष तदाभूत् ? कुत एतदागात् ? इति यदपृच्छाम तत मयोच्यमानं शृणु । यत्रैष एतत सुप्तोऽभूत् **तत्** तदा तस्मिन् काले **एषां** वागादि**प्राणानाम**न्तःकरणाभिव्यक्तविशेष**विज्ञानेन विज्ञानं** वागादिगतसामर्थ्य**मादाय** गृहीत्वा **य एषोऽन्तर्हृदय**मध्ये तदवच्छिन्न**आकाशः** य आकाशशब्देन पर एव स्वात्मोच्यते **तस्मिन्** स्वात्मन्याकाशे **शेते** । "सता सोम्य ! तदा संपन्नो भवति" इति लिङ्गोपाधिसंबन्धकृतं विशेषात्मस्वरूपमुत्सृज्य स्वाभाविकात्मन्येव वर्तते शरीरेन्द्रियतदध्यक्षसंबन्धवैरल्यात् । कथमेतदवगम्यते ? इत्यत आह— **तानीति** । **यदा** यस्मिन् काले **तानि** वागादिविज्ञानानि **गृह्णाति** आदत्ते **अथ** तदाह **एतत्पुरुषः स्वपिति नाम** । तत् गौणमेवास्य नाम भवति । स्वमेवात्मानमप्येतीति स्वपितीत्युच्यते । एवं नामप्रसिद्ध्या आत्मनः संसारधर्मवैलक्षण्यमवगम्यते । न त्वत्र युक्तिरस्तीत्यत आह—**तदिति** । **तत्** तत्र स्वापकाले **गृहीत एव** प्राणशब्देन **प्राणो भवति** इन्द्रियादिप्रकरणात् । वागादिसंबन्धतः संसारित्वं स्यात् इति चेन्न ; वागादीनामुपसंहृतत्वात् । तत् कथं ? **गृहीता**

वाक् गृहीतं चक्षुः गृहीतं श्रोत्रं गृहीतं मन इति। एवं वागादिषु उपसंहृतेषु तद्गतक्रियाकारकादिवैरल्यात् स्वरूपावस्थ एवात्मा भवतीत्यवगम्यते ॥ १७ ॥

विज्ञानात्मनो विलक्षणत्वकथनम्

स यत्रैतत् स्वप्न्यया चरति ते हास्य लोकास्तदुतेव महाराजो भवति उतेव महाब्राह्मण उतेव उच्चावचं निगच्छति स यथा महाराजो जानपदान् गृहीत्वा स्वे जनपदे यथाकामं परिवर्तेत एवमेवैष एतत्प्राणान् गृहीत्वा स्वे शरीरे यथाकामं परिवर्तते ॥ १८॥

दर्शनलक्षणस्वप्नावस्थायां कार्यकरणवियोगेऽपि संसारधर्मित्वमवगम्यते। यथा जागरितावस्थायां स्वान्यत्रात्मात्मीयाध्यासतः शोचति मुह्यति। तस्मात् धर्मवानेवायम्। न त्वस्य शोकादयः करणसंयोगभ्रान्तिजनिता इत्यत आह— **स** इति। सोऽयं प्रकृत आत्मा **यत्र** यस्मिन् काले दर्शनलक्षण**स्वप्न्यया** स्वप्नवृत्त्या **चरति** तदा **ते हास्य लोकाः** कर्मफलानि तत्तत्र **उ**तापि **महाराज इव भवति**। जागरित इव न महाराजत्वमेव। तथा **महाब्राह्मण इव उत इव** अपि **उच्चं** देवत्वादि **अवचं** तिर्यक्त्वादि उच्चमिव अवचमिव च **निगच्छति**। महाराजत्वादयोऽस्य लोका मृषैव। इवशब्दतो व्यभिचारदर्शनाच्च मिथ्यात्वं सिद्धमित्यर्थः। तस्मादयं स्वप्ने न हि स्वात्मात्मीयप्रभवशोकमोहादिभिः संबध्यते। जाग्रत्कालाव्यभिचारिलोकवत् स्वप्नकालभाविलोको व्यभिचारीति चेन्न ; जाग्रत्कालीनकार्यकरणदेवतात्मतायाः स्वाविद्याविकल्पितत्वेन न परमार्थत्वात्। तदारोपाधिकरणत्वेन विज्ञानमयस्य तद्विलक्षणत्वात् कथं मिथ्याभूतजाग्रद्दृष्टान्तेन स्वप्नलोकमुज्जीवयसि ? न हि जाग्रदाद्यवस्थायाः कालत्रयेऽपि सत्यत्वमिष्यते। तस्याः स्वाज्ञानविकल्पितत्वेन कारणतुल्यत्वात्। तदारोपाधारो विज्ञानात्मा उच्चावचोपाधिं गच्छतीव गच्छति न परमार्थतः। करणोपसंहारविषये दृष्टान्त उच्यते—**यथेति**। **यथा स महाराजो** जनपदे भवान्

जानपदान् स्वोपकरणभूतभृत्याननन्यांश्च **गृहीत्वा स्वार्जितजनपदे यथाकामं** यथेच्छं **परिवर्तेत, एवमेवैष** विज्ञानमयः— एतदिति क्रियाविशेषणम्— **प्राणान् गृहीत्वा** जाग्रत्प्रपञ्चादुपसंहृत्य **स्वे शरीरे यथाकामं परिवर्तते।** कामकर्मोद्भूतपूर्वानुभूतवस्तुसदृशवासना अनुभवति। यथा स्वप्नपदार्थस्यावस्तुत्वेन मृषात्वं तथा जागरितेऽपि प्रत्येतव्यम्। ततो विज्ञानात्मा तद्विलक्षण इति सिद्धम्॥ १८॥

विज्ञानात्मनः स्वभावतः शुद्धत्वं ब्रह्ममात्रत्वं च

अथ यदा सुषुप्तो भवति यदा न कस्यचन वेद हिता नाम नाड्यो द्वासप्ततिसहस्राणि हृदयात्पुरीततमभिप्रतिष्ठन्ते ताभिः प्रत्यवसृप्य पुरीतति शेते स यथा कुमारो वा महाराजो वा महाब्राह्मणो वा अतिघ्नीमानन्दस्य गत्वा शयीत एवमेवैष एतच्छेते॥ १९॥

यथाकामं परिवर्तते इत्यनेन कामवशात् परिवर्तनमुक्तम्। तत्र दृश्यादिसंबन्धात् अशुद्धता स्यादित्याशंकायामत आह— अथेति। **अथ यदा सुषुप्तो भवति** जाग्रदादिप्रविभक्तदर्शनादिवृत्तिं विहाय स्वान्यसंबन्धरहितसलिलवत् संप्रसादं स्वाभाव्यं गतो भवति। कदा सुषुप्तो भवति? इत्यत्र **यदा** यस्मिन् काले **न कस्यचन** न किञ्चनेत्यर्थः। **वेद** विजानाति स्वातिरिक्तं न किमपि जानातीत्यर्थः। विशेषविज्ञानाभावः सुषुप्तिरित्युक्तम्। तत्र केन प्रकारेण सुषुप्तो भवति? इत्यत आह— **हिता नामेति। हिता नाम नाड्यः** सिराः देहस्यान्नरसपरिणामभूताः। ताश्च **द्वासप्ततिः** द्वे सहस्रे अधिके सप्ततिश्च **सहस्राणि** नाड्यः मांसपिण्डाकारहृदयपुण्डरीकात् हृदयपरिवेष्टनं **पुरीतत**मित्याचक्षते। पुरीतच्छब्देन तदुपलक्षितं शरीर**मभिप्रतिष्ठन्ते।** शरीरकात्स्न्र्यं व्याप्नुवत्यः अश्वत्थपर्णराजय इव बहिर्मुखाः प्रवृत्ता इत्यर्थः। तत्रान्तः-

करणस्थानं हृदयम्। तत्रत्यान्तःकरणतन्त्राणि बाह्यकरणानि नाडीभिः प्रसारयति। विज्ञानात्मा जाग्रत्काले व्याप्नोति स्वप्नादावनुसंकुचति। विज्ञानमयस्वापस्तु जाग्रत्स्वप्नव्याप्तृतिप्रासः। अत एव न हि सुषुप्तिकाले करणग्रामविशिष्टशरीरसंबन्धोऽस्ति। तथा च वक्ष्यति—"तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति" इति। तथापि **ताभिः** नाडीभिः **प्रत्यवसृप्य** व्याप्य **पुरीतति शेते**। तप्तलोहपिण्डमग्निवत् व्याप्य शरीर एव वर्तते। स्वापावस्थेयं सर्वसंसारदोषास्पृष्टेत्यत्र दृष्टान्तः—**स यथा कुमारो**ऽत्यन्तबालो बात्यन्तवश्यप्रकृतिः **महाराजो** बात्यन्तपरिपक्वविद्याविनयसंपन्नमहाब्राह्मणो बातिशयेन दुःखजातं हन्तीत्यतिघ्नीमानन्दस्यावस्था सुखावस्थातां प्राप्य **गत्वा शयीताव**तिष्ठेत। एषां कुमारादीनां स्वभावावस्थानिष्पन्नसुखं लोकप्रसिद्धम्। तस्य प्रसिद्धत्वात् दृष्टान्तत्वेनोपादीयते तत्र विशेषाभावात्। सति हि विशेषे दृष्टान्तदार्ष्टान्तिकभेदः स्यात्। तथापि दृष्टान्तत्वेन स्वापः प्रणीयते। **एवमेवैष** विज्ञानमयः—एतच्छब्दः क्रियाविशेषणार्थः—एतच्छयनं **शेते** स्वापकालेऽयं सर्वसंसारविरलस्वाभाविकात्मनि वर्तते। एतेन क्व एष तदाभूत्? इति प्रश्नस्य प्रतिवचनमुक्तम्। तेन विज्ञानमयस्य सङ्घातास्पृष्टत्वेन स्वभावतो विशुद्धत्वं स्वगतहेयांशापाये ब्रह्ममात्रत्वं चोक्तं भवति ॥ १९ ॥

तस्य गतागतकथनम्

स यथा ऊर्णनाभिस्तन्तुना उच्चरेत् यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि व्युच्चरन्ति तस्योपनिषत् सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ २० ॥

कुत एतदागात्? इति प्रश्नस्यापाकरणार्थं खण्डिकारभ्यते—**स यथेति**। यो यस्मिन् ग्रामे नगरे वा भवति सोऽन्यत्र गच्छन् ग्रामात् नगराद्वा

निर्गच्छति नान्यतः। तथा सति एतावानेवास्तु प्रश्नः क्व एष तदाभूत्? इति। यत्राभूत् तत एवागमनं सिद्धं नान्यतः। कुत एतत् आगात्? इति प्रश्नो निरर्थक एवेति चेन्न; स्वात्मनो निष्क्रियत्वात्। तथापि द्वितीय-प्रश्नस्यार्थान्तरं वक्तव्यमिति चेन्न; अर्थान्तरानुपपत्तेः। अपादानार्थता स्यादिति चेन्न; पुनरुक्ततापत्तेः। कुत एतदागात्? इति निमित्तार्थता स्यादिति चेन्न; प्रतिवचनवैरूप्यात्। किं तत् प्रतिवचनम्? आत्मनः सकाशात् जगतो महाग्निविस्फुलिंगादिवत् उत्पत्तिः प्रतिवचनेऽवगम्यते। न ह्यग्निः विस्फुलिङ्ग-विद्रवणे निमित्तम्। सोऽयं विज्ञानमय आत्मा अपादानमेव। न हि निमित्तार्थता शक्यते वर्णयितुम्। अपादानपक्षेऽपि पुनरुक्तता स्यादिति चेन्न; क्व एष तदाभूत्? कुत एतदागात्? इति प्रश्नाभ्यामात्मनि क्रियाकारकफलापोहस्य विवक्षितत्वात्। अत्रोपन्यस्तौ हि विद्याविद्याविषयौ। तत्र "आत्मेत्येवो-पासीत", "आत्मानमेवावेदहं ब्रह्मास्मि" इति विद्याविषयः। पाङ्क्तं कर्म तत्फलं चाविद्याविषयः। तत्रानिर्णीतो विद्याविषयस्त्वात्मा। तन्निर्णयाय खलु "ब्रह्म ते ब्रवाणि", "ज्ञपयिष्यामि" इति च प्रक्रान्तम्। तद्ब्रह्मयाथात्म्यं स्वातिरिक्तक्रियाकारकफलापह्नवसिद्धनिष्प्रतियोगिकाद्वैतं हि विव-क्षितम्। अतस्तदनुरूपेण श्रुत्या प्रश्नावुत्थाप्येते क्व एष तदाभूत्? कुत एतदागात्? इति। यत्र किंचित् भवति तदधिकरणम्। यत् भवति तदधिकर्तव्यम्। लोके तावत् तयोर्भेदः दृष्टः। तथा यत आगच्छति तदपादानम्। य आगच्छति स कर्ता। तस्मादन्यो दृष्टः। तथात्मान्यस्मिन् अन्यवत् क्वाप्यभूत्। अन्यस्मादन्यवत् कुतश्चिदागात्। एवं हि लोकबुद्धिः सा प्रतिवचनेन निराकर्तव्येति नायमात्मान्योऽन्यत्राभूत्। अन्यो वान्यस्मादा-गतः। किं तर्हि स्वात्मन्येवाभूत्? "स्वात्मानमेवापीतो भवति", "सता सोम्य! तदा संपन्नो भवति", "पर आत्मनि संप्रतिष्ठितः" इति श्रुत्यनु-रोधेन न ह्यन्योन्यस्मादागच्छतीत्येतदर्थं श्रुतिरेव प्रकटयति। अस्मादात्मन इति स्वातिरिक्तवस्त्वन्तराभावात्। वस्त्वन्तरं प्राणादीति चेन्न? प्राणादेः तन्निष्पन्नत्वात्। तत् कथम्? इत्यत्रायं दृष्टान्तः—**स यथा लोके ऊर्णनाभिः**

लूताकीटः एक एव सन् स्वाविभक्ततन्तुना **उच्चरेत्** उद्गच्छेत् । न ह्यस्योद्गमने स्वातिरिक्तकारकान्तरमस्ति । **यथा** एकस्मा**दग्नेः क्षुद्रा विस्फुलिङ्गाः** अग्न्यवयवा **व्युच्चरन्ति** । कारकभेदाभावेऽपि प्रवृत्तिं यथेमौ दृष्टान्तौ प्रदर्शयतः प्रवृत्तेः प्राक् एकत्वस्वाभाविकत्वात् **एवमेव अस्मादात्मनो** विज्ञानमयस्य प्रबोधात् प्राक् स्वरूपम् । तस्मात् **सर्वे प्राणा** वागादयः **सर्वे लोकाः** सर्वाणि कर्मफलानि **सर्वे** प्राणलोकाधिष्ठातारो **देवाः सर्वाणि** ब्रह्मादिस्तम्बपर्यन्तानि **भूतानि** प्राणिजातानि **व्युच्चरन्ति** । सर्व एत आत्मान इति पाठान्तरम् । तत्रोपाधिसंपर्कजनितप्रतिबुध्यमानविशेषात्मानो व्युच्चरन्ति । यस्मादात्मन इदं जगत् अग्निविस्फुलिंगवत् व्युच्चरति सृष्टिकाले संभवति स्थितिकाले यदात्मना वर्तते पुनः प्रलयकाले जलबुद्बुदवत् यस्मिन्नेव लीयते सोऽयमात्मा प्रपञ्चारोपापवादाधिकरणतया प्रसिद्धः । **तस्या**त्मनो ब्रह्मण उप समीपं नयतीति **उपनिषत्** । अभिधायकः शब्द उपनिषदित्युच्यते । शास्त्रप्रामाण्यात् उपनिषच्छब्देन ब्रह्मविद्यावसीयते । तत्सिद्धे ग्रन्थपाठतदर्थविचारणपूर्वकत्वात् । तद्विद्यावेद्यं ब्रह्म कीदृशं ? इत्यत आह—**सत्यस्य सत्यमिति** । प्राथमिकसत्यपदेन व्यावहारिकत्वादिसत्यतोच्यते । द्वितीयसत्यपदेन स्वातिरिक्तकलना अस्ति नास्तीति विभ्रमापह्नवसिद्धं सन्मात्रमुच्यते । एतदर्थस्य दुर्विज्ञेयतया श्रुतिरेवं व्याचष्टे—**प्राणा वै सत्यं तेषामेष सत्यमिति** । **प्राणा** इति प्राणशब्दोपलक्षिताविद्यापदतत्कार्यं स्वाज्ञदृष्ट्या **सत्य**मुच्यते । स्वज्ञदृष्ट्या **यस्तेषा**मारोपापवादाधिकरणत्वेनावशिष्यते स **एष** पारमार्थिक**सत्यम्** । परमार्थदृष्ट्या तु स्वाधेयसामान्यस्य स्वाविद्याविकल्पितत्वेन कारणतुल्यत्वात् । अधिष्ठेयाभावे निरधिष्ठानं निष्प्रतियोगिकसन्मात्रमेवावशिष्यत इत्यर्थः । "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं जिघ्रेत् तत् केन कं पश्येत्" इत्यादिस्वातिरिक्तवस्तुदर्शनाद्यसंभवश्रुतेः ॥ २० ॥

इति प्रथमं ब्राह्मणम्

द्वितीयं शिशुब्राह्मणम्

मध्यमप्राणस्य शिशुत्वम्

योः ह वै शिशुꣳ साधानꣳ सप्रत्याधानꣳ सस्थूणꣳ सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि अयं वाव शिशुर्योऽयं मध्यमः प्राणस्तस्येदमेवाधानं इदं प्रत्याधानं प्राणः स्थूणान्नं दाम ॥ १ ॥

"ब्रह्म ज्ञपयिष्यामि" इति प्रस्तुतम्। तत्र यस्मात् स्वातिरिक्तं जगत् जन्मस्थितिभङ्गं भजति तत् ब्रह्म "सत्यस्य सत्यं" इत्युक्तम्। तद्वृत्त्यर्थं "प्राणा वै सत्यं तेषामेष सत्यं" इत्यभिहितम्। तत्र प्राथमिकसत्यस्थानीयप्राणाः पञ्चीकृतापञ्चीकृतमूर्तामूर्तात्मकपञ्चमहाभूतानि तत्कार्यानन्तकोटिब्रह्माण्डानि सत्कार्याणीति कृत्वा सत्यमुच्यते। तेषां कार्यकरणात्मकभूतानां सत्यत्वनिर्दिधारयिषया ब्राह्मणद्वयमारभ्यते—यो ह वा इत्यादिना। "प्राणा वै सत्यं" इत्यत्र—के ते? कियन्तः प्राणाः? प्राणविषया उपनिषदः काः? इति ब्रह्मोपनिषत्प्रसङ्गेन पथिगततृणकूपारामाद्यवधारणवत् तेषां स्वरूपमवधारयितुं यो ह वै शिशुं साधानं सप्रत्याधानं सस्थूणं सदामं वेद तस्येदं फलम्। किं तत्? सप्त सप्तसंख्याकान् द्विषतो विद्वेषकान्—द्विषन्तोऽद्विषन्तश्चेति भ्रातृव्या द्विविधाः। तत्र द्विषन्तो ये भ्रातृव्याः तान् द्विषतो भ्रातृव्यानवरुणद्धि। सप्त वै शीर्षण्याः प्राणाः विषयोपलब्धिद्वाराणि। तत्र सहजत्वात् विषयरागा हि भ्रातृव्याः। ते ह्यस्य विज्ञानात्मनः स्वात्मस्थां दृष्टिं विषयविषयां कुर्वन्ति। अतस्तेन हि ते द्वेष्टारो भ्रातृव्याः प्रत्यग्भावप्रतिकूलत्वात्। तथा च श्रुतिः—

पराञ्चि खानि व्यतृणत् स्वयंभूः
तस्मात् पराङ् पश्यति नान्तरात्मन्।

इति । तत्र यः शिश्वादीन् वेद तद्याथात्म्यमवधारयति स एतान् भ्रातृव्यान् पराग्भावारूढानवरुणद्धि विनाशयतीत्येतत् एवं फलश्रवणेनाभिभूतायाह— **अयमिति । अयं वाव शिशुः योऽयं मध्यमः प्राणः** लिङ्गात्मनः शरीरमध्यपातित्वात् । यः पञ्चधा शरीरमाविष्टः यस्तु "बृहन् पाण्डरवासः सोम राजन्" इत्युक्तः यस्मिन् वाङ्मनःप्रभृतीनि करणानि विषक्तानि पड्वीशशंकुनिदर्शनात् स एष शिशुरिव शिशुः विषयेष्वितरकरणवत् अपटुत्वात् शिशुं साधानमित्युक्तम् । किं पुनर्वत्सस्थानीयस्य करणात्मन आधानम्? **तस्य इदमेव शरीरमाधानं** कार्यजाताधानात् । तस्य हि शिशोः प्राणस्येदं शरीरमधिष्ठानम् । तत्र हि करणान्यधिष्ठितानि दृश्यन्ते । न तु प्राणमात्रे विषक्तानि । तथेदमजातशत्रुणा दर्शितम् । करणेषूपसंहृतेषु विज्ञानमयो नोपलभ्यते । तद्विपर्यय उपलभ्यते । तथा च दर्शितम् । पाणिपेषप्रतिबोधनेनेदं शिरःप्रदेशविशेषेषु प्रत्याधीयत इति **प्रत्याधानम् । प्राणः स्थूणा** अन्नपानजनिता शक्तिः । प्राणो बलमिति पर्यायः । प्राणस्य बलावष्टम्भात् यथावत् सस्थूणावष्टम्भः । शरीरपक्षपाती वायुः स्थूणेति केचित् । **अन्नं दाम** । अन्नं हि त्रेधा परिणमते मूत्रं पुरीषं च । तत्स्थूलपरिणामः । मांसलोहितादि मध्यमपरिणामः । अमृतमूर्जमणिष्ठपरिणामः । इत्थं स्वकार्यं शरीरं सप्तधातुकमुपचिनोति शरीरस्यान्नयोनित्वात् । तदलाभे क्षीयते पतति च । तद्धि नाभेरूर्ध्वं हृदयदेशमासाद्य हृदयात् विप्रसृतद्वासप्ततिनाडीसहस्रेषु अनुप्रविश्य यत् तत्कारणसंघातरूपं लिङ्गं शिशुसंज्ञकं तस्य बलवृद्धिं कुर्वत् शरीरस्थितिकारणं भवति । यत एवमतः स्थूणाख्यमन्नं सदामवत् पाशवत् स्थूलसूक्ष्मशरीरनिबन्धनं भवतीत्यर्थः ॥ १ ॥

तस्य शिशोः प्रत्याधानदर्शनम्

तमेताः सप्ताक्षितय उपतिष्ठन्ते तद्या इमा अक्षन् लोहिन्यो राजयस्ताभिरेनꣳ रुद्रोऽन्वायत्तोऽथ या अक्षन्नापस्ताभिः पर्जन्यो

या कनीनिका तयादित्यो यत्कृष्णं तेनाग्निर्यच्छुक्लं तेनेन्द्रोऽधरया एनं वर्तन्या पृथिवी अन्वायत्ता द्यौरुत्तरया नास्यान्नं क्षीयते य एवं वेद ॥ २ ॥

इदानीं तस्यैव शिशोः प्रत्याधानदर्शनमुच्यते — **तमिति**। चक्षुषि ऊढत्वेन करणात्मकं **तं** शिशुं **एता** वक्ष्यमाणाः **सप्त** सप्तसंख्याका अक्षितिहेतुत्वात् **अक्षितयो ह्युपतिष्ठन्ते**। तिष्ठतेरात्मनेपदं न विरुद्धं देवतावाचकानां मन्त्रस्थानीयानां करणत्वात्। काः ता अक्षितयः? इत्यत्र — **तत्** तत्र **या इमाः** प्रसिद्धाः **अक्षन्** अक्षिणि **लोहिन्यो** लोहिता **राजयो** रेखाः **ताभिः** द्वारभूताभि**रेनं** मध्यमं प्राणं **रुद्रोऽन्वायत्तो**ऽनुगतः। **अथ या अक्षन्** अक्षिणि धूमादिसंयोगेऽभिव्यज्यमाना **आपः ताभिः पर्जन्योऽन्वायत्तो**ऽनुगतः। स चान्नभूतोऽक्षितिः प्राणस्य। "पर्जन्ये वर्षति आनन्दिनः प्रजा भवन्ति" इति श्रुतेः। याद्दक्छक्तिः **कनीनिका तया** कनीनिकया द्वारभूतया**यमादित्यो** मध्यमं प्राणमुपतिष्ठते। **यत्** चक्षुषि **कृष्णं तेनैनमग्निरु**पतिष्ठते। चक्षुषि **यत् शुक्लं तेनेन्द्रोऽधरया वर्तन्या** पक्ष्मणा **पृथिव्यन्वायत्ता** तयोरधरत्वसामान्यात्। **द्यौरुत्तरया** ऊर्ध्वत्वसामान्यात्। एताः सप्तान्नभूताः प्राणं सन्तमुपतिष्ठन्ते। इत्येवं **यो वेद** तस्यैतत् फलं **नास्यान्नं क्षीयते** ॥ २ ॥

शिरसः चमसत्वकथनम्

तदेष श्लोको भवति—

अर्वाग्बिलश्चमस ऊर्ध्वबुध्नस्तस्मिन् यशो निहितं विश्वरूपम्।
तस्यासत ऋषयः सप्त तीरे वागष्टमी ब्रह्मणा संविदाना ॥

इति। अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्नः तस्मिन् यशो निहितं विश्वरूपमिति प्राणा वै यशो

विश्वरूपं प्राणानेतदाह तस्यासत ऋषयः सप्त तीर इति प्राणा वा ऋषयः प्राणानेतदाह वागष्टमी ब्रह्मणा संविदानेति वाक् हि अष्टमी ब्रह्मणा संवित्ते ॥ ३ ॥

एवमुक्तार्थे मन्त्रो भवतीत्याह—**तदिति**। **तत्** तत्र एतस्मिन्नर्थे **एष श्लोको** मन्त्रो **भवति—अर्वाग्बिलश्चमस** इत्यादिः। तत्र श्रुतिः मन्त्रार्थ-माचष्टे—**अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति**। कः पुनरसौ? इत्यत्र—**इदं तत् शिरः**। चमसाकारं हि तत्। कथं? **एष ह्यर्वाग्बिलः** मुखस्य बिलरूपत्वात्। शिरसो बुध्नाकारत्वात् **ऊर्ध्वबुध्नः**। **तस्मिन् यशो निहितं विश्वरूपमिति**। यथा चमसे सोमः एतस्मिन् शिरसि विश्वरूपं नानारूपं यशो निहितं स्थितं भवति। किं तत् यशः? **प्राणा वै यशो विश्वरूपं** प्राणाः श्रोत्रादयो वायवश्च मरुतः सप्तधा तेषु प्रसृताः। तान् यश इत्याह मन्त्रः। तस्य शब्दादिख्यापनहेतुत्वात्। **तस्यासते ऋषयः सप्त तीरे** इति परिस्पन्दनात्मकाः प्राणाः त एव **ऋषयः**। तान् **प्राणानेतदाह** मन्त्रः—**वागष्टमी ब्रह्मणा संविदाना इति**। ब्रह्मणा सादनं कुर्वन्ती अष्टमी भवति। तत्र हेतुः **वाक् ह्यष्टमी ब्रह्मणा संवित्त** इति ॥ ३ ॥

चमसतीरस्थऋषिकथनम्

इमावेव गोतमभरद्वाजौ अयमेव गोतमोऽयं भरद्वाज इमावेव विश्वामित्रजमदग्नी अयमेव विश्वामित्रोऽयं जमदग्निः इमावेव वसिष्ठकश्यपौ अयमेव वसिष्ठोऽयं कश्यपो वागेवात्त्रिर्वाचा ह्यन्नमद्यतेऽत्तिर्ह वै नाम एतत् यदत्रिरिति सर्वस्यात्ता भवति सर्वमस्यान्नं भवति सर्वमस्यान्नं भवति य एवं वेद ॥ ४ ॥

के तस्य चमसस्य तीर आसते ऋषयः? इत्यत आह—**इमाविति**। **इमावेव गोतमभरद्वाजौ** दक्षिणोत्तरकर्णावयवौ। **अयमेव गोतमः**। **अयं**

भरद्वाजः । विपर्ययेण वा । **इमावेव विश्वामित्रजमदग्नी** दक्षिणोत्तरचक्षुषी । दक्षिणं **विश्वामित्रः** उत्तरं **जमदग्निः** विपर्ययेण वा । **इमावेव वसिष्ठकश्यपौ** । दक्षिणनासिकापुटो **वसिष्ठः** । उत्तरः **कश्यपः** । पूर्ववदनक्रियायोगात् **वागेव अत्रिः** सप्तमः । **वाचा ह्यन्नमद्यते** । तस्मादत्तिर्ह **वै** प्रसिद्धं **नाम एतद**त्तृत्वात् । अत्तीति तदत्तिरेव सत् **अत्रिरुच्यते** । परोक्षेण **सर्वस्य** एतस्यान्नजातस्य प्राणोऽत्तेति निर्वचनज्ञानात् **अत्ता भवति** । न ह्यन्नेनायमद्यते । एतदुक्तं भवति—**य एवमेतत्** यथोक्तं प्राणयाथात्म्यं **वेद सर्वमस्यान्नं भवति** । स मध्यमः प्राणो भूत्वा आधानप्रत्याधानगतो भोक्तैव भवति न कदापि भोज्यं भवति इति भोज्यात् व्यावर्तत इत्यर्थः ॥ ४ ॥

इति द्वितीयं ब्राह्मणम्

तृतीयं मूर्तामूर्तब्राह्मणम्

ब्रह्मणो मूर्तामूर्तरूपकथनम्

द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च मर्त्यं चामृतं च स्थितं च यच्च सच्च त्यच्च ॥ १ ॥

पुरा "प्राणा वै सत्यं" इत्युक्तम् । ब्रह्मोपनिषत्प्रसङ्गेन याः प्राणानामुपनिषदो व्याख्याताः त एव हि प्राणाः किमात्मकाः? कथं वा तेषां सत्यत्वं ? इत्यत्र "अथात आदेशः" इति वक्ष्यमाणश्रुतिगतचतुर्नेतिशब्दतः स्वारोपितप्राणोपलक्षिताविद्याण्डस्थूलाद्यंशचतुष्टयप्रतिषेधद्वारेण हि ब्रह्मणो याथात्म्यं निर्दिधारयिषितम् । स्वापनोदितव्यस्वातिरिक्तेयत्तापरिज्ञानं विना न हि तदपह्नोतुं शक्यते । न ह्यसतः प्रतिषेधविषयत्वं संभवति । यद्यत् सद्विकल्पितं तत्तत् सदेवेति कृत्वा कार्यकारणात्मकपञ्चीकृतापञ्चीकृतमहाभूतानामियत्तापरि-

ज्ञानार्थं मूर्तामूर्तब्राह्मणमारभ्यते—**द्वे** वेति। कार्यकारणभूतभौतिकसंबन्धात् द्विरूपं ब्रह्म। मूर्तामूर्तप्रपञ्चयोगायोगाभ्यां तन्मर्त्यामृतस्वभावं क्रियाकारकफल-भेदभिन्नसर्वव्यवहारास्पदं तद्गतविशेषापाये निर्विशेषं ब्रह्मावशिष्यते। तत्र स्वातिरिक्तकलनावच्छिन्नशबलब्रह्मणो **द्वे वाव रूपे**। वावशब्दो द्वे एवेत्यव-धारणार्थः। के ते द्वे? **मूर्तं चामूर्तं** चेति। किं तद्विशेषणं? इत्यत्र **मर्त्यं** मरणधर्मि **च**। तद्विपरीतम**मृतं च**। **स्थितं** स्थास्नु परिच्छिन्नम्। **यच्च** व्यापि अपरिच्छिन्नं स्थितविपरीतम्। **सच्च** प्रत्यक्षं **त्यच्च** परोक्षम्। एवं चतुर्विशेषणविशिष्टं मूर्तं चामूर्तं चेत्यर्थः ॥ १ ॥

मूर्तस्वरूपकथनम्

तदेतन्मूर्तं यदन्यद्वायोश्चान्तरिक्षाच्च तन्मर्त्यमेतत् स्थितमेतत् सत् तस्यैतस्य मूर्तस्य एतस्य मर्त्यस्य एतस्य स्थितस्य एतस्य सत एष रसो य एष तपति सतो ह्येष रसः ॥ २ ॥

तत्र कानि मूर्तामूर्तविशेषणानि? इत्यत आह—**तदेत**दिति। **तदेतत्** इतरेतरानुप्रविष्टावयवं **मूर्तम्**। किं तत्? **वायोश्चान्तरिक्षाच्च** भूतद्वयात् **यदन्यत्** पृथिव्यादिभूतत्रय**मेतन्मर्त्यं** मरणधर्मि। कस्मात्? **स्थितमेतत्** अर्थान्तर-संबन्धात् परिच्छिन्नम्। यत् विशेष्यमाणासाधारणधर्मवत् तत् परिच्छिन्नत्वात् मूर्तम्। मूर्तत्वात् मर्त्यम्। मर्त्यत्वात् स्थितम्। स्थितत्वात् **सत्**। अन्यो-न्याव्यभिचारात् चतुर्णां धर्माणां विशेषणविशेष्यभावो हेतुहेतुमद्भावश्च। एवं विशेषणचतुष्टयविशिष्टभूतत्रयं मूर्तं ब्रह्मणो रूपमित्यर्थः। चतुर्णामेकस्मिन् गृहीते इतरत् गृहीतमेवेत्याह—**तस्ये**ति। **तस्यैतस्य मूर्तस्य एतस्य मर्त्यस्य एतस्य स्थितस्य एतस्य सतः** चतुष्टयविशेषणविशिष्टस्य भूतत्रयस्य **एष रसः** सार इत्यर्थः। भूतत्रयसारिष्ठः सविता। यतः **य एष** मण्डलस्थः सविता **तपति**। **सतो** भूतत्रयस्य **एष हि रसः**। मूर्तो हि सविताधिदैविकः सारिष्ठश्चेत्यर्थः ॥ २ ॥

अमूर्तस्वरूपनिरूपणम्

अथामूर्तं वायुश्चान्तरिक्षं च एतदमृतमेतत् यत् एतत् त्यत् तस्य एतस्यामूर्तस्य एतस्यामृतस्य एतस्य यत एतस्य त्यस्य एष रसो य एष एतस्मिन् मण्डले पुरुषस्तस्य ह्येष रस इत्यधिदैवतम् ॥

अमूर्तस्वरूपमाह—अथेति। **अथामूर्तं वायुश्चान्तरिक्षं च** भूतद्वयम्। यत् परिशेषितं **तदेतदमृतम्**। अमूर्तत्वात् अस्थितं केनाप्यसंसर्गात् अमृतम-मरणधर्मि। **एतत्** स्थितविपरीतं अपरिच्छिन्नत्वात्। **यत एतद**न्याविभज्य-मानविशेषणं अतः **त्यत्**। त्यदिति परोक्षाभिधानार्हमेव। पूर्ववत् **तस्यैतस्या-मूर्तस्य एतस्यामृतस्य एतस्य यत एतस्य त्यस्य** चतुर्विशेषणविशिष्टो मूर्तस्य **एष रसः**। कोऽसौ? इत्यत्र **य एष एतस्मिन् मण्डले पुरुषो** हिरण्यगर्भः प्राणः यः स एषोऽमूर्तस्य भूतद्वयस्य **रसः** सारिष्ठः। **इत्यधिदैवत-**मित्युक्तोपसंहारार्थः ॥ ३ ॥

मूर्तामूर्तविवेकपूर्वकाध्यात्मदर्शनम्

अथाध्यात्ममिदमेव मूर्तं यदन्यत् प्राणाच्च यश्चायमन्तरा-त्मन्नाकाशः एतन्मर्त्यमेतत् स्थितमेतत् सत् तस्यैतस्य मूर्तस्य एतस्य मर्त्यस्य एतस्य स्थितस्य एतस्य सत एष रसो यच्चक्षुः सतो ह्येष रसः ॥ ४ ॥

अधुना मूर्तामूर्तविवेकपूर्वकमध्यात्मदर्शनमुच्यते—अथेति। **अथाध्या-त्मम्**। किं तत्? **इदमेव मूर्तं यदन्यत् प्राणाच्च** वायोः **यश्चायमन्तरात्मन्** आत्मन्याकाशः शरीरस्थश्च यः प्राणः एतत् द्वयं वर्जयित्वा यदेतच्छरीरा-रम्भकभूतत्रयं **एतन्मर्त्यमि**त्यादि समानमन्यत् पूर्वेण। **एतस्य सत एष रसो यच्चक्षुः** इत्याध्यात्मिकस्य कार्यत्वेन शरीरारम्भकस्य एष रसः सारः। तद्रसेन

हि सारवदिदं शरीरम् । "तेजो रसो निरवर्तताग्निः" इति लिङ्गात् । तैजसं हि चक्षुः । एतत्सारमाध्यात्मिकं भूतत्रयं **सतो ह्येष रस** इति भूतत्रय-सारत्वे हेत्वर्थः ॥ ४ ॥

अमूर्तस्वरूपम्

अथामूर्तं प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमृतमेतद्यत् एतत् त्यं तस्य एतस्यामूर्तस्य एतस्यामृतस्य एतस्य यत एतस्य त्यस्य एष रसो योऽयं दक्षिणेऽक्षन् पुरुषः त्यस्य ह्येष रसः ॥ ५ ॥

अमूर्तमुच्यते—**अथेति** । अथाधुना यत् परिशेषितं भूतद्वयं **प्राणश्च यश्चायमन्तरात्मन्नाकाश एतदमूर्तम्** । अन्यत् पूर्ववत् । **एतस्यैष रसः** सारः **योऽयं दक्षिणेऽक्षन् पुरुषः** दक्षिणेऽक्षन्निति विशेषग्रहणं शास्त्रप्रत्यक्षं तत्रैवो-पलब्धिपाटवदर्शनात् । **त्यस्य ह्येष रस** इति विशेषतः पूर्ववद्ग्रहणात् अमूर्त-सारत्व एव हेत्वर्थः । ब्रह्मोपाधिभूतकार्यकारणात्मकाध्यात्माधिदैवताभावमापन्न-सत्त्यच्छब्दवाच्यमूर्तामूर्तविभागो व्याख्यातः ॥ ५ ॥

मूर्तामूर्तकलनापवादसिद्धार्थप्रकटनम्

तस्य हैतस्य पुरुषस्य रूपं यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाग्न्यर्चिर्यथा पुण्डरीकं यथासकृद्विद्युत्तꣳ सकृद्विद्युत्तेव ह वा अस्य श्रीर्भवति य एवं वेद अथात आदेशो नेति नेति न ह्येतस्मादिति नेत्यन्यत्परमस्ति अथ नामधेयꣳ सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यम् ॥ ६ ॥

मूर्तामूर्तकलनापवादसिद्धमर्थं प्रकटयति—**तस्येति** । अथेदानीं **तस्य हैतस्य पुरुषस्य** यन्मूर्तामूर्तवासनासंयोगजं स्वाविद्येन्द्रजालगन्धर्वनगरमृग-

तृष्णिकोपमं **रूपमुच्यत** इत्यर्थः। न हि तत् विज्ञानात्मनो रूपम्। विज्ञानमयस्य स्वातिरिक्तासंभवप्रबोधतो ब्रह्ममात्रत्वात्। नानाविधवासनानुयोगात् नानारूपाण्यात्तवत् भातीत्यत्र दृष्टान्त उच्यते—**यथेति**। **यथा** लोके **माहारजनं** हरिद्रादियोगात् **वासो** वस्त्रं हरिद्रादिवत् भाति एवं स्त्र्यादिविषयसंयोगात् तादृशवासनानुरूपं रञ्जनाकारमुत्पद्यते। **यथा च** लोके **पाण्ड्वाविकमविदेहयोगतः** पाण्डरं भवति। **यथा** लोके **इन्द्रगोपोऽ**त्यन्तरक्तो भवति। एवमस्य क्वचित् विशेषापेक्षया रागस्य तारतम्यम्। क्वचित् पुरुषचित्तवृत्त्यपेक्षया। **यथा** लोके**ऽग्न्यर्चिः** भास्वरं भवति तथायमपि वासनानुरूपतां भजति। **यथा पुण्डरीकं** शुक्लं **यथा सकृद्विद्युत्तं** यथा च लोके सकृद्विद्योतनं सर्वतः प्रकाशकं भवति तथा ज्ञानप्रकाशकवृद्ध्यपेक्षया कस्यचित् वासनारूपं जायते। न च तेषां वासनारूपाणामियत्तेति परिच्छेदो विद्यते। तासामसंख्येयत्वात्। तथा च वक्ष्यति "तद्यदेतत् इदंमयोऽदोमयः" इति। यथा माहारजनं वास इत्यादयः प्रकारप्रदर्शनार्थाः एवं हिरण्यगर्भस्य वासनारूपं **यो वेद** तस्य **सकृद्विद्युत्ता इवास्य श्रीः** ख्याति**र्भवति**। ह वै इत्यवधारणार्थौ। "सत्यस्य सत्यं" इत्यत्र प्राथमिकसत्यस्वरूपं चतुरंशाढ्यस्वाविद्यापदतत्कार्यत्वेनाभिधाय एतत्सर्वापह्नवसिद्धद्वितीयसत्ययाथात्म्यं वक्तुं ब्राह्मणमारभ्यते—**अथेति**। **अथ** प्राथमिकसत्यस्वरूपनिर्देशानन्तरं यत् द्वितीयसत्यं निष्प्रतियोगिकसन्मात्रतयावशिष्यते तन्निर्दिधारयिषया तदावृतिरूपस्थूलादिचतुरंशाढ्यस्वाविद्यापदतत्कार्यगतविशेषांशापह्नवप्रबोधाय **अयमादेशो** निर्देशः। कः पुनरसौ? इत्यत्र ब्रह्म तावत् निष्प्रतियोगिकनिर्विशेषम्। तदवगतेः सर्वविशेषापह्नवबोधपूर्वकत्वात्। स्वातिरिक्तसामान्यापह्नवे न हि तत् येन केन वा बोधयितुमवगन्तुं शक्यम्। केन प्रकारेण तस्यादेशो भवेत्? इत्यत्र स्वाज्ञदृष्ट्यारोपितनामरूपजातिगुणक्रियाजुष्टस्थूलादिचतुरंशाढ्याविद्यापदतत्कार्यप्रतिषेधद्वारेण स्वज्ञैः ब्रह्म निर्दिश्यते—"तदेतत् ब्रह्म अपूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म" इति। कथं तत्प्रतिषेधः? इत्यत्र **नेति नेतीति**। चतुर्नेतिशब्दतः स्वातिरिक्ताविद्यापदचतुरंशान् निह्नुते। तदपह्नवप्रबोधतः स्वाज्ञादिदृष्ट्या स्वातिरिक्ताविद्यापदतत्कार्ये सत्यसति तत्कल-

नान्यत्वे नास्तीति सन्मात्रं ब्रह्मावशिष्यते। एवंप्रकारेण **सत्यस्य सत्यं** यत् परं ब्रह्म तदेव ब्रह्मणो **नामधेयम्**। किं तत्? सत्यस्य सत्यम्। प्राथमिक-सत्यार्थमाह—**प्राणा वै सत्यमिति**। प्राणोपलक्षितस्वाविद्यापदतत्कार्यजातस्य सद्विकल्पितत्वात् सत्यत्वम्। पृथक्सत्ताविरल्यात् वाचारम्भणमात्रत्वं च तेषामेष सत्यं इति द्वितीयसत्यशब्दार्थः ॥ ६ ॥

इति तृतीयं ब्राह्मणम्

चतुर्थं मैत्रेयीब्राह्मणम्

सर्वप्रत्ययविषयसंन्यासः ब्रह्मविद्यासाधनम्

मैत्रेयीति होवाच याज्ञवल्क्यः उद्यास्यन् वा अरेऽहम-स्मात् स्थानादस्मि हन्त तेऽनया कात्यायन्यान्तं करवाणीति ॥ १ ॥

"आत्मानमेवावेदहं ब्रह्मास्मि", "सर्वस्मात् प्रियतमः" इति "अन्योऽसावन्योऽहमस्मि", "त्रयं वा इदं नाम रूपं कर्म च" इति शास्त्रीयविद्याविद्याविषयः पूर्वमेव दर्शितः "द्वया ह" इत्यादिना। स्वाविद्या-विषयात् विरक्तस्य ब्रह्मविद्याधिकारो वर्णितः। यतो जायापुत्रवित्तादिलक्षणं पाङ्क्तं कर्म अविद्याविषयं न ह्यात्माप्तिसाधनं, तत्त्यागपूर्वकं ब्रह्मवेदनं ब्रह्माप्ति-साधनमित्यत्र—

> कर्मणा वध्यते जन्तुर्विद्यया च विमुच्यते।
> तस्मात् कर्म न कुर्वन्ति यतयः पारदर्शिनः ॥ इति,
> कां गतिं विद्यया याति कां च गच्छति कर्मणा।
> संन्यस्याखिलकर्माणि ब्रह्मविद्यां समाश्रय ॥

इति च श्रुतेः स्मृतेश्च। अतः कर्मादिसाधननैरपेक्ष्येण पारिव्राज्यं पुरुषार्थ-साधनमिति सर्वसाधनसंन्यासलक्षणं ब्रह्मज्ञानाङ्गत्वेन विधित्स्यते। एतदेवा-मृतत्वसाधनमिति अवधारणात्। कर्मी सन् याज्ञवल्क्यः प्रवव्राज। कर्मरहितायै मैत्रेय्यै ब्रह्मविद्यां इतरसाधननैरपेक्ष्येण उपदिदेश। "अमृतत्वस्य तु नाशास्ति वित्तेन" इति कर्माधिकारनिमित्तवर्णाश्रमादिप्रत्ययोपमर्दात् सर्वप्रत्ययविषयसंन्यासो ब्रह्मविद्यासाधनमिति संन्यासविधित्सया इयमाख्यायिकारभ्यते—**मैत्रेयीति**। **मैत्रेयि! इति होवाच याज्ञवल्क्यः** स्वभार्यामामन्त्रितवान्। किमर्थं? हे **अरे मैत्रेयि! अहमस्मात् स्थानात्** गार्हस्थ्याश्रमात् **उद्यास्यन्** ऊर्ध्वं पारिव्राज्यपदं यास्यन् तत्पदं गन्तुमिच्छन् **अस्मि**। अतः तवानुमतिं प्रार्थयामि "मातरं भार्यामनुमोदयित्वा संन्यसेत्" इति श्रुतेः। किंचान्यत् **ते** तव **अनया कात्यायन्या अन्तं** दाम्पत्यविच्छेदं **करवाणि** युवयोर्विभागं करोमि। एवं काङ्क्षितार्थं दत्वा गमिष्यामीत्यर्थः॥ १॥

याज्ञवल्क्येनामृतत्वसाधनकथनम्

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् कथं तेनामृता स्याँ इति नेति होवाच याज्ञवल्क्यो यथैव उपकरणवतां जीवितं तथैव ते जीवितꣳ स्यात् अमृतत्वस्य तु नाशास्ति वित्तेनेति॥ २॥

सा एवमुक्ताह—**सेति**। **सा होवाच**। **यन्नु** इति वितर्के। हे **भगोः** भगवन्! **मे** ममेयं **सर्वा पृथिवी** चतुःसागरपर्यन्ता **वित्तेन पूर्णा स्यात्**। **कथं तेने**त्याक्षेपार्थः प्रश्नार्थो वा। **तेन** पृथिवीवित्तसाध्येन कर्मणा**मृता** किं **स्यां**? **इति** व्यवहितेन संबन्धः। कथमिति यद्याक्षेपार्थः तदानुमोदनं **नेति होवाच याज्ञवल्क्यः**। प्रश्नार्थश्चेत् प्रतिवचनार्थं नैव स्यात्। तेनामृताहम्। किं तर्हि? **यथैव** लोके धनोपकरणवतां **जीवितं तथैव ते जीवितं स्यात्**।

वित्तसाध्येन कर्मणा **अमृतत्वस्य तु नाशास्ति** अमृतावगतेः वित्तादित्यागपूर्वकत्वात् ॥ २ ॥

मैत्रेय्या अमृतत्वसाधनविद्याप्रार्थनम्

सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां? यदेव भगवान् वेद तदेव मे ब्रूहीति ॥ ३ ॥

एवं श्रुत्वा वित्ताद्याशामुत्सृज्य अमृतत्वसाधनविद्यामेव प्रार्थयति इत्याह—सेति। **सा होवाच मैत्रेयी येन** वित्तेन**ाहं नामृता स्यां किमहं तेन कुर्याम्? यदे**वामृतत्वसाधनं **भगवान् वेद तदेव मे** मह्यं **ब्रूहीति** ॥ ३ ॥

याज्ञवल्क्येन उपदेशप्रतिज्ञा

स होवाच याज्ञवल्क्यः प्रिया बतारे नः सती प्रियं भाषसे एह्यास्स्व व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ४ ॥

एवं जायोक्तितुष्टो मुनिराह—स हेति। **स होवाच याज्ञवल्क्यः**। किमिति? **प्रिया** इष्टा **बते**त्यनुकंपयन् इदमाह—हे **अरे** मैत्रेयि! पूर्वमेव **प्रिया सती नो**ऽस्माकमिदानीं मत्प्रियमेव कालोचितं **भाषसे**। अतः त्वमेहि **आस्स्व** उपविश। ते**ऽ**मृतत्वसाधनब्रह्मविद्यां **व्याख्यास्यामि**। **व्याचक्षाणस्य** व्याख्यानं कुर्वतो **मे** वाक्यमर्थानुसन्धानपूर्वकं **निदिध्यासस्व** ध्यातुमिच्छस्वेत्यर्थः ॥ ४ ॥

अमृतत्वसाधनब्रह्मविद्योपदेशः

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै

कामाय जाया प्रिया भवति आत्मनस्तु कामाय जाया प्रिया भवति न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति आत्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवति आत्मनस्तु कामाय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति आत्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति आत्मनस्तु कामाय लोकाः प्रिया भवन्ति न वा अरे देवानां कामाय देवाः प्रिया भवन्ति आत्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेयि! आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेन इदꣳ सर्वं विदितम् ॥ ५ ॥

जायापतिपुत्रादिभ्यो विरागोत्पादनपूर्वकममृतत्वसाधनब्रह्मविद्यां मुनिराह—स होवाचेति। स होवाच न वा इति। प्रसिद्धस्मरणार्थो वैशब्दः। कथम्? प्रसिद्धमेवैतल्लोके पत्युः भर्तुः कामाय प्रयोजनाय जायायाः पतिः प्रियो न भवति। किं तर्हि? स्वात्मनस्तु कामाय स्वप्रयोजनायैव जायायाः पतिः प्रियो भवति। तथा न वा अरे जायाया इत्यादि समानमन्यत्। पुत्रवित्तब्रह्मक्षत्रलोकदेवभूतानि तद्गतप्रीतिः स्वात्मनिमित्तेत्यर्थः। पुनः सर्वग्रहणं तु स्वातिरिक्तसर्वप्रपञ्चगतप्रीतेरात्मनिमित्तत्वेन स्वातिरिक्ता-

नात्मताप्रकटनार्थम्। इदं तावत् लोकप्रसिद्धं "आत्मैव प्रियो नान्यत्" इति। पुरा "तदेतत् प्रेयः" इत्यादि यदुपन्यस्तं तद्वृत्तिस्थानीयमिदं प्रपञ्चितम्। स्वाज्ञदृष्ट्या स्वान्यत्र प्रीतिस्तु गौणी। स्वात्ममात्रप्रीतिर्मुख्या। यस्मादेवं तस्मात् **आत्मा वा अरे** स्वमात्रतया **द्रष्टव्यः**। तस्य निष्प्रतियोगिकत्वेन तद्दर्शने निरुपायत्वमाशंक्याह—**श्रोतव्य** इति। श्रुत्याचार्यमुखतः स्वात्मा स्वातिरिक्तानात्मापह्नवसिद्धात्ममात्रतया **श्रोतव्यः**। तथा श्रुतियुक्तिभ्यां **मन्तव्यः**। तथा **निदिध्यासितव्यः**। एवं श्रवणमनननिदिध्यासनोपायतः स्वात्मा स्वावशेषतया द्रष्टुं शक्यः नान्यथा। स्वात्मन्यध्यस्तब्रह्मक्षत्रवर्णाश्रमविहितक्रियाकारकफलादिविभ्रमनिरसनपूर्वकं **अरे मैत्रेयि!** स्वात्मनो **वा दर्शनेन** तदुपाय**श्रवणेन मत्या विज्ञानेन च** यत् स्वाज्ञदशायां इदन्त्वेन सर्वमवगतं इदानीमिदं सर्वमात्ममात्रमिति विदितं भवतीत्यत्र—

आत्ममात्रमिदं सर्वं आत्मनोऽन्यन्न किंचन।

इति श्रुतेः ॥ ९ ॥

इदं सर्वमात्ममात्रमिति कथनम्

ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादात् योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुर्योऽन्यत्रात्मनो लोकान् वेद देवास्तं परादुः योऽन्यत्रात्मनो देवान् वेद भूतानि तं परादुः योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादात् योऽन्यत्रात्मनः सर्वं वेद इदं ब्रह्म इदं क्षत्रमिमे लोका इमे देवा इमानि भूतानि इदꣳ सर्वं यदयमात्मा ॥ ६ ॥

कथं पुनरिदं सर्वमात्ममात्रं? इत्यत आह—**ब्रह्मे**ति। यः स्वात्मनोऽन्यत्र **ब्रह्म** ब्राह्मणजातिं **वेद तं ब्रह्म** ब्राह्मणजातिः मामनात्मदृष्ट्या पश्यतीति **परादात्**

पराकुर्यात् स्वात्मविकल्पितानां निर्विकल्पस्वप्रबोधतो विकल्पापाये स्वात्ममात्रत्वात्। तथा क्षत्रं क्षत्रियजातिः। तथा लोका देवा भूतानि सर्वमिदं ब्रह्मेति यान्यनुक्रान्तानि तानि सर्वाण्यात्मैव। यदयमात्मा इदं सर्वम्। यथा घटशरावादिकः स्वोत्पत्तिस्थितिप्रलयेष्वपि स्वकारणीभूतमृदतिरिक्तं न भवति तथा स्वातिरिक्तानात्मप्रपञ्चस्वोत्पत्तिस्थितिप्रलयेष्वपि स्वात्मातिरिक्तं न भवतीत्यत्र—

गृह्यमाणे घटे यद्वत् मृत्तिका भाति वै बलात्।
वीक्ष्यमाणे प्रपञ्चे तु ब्रह्मैवाभाति भासुरम्॥

इति श्रुतेः ॥ ६ ॥

सर्वं चिन्मात्रमेवेत्यत्र दृष्टान्तजातम्

स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयात् ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ७ ॥ स यथा शङ्खस्य ध्मायमानस्य न बाह्यान् शब्दान् शक्नुयात् ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ८ ॥ स यथा वीणायै वाद्यमानायै न बाह्यान् शब्दान् शक्नुयात् ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ ९ ॥

कथं पुनः "इदं सर्वं यदयमात्मा", "चिन्मात्रान्न परं किंचित्" इति श्रुत्या सर्वं चिन्मात्रमेव? इत्यत्र सर्वलोकप्रत्यक्षतया दृष्टान्तजातमाह—**स यथे**त्यादिना। **स यथा** लोके **दुन्दुभेः हन्यमानस्य** ताड्यमानस्य **न** हि **बाह्यान्** बहिर्भूतान् **शब्दान्** दुन्दुभिशब्दविशेषान् **ग्रहणाय** ग्रहीतुं **शक्नुयात्**। **दुन्दुभेस्तु** शब्द**ग्रहणेन** दुन्दुभिशब्दा एत इति गृहीता भवन्ति। दुन्दुभि-

शब्दव्यतिरेकेणाभावात् । तथा दुन्दुभेराघातो दुन्दुभ्याघातः । तस्य दुन्दुभिशब्दसामान्यस्य ग्रहणेन तद्गतविशेषा गृहीता भवन्ति । न हि त एव निर्भिद्य ग्रहीतुं शक्यन्ते । तथा जाग्रदाद्यवस्थात्रयेऽपि प्रज्ञानमेव दृश्यते प्रज्ञानातिरिक्तस्य मृग्यत्वात् । किञ्च—**स यथा शङ्खस्य, स यथा वीणायै** इति । **स यथा शङ्खस्य ध्मायमानस्य** भङ्कारशब्देन पूर्यमाणस्य, तथा **वीणायै वाद्यमानायै** वीणाया वाद्यमानाया **न** बाह्यान् शब्दान् शक्नुयादित्यादि पूर्ववत् । एवमनेकदृष्टान्तोपपादनं दार्ष्टान्तिकदार्ढ्यार्थम् ॥ ७–९ ॥

प्रज्ञानविकल्पितभावानां प्रज्ञानमात्रत्वम्

स यथा आर्द्रैधाग्नेरभ्याहितात् पृथग्धूमा विनिश्चरन्ति एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतत् यत् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि ॥ १० ॥

यथा दुन्दुभिशङ्खादिशब्दानां शब्दमात्रं सामान्यं एवं प्रज्ञानविकल्पितभावानां स्वाङ्गदृष्ट्या जन्मस्थितिभङ्गवतामपि स्वज्ञदृष्ट्या प्रज्ञानमात्रमिति प्रकटयति—**स यथेति** । **स यथार्द्रैधोभिः** इद्धोऽग्निः **आर्द्रैधाग्निः** । तस्मादग्ने**रभ्याहितात् पृथक् धूम** विस्फुलिङ्गादयो **विनिश्चरन्ति** निर्गच्छन्ति **तथैवं वा अरे अस्य महतो भूतस्य** प्रकृतात्मनो **निश्श्वसितमेतत्** । यथा प्रयत्नतः पुरुषनिःश्वासो भवति तथा निश्श्वसितवत् आविर्भूतम् । किं तत ? इत्यत्र **यत्** चतुर्विधमन्त्रजातं **ऋग्वेद** इत्यादि । उर्वशीपुरूरवसोः संवादादिः **इतिहासः** । "असद्वा इदमग्र आसीत्" इत्यादि **पुराणम्** । देवयजनादि**र्विद्या** । "आत्मेत्येवोपासीत" इत्याद्या **उपनिषदः** । "तदेते श्लोका भवन्ति" इति ब्राह्मणप्रभवमन्त्राः **श्लोकाः** । "आत्मानमेवावेदहं ब्रह्मास्मि" इति

"ब्रह्मविदाप्नोति परं" इत्यादिवस्तुसंग्रहवाक्यानि **सूत्राणि**। मन्त्रविवरणानि **अनुव्याख्यानानि** वस्तुसंग्रहवाक्यविवरणानि वा। यथा "आत्मेत्येवोपासीत", "न स वेद यथा पशुः" इत्यादितृतीयाध्यायगतसङ्ग्रहवाक्यस्य चतुर्थाध्यायः। केवलमन्त्रविवरणानि **व्याख्यानानि** वेदाभिव्यक्तिः पुरुषनिश्श्वासवत्। न हि पुरुषबुद्धिप्रयत्नपूर्वकः अतः स्वार्थे प्रमाणनिरपेक्ष एव। तस्मात् वेदेन यदुक्तं तत् श्रेयोऽर्थिभिः प्रतिपत्तव्यम्। एवमुक्तानुक्तानि सर्वाणि **निःश्वसितानि** अग्निविस्फुलिङ्गादिवत् स्वकाले प्रादुर्भवन्तीत्यर्थः ॥१०॥

चिन्मात्रविकल्पिताचित्प्रपञ्चस्यापि चिन्मात्रत्वमेव

स यथा सर्वासामपाᳩ समुद्र एकायनमेवᳩ सर्वेषाᳩ स्पर्शानां त्वक् एकायनमेवᳩ सर्वेषां गन्धानां नासिके एकायनमेवᳩ सर्वेषाᳩ रसानां जिह्वा एकायनमेवᳩ सर्वेषाᳩ रूपाणां चक्षुरेकायनमेवᳩ सर्वेषाᳩ शब्दानाᳩ श्रोत्रमेकायनमेवᳩ सर्वेषाᳩ संकल्पानां मन एकायनमेवᳩ सर्वासां विद्यानाᳩ हृदयमेकायनमेवᳩ सर्वेषां कर्मणाᳩ हस्तावेकायनमेवᳩ सर्वेषामानन्दानामुपस्थ एकायनमेवᳩ सर्वेषां विसर्गाणां पायुरेकायनमेवᳩ सर्वेषामध्वनां पादावेकायनमेवᳩ सर्वेषां वेदानां वागेकायनम् ॥ ११ ॥

यथा जलोद्भूततरङ्गबुद्बुदफेनादि स्वोत्पत्तिस्थितिप्रलयेष्वपि जलमात्रं चिन्मात्रविकल्पिताचित्प्रपञ्चोऽपि तथा स्वोत्पत्तिस्थितिप्रलयेष्वपि चिन्मात्रमेव तद्व्यतिरेकेण निरूपयितुमशक्यत्वात् इत्यत्र दृष्टान्तपरम्परामनुक्रामति—**स यथेति**। **स** इति दृष्टान्तप्रदर्शनार्थः। **यथा सर्वासां** नदीनदवापीकूपतटाकादीनाम**पां समुद्रो**ऽब्धि**रेकायनम्**। मेघव्यवधानेन समुद्रादेव तासामुत्पत्तिः तद्रूपतया स्थितिः पुनस्तत्रैव प्रलयः। यत एवमतः कालत्रयेऽप्यपां सम्यक्

द्रवात्मकत्वात् ताः समुद्ररूपा एवेति। यथायं दृष्टान्त **एवं सर्वेषां** मृदुकठिनादि**स्पर्शानां त्वक् एकायनं** स्पर्शानां मनोगृहीतत्वगाश्रितत्वात् तदतिरिक्ताश्रयाभावाच्च। तदपि स्पर्शसामान्यं मनसि। मनस्तु विज्ञानमात्रे परब्रह्मणि समुद्रे नदनदीप्रवाहवत् विलीयते। तदा प्रज्ञानमात्रमवशिष्यते। एवं सर्वत्र योज्यम्। तथा **सर्वेषामविशेषरसानां जिह्वेन्द्रियसामान्यमेकायनम्**। तथा **सर्वेषां** पार्थिव**गन्धानां नासिका**वाच्यघ्राणेन्द्रिय**मेकायनम्**। तथा तेजोविशेष**रूपाणां चक्षुः**। तथा **शब्दानां श्रोत्रम्**। तथा **सङ्कल्पा**दिवृत्ती**नां मनो**ऽन्तःकरणम्। तथा **विद्या**सामान्यानां **हृदयं** धीः। तथा **कर्मणां हस्तौ**। तथा **सर्वेषामानन्दानामुपस्थः**। तथा **विसर्गाणां पायुः**। तथा**ध्वनां पादौ**। तथा **सर्वेषां वेदानां** वागिन्द्रियमेकायनम्। वागादिबाह्यकरणं मनसि मनस्तत्कार्यं विज्ञानमात्रं भूत्वा परमात्मनि विलीयते। "इदं सर्वं यदयमात्मा" इति यत् प्रतिज्ञातं तत्र हेतुः सम्यगभिहितः। कथम्? करणग्रामोपलक्षिताविद्यापदतत्कार्यजातं स्वाज्ञादिदृष्ट्या चिन्मात्रोत्थं चिन्मात्रस्थं चिन्मात्रपर्यवसन्नम्। यत एवमतः स्वाज्ञादिदृष्ट्याविद्यापदतत्कार्यजाते सत्यसति परमार्थदृष्ट्या सर्वं निष्प्रतियोगिकचिन्मात्रमेव। यच्चिन्मात्रमिति प्रतिज्ञातं तत् श्रुतियुक्तिभ्यां साधितमित्यर्थः ॥ ११ ॥

आत्यन्तिकप्रलयस्यापि ब्रह्मविद्यानिमित्तत्वम्

स यथा सैन्धवखिल्य उदके प्रास्त उदकमेवानुविलीयेत न हास्य उद्ग्रहणायेव स्यात् यतो यतस्त्वाददीत लवणमेव एवं वा अर इदं महद्भूतमनन्तमपारं विज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु विनश्यन्ति न प्रेत्य संज्ञास्तीति अरे ब्रवीमीति होवाच याज्ञवल्क्यः ॥ १२ ॥

आत्यन्तिकप्रलयोऽपि स्वाभाविक इत्याकाङ्क्षायां ब्रह्मविद्यानिमित्तोऽयमित्यत्र दृष्टान्तमाह—**स यथेति**। स्यन्दनात् सिन्धुरुदकं तद्विकारः सैन्धवः

चासौ खिल एव खिल्यश्च । स्वार्थे यत्प्रत्ययः । **स यथा सैन्धवखिल्यः** स्वयोनावु**दके प्रास्तः** प्रक्षिप्तः लीयमान**मुदकमेवानुविलीयेत । न ह नैवास्य** खिल्यस्य उद्धृत्य **ग्रहणाय** पूर्ववत् ग्रहीतुं न हि कश्चित समर्थो भवति । **यतो यतो** देशादुद**कमाददीत** गृहीत्वास्वादयेत् तदुदकं **लवणमेव** । न हि सलिलं प्रतीयते । यथायं दृष्टान्तस्त**थैवं वा अरे** मैत्रेयि ! यत्प्रबोधसमकालं स्वातिरिक्तत्वेन परिच्छिन्नभूतभौतिकसन्ततिरपह्नवपदं भजति तदि**दं महद्भूतं** निष्प्रतियोगिकमहत्त्वात् सैन्धवघनवत् अखण्डैकरसत्वा**दनन्तम्** । किं तदापेक्षिकानन्त्यं ? **अपारम्** । एवं विज्ञप्तिः विज्ञानं च तत् घनं चेति विज्ञानघनं ब्रह्म । तदेव तवात्मा **विज्ञानघनः** । घनशब्दः स्वातिरिक्तजात्यन्तरप्रतिषेधार्थः तथावधारणात् । यदिदमेकं निष्प्रतियोगिकाद्वैतं स्वमात्रमित्यज्ञानमहिम्ना स्वाज्ञाग्रणीः खिल्यभावमेत्य जातो मृतः सुखी दुःखी स्वान्यत्राहं ममेत्यादि संसारसागरे मग्नो भवति । तद्दृष्ट्या स्वतुल्योच्चावचभूतानि विकल्पितानि । यदास्यानेककोटिजन्मकृतसुकृतफलार्पणसन्तुष्टेश्वरप्रसादतः श्रुत्याचार्यकटाक्षो जायते तदायं तदुपदिष्टनिष्प्रतियोगिकब्रह्ममात्रप्रबोधसमकालं **एतेभ्यो** भूतभौतिकपरिच्छिन्नोपाधि**भूतेभ्यः समुत्थाय** स्वातिरिक्तभूतभौतिकजातं नेतीत्यवधार्य स्वातिरिक्तकलनापह्नवसिद्धब्रह्ममात्रतयावशिष्यते । तत्समकालमेव **तान्येव** स्वाज्ञदृष्टिविकल्पितभूतभौतिकानि नदीसमुद्रवत् सलिलविकल्पितफेनबुद्बुदादिवच्च **विनश्यन्ति** ब्रह्ममात्रावशिष्टानि भवन्तीत्यर्थः । तदानीं स्वाज्ञादिदृष्ट्या स्वातिरिक्तभ्रमे सत्यसति महद्भूतमनन्तमपारं प्रज्ञानघनं स्वमात्रमवशिष्यते । एवं स्वातिरिक्तभ्रमासंभवप्रबोधतः तद्भावापत्तावपि कालान्तरे पुनर्विशेषसंज्ञा स्यादित्याशङ्कमानामालक्ष्याह—**नेति** । एवं स्वातिरिक्तास्तिताभ्रमतः **प्रेत्य** व्यावृत्य ब्रह्ममात्रावस्थानलक्षणविकळेबरकैवल्यपदमारूढस्य हे **अरे** मैत्रेयि ! **न हि** कदाचिदपि **विशेषसंज्ञास्तीति ब्रवीमि** । स्वाज्ञदशायां यदनुभूतमहममुष्य पुत्रो ममेदं क्षेत्रं धनमित्येवमादिविशेषसंज्ञाया ब्रह्ममात्रप्रबोधसमकालमपह्नवतां गतत्वात् कालत्रयेऽप्ययं विद्वान् निष्प्रतियोगिकब्रह्ममात्रतयावशिष्यत इति स्वभार्यायै मैत्रेय्यै **होवाच याज्ञवल्क्य** इति श्रुतेर्वचः ॥ १२ ॥

महाभूतमेव विज्ञानायालमिति कथनम्

सा होवाच मैत्रेयी अत्रैव मा भगवानमूमुहत् न प्रेत्य संज्ञास्तीति स होवाच याज्ञवल्क्यो न वा अरेऽहं मोहं ब्रवीमि अलं वा अरे इदं विज्ञानाय ॥ १३ ॥

"न प्रेत्य संज्ञास्तीति" अत्र सन्दिहाना पतिं प्रत्याह—**सा** **ह**इति। एवं प्रतिबोधितापि **सा ह** किल **मैत्रेय्युवाच**। ह किल। किमिति? **अत्रैव** एतस्मिन् ब्रह्मणि पुरा "विज्ञानघनं ब्रह्म स्वमात्रमवशिष्यते" इति प्रतिज्ञाय पुनः **न प्रेत्य संज्ञास्तीति** विरुद्धधर्ममाचक्षाणो **भगवान् मा** माममूमुहत् कथं मोहनं कृतवान्? न ह्यग्निरेक एव उष्णः शीतो भवितुमर्हतीति। **स होवाच** याज्ञवल्क्यः। किमिति? **न वा अरे अहं मोहं** मोहनवाक्यं **ब्रवीमि**। विज्ञानघनत्वं संज्ञाभावं च कथं? इति चेन्न; स्वातिरिक्तसंज्ञाभावस्य निष्प्रतियोगिकस्वमात्रावगतिहेतुत्वात्। भ्रान्त्या त्वयैव एतदन्यथा गृहीतम्। मया त्विदमुक्तम्। यस्तु स्वाविद्योपाधियोगभ्रान्त्या आत्मनः खिल्यभावः तस्मिन् ब्रह्ममात्रप्रबोधसमकालमपह्नवतां गते विशेषसंज्ञानिमित्ताभावात् न प्रेत्य संज्ञास्तीत्युक्तम्। घटनाशात् तद्गतचन्द्रादिप्रतिबिम्बनाशवत्। न हि चन्द्रादिस्थानीयविज्ञानघनस्य नाशोऽस्ति तस्य पारमार्थिकसद्रूपत्वात्। यत एवमतो **अरे इदं** महद्भूतमनन्तमपारं यथा व्याख्यातं तदेव **विज्ञानायालम्**। तथा च वक्ष्यति "न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते" इति ॥ १३ ॥

आत्ममात्रस्यैवावशेषः

यत्र हि द्वैतमिव भवति तदितर इतरं जिघ्रति तदितर इतरं पश्यति तदितर इतरꣳ शृणोति तदितर इतरमभिवदति तदितर इतरं मनुते तदितर इतरं विजानाति यत्र वा अस्य सर्वमात्मैवाभूत् तत्केन कं जिघ्रेत् तत्केन कं पश्येत् तत्केन कꣳ शृणुयात् तत्केन

कमभिवदेत् तत् केन कं मन्वीत तत् केन कं विजानीयात् येनेदꣳ सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयादिति ॥ १४ ॥

कथं पुनः "न प्रेत्य संज्ञास्तीति" उच्यते ? इत्यत आह—यत्र हीति। **यत्र** यस्मिन् निष्प्रतियोगिकाद्वैते तद्याथात्म्याज्ञदृष्ट्या तदतिरेकेण यत्किञ्चित् स्वातिरिक्तं प्रतियोगिक**द्वैतमिव** भिन्नवत् **भवति**। अद्वैतस्य द्वैतसापेक्षत्वेनावास्तवता स्यादिति चेन्न; तस्य निष्प्रतियोगिकभावरूपत्वेन पारमार्थिकसत्यत्वात्। द्वैतस्यापि तथात्वं स्यादिति चेन्न; तत्रत्य—इवशब्दस्य तद्गतभावरूपताग्रासत्वात्। वस्तुतो द्वैतजातं निष्प्रतियोगिकाभावरूपमेवेत्यर्थः। एवं द्वैताद्वैतेयत्तां यो न जानाति सोऽयं ब्रह्ममात्रे**तरः** खिल्यात्मदृष्टिः घ्राता स्वेतरघ्राणेन स्वेतरघ्रातव्यं **जिघ्रति**। इतर इतरं जिघ्रतीति कारकप्रदर्शनार्थम्। **तदितर इतरं पश्यतीत्यादि** समानम्। यत्र वास्य विदुषः सर्वमविद्यापदतत्कार्यजातं ब्रह्ममात्र प्रबोधसमकालमात्मैवाभूत् **तत्तत्र केन** करणेन **कं** घ्रातव्यं **जिघ्रेत्?** क्रियासामान्यस्य कारकनिमित्तत्वम्। कारकाभावे क्रियाभावः। क्रियाभावे फलाभावः। तस्मात् कारकादीनामविद्याकार्यत्वेन कारणतुल्यत्वात् विद्वद्दृष्ट्या आत्ममात्रमवशिष्यते। स्वाज्ञदशायां कारकक्रियादि भातं स्वज्ञदशायां तत् सर्वमात्मैव भवति। यत एवमतः स्वात्ममात्रप्रत्ययारूढानां विदुषां क्रियाकारकफलप्रत्ययो मृग्य इत्यर्थः। यदि प्रमादतः स्फुरेत् तदा निवृत्तिरेव कार्येत्यत्र—

> अनुतिष्ठन्तु कर्माणि परलोकधियासवः।
> सर्वलोकात्मकः कस्मादनुतिष्ठामि किं मुधा॥
> दुःखिनोऽज्ञाः संसरन्तु कामं पुत्राद्यपेक्षया।
> परमानन्दपूर्णोऽहं संसरामि किमिच्छया॥

इति श्रुतेः। तथा **तत् केन कं पश्येत्?** इत्यादि समानम्। तत् केन कं इत्याक्षेपार्थतः स्वातिरिक्तक्रियाकारकफलासंभवप्रबोधसिद्धस्वात्ममात्रमवगम्यते।

यत्र स्वाज्ञदशायां अन्योन्यं पश्यति तत्राप्ययं स्वाज्ञो येनेदं सर्वं विजानाति तं केन विजानीयात् ? करणेन विजानातीति चेन्न; तस्य ज्ञेयनियुक्तत्वेन जडत्वात्। ज्ञेये एव हि ज्ञातुः जिज्ञासा न ह्यात्मनि न ह्यग्नौ। अग्निरिव स्वात्मा स्वविषयो भवितुमर्हति। नापि निर्विषये ज्ञातुर्ज्ञानमुपपद्यते। तस्मात् येनेदं सर्वं विजानाति तं विज्ञातारं केन करणेन को वान्यो विजानीयात् ? न केनापीत्याक्षेपार्थादनात्मापह्नवसिद्धमात्ममात्रं अवशिष्यत इति द्योत्यते।

आत्ममात्रमिदं सर्वमात्मनोऽन्यन्न किंचन।

इति श्रुतेः ॥ १४ ॥

इति चतुर्थं ब्राह्मणम्

पञ्चमं मधुब्राह्मणम्

आत्मनो नानात्वनिवृत्तिः

इयं पृथिवी सर्वेषां भूतानां मधु अस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मꣳ शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदꣳ सर्वम् ॥ १ ॥

सर्वकर्मनैरपेक्ष्येणामृतत्वसाधनं वक्तव्यमिति मैत्रेयीब्राह्मणमारब्धम्। तच्च ज्ञानं सर्वकर्मसंन्यासाङ्गविशिष्टम्। स्वात्मनि विज्ञाते स्वविकल्पितमिदं सर्वं विकल्पासंभवप्रबोधतः स्वात्ममात्रतया विदितं भवति। एवमवगत्युपायत्वेन श्रवणादिरुक्तः। "आत्मैवेदं सर्वं" इति यत् प्रतिज्ञातं तत्र हेतुत्वेन इदं सर्वमात्मजमात्मस्थमात्मप्रलयं चोक्तम्। तत्र तत्तत्काले स्वेनैवेदं जायते।

किंनिमित्ताकाङ्क्षास्य ? इति हेत्वसिद्ध्याशंकायां लोके तावत् यत् पृथिव्यादि-परस्परोपकार्योपकारकभूतं तदेककारणपूर्वकं न स्वतः संभूतिमत् भवितुमर्हति जडत्वेन परार्थत्वात्। यद्वा—"आत्मैवेदं सर्वं" इति यत् प्रतिज्ञातं तत्र सर्वस्यात्मोत्पत्तिप्रलयवत्त्वेन कार्यकारणयोरभेदतः सर्वं ब्रह्मेत्युक्तम्। पुनरागम-प्राधान्यतः प्रतिज्ञातार्थनिगमनार्थमिदं मधुब्राह्मणमारभ्यते। मैत्रेयीब्राह्मणे श्रोतव्य इति श्रवणविधिरुक्तः। तद्दार्ढ्याय पुनः मधुब्राह्मणात् तदर्थमनननिदिध्यासनविधि-रुच्यते। अध्यायद्वयार्थोऽप्यस्मिन् मधुब्राह्मणे उपसंह्रियत इति न पुनरुक्तिः—**इयमिति**। प्रसिद्धेयं **पृथिवी सर्वेषां** ब्रह्मादिस्तम्बान्त**भूतानां** कार्यत्वेन मध्विव **मधु**। यथा मध्वपूपो बहुमधुकरनिर्वर्तितः एवमियं पृथिवी सर्वभूतनिर्वर्तिता। तथा **सर्वाणि भूतानि अस्यै पृथिव्यै** पृथिव्या **मधु** कार्यम्। किञ्च **अस्यां पृथिव्यां यश्चायं पुरुषः** चित्प्रकाशप्रायत्वात् **तेजोमयोऽमृतमयोऽ**मरणधर्मा **यश्चायमध्यात्मं**, शरीरे भवः **शारीरः** पूर्वोक्त**तेजोमयोऽमृतमयः पुरुषो** लिङ्गाभिमानी **सोऽयं** सर्वभूतानामुपकारात् कारणत्वेन मधु। सर्वाणि भूतान्यस्य च मधु। चशब्दात् एतच्चतुष्टयं तावदेकं सर्वभूतकार्यम्। सर्वाणि भूतानि अस्य कार्यम्। यस्मात्तयोर्मिथः एकैककारणपूर्वकता तस्मात् एकस्मात् कारणात् एत-ज्जातम्। व्यष्टिसमष्टिप्रपञ्चारोपाधिकरणयोः यदेकत्वं तदेव तद्गतहेयांशापायात् ब्रह्म। इतरत् सर्वं कार्यं तद्व्यावहारिकप्रातिभासिकदृष्टिभ्यां वाचारम्भणमात्रम्। वस्तुमात्रदृष्ट्या तत्कार्यजातं वाचारम्भणतामपि नार्हति। मधुपर्यायाणामयमेवार्थ-संक्षेपः। "इदं सर्वं यदयमात्मा" इति योऽयं प्रतिज्ञातः अयमेव स इदमेवामृतमिति यन्मैत्रेय्यै मुनिनामृतत्वसाधनत्वेनोक्तमात्मयाथात्म्यविज्ञानमध्या-यादौ यत् प्रकृतं "ब्रह्म ते ब्रवाणि", "ज्ञपयिष्यामि" इति च यन्मात्रज्ञानं ब्रह्मविद्या तन्मात्रज्ञानादिदं सर्वं स्वगतहेयांशापायतो ब्रह्मैव भवति ॥ १ ॥

अबादीनां मधुत्वख्यापनम्

इमा आपः सर्वेषां भूतानां मधु आसामपाꣳ सर्वाणि भूतानि मधु यश्चायमास्वप्सु तेजोमयोऽमृतमयः पुरुषो यश्चाय-

मध्यात्मᳫ रैतसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदᳫ सर्वम् ॥ २ ॥ अयमग्निः सर्वेषां भूतानां मधु अस्याग्नेः सर्वाणि भूतानि मधु यश्चायमस्मिन्नग्नौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं वाङ्मयस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदᳫ सर्वम् ॥ ३ ॥ अयं वायुः सर्वेषां भूतानां मधु अस्य वायोः सर्वाणि भूतानि मधु यश्चायमस्मिन् वायौ तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं प्राणस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदᳫ सर्वम् ॥ ४ ॥ अयमादित्यः सर्वेषां भूतानां मधु अस्यादित्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नादित्ये तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं चाक्षुषस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदᳫ सर्वम् ॥ ५ ॥ इमा दिशः सर्वेषां भूतानां मधु आसां दिशाᳫ सर्वाणि भूतानि मधु यश्चायमासु दिक्षु तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मᳫ श्रौत्रः प्रातिश्रुत्कः तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदᳫ सर्वम ॥ ६ ॥ अयं चन्द्रः सर्वेषां भूतानां मधु अस्य चन्द्रस्य सर्वाणि भूतानि मधु यश्चायमस्मिᳫश्चन्द्रे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं मानसस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदᳫ सर्वम् ॥ ७ ॥ इयं विद्युत् सर्वेषां भूतानां मधु अस्यै विद्युतः सर्वाणि भूतानि मधु यश्चाय-

मस्यां विद्युति तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं तैजस-स्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इद॰ सर्वम् ॥ ८ ॥ अय॰ स्तनयित्नुः सर्वेषां भूतानां मधु अस्य स्तनयित्नोः सर्वाणि भूतानि मधु यश्चायमस्मिन् स्तनयित्नौ तेजो-मयोऽमृतमयः पुरुषो यश्चायमध्यात्म॰ शाब्दः सौवरस्तेजोमयो-ऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इद॰ सर्वम् ॥ ९ ॥ अयमाकाशः सर्वेषां भूतानां मधु अस्याकाशस्य सर्वाणि भूतानि मधु यश्चायमस्मिन्नाकाशे तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्म॰ हृद्याकाशस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इद॰ सर्वम् ॥ १० ॥

एवमत्रग्निवाय्वादित्यदिक्चन्द्रविद्युत्स्तनयित्न्वाकाशधर्मिसत्यमानुषात्मनां का-र्यत्वेन उपकारात् मधुत्वम् । तदन्तर्गततेजोमयादिविशेषणविशिष्टपुरुषस्य कारण-त्वेनोपकारात् मधुत्वं समानमित्याह—**इमा आप** इत्यादिना । तथा आप **अध्यात्मम्** । रेतसि भवो **रैतसः** । अपां विशेषतो रेतस्यवस्थानात् । **अयमग्निः** इति । वाच्यग्नेर्विशेषतोऽवस्थानात् । **अयं वायुः** इति । तथा **वायुरध्यात्मं प्राणः** । स हि सर्वभूतशरीरारम्भहेतुः । तथा चोक्तं “तस्यै वाचः पृथिवी शरीरं ज्योतीरूपमयमग्निः” इति । **अयमादित्यः** इति । तथादित्यो **मधु** । **चक्षु-रध्यात्मम्** । **इमा दिशः** इति । तथा **दिशो मधु** यद्यपि श्रोत्रमध्यात्मं शब्दं प्रति श्रवणवेलायां तु विशेषतः सन्निहितो भवतीत्यध्यात्मम् । प्रतिश्रुत्कायां श्रवणवेलायां भवः **प्रातिश्रुत्कः** । **अयं चन्द्रः** इति । तथा **चन्द्रः अध्यात्मं मानसः** । **इयं विद्युत्** इति । तथा **विद्युत्** त्वक्तेजसि भवः **तैजसोऽध्या-त्मम्** । **अय॰ स्तनयित्नुः** इति । तथा **स्तनयित्नुः** शब्दे भवः **शाब्दः अध्यात्मम्** । विशेषतः स्वरे भवतीति **सौवरः** । **अयमाकाश** इति । तथा-

काशोऽध्यात्मं हृद्याकाशः। पृथिव्याद्याकाशान्ता भूतगणाश्च कार्यकरण-संघातात्मना उपकुर्वन्तो मधु भवन्ति प्रतिशरीरमित्युक्तम् ॥ २–१० ॥

एतैर्धर्मरूपेण उपकारित्वम्

अयं धर्मः सर्वेषां भूतानां मधु अस्य धर्मस्य सर्वाणि भूतानि मधु यश्चायमस्मिन् धर्मे तेजोमयोऽमृतमयः पुरुषो यश्चाय-मध्यात्मं धार्मस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदꣳ सर्वम् ॥ ११ ॥

कथमेते शरीरिभिः संवध्यमाना मधुत्वेन उपकुर्वन्ति? इत्यत्र इदमारभ्यते—अयमिति। अप्रत्यक्षोऽप्ययं धर्मः कार्यतः प्रत्यक्षवत् व्यपदिश्यते "श्रुतिस्मृतिलक्षणोऽयं धर्मः" इति। तस्य क्षत्रादीनामपि नियन्तृत्वेन जगद्वैचित्र्यकृत्त्वात्। सोऽयं धर्मः पृथिव्यादिपरिणामहेतुतया प्राणिभिरनुष्ठीयमानः सन् प्रत्यक्षव्यपदेशमर्हति। तथाध्यात्मम्। संघातकर्तरि धर्मे भवो धार्मः ॥११॥

सत्यधर्मयोर्भेदेन व्यपदेशः

इदꣳ सत्यꣳ सर्वेषां भूतानां मधु अस्य सत्यस्य सर्वाणि भूतानि मधु यश्चायमस्मिन् सत्ये तेजोमयोऽमृतमयः पुरुषो यश्चा-यमध्यात्मꣳ सात्यस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदꣳ सर्वम् ॥ १२ ॥

शास्त्राचारलक्षणसत्यधर्मयोः दृष्टादृष्टभिदा। कार्यारम्भकत्वादभेदेन निर्देशः कृतः। इह तु भेदेन व्यपदेशमर्हतीति प्राह—इदमिति। योऽयमदृष्टरूपेण कार्यमारभते स धर्मः। यत् दृष्टरूपेणानुष्ठीयमानं सत् कार्यमारभते तत् सत्यम्। सामान्यविशेषरूपेण तत् द्विविधम्। पृथिव्यादिसमवेतं सामान्यम्। कार्यकरण-

संघातसमवेतं विशेषवत्। तत्र पृथिवीसमवेतवर्तमानक्रियान्वितं समष्टिसत्यम्। तथाध्यात्मं कार्यकरणसंघातसमवेतम्। तत्र भवः सात्यः।

सत्येन वायुरावाति सत्ये सर्वं प्रतिष्ठितम्।

इति श्रुतेः॥ १२॥

मानुषस्य मधुत्वम्

इदं मानुषꣳ सर्वेषां भूतानां मधु अस्य मानुषस्य सर्वाणि भूतानि मधु यश्चायमस्मिन् मानुषे तेजोमयोऽमृतमयः पुरुषः यश्चायमध्यात्मं मानुषः तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदꣳ सर्वम्॥ १३॥

इदं मानुषं इति। यः कार्यकरणसंघातविशेषो येन जातिविशेषेण समवैति स जातिविशेषो मानुषाख्यः। तत्र मानुषादिजातिविशिष्टा हि सर्वे प्राणिनः परस्परोपकार्योपकारकभावेन वर्तमाना दृश्यन्ते। यत एवमतो मानुषजातिरपि सर्वेषां भूतानां मधु। सेयं मानुषजातिरपि बाह्याध्यात्मिकव्यपदेशभाक् भवति॥ १३॥

मानुषजातिविशिष्टस्यात्मत्वम्

अयमात्मा सर्वेषां भूतानां मधु अस्यात्मनः सर्वाणि भूतानि मधु यश्चायमस्मिन्नात्मनि तेजोमयोऽमृतमयः पुरुषो यश्चायमात्मा तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मा इदममृतमिदं ब्रह्म इदꣳ सर्वम्॥ १४॥

यस्तु कार्यकरणसंघातमानुषजातिविशिष्टः सोऽयमात्मेत्याह—अयमात्मा इति। पृथिवीपर्याय एवात्मनः शारीरशब्देन निर्दिष्टत्वात् पार्थिवांशोऽयमात्मेति

चेन्न ; अत्रत्यात्मनः पार्थिवाध्यात्मादिविकृतिग्रासत्वेन सर्वात्मकत्वात् । अत्र तेजोमयोऽमृतमयः पुरुषः सर्वात्मको निर्दिश्यते ॥ १४ ॥

अन्त्यपर्यायप्रविष्टस्यात्मनः स्वरूपकथनम्

स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूताना॰ राजा तद्यथा रथनाभौ च रथनेमौ च अराः सर्वे समर्पिता एवमेवास्मिन् आत्मनि सर्वाणि भूतानि सर्वे देवाः सर्वे लोकाः सर्वे प्राणाः सर्व एत आत्मानः समर्पिताः ॥ १९ ॥

अत्राध्यात्मं विज्ञानमय आत्मेत्युच्यते । अन्त्यपर्यायप्रविष्ट आत्मा कीदृशः ? इत्यत आह—**स वा** इति । यः परिशिष्टः **स वा अयमात्मा**नन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनः **सर्वेषां भूताना**मात्मा सर्वोपास्यत्वात् । सर्वाधिपतिः **सर्वेषां भूतानां राजा**धिपतिः । अधिपतिराजशब्दाभ्यां कर्तुमकर्तुमन्यथाकर्तुं निरङ्कुशस्वातन्त्र्यमभिधीयते सर्वेश्वरत्वात् । एवं विद्वान् सर्वात्मा सन् विमुक्तो भवति । तथा चोक्तं "यत् ब्रह्मविद्यया सर्वं भविष्यन्तो मनुष्या मन्यन्ते किमु तत् ब्रह्मावेत् यस्मात् तत्सर्वमभवत्" इति । तदत्र व्याख्यातम । एवमाचार्योक्तितः स्वबुद्धितर्कतश्च यन्मधुब्राह्मणेन दर्शितं तद्विज्ञाय तन्मात्रतयावशिष्यते । एवं वेदनात् पुरापि ब्रह्मैवायमविद्यया ब्रह्मवदासीत् । विद्यया तदावृतिनिवृत्तौ ब्रह्मैव सन् ब्रह्माभवत् । शास्त्रार्थोऽयमेवं परिसमाप्तः । एवं सर्वात्मभावमापन्ने ब्रह्मविदि सर्वं जगत् समर्पितमित्यत्र दृष्टान्तमाह—**तद्यथे**ति । **तद्यथा रथनाभौ च रथनेमौ च अराः सर्वे समर्पिता** इति । स्पष्टोऽर्थः । **एवमेवास्मिन्नात्मनि** ब्रह्मविदि **सर्वाणि** ब्रह्मादिस्तम्बान्तभूतानि अग्न्यादयो **देवाः सर्वे** भूरादयो **लोकाः प्राणा** वागादयः **सर्व एत आत्मानो** जलसूर्यकादिवत् **समर्पिताः** तेषां स्वविकल्पितत्वात् ॥ १९ ॥

ब्रह्मविद्यास्तुतये मन्त्रप्रकाशनम्

इदं वै तन्मधु दध्यङ् आथर्वणोऽश्विभ्यामुवाच तदेतत् ऋषिः पश्यन्नवोचत्। तद्वां नरा सनये दꣳस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिं दध्यङ् ह यन्मधु आथर्वणो वां अश्वस्य शीर्ष्णा प्र यत् ईं उवाचेति ॥ १६ ॥ इदं वै तन्मधु दध्यङ् आथर्वणोऽश्विभ्यामुवाच तदेतत् ऋषिः पश्यन्नवोचत् आथर्वणायाश्विना दधीचेऽश्व्यꣳ शिरः प्रत्यैरयतं स वां मधु प्रवोचत् ऋतायन् त्वाष्ट्रं यत् दस्रावपि कक्ष्यं वामिति ॥ १७ ॥

येयममृतत्वसाधनभूता सेयं ब्रह्मविद्या परिसमाप्ता। तद्विद्यास्तुतये हीयमाख्यायिका। तत्प्रकाशनार्थावितौ मन्त्रौ भवत इत्याह— इदमिति। का पुनः सेयमाख्यायिका? इत्यत्र इदमित्यनन्तरनिर्दिष्टं बुद्धिसन्निहितं व्यपदिशति। प्रकारान्तरनिर्दिष्टार्थं वैशब्देन स्मारयन् इह व्यपदिशति। यत् प्रवर्ग्यप्रकरणे सूचितं तन्मधु। "इयं पृथिवी" इत्यादिना निर्दिष्टं प्रकारान्तरेण सूचयति। कथम्? दध्यङ् ह वा आथर्वणोऽश्विभ्यां मधुनाम ब्राह्मणमुवाच। तदेनयोः प्रियं धाम तदेनयोरेतेन उपगच्छति। इन्द्रेणैवमुक्तोऽस्मीति स होवाच। एतच्चेदन्यस्मा अनुब्रूयास्ते शिरश्छिन्द्यामिति। तस्माद्वै बिभेमि। स यन्मे शिरो न छिन्द्यात् तद्वामुपनेष्य इति। तौ होचतुः तस्मात् त्रस्याव इति। कथं मे त्रस्येथे? इति। यदा नावुपनेष्यसे अथ ते शिरश्छित्वान्यत्राहृत्योपनिधास्यावः। अथाश्वस्य शिर आहृत्य तत्ते प्रतिधास्यावः तेन नावनुवक्ष्यसि। स यदा नावनुवक्ष्यसि अथ ते तदिन्द्रः शिरः छेत्स्यति। अथ ते स्वशिर आहृत्य प्रतिधास्याव इति। तथेति तौ होपनिन्ये। तौ यदा उपनिन्येऽथास्य शिरश्छित्वान्यत्र उपनिदधतुः। अथाश्वस्य शिर आहृत्य तद्धास्य प्रतिदधतुः। तेन स हाभ्यामनूवाच। स यदाभ्यामनूवाच अथास्य तदिन्द्रः शिरश्चिच्छेद। अथास्य स्वशिर आहृत्य तद्धास्य प्रतिदधतुरिति। यावत्तु प्रवर्ग्याङ्गभूतं

मधु तावदेव तत्राभिहितम्। न तु कक्ष्यमात्मज्ञानाख्यम्। तत्रेयमाख्यायिका-भिहिता। सेह स्तुत्यर्था प्रदर्श्यते। इदं वै तन्मधु दध्यङ् आथर्वणोऽनेन प्रपञ्चेनाश्विभ्यामुवाच। तदेतदृषिः मन्त्रः पश्यन्नुपलभमानोऽवोचत् उक्तवान्। कथम्? तत् दंसः इति व्यवहितेन संबन्धः। दंस इति कर्मनाम। तत् किंविशिष्टम्? उग्रं क्रूरम्। वां युवयोः हे नरा नराकारावश्विनौ! तत् कर्म सनये लाभाय। लोके तावत् लाभलुब्धो हि क्रूरं कर्म करोति। तथैव तावुपलक्ष्येते। तदाविः प्रकाशं कृणोमि करोमि यत् रहसि भवद्भ्यां कृतम्। तत् किमिव? इत्यत्र तन्यतुः पर्जन्यः न इव। नकारस्तु उपरिष्टा-दुपचारादुपमार्थः। यथा "अश्वं न" इत्यश्वमिवेति यद्वत्। तन्यतुरिव वृष्टिं यथा पर्जन्यो वृष्टिं प्रकाशयति दिशः शब्दैः स्तनयित्वा सर्वजनाह्लादनं करोति तद्वदहं युवयोः क्रूरं कर्माविष्कृणोमीति संबन्धः। दध्यङ् आथर्वणः। हकारोऽनर्थकः प्रसिद्धार्थो वा। मधु कक्ष्यमात्मज्ञानलक्षणमाथर्वणो वां युवा-भ्यामश्वस्य शीर्ष्णा शिरसा प्र यत् ईं उवाच यत् प्रोवाच मधु। ईं इत्यनर्थको निपातः॥ १६॥ तथान्यो मन्त्रः तामेवाख्यायिकामनुसरति—इदमिति। इदं वै तन्मधु इत्यादि पूर्ववत्। दध्यङ् नामाथर्वणोऽन्यो विद्यते। तस्मै दधीचे आथर्वणाय हे अश्विनौ! इति मन्त्रदृशो वचनम्। अश्व्यं अश्वस्य स्वभूतं शिरो ब्राह्मणस्य शिरसि छिन्ने अश्वस्य शिरश्छित्वा क्रूरकृत्यमी-दृशं कृत्वाश्वयं शिरो ब्राह्मणं प्रति ऐरयतं युवां गमितवन्तौ। स चाथर्वणो वां युवाभ्यां तन्मधु प्रावोचत्। जीवितसन्देहे कथं मुनिः प्रवृत्तः? इत्यत्रोच्यते। ऋतायन् स्वोक्तप्रतिज्ञातमर्थं सत्यं परिपालयितुमिच्छन् जीवि-तादपि सत्यपरिपालनमेव वरमित्येतत्। किं मधु प्रावोचत्? इत्यत्र—त्वाष्ट्रं सविता तत्संबन्धि यज्ञस्य शिरः छिन्नं त्वष्ट्राभवत्। तत्प्रतिसन्धानार्थं हि प्रवर्ग्यं कर्म। तदङ्गभूतं यद्विज्ञानं तत् त्वाष्ट्रं मधु हे दस्रौ! परबलशत्रुपटल-हिंसितारावपि न हि केवलं त्वाष्ट्रमेव मधु कर्मसंबन्धि युवाभ्यामवोचत्, अपि तु कक्ष्यमतिरहस्यं परमात्मसंबन्धि यदध्यायद्वयप्रकाशकमधुब्राह्मण-प्रकाशितमधुज्ञानं तच्च वां युवाभ्यां प्रावोचदित्यनुवर्तते॥ १७॥

अध्यायद्वयार्थसंग्रहः

इदं वै तन्मधु दध्यङ् आथर्वणोऽश्विभ्यामुवाच तदेतत् ऋषिः पश्यन्नवोचत् ।

पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः ।
पुरः स पक्षी भूत्वा पुरः पुरुष आविशत् ॥ इति ॥

स वा अयं पुरुषः सर्वासु पूर्षु पुरिशयो नैनेन किंचनानावृतं नैनेन किंचनासंवृतम् ॥ १८ ॥ इदं वै तन्मधु दध्यङ् आथर्वणोऽश्विभ्यामुवाच तदेतत् ऋषिः पश्यन्नवोचत् रूपꣳ रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश इत्ययं वै हरयोऽयं वै दश च सहस्राणि बहूनि चानन्तानि च तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम् ॥ १९ ॥

पुनरध्यायद्वयार्थं वक्ष्यमाणऋग्भ्यां प्रकाशयति—इदमिति । इदं वै मधु इत्यादि पूर्ववत् । यत्कक्ष्यं मधुज्ञानं युवाभ्यामुक्तं किं तत् ? पुरः पुरा सर्गादौ स परमेश्वरोऽव्याकृतनामरूपव्याकरणाय मनश्चक्रे । द्विपदः तदुपलक्षित-मनुष्यशरीराणि पक्षिशरीराणि च पुरः चतुष्पदः तदुपलक्षितपशुशरीराणि पुरः पुरस्तात् सोऽयमीश्वरः पक्षी लिङ्गशरीरं भूत्वा पुरः शरीराणि पुरुष आविशदिति । अस्यार्थं श्रुतिराचष्टे—स वा इति । स वायं पुरुषः सर्वासु पूर्षु सर्वशरीरेषु पुरि शेत इति पुरिशयः सन् पुरुष उच्यते । एतेनानेन किंचन किञ्चिदप्यनावृतं अनाच्छादितम् । तथा नैनेन किञ्चनासंवृतमन्तरनु-प्रवेशितम् । स एवं सर्वभूतानामन्तर्बहिः व्याप्य व्यवस्थित इति मन्त्रार्थपर्या-

लोचनया सर्वभूतान्तरात्मा एक एवेत्ययमर्थोऽवसीयते ॥ १८ ॥ स्वयमेव स्वाविद्यातत्कार्यानुयोगतः सर्वरूपी भूत्वा पुनः स्वविद्यया स्वाविद्यां ग्रसित्वा स्वयमेव निष्प्रतियोगिकमवशिष्यत इत्याद्यपि मन्त्र आह—**इदमिति**। **इदं वा** इत्यादि पूर्ववत्। **रूपं रूपं प्रतिरूपो** रूपान्तरं **बभूव**। यादृशौ मातापितरौ तदनुरूप एव पुत्रो जायते। न हि जातौ जात्यन्तरम्। सोऽयमीश्वर एवं नामरूपे व्याकुर्वाणो रूपं रूपं प्रतिरूपोऽनुरूपो बभूवेत्यर्थः। कथम्? इत्यत्र **तदस्यात्मनो रूपं प्रतिचक्षाणाय** प्रतिख्यापनाय **इन्द्रो** विश्वाधिकः परमेश्वरो **मायाभिः** प्रज्ञाभिः **पुरुरूपो** बहुरूप **ईयते** न तु परमार्थतः। वस्तुतः स्वस्य एकरूपत्वेन चिन्मात्रत्वात्। मायोपाधियोगतोऽस्य पुरुरूपता। तत् कथं? इत्यत्र अस्य स्वविषयप्रकाशनाय **हरयो** रथवाजिन इव **युक्ता हि**। विषयजातहरणात् इन्द्रियाणि हरय उच्यन्ते। **शता** शतानि **दश** च प्राणिनां बहुत्वात् शतानि दश च भवन्ति। इन्द्रियविषयबाहुल्यात् नानाविषयप्रकाशनाय तद्विषयैरीयत इव ईयते न स्वेन रूपेणेत्यर्थः। हर्यपेक्षयायमन्य इति चेत्, उच्यते—**अयं वै हरयः अयं वै दश च सहस्राणि बहूनि चानन्तानि च** प्राणिनामानन्त्यात्। वस्तुतस्तु **तदेतत् ब्रह्म** इत्यत्र तच्छब्देन समष्टिप्रपञ्चारोपापवादाधिकरणं, एतच्छब्देन व्यष्टिप्रपञ्चारोपापवादाधिकरणं; तयोर्वाच्यार्थपरित्यागेनावशिष्टलक्ष्ययोरैक्यचैतन्यमयमात्मा ब्रह्म। स्वाज्ञदृष्ट्या द्रष्टा श्रोता मन्ता विज्ञाता जीवः। स्वज्ञदृष्ट्या तु सर्वात्मना सर्वं स्वाभेदेनानुभवतीति सर्वानुभूः। तत् किं पूर्वम्? नेत्याह—**अपूर्वमिति**। नास्य पूर्वं कारणं विद्यते। वस्तुतः स्वयं वा कस्यचित् पूर्वं न भवतीति वा तदपूर्वम्। तथात्वे इदमपरं स्यादित्यत आह—**अनपरमिति**। नास्यापरं पश्चाद्भावि कार्यं विद्यत इत्यनपरं कार्यकरणकलनाविरलमित्यर्थः। तस्यान्तरं स्यादित्यत आह—**अनन्तरमिति**। स्वान्तराले जात्यन्तरं न विद्यत इत्यर्थः। तद्बाह्यं वा किंचित् स्यादित्यत आह—**अबाह्यमिति**। स्वान्तर्बाह्यविभागहेतुशरीरवैरल्यात्। **तदेतत् ब्रह्म** स्वविकल्पितपूर्वापरान्तर्बाह्योपलक्षितस्वाविद्यापदतत्कार्यजातमस्ति नास्तीति विभ्रमापह्नवसिद्धनिष्प्रतियोगिकस्वमात्रमव-

शिष्यत इत्यनुशासनम् । एष एव हि सर्ववेदान्तानामुपसंहारार्थः । "सर्वविशेषं नेति नेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्म" इति श्रुतेः ॥ १९ ॥

इति पञ्चमं ब्राह्मणम्

षष्ठं वंशब्राह्मणम्

मधुविद्यास्तुतये वंशब्राह्मणम्

अथ वꣳशः पौतिमाष्यो गौपवनात् गौपवनः पौतिमाष्यात् पौतिमाष्यो गौपवनात् गौपवनः कौशिकात् कौशिकः कौण्डिन्यात् कौण्डिन्यः शाण्डिल्यात् शाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥ आग्निवेश्यादाग्निवेश्यः शाण्डिल्याच्चानभिम्लाताच्चा-नभिम्लात आनभिम्लातादानभिम्लात आनभिम्लातादानभिम्लातो गौतमात् गौतमः सैतवप्राचीनयोग्याभ्याꣳ सैतवप्राचीनयोग्यौ पाराशर्यात् पाराशर्यो भारद्वाजात् भारद्वाजो भारद्वाजाच्च गौतमाच्च गौतमो भारद्वाजात् भारद्वाजः पाराशर्यात् पाराशर्यो बैजवापायनात् बैजवापायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥ घृतकौशिकात् घृतकौशिकः पाराशर्यायणात् पाराशर्यायणः पाराशर्यात् पाराशर्यो जातूकर्ण्यात जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेः त्रैवणिः औपजन्धनेरौपजन्धनिः आसुरेरासुरिर्भारद्वाजात् भारद्वाज

आत्रेयादात्रेयो माण्टेर्माण्टिर्गौतमात् गौतमो गौतमाद्गौतमो वात्स्यात् वात्स्यः शाण्डिल्यात् शाण्डिल्यः कैशोर्यात् काप्यात् कैशोर्यः काप्यः कुमारहारितात् कुमारहारितो गालवात् गालवो विदर्भीकौण्डिन्याद्विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवात् वत्सनपात् बाभ्रवः पथः सौभरात् पन्थाः सौभरोऽयास्यादाङ्गिरसात् अयास्य आङ्गिरस आभूतेस्त्वाष्ट्रात् आभूतिस्त्वाष्ट्रो विश्वरूपात्त्वाष्ट्रात् विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणात् दध्यङ्ङाथर्वणो-ऽथर्वणो दैवादथर्वा दैवो मृत्योः प्राध्वꣳसनान्मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात् प्रध्वꣳसन एकर्षेरेकर्षिर्विप्रचित्तेर्विप्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात् सनातनः सनगात् सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ३ ॥

अथेदानीं मधुविद्यास्तुतये वंशब्राह्मणमारभ्यते—अथेति। अयं वंश-ब्राह्मणः स्वाध्यायार्थो जपार्थश्च। यथा वेणुवंशः पर्वणः पर्वणो भिद्यते तद्वत् अग्रात् प्रभृति आमूलप्राप्तेरयं ब्रह्मविद्यासंपन्नाचार्यपारंपर्यक्रमो वंश उच्यते। तत्र प्रथमान्तः शिष्यः पञ्चम्यन्त आचार्यः। परमेष्ठी विराट्। ब्रह्मणो हिरण्यगर्भात् परमाचार्यपरंपरा नास्ति। यत् पुनर्ब्रह्म तदेव नित्यं स्वयंभु। तस्मै ब्रह्मणे नमः ॥ १–३ ॥

इति षष्ठं ब्राह्मणम्

इति द्वितीयोऽध्यायः

तृतीयोऽध्यायः

प्रथमं अश्वलब्राह्मणम्

जनकेनानूचानतमब्राह्मणजिज्ञासापूर्वकं यजनादि

जनको ह वैदेहो बहुदक्षिणेन यज्ञेन ईजे तत्र ह कुरुपञ्चालानां ब्राह्मणा अभिसमेता बभूवुस्तस्य ह जनकस्य वैदेहस्य विजिज्ञासा बभूव कःस्विदेषां ब्राह्मणानामनूचानतम इति ? स ह गवाᳬ सहस्रमवरुरोध दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥ १ ॥

स्वात्मतत्त्वं करतलबिल्वफलवत् दर्शयितुं "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति सोपायं "तदेतत् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म" इति वस्तुयाथात्म्यं प्रकटितम् । तदागममात्रं पुनस्तर्कतो निर्दिधारयिषया याज्ञवल्कीयं काण्डमारभ्यते । आख्यायिका वक्ष्यमाणविद्यास्तुत्यर्था--जनक इति । पुरा जनको नाम ह किल विदेहानामधिपतिः । तत्र भवो वैदेहः सम्राट् राजा बभूव । स च बहुर्दक्षिणा यत्र सोऽयं बहुदक्षिणो यज्ञोऽश्वमेधः । तेन बहुदक्षिणेन यज्ञेन ईजे अयजत् । तस्मिन् यज्ञे राज्ञा निमन्त्रिता दर्शनकामा वा कुरुपञ्चालदेशानामलङ्कारभूता ब्राह्मणा अभिसमेता अभिसङ्गता बभूवुः । तद्ब्राह्मणसमाजदर्शनतः तस्य ह किल जनकस्य वैदेहस्य राज्ञः अत्र ब्राह्मणसमाजे को वा ब्रह्मिष्ठाग्रगण्यः ? इति विजिज्ञासा विज्ञातुमिच्छा बभूव । तत् कथम् ? कःस्वित् को नु खलु एषां ब्राह्मणानामनूचानतमः ? येऽत्रागतास्ते सर्वे तथा भान्ति । तद्विशेषबुभुत्सया प्रथमवयसां गवां सहस्रमवरुरोध गोष्ठेऽवरोधं कारयामास । ताः पुनः

किंविशिष्टाः ? इत्यत्र—सुवर्णपलचतुर्थांशः पादः। एवं दश दश पादा एकैकस्याः शृङ्गयोराबद्धा बभूवुः ॥ १ ॥

जनकवचनानन्तरं याज्ञवल्क्यस्य कर्म अश्वलप्रश्नश्च

तान् होवाच ब्राह्मणा भगवन्तो यो वो ब्रह्मिष्ठः स एता गा उदजतामिति ते ह ब्राह्मणा न दधृषुः अथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणमुवाच एताः सोम्य! उदज सामश्रवा३ इति ता ह उदाचकार ते ह ब्राह्मणाश्चुक्रुधुः कथं नो ब्रह्मिष्ठो ब्रुवीतेति ? अथ ह जनकस्य वैदेहस्य होताश्वलो बभूव स हैनं पप्रच्छ त्वं नु खलु नो याज्ञवल्क्य ब्रह्मिष्ठोऽसी३ इति स होवाच नमो वयं ब्रह्मिष्ठाय कुर्मो गोकामा एव वयꣳ स्म इति तꣳ ह तत एव प्रष्टुं दध्रे होताश्वलः ॥ २ ॥

ततः किम्? इत्यत आह—तानिति। राजा गा एवमवरुध्य तान् ब्राह्मणान् होवाच। किमिति? हे भगवन्तो ब्राह्मणाः! युष्माकं ब्रह्मिष्ठः ब्रह्मयाथात्म्यवित् स एता गा उदजतां स्वगृहानुत्कालयतु। ते ह ब्राह्मणाः स्वात्मनो ब्रह्मिष्ठत्वं न दधृषुः। तेष्वेवमप्रगल्भभूतेषु ब्राह्मणेषु अथ ह याज्ञवल्क्यः स्वमेव ब्रह्मचारिणं स्वान्तेवासिनमुवाच—हे सोम्य! एता गा अस्मद्गृहान् प्रति उदज उद्गमय। सामविधिं शृणोतीति सामश्रवा वा याज्ञवल्क्यशिष्यः अतश्चतुर्वेदी मुनिरित्यर्थः। सोऽयमाचार्यगृहान् प्रति ता गा ह उदाचकार उत्कालितवानित्यर्थः। यो ब्रह्मिष्ठपणस्वीकारी तेनात्मनो ब्रह्मिष्ठता प्रतिज्ञातेति ते ह ब्राह्मणाः चुक्रुधुः। तेषां क्रोधाभिप्रायस्तु—कथं दिगन्तविश्रान्तयशसामस्माकं पुरतो ब्रह्मिष्ठोऽस्मीति ब्रूवीतेति ? एवं क्रुद्धेषु ब्राह्मणेषु अथ ह जनकस्य वैदेहस्य होता ऋत्विक् अश्वलो नाम

बभूव। सोऽयं ब्रह्मिष्ठाभिमानी राजाश्रयतोऽपि धृष्टः सन् याज्ञवल्क्यमेनं पप्रच्छ। किमिति? त्वं नु खलु नो याज्ञवल्क्य! ब्रह्मिष्ठोऽसि इति। प्लुतिस्तु भर्त्सनार्था। तदाकर्ण्य स होवाच याज्ञवल्क्यः। ब्रह्मिष्ठाय इदानीं वयं नमस्कुर्मः। वयं तु गोकामा एव स्मः इति। ब्रह्मिष्ठपणस्वीकारात् ब्रह्मिष्ठप्रतिज्ञं सन्तं याज्ञवल्क्यं ततः प्रष्टुं मनो दध्रे होताश्वलः॥ २॥

यजमानस्य कर्मप्रयुक्तमृत्योरतिमुक्तिः

याज्ञवल्क्य! इति होवाच यदिदꣳ सर्वं मृत्युनाप्तꣳ सर्वं मृत्युनाभिपन्नं केन यजमानो मृत्योराप्तिमतिमुच्यत इति? होत्रा ऋत्विजा अग्निना वाचा वाग्वै यज्ञस्य होता तद्येयं वाक् सोऽयमग्निः स होता स मुक्तिः सातिमुक्तिः॥ ३॥

किं पृष्टवान्? इत्यत आह—याज्ञवल्क्येति। याज्ञवल्क्य! इति होवाच। किमिति?, मधुकाण्डे उद्गीथप्रकरणे च पाङ्क्तयज्ञकर्मणा मृत्योरत्ययो यजमानस्य दर्शितः। तदिदमयं जानाति नवेति परीक्षार्थं यदिदं सर्वं कर्मसाधनजातं ऋत्विगग्न्यादिसाध्यकर्मलक्षणमृत्युनाप्तं व्याप्तं मृत्युनाभिपन्नं वशीकृतं च। केन साधनेन यजमानो मृत्योराप्तिमतीत्य मुच्यते मृत्योरवश्यो भवतीति? एवं पृष्टो याज्ञवल्क्य आह। किमिति? होत्रा ऋत्विजा अग्निना वाचेति। कः पुनरसौ होता? इत्यत्र या वाक् यज्ञस्य यजमानस्य सैव होता। "यज्ञो वै यजमानः" इति श्रुतेः। अधियज्ञे तु तत्तत्र येयं वाक् यजमानस्य सोऽयमग्निरिति प्रसिद्धः। तदेतदधिदैवतं त्र्यन्नप्रकरणे व्याख्यातम्। सोऽयमग्निर्होतेति। तथा च श्रुतिः "अग्निर्वै होता" इति। यदेतत् यज्ञस्याधियज्ञं होताध्यात्मं च वाक् इत्येतदुभयं परिच्छिन्नं ज्ञानविकलकेवलकर्ममृत्युनाप्तम्। तत्तु अधिदैवताग्निना दृश्यमानं सत् यजमानस्य मृत्योरतिमुक्तये भवति। तत् कथम्? स होताग्निरूपेण दृष्टः मुक्तिः।

मुक्तिसाधनत्वात् परिच्छिन्नसाधनद्वयस्य मृत्युत्वम्। तत् पुनः अधिदैवताग्नि-दृष्टिर्या सातिमुक्तिः ॥ ३ ॥

दर्शपूर्णमासादिकालादप्यतिमुक्तिः

याज्ञवल्क्य ! इति होवाच यदिदꣳ सर्वमहोरात्राभ्यामाप्तꣳ सर्वमहोरात्राभ्यामभिपन्नं केन यजमानोऽहोरात्रयोराप्तिमतिमुच्यत इति ? अध्वर्युणा ऋत्विजा चक्षुषादित्येन चक्षुर्वै यज्ञस्याध्वर्युस्तद्य-दिदं चक्षुः सोऽसावादित्यः सोऽध्वर्युः स मुक्तिः सातिमुक्तिः ॥४॥

केवलकर्मप्रयुक्तमृत्योरतिमुक्तिः व्याख्याता। पूर्वोक्तकर्ममृत्योराश्रयदर्शपूर्णमा-सादिकर्मविपरिणामहेतुकालादप्यतिमुक्तिः वक्तव्येतीदमारभ्यते—**याज्ञवल्क्येति**। **याज्ञवल्क्य! इति होवाच। यदिदं सर्वमहोरात्राभ्यामाप्तम्**। स च कालो द्विरूपः। तत्र होत्रादिलक्षणस्त्वेकः। अपरः तिथ्यादिलक्षणः। तत्राद्येनातिमुक्ति-माह—**सर्वमिति**। सर्वमहोरात्राभ्यां हि जायते नश्यति च। तथा यज्ञसाधनं यजमानरूपयज्ञस्य **चक्षुरध्वर्युः**। शिष्टं पूर्ववदुन्नेयम्। एवं साधनभूताध्यात्माधि-भूतपरिच्छेददृष्टिं विहायाधिदैवतादित्यात्मना यत् दृष्टं स **मुक्तिः**। या दृष्टि-रध्वर्युमादित्यात्मना पश्यति सैव **मुक्तिः अतिमुक्तिश्च**। न ह्यादित्यभावमा-पन्नस्याहोरात्रकलनास्ति ॥ ४ ॥

तिथ्यादिकालादप्यतिमुक्तिः

याज्ञवल्क्य ! इति होवाच यदिदꣳ सर्वं पूर्वपक्षापरपक्षा-भ्यामाप्तꣳ सर्वं पूर्वपक्षापरपक्षाभ्यामभिपन्नं केन यजमानः पूर्वपक्षा-परपक्षयोराप्तिमतिमुच्यत इति ? उद्गात्रा ऋत्विजा वायुना प्राणेन प्राणो वै यज्ञस्य उद्गाता तद्योऽयं प्राणः स वायुः स उद्गाता स मुक्तिः सातिमुक्तिः ॥ ५ ॥

अहोरात्रादिलक्षणादतिमृत्युमङ्गीकृत्य तिथ्यादिलक्षणादप्यतिमुक्त्यवगमाय इदमारभ्यते—**याज्ञवल्क्य !** इति । **यदिदं सर्वं** पूर्वोक्ताहोरात्रयोरादित्यः कर्ता न प्रतिपदादितिथीनाम् । तासां तु चन्द्रमाः कर्ता वृद्धिक्षयसाम्यात् । यथादित्याप्त्याहोरात्रात्ययः तथा चन्द्राप्त्या पूर्वपक्षापरपक्षात्ययः । यजमानप्राणवायुरेव उद्गातेति उद्गीथब्राह्मणेऽभिहितं "वाचा च ह्येव स प्राणेन चोदगायदिति" इति । तथा च "अथैतस्य प्राणस्यापः शरीरं ज्योतीरूपमसौ चन्द्रः" इति प्राणवायुचन्द्रमसामेकत्वात् । वायुनिमित्तौ हि वृद्धिक्षयौ चन्द्रमसः । यतः तिथिरूपकालकारयिता वायुः अतो वायुभावमापन्नः तिथ्यादिकालातीतो भवति । वाय्वात्मदृष्टिः मुक्तिः अतिमुक्तिश्चेति ॥ ५ ॥

कालादिमुक्तेरवष्टम्भकथनम्

याज्ञवल्क्य ! इति होवाच यदिदमन्तरिक्षमनारम्बणमिव केनाक्रमेण यजमानः स्वर्गं लोकमाक्रमत इति ? ब्रह्मणा ऋत्विजा मनसा चन्द्रेण मनो वै यज्ञस्य ब्रह्मा तद्यदिदं मनः सोऽसौ चन्द्रः स ब्रह्मा स मुक्तिः सातिमुक्तिरित्यतिमोक्षा अथ संपदः ॥ ६ ॥

कालातिमुक्तिः व्याख्याता । स केनावष्टम्भेन परिच्छेदमृत्युमतीत्य यथोक्तफलमाप्नोति ? इति पृच्छति—**याज्ञवल्क्य !** इति । **याज्ञवल्क्य ! इति होवाच** । **यदिदं** प्रसिद्धम**न्तरिक्षमनारम्बण**मनालम्बन**मिव** । इवशब्दादालम्बनमस्त्येव । तत्तु न ज्ञायते । तदर्थं केनेति पृच्छ्यते । अन्यथा फलाप्तिवैरल्यात् । यदवष्टभ्य यजमानः कर्मफलप्रतिपत्त्यातिमुच्यते । **केनाक्रमेण यजमानः स्वर्गं लोकमा**प्नोति अतिमुच्यते? इत्यत्र **ब्रह्मणा ऋत्विजा मनसा चन्द्रेणे**ति पूर्ववत् । तत्र **यज्ञस्य** यजमानस्य **यदिदं मनः** तदध्यात्मम् । प्रसिद्धं हि तदधिदैवतं चन्द्र इति । **स** एव चन्द्रमा **ब्रह्मा** ऋत्विक् । तेन ब्रह्मणः परिच्छिन्नरूपमधिभूतमध्यात्मं च । तदुभयमपरिच्छिन्नचन्द्ररूपेण पश्यति ।

तेन चन्द्रमसालम्बनेन कर्मफलभूतस्वर्गं लोकमाप्नोत्यतिमुच्यते । इत्येवं प्रकारा मृत्योरतिमोक्षाः ॥ ६ ॥

फलप्रापकसंपत्कथनम्

याज्ञवल्क्य ! इति होवाच कतिभिरयमद्य ऋग्भिर्होतास्मिन् यज्ञे करिष्यतीति ? तिसृभिरिति कतमास्तास्तिस्र इति ? पुरोनुवाक्या च याज्या च शस्यैव तृतीया किं ताभिर्जयतीति ? यत्किंचेदं प्राणभृदिति ॥ ७ ॥

अथाधुना संपद उच्यन्ते । या फलप्रापकाः ताः संपदः । तत्प्रकार-कथनाय इदमारभ्यते—**याज्ञवल्क्य** ! इति । स्वाभिमुखीकरणाय **याज्ञवल्क्य** ! **इति होवाच** । **कतिभिः ऋग्भिः अयं** होताद्यास्मिन् **यज्ञे करिष्यति** शस्त्रं शंसति ? इतर आह । **तिसृभिरि**त्युक्तवन्तं इतर आह—**कतमाः ताः तिस्र इति** ? इतर आह—**पुरोनुवाक्या चे**ति । यागकालात् प्राक् याः प्रयुज्यन्ते ऋचः सा ऋग्जातिः **पुरोनुवाक्ये**त्युच्यते । या ऋचो यागार्थं प्रयुज्यन्ते सा ऋग्जातिः **याज्या** । या ऋचः शस्त्रार्थं प्रयुज्यन्ते सा ऋग्जातिः **शस्या** । सर्वास्तु याः काश्चन ऋचः स्तोत्रिया अन्या वा । एतास्वेव तिसृषु ऋग्जातिषु सर्वा अन्तर्भवन्ति । **किं ताभिः जयतीति** ? **यत्किञ्चेदं प्राणभृदिति** यत्किञ्चित् प्राणभृज्जातं सर्वं जयति सङ्ख्या-सामान्यात् तत्फलजातं संपादयतीत्यर्थः ॥ ७ ॥

अध्वर्युनिर्वर्त्यकार्यं तत्फलं च

याज्ञवल्क्य ! इति होवाच कत्ययमद्याध्वर्युरस्मिन् यज्ञे आहुतीर्होष्यतीति ? तिस्र इति कतमास्तास्तिस्र इति ? या हुता उज्ज्वलन्ति या हुता अतिनेदन्ते या हुता अधिशेरते किं ताभि-

र्जयतीति ? या हुता उज्ज्वलन्ति देवलोकमेव ताभिर्जयति दीप्यत इव हि देवलोको या हुता अतिनेदन्ते पितृलोकमेव ताभिर्जयत्यतीव हि पितृलोको या हुता अधिशेरते मनुष्यलोकमेव ताभिर्जयति अध इव हि मनुष्यलोकः ॥ ८ ॥

अध्वर्युनिर्वर्त्यकार्यं तत्फलं च पृच्छति—याज्ञवल्क्य इति। याज्ञवल्क्य ! इति होवाच । कत्ययमद्याध्वर्युः अस्मिन् यज्ञे आहुतीर्होष्यतीति ? पूर्ववत् तिस्र इति। कतमास्तास्तिस्र इति ? इतर आह—या हुता उज्ज्वलन्ति समिदाज्यादिभिः । या हुता अतिनेदन्ते मांसाद्याहुतयः शब्दं कुर्वन्ति। या हुता अधिशेरते पयस्सोमाद्या अधो भूप्रदेशं गत्वा शेरते। किं ताभिराहुतीभिर्जयतीति ? इतर आह—या हुताः समिदाज्यादिभिः उज्ज्वलन्ति यजमानस्ताभिरुज्ज्वलद्देवलोकमेव ताभिः जयतीति। दीप्यत इव हि देवलोकः । यजमाननिर्वर्तिताहुतयो यजमानस्य देवलोकं संपादयन्ति । या हुता अतिनेदन्ते पितृलोकमेव ताभिः जयतीति । शब्दवन्मांसाद्याहुतीनां हा हतोऽस्मि मुञ्च मुञ्च इति यमलोकगतपापिजनाक्रोशसामान्यात् । ता आहुतयो यजमानस्य पितृलोकमेव संपादयन्ति । या आहुतयोऽधिशेरते मनुष्यलोकमेव ताभिः जयतीति भूम्युपरि संबन्धसामान्यात्। मनुष्यलोकस्तु गन्धर्वादिलोकापेक्षयावर इव हि अवर एव लक्ष्यते। तन्निर्वर्तिताहुतयो मनुष्यलोकमेव संपादयन्तीत्यर्थः ॥ ८ ॥

ब्रह्मनिर्वर्त्यकर्म तत्फलं च

याज्ञवल्क्य ! इति होवाच कतिभिरयमद्य ब्रह्मा यज्ञं दक्षिणतो देवताभिर्गोपायति ? एकयेति कतमा सा एकेति ? मन एवेति अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति ॥ ९ ॥

ब्रह्मनिर्वर्तितकर्म तत्फलं च पृच्छति--**याज्ञवल्क्य**! इति। **याज्ञवल्क्य**! इति पूर्ववत्। **अद्यास्मिन्** यज्ञे ब्रह्मा **दक्षिणतः** स्वासने स्थित्वा **कतिभिः देवताभिः यज्ञं गोपायति**? अत्रत्यबहुवचनस्य प्रासङ्गिकत्वात् पूर्वखण्डिकाद्वयकृतप्रश्नप्रतिवचनेषु कतिभिः तिसृभिः इति प्रसङ्गानुरोधेन इहापि कतिभिः इति प्रश्नोपक्रमः। यद्वा प्रतिवादिबुद्धिव्यामोहार्थं बहुवचनम्। तत् ज्ञात्वा इतर आह—**एकयेति**। यया ब्रह्मा यज्ञं गोपायति सा एकेत्यर्थः। इतर आह-- **कतमा सा एकेति**? आह इतरः। **मन एवेति**। मनसा हि ब्रह्मा व्याप्रियते। "तस्य यज्ञस्य मनश्च वाक् च वर्तनी तयोरन्यतरां मनसा संस्करोति ब्रह्मा" इति श्रुतेः। मनो हि देवता। तया ब्रह्मा मौनेन यज्ञं गोपायति मनोवृत्तीनां बहुत्वात्। **तन्मनोऽनन्तम्**। **वै**शब्दः प्रसिद्धिद्योतकः। तथानन्त्याभिमानिनो **वै विश्वे देवाः** "सर्वे वेदा यत्रैकं भवन्ति" इति श्रुतेः। तेनानन्त्यसामान्या**दनन्तमेव स तेन लोकं जयतीत्यर्थः** ॥ ९ ॥

उद्गातृनिर्वर्त्यकर्म तत्फलं च

याज्ञवल्क्य! इति होवाच कत्ययमद्य उद्गातास्मिन् यज्ञे स्तोत्रियाः स्तोष्यतीति? तिस्र इति कतमास्तास्तिस्र इति? पुरोनुवाक्या च याज्या च शस्यैव तृतीया कतमास्ता या अध्यात्ममिति? प्राण एव पुरोनुवाक्यापानो याज्या व्यानः शस्या किं ताभिर्जयतीति? पृथिवीलोकमेव पुरोनुवाक्यया जयति अन्तरिक्षलोकं याज्यया द्युलोकꣳ शस्यया ततो ह होताश्वल उपरराम ॥ १० ॥

उद्गातृनिर्वर्त्यकर्म तत्फलं च पृच्छति—**याज्ञवल्क्य**! इति। **याज्ञवल्क्य**! इति पूर्ववत्। **अयमुद्गाता कति स्तोत्रिया अस्मिन् यज्ञे स्तोष्यति**? **इति**। **तिस्र इति**। **कतमास्तास्तिस्रः**? **इति**। पूर्ववत् **पुरोनुवाक्या च**

याज्या च शस्यैव तृतीयेति व्याख्यातमेतत् । यत्किञ्चेदं प्राणभृत् तत्-सर्वं जयतीति । तत् केन सामान्येन ? इत्यत्र **कतमास्तास्तिस्र ऋचो या अध्यात्मं** भवन्ति इवशब्दसामान्यात् । **प्राण एव पुरोनुवाक्या** । तदानन्तर्याद्**अपानो याज्या**, देवताया अपानतो हविर्ग्रसनात् "तदपानेनाजिघृक्षत् तदावयत्" इति श्रुतेः । **व्यानः शस्या** "अप्राणन् अनपानन् ऋचं अभिव्याहरति" इति श्रुतेः । **किं ताभिः जयति?** इत्युक्तार्थम् । तत्रानुक्तमिहोच्यते । लोकसंबन्धसामान्येन **पृथिवीलोकमेव पुरोनुवाक्यया जयति** । मध्यत्व-सामान्याद**न्तरिक्षलोकं याज्यया** । ऊर्ध्वत्वसामान्यात् **द्युलोकं शस्यया । ततो ह** स्वकृतप्रश्नपूरणादस्मदादिभिः अजेयोऽयमिति **होताश्वल उपरराम** अवाक्छिरा बभूवेत्यर्थः ॥ १० ॥

इति प्रथमं ब्राह्मणम

द्वितीयं जारत्कारवब्राह्मणम्

ग्रहातिग्रहबन्धमोक्षकथनम्

अथ हैनं जारत्कारव आर्तभागः पप्रच्छ याज्ञवल्क्य ! इति होवाच कति ग्रहाः कत्यतिग्रहा इति ? अष्टौ ग्रहा अष्टावतिग्रहा इति ये तेऽष्टौ ग्रहा अष्टावतिग्रहाः कतमे ते ? इति ॥ १ ॥

आख्यायिकासंबन्धस्तु काललक्षणात् कर्मलक्षणाच्च मृत्योरतिमुक्तिरुद्गीथादिब्राह्मणेषु व्याख्याता । इह तु ग्रहातिग्रहलक्षणो मृत्युबन्धः । तस्मान्मोक्षो वक्तव्य इति जारत्कारवब्राह्मणमारभ्यते— **अथेति** । अथाश्वलोपरत्यनन्तरं—**ह**कार ऐतिह्यार्थः—जरत्कारुगोत्रतो **जारत्कारवः** ऋतभागस्यापत्य**मार्तभागः** स्वाभि-मुखीकरणाय **याज्ञवल्क्य! इति होवाच** । ततो ग्रहातिग्रहविषयप्रश्नमेनं

याज्ञवल्क्यं पप्रच्छ। कति ग्रहाः? कत्यतिग्रहाः? इति प्रश्नः। इति-शब्दो वाक्यसमाप्त्यर्थः। कतिसंख्याका ग्रहाः अतिग्रहाश्च? इति पृच्छति। इतर आह— **अष्टौ ग्रहा अष्टावतिग्रहा इति**। ये तेऽभिहिता अष्टौ ग्रहा अष्टावतिग्रहाः कतमे ते नियमेन गृहीतव्याः? इति ॥ १ ॥

प्राणादीनां ग्रहातिग्रहत्वकथनम्

प्राणो वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन हि गन्धाञ्जिघ्रति ॥ २ ॥ वाक् वै ग्रहः स नाम्नातिग्राहेण गृहीतो वाचा हि नामान्यभिवदति ॥ ३ ॥ जिह्वा वै ग्रहः स रसेनातिग्राहेण गृहीतो जिह्वया हि रसान् विजानाति ॥ ४ ॥ चक्षुर्वै ग्रहः स रूपेणातिग्राहेण गृहीतः चक्षुषा हि रूपाणि पश्यति ॥ ५ ॥ श्रोत्रं वै ग्रहः स शब्देनातिग्राहेण गृहीतः श्रोत्रेण हि शब्दान् शृणोति ॥ ६ ॥ मनो वै ग्रहः स कामेनातिग्राहेण गृहीतो मनसा हि कामान् कामयते ॥ ७ ॥ हस्तौ वै ग्रहः स कर्मणातिग्राहेण गृहीतो हस्ताभ्याᳬ हि कर्म करोति ॥ ८ ॥ त्वक् वै ग्रहः स स्पर्शेनातिग्राहेण गृहीतः त्वचा हि स्पर्शान् वेद यत इत्येतेऽष्टौ ग्रहा अष्टावतिग्रहाः ॥ ९ ॥

प्रश्नोत्तरमाचष्टे—**प्राण** इत्यादिना। घ्राणाभिधानप्राणो **वै ग्रहः** प्रकरणात्। **सोऽपानेनातिग्राहेण गृहीतः** अपानस्य गन्धापहारित्वात्। सर्वो लोकोऽपानद्वारा घ्राणेन गन्धं जिघ्रति। अत इदमुच्यते—**अपानेन हि गन्धान् जिघ्रति** इति। **वाग्वै ग्रहः** इति। **वाग्वै ग्रहः**। **स** वागाख्यग्रहः वक्तव्यनाम्नातिग्राहेण **गृहीतः**। अतिग्राहेणेति दैर्घ्यं छान्दसम्। वक्तव्यार्था

हि वाक् स्वकार्यमकृत्वा नैव शाम्यति । अत एव हि लोको वाचा नामान्यभिवदति । जिह्वादित्वगन्तं समानमित्याह—जिह्वेति ॥ २–९ ॥

ग्रहप्रयुक्तमृत्युतरणम्

याज्ञवल्क्य ! इति होवाच यदिद॑ सर्वं मृत्योरन्नं कास्वित् सा देवता यस्या मृत्युरन्नमिति ? अग्निर्वै मृत्युः सोऽपामन्नमप पुनर्मृत्युं जयति ॥ १० ॥

ग्रहविषयकप्रश्नपूरणानन्तरं तत्प्रयुक्तमृत्युतरणाय पृच्छति—याज्ञवल्क्य ! इति । यदिदं सर्वं व्याकृतं मृत्योरन्नं ग्रहातिग्रहमृत्युना ग्रस्तं सत् जायते विपद्यते च । कास्वित् का नु स्यात् सा देवता यस्या देवताया मृत्युरन्नं भवति ? "मृत्युर्यस्योपसेचनम्" इति श्रुतेः । मृत्योरपि मृत्युरस्तीति कथनाकथनाभ्यामनवस्थानिर्मोक्षौ स्यातामिति चेन्न ; स्वातिरिक्तसामान्यमृत्योः मृत्यन्तरानुपपत्तेः । तत् कथम् ? इत्यत्र—अग्निस्तावत् सर्वस्य मृत्युः विनाशकत्वेन दृष्टत्वात् । सोऽग्निरद्भिः भक्ष्यत इत्यपामन्नम् । अतो मृत्योरपि मृत्युरस्ति । तेन हि ग्रहातिग्रहजातं भक्ष्यते । ग्रहातिग्रहबन्धने मृत्युमृत्युना नाशिते संसृतिमुक्तिरुपपन्ना भवति । बन्धनं ग्रहातिग्रहदर्शनम् । मृत्युमृत्युप्रबोधः तन्मुक्तिहेतुः । यत एवमतो बन्धमोक्षाय पुरुषप्रयत्नः सफलो भवति । एवंवित् पुनः मृत्युमपजयति ॥ १० ॥

एवंवित्प्राणोऽप्युत्क्रामति किं इति प्रश्नः

याज्ञवल्क्य ! इति होवाच यत्रायं पुरुषो म्रियत उदस्मात् प्राणाः क्रामन्ति आहो३ नेति नेति होवाच याज्ञवल्क्योऽत्रैव समवनीयन्ते स उच्छ्वयति आध्मायत्याध्मातो मृतः शेते ॥ ११ ॥

एवंवित्प्राणोऽप्युत्क्रामतीति पृच्छति—याज्ञवल्क्य ! इति । परमात्मप्रबोधाविर्भूतपरमृत्युना स्वातिरिक्तग्रहादिमृत्यौ भक्षिते सति, अथ यत्र यस्मिन् काले सोऽयं विद्वान् म्रियते । ऊर्ध्वमस्मात् ब्रह्मविदो म्रियमाणात् वागादयः प्राणा ग्रहा नामादयोऽतिग्रहाश्च क्रामन्ति ऊर्ध्वमुत्क्रमन्ते, आहोस्वित् नेति । नेति होवाच याज्ञवल्क्यः । विदुषः प्राणादयो नोत्क्रमन्ति । अत्रैव स्वात्मनि परतत्त्वे समवनीयन्ते ऊर्मयः समुद्र इव सम्यक् विलीयन्त इत्यर्थः । "एवमेवास्य परिद्रष्टुरिमाः षोडश कलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति" इति श्रुतेः । यस्मात् स उच्छ्वयति उच्छूनभावमेति बाह्यवायुनाध्मायति पूर्यते दृतिवदाध्मातो मृतः शेते । विदुषो न कुत्रापि गमनमस्तीत्यर्थः ॥ ११ ॥

सर्वस्य समवनयनं मुक्तिश्च

याज्ञवल्क्य ! इति होवाच यत्रायं पुरुषो म्रियते किमेनं न जहातीति ? नामेति अनन्तं वै नाम अनन्ता विश्वे देवा अनन्तमेव स तेन लोकं जयति ॥ १२ ॥

किं विदुषः प्राणा एव समवनीयन्ते तत्प्रयोजकमपि ? तद्विद्यमाने पुनः प्राणप्रसङ्गोऽपि स्यात् । अतः सर्वं समवनीयते । ततो मुक्तिः स्यात् इति ख्यापनायायं प्रश्नारम्भः—याज्ञवल्क्य ! इति । यत्रायं पुरुषो म्रियते किमेनं न जहाति ? इत्यत्र इतर आह—नामेति । नामातिरिक्तं सर्वं विलीयते । प्रकृतिसंबन्धात् नाममात्रं तु न लीयते । नाम्न आनन्त्याधिकृता अनन्ता वै विश्वे देवाः । अनन्तमेव स तेन लोकं जयति । नामाधिकृतविश्वेदेवाभेदज्ञानतोऽक्षयलोकाप्तिरान्तरालिकं फलम् ॥ १२ ॥

ग्रहातिग्रहप्रलयो मुक्तिः

याज्ञवल्क्य ! इति होवाच यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं

शरीरमाकाशमात्मा औषधीर्लोमानि वनस्पतीन् केशा अप्सु लोहितं च रेतश्च निधीयते क्वायं तदा पुरुषो भवतीति ? आहर सोम्य ! हस्तमार्तभाग ! आवामेव एतस्य वेदिष्यावो न नावेतत् सजन इति तौ होत्क्रम्यामन्त्रयांचक्राते तौ ह यदूचतुः कर्म हैव तदूचतुः अथ यत्प्रशशꣳसतुः कर्म हैव तत्प्रशशꣳसतुः पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति ततो ह जारत्कारव आर्तभाग उपरराम ॥ १३ ॥

ग्रहातिग्रहयोः मृत्युरूपत्वेन बन्धनत्वं मृत्युमृत्युज्ञानात्तन्मुक्तत्वं चोक्तम् । प्रदीपनिर्वाणवत् ग्रहातिग्रहप्रलयो मुक्तिरिति प्रकटनार्थमिदमारभ्यते—**याज्ञवल्क्य !** इति । **याज्ञवल्क्य ! इति होवाच । यत्रास्य** शिरःपाण्यादिमतः **पुरुषस्य मृतस्य वागिन्द्रियमग्निं** प्रत्यप्येति । **प्राणो वातमप्येतीति** सर्वत्रानुषज्यते । **चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीꣳ शरीरमाकाशमात्मा** हृदयाकाशं महाकाशमप्येति । **लोमान्योषधीरपियन्ति । केशा वनस्पतीनपियन्ति । लोहितं च रेतश्चाप्सु निधीयते ।** न तु वागादिशब्देन करणान्येव, अपि तु तत्तत्करणाभिमानिदेवता गृह्यते । विमोक्षात् प्राक् साधिष्ठानकरणानि व्याविद्धदात्राद्युपमानि भवन्ति हि । तदानीं पुरुषः किमाश्रितो भवति ? इति पृच्छति—**क्वायं तदा पुरुषो भवतीति ?** यमाश्रित्य पुनः कार्यकारणसङ्घातमुपादत्ते येन ग्रहातिग्रहप्रयुक्तबन्धनभाक् भवति इति प्रश्नः । तत्रोच्यते । **आहर सोम्य ! हस्तमार्तभाग !** इति । **आवामेव** यद्वेदितव्यं तद्वेदि**ष्यावः** । कस्मात् ? **न नौ** आवयोः **एतद्वस्तु सजने** निर्णेतुं शक्यते । **तौ ह** इत्यादि श्रुतेः वचः । तौ याज्ञवल्क्यार्तभागौ एकान्तं गत्वा किं चक्रुः ? इत्यत आह—**तौ ह उत्क्रम्यामन्त्रयाञ्चक्रात** इति । आदौ तावत् लोकायतिकादिपक्षाणां एकैकपक्षमादाय विचारितवन्तौ । ततः किं ऊचतुः ? इत्यत्र तावेवं विचार्य पूर्वपक्षं दूरीकृत्य **कर्म हैव** कार्यकारणोपादानहेतुं कर्माश्रितं **तत्** तत्रोचतुः । तत्र किं प्रशशंसतुः ?

कर्म हैव तत् प्रशशंसतुः । यत एवं निर्धारितमेतत् कर्म ग्रहातिग्रहकार्यकरणोपादानं शास्त्रविहितपुण्येन **कर्मणा पुण्यो भवति ।** तद्विपरीतपापकर्मणा **पापो** भवतीति । इत्थं याज्ञवल्क्येन स्वकृतप्रश्नजालपूरणतः अयमप्रकम्प्य इति मत्वा **जारत्कारव आर्तभाग उपरराम ॥ १३ ॥**

इति द्वितीयं ब्राह्मणम्

तृतीयं लाह्यायनिब्राह्मणम्

कर्मफलस्य संसारत्वप्रदर्शनम्

अथ हैनं भुज्युर्लाह्यायनिः पप्रच्छ याज्ञवल्क्य ! इति होवाच मद्रेषु चरकाः पर्यव्रजाम ते पतञ्चलस्य काप्यस्य गृहान् ऐम तस्यासीत् दुहिता गन्धर्वगृहीता तमपृच्छाम कोऽसि इति ? सोऽब्रवीत् सुधन्वाङ्गिरस इति तं यदा लोकानामन्तानपृच्छाम अथैनमब्रूम क्व पारिक्षिता अभवन्निति क्व पारिक्षिता अभवन् ? स त्वा पृच्छामि याज्ञवल्क्य ! क्व पारिक्षिता अभवन् ? इति ॥ १ ॥

ग्रहातिग्रहलक्षणं बन्धनम् । येन बद्धः संसरति स मृत्युः । स हि मृत्युः । तस्मान्मोक्षणहेतुमृत्युमृत्युरात्मा । ग्रहातिग्रहरूपमृत्युवर्त्मनि संसरतां "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेन" इति संसारगतिरभिहिता । तस्मान्न मोक्षार्थानि कर्माणि इति सिद्धम् । अतः कर्मफलस्य संसारत्वप्रदर्शनाय इदं ब्राह्मणमारभ्यते—**अथेति** । अथ जारत्कारवप्रश्नानन्तरं नामतो **भुज्युः** लह्यस्यापत्यं लाह्यः तदपत्यं **लाह्यायनिः पप्रच्छ । याज्ञवल्क्य ! इति**

होवाच । समष्टिव्यष्टिफलात्मकमश्वमेधदर्शनमादावुक्तम् । तत्कर्तुरश्वमेधस्य कर्मणां काष्ठारूपत्वात् ।

भ्रूणहत्याश्वमेधाभ्यां न वरं पुण्यपापयोः ।

इति स्मरणात् । तत् किं केवलकर्मणा ज्ञानेन वा तदुभयसमुच्चितेन वा समष्टि व्यष्टिफलं च प्राप्नोति । तत्र व्यष्टिफलस्याण्डान्तःपातित्वेन ज्ञातत्वात् मृत्यु- रस्यात्मा भवतीत्युक्तम् । मृत्योरशनायादिलक्षणत्वात् । समुच्चयफलन्तु समष्टि- लिङ्गशरीराभिमानिहिरण्यगर्भाप्तिः यत्पदमपरविद्यापरमफलम् । एतद्व्यष्टिसमष्टि- दर्शनस्यालौकिकत्वेन दक्षिणोत्तरमार्गप्रापकत्वात् । अस्मिन्नर्थे इमामाख्यायिकां स्वानुभूतां प्रकुरुते । न हि भवद्बुद्धिव्यामोहाय उच्यते । मद्रा नाम जनपदाः । तेषु मद्रेषु अध्ययनार्थं व्रतचरणात् चरका अध्वर्यवो वा **पर्यव्रजाम** पर्यटितवन्तः । ते **पतञ्चलस्य** ते वयं पर्यटन्तः नामतः पतञ्जलस्य कपिगोत्रस्य **काप्यस्य गृहान् ऐम** गतवन्तः । **तस्यासीत् दुहिता गन्धर्वगृहीता** । गन्धर्वशब्देनाग्निरुच्यते । ऋत्विग्देवताविशिष्टविज्ञानवत्त्वात् । न हि सत्त्वमात्रस्य ईदृशं विज्ञानमस्ति । **तं** परिवार्य सर्वे वयं **अपृच्छाम—कोऽसि? इति** । किन्ना- मासि? इति पृष्टः **सोऽब्रवीत्—गन्धर्वो** नामतः **सुधन्वा** गोत्रत **आङ्गिरसः** । **तं यदा** यस्मिन् काले **लोकानामन्तान्** पर्यवसानान् **अपृच्छाम** भुवनकोश- परिमाणबोधाय **अथैनं गन्धर्वमब्रूम—क पारिक्षिता अभवन्? इति** । स सर्वमस्मभ्यमब्रवीत् । तन्मुखतो मया दिव्यज्ञानं लब्धम् । न हि ते तदस्ति । अतो मया निगृहीतोऽसि । गन्धर्वात् गृहीतविद्योऽहं **त्वा पृच्छामि—हे याज्ञवल्क्य! क पारिक्षिता अभवन्? इति** । तत् किं त्वं जानासि? कथय यत्त्वां पृच्छामि—**क पारिक्षिता अभवन्? इति** ॥ १ ॥

याज्ञवल्क्येन तद्गूढार्थकथनम्

स होवाचोवाच वै सोऽगच्छन् वै ते तत् यत्राश्वमेधयाजिनो गच्छन्तीति क नु अश्वमेधयाजिनो गच्छन्तीति? द्वात्रिँशतं

वै देवरथाह्न्यानि अयं लोकः तꣳ समन्तं पृथिवी द्विस्तावत्पर्येति ताꣳ समन्तं पृथिवीं द्विस्तावत् समुद्रः पर्येति तत् यावती क्षुरस्य धारा यावद्वा मक्षिकायाः पत्रं तावानन्तरेणाकाशः तानिन्द्रः सुपर्णो भूत्वा वायवे प्रायच्छत् तान् वायुरात्मनि धित्वा तत्रागमयत् यत्राश्वमेध-याजिनोऽभवन्निति एवमेव वै स वायुमेव प्रशशꣳस तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयति य एवं वेद ततो ह भुज्युर्लाह्यायनिरुपरराम ॥ २ ॥

तद्गूढार्थं भगवानाह—स हेति । स होवाच । याज्ञवल्क्य उवाच वै सः । वैशब्दः स्मरणार्थः । तुभ्यमगच्छन् वै स गन्धर्व उवाच । तत्तत्र क ? यंत्र यस्मिन् अश्वमेधयाजिनो गच्छन्तीति । एवं प्रश्ने निर्णीते आह इतरः—क नु कस्मिन् अश्वमेधयाजिनो गच्छन्ति ? इति । तेषां गतिविवक्षया भूकोशपरिमाणमाह । कथम् ? द्वात्रिंशतं वै, देवः सविता । तस्य रथो देवरथः । तद्गत्याह्ना यावद्देशपरिमाणं परिच्छिद्यते तद्देवरथाह्न्यं यदि द्वात्रिंशद्गुणितं तदा तानि देवरथाह्न्यानि । तावत्परिमाणोऽयं लोकालोकपर्वतपरिक्षिप्तो लोकः यत्र प्राणिनां कर्मफलोपभोगः स एष लोक एतावान् । अतः परमलोकः । तं लोकं समन्तं समन्ततो विस्तारात् द्विगुणपरिमाणेन तं परिक्षिप्यति पृथिवी । तां पुनः पृथिवीं तथैव समन्तात् द्विस्तावत् द्विगुणपरिमाणेन समुद्रः पर्येति यं पौराणिका घनोदकमाचक्षते । तत्राण्डकपालद्वयपरिमाणं यद्विवरणवहिर्गता अश्वमेधयाजिनो वाप्नुवन्ति । तत् तत्र यावती यावत्परिमाणा क्षुरस्य धारा अतीव तीक्ष्णसूक्ष्माग्रं तथा यावद्वा मक्षिकायाः पत्रं तावानण्डकपालयो-रन्तरेण मध्ये आकाशश्छिद्रम् । तेन तान् पारिक्षितानश्वमेधयाजिनः प्राप्तान् यस्य यादृग्विज्ञानं तदनुरोधेन इन्द्रः परमेश्वरः सुपर्णः पक्षी भूत्वा वायवे प्रायच्छत् । तान् पारिक्षितान् वायुरात्मनि धित्वा स्थापयित्वा स्वात्मभूतान् कृत्वा तत्र तस्मिन्नगमयत् । क ? यत्र पूर्वे अतिक्रान्ता अश्वमेधयाजिनोऽभवन् इत्येवमिव

वै स गन्धर्वो वायुमेव प्रशशंस वायोः पारिक्षितगतित्वात्। समाप्तेय-माख्यायिका। तन्निर्वृत्तमर्थं श्रुतिराचष्टेऽस्मभ्यम्। यतो वायुर्जगदन्तरात्मा स एवाध्यात्मादिभेदेन व्यष्टिः समष्टिश्च वायोः सूत्ररूपत्वात्। य एवं व्यष्टिसमष्ट्यात्मानं वायुमात्मत्वेन उपगच्छति सोऽप पुनर्मृत्युं जयति। एवमात्मनो गूढप्रश्ननिर्णयात् भुज्युर्लाह्यायनिरुपरराम ॥ २ ॥

इति तृतीयं ब्राह्मणम्

चतुर्थं उषस्तब्राह्मणम्

आत्मावगतिप्रकारः

अथ हैनमुषस्तश्चाक्रायणः पप्रच्छ याज्ञवल्क्य! इति होवाच यत् साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः तं मे व्याचक्ष्व इति एष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य! सर्वान्तरो यः प्राणेन प्राणिति स त आत्मा सर्वान्तरो योऽपानेनापानीति स त आत्मा सर्वान्तरो यो व्यानेन व्यानीति स त आत्मा सर्वान्तरो य उदानेन उदानिति स त आत्मा सर्वान्तर एष त आत्मा सर्वान्तरः ॥ १ ॥

पुण्यपापतः संसरति इत्युक्तम्। तत्कलनासंभवात्मावगतये इदमुषस्त-ब्राह्मणमारभ्यते—अथेति। अथ लाह्यायनिप्रश्नपूरणानन्तरमेनं याज्ञवल्क्यं नामत उषस्तः चक्रस्यापत्यं चाक्रिः तदपत्यं चाक्रायणः पप्रच्छ। स्वाभिमुखीकरणाय याज्ञवल्क्य! इति होवाच। यत् साक्षादव्यवहितपरोक्षादपरोक्षं व्यष्टि-प्रपञ्चोपबृंहणात् ब्रह्म। किं तत्? य आत्मा प्रत्यक् सर्वान्तरः व्यष्टिभूत-

कदम्बान्तःकरणवृत्तिसहस्रभावाभावप्रकाशकत्वेन तद्गतदोषास्पृष्टत्वात्। **तमात्मानं मे मह्यं व्याचक्ष्वेति**। एवं पृष्टः तं प्रत्याह याज्ञवल्क्यः—**एष ते तवात्मा सर्वान्तरः** "सबाह्याभ्यन्तरः" इति श्रुतेः। त्वत्कार्यकरणसंघातो येनात्मनात्मवान् स एष हि तवात्मा। पिण्डात्मलिङ्गात्मनोः कतरो ममात्मा? इति। तत्र इतर आह—**य** इति। **यो** हन्मुखनासिकालयप्राणेन **प्राणिति** प्राणनचेष्टां करोति—"येन प्राणः प्रणीयते" इति श्रुतेः—**स ते** कार्यकरणसंघातात्मा विज्ञानमयः। समानमन्यत्। **योऽपानेनापानीतीति** दैर्घ्यं छान्दसम्। दारुयन्त्रस्थानीयकरणसन्ततिः यद्योगात् स्वं स्वं व्यापारं करोति यद्विना विशीर्यते एवं यश्चेष्टानिमित्तं स संघातविलक्षण इत्यर्थः ॥ १ ॥

स्पष्टतयात्मलक्षणकथनम्

स होवाच उषस्तश्चाक्रायणो यथा विब्रूयात् असौ गौरसावश्व इति एवमेव एतद्व्यपदिष्टं भवति यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति एष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य! सर्वान्तरो न दृष्टेर्द्रष्टारं पश्येर्न श्रुतेः श्रोतारँ शृणुयान्न मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीया एष त आत्मा सर्वान्तरः अतोऽन्यदार्तं ततो होषस्तश्चाक्रायण उपरराम ॥ २ ॥

मया यत्पृष्टं तदपोह्यान्यत् वदतीति पुनः पृच्छति—**स** हेति। **स होवाच** इत्यादि समानम्। त्वत्पृष्टप्रश्नोत्तरं सम्यग्वक्ष्यामीति प्रतिज्ञाय किं पुनस्त्वमन्यथा ब्रूषे? **यथा** प्राकृतः प्रतिज्ञाविपरीतं **ब्रूयात्**। **असौ गौरसावश्वो** यश्चलति धावतीति वा। पूर्वं तत् दर्शयामीति प्रतिज्ञाय तत-श्चलनादिलिङ्गैः व्यपदिशति तथैव**मेवैतत्** ब्रह्म त्वया प्राणादिलिङ्गैः **व्यपदिष्टं भवति**। तत् विहाय **यदेव साक्षादपरोक्षात्** ब्रह्म **य आत्मा सर्वान्तरः**

तं मे व्याचक्ष्वेति । इतर आह—**एष त आत्मा सर्वान्तर** इति । एवंलक्षणस्त-वात्मेति यथा मयात्मा प्रतिज्ञातः तथैवोक्तम् । घटादिवत् तमात्मानं निदर्शयेति यदि वदसि तदैवमयमात्मा निर्वक्तुमशक्यः निष्प्रतियोगिकनिर्विशेषत्वात् । तथा चेत् तदवगतिः कथं ? इत्याकाङ्क्षायां चक्षुरादिकरणग्रामारोपापवादाधिकरण-प्रबोधोपायतो निरधिकरणनिर्विशेषं ब्रह्म स्वमात्रमित्यवगन्तुं शक्यमित्याह—**न दृष्टेर्द्रष्टारं पश्येरि**त्यादिना । लौकिकादिभेदात् दृष्टिर्द्विविधा । तत्र चक्षुरादि-करणानुग्रहान्तःकरणवृत्तिः लौकिकी दृष्टिः । सा जायते नश्यति च । अग्न्युष्ण-प्रकाशवत् या वस्तुस्वरूपभूता सा त्वलौकिकी दृष्टिः । सा जात्वपि न जायते न विनश्यति च । तस्या ज्ञप्तिमात्रत्वेन नित्यत्वात् । तद्दृष्ट्यारूढो द्रष्टा स्वातिरिक्तरूपादिकं स्वाज्ञदृष्ट्या पश्यन्नपि स्वज्ञदृष्ट्या पश्यति न परमार्थदृष्ट्या तत्प्रसक्तिरेव नास्तीत्यर्थः । न ह्यलौकिकदृष्टेरन्यथाभावः कदापि विद्यते । तथा च वक्ष्यति "न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते" इति । लौकिक्या दृष्टेर्द्रष्टारं प्रत्यञ्चमात्मानं न पश्येः । तथा श्रुतेः **श्रोतारं न शृणुयाः** । तथा **मतेर्मन्तारं न मन्वीथाः** । तथा **विज्ञाते**र्धीवृत्तिततेर्**विज्ञातारं न विजानीया एष त आत्मा सर्वान्तरः** । सर्वान्तर इत्युक्त्या व्याप्यव्यापकता स्यात् इत्यत्र यत् लौकिकदृष्ट्यादिकं स्वातिरिक्तत्वेन व्याप्य धिया विकल्पितं तद्धि **अतः** स्वात्मनो लौकिकदृष्टिरूपात् **अन्यत्** अतिरिक्तम् **आर्तं** वाचारम्भणमात्रं वस्तुतः स्वातिरिक्तसामान्यस्य मृग्यत्वात् । स्वातिरिक्तप्रसक्तव्याप्यव्यापककलनापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमवशिष्यत इत्यत्र—

> ततः स्तिमितगम्भीरं न तेजो न तमस्ततम् ।
> अनाख्यमनभिव्यक्तं सत् किंचिदवशिष्यते ॥

इति श्रुतेः । एवं स्वप्रश्नपूरणहर्षतः **होषस्तश्चाक्रायण उपरराम** ॥ २ ॥

इति चतुर्थं ब्राह्मणम्

पञ्चमं कहोलब्राह्मणम्

स्वात्मसाधनत्वेन सर्वसंन्यासकथनम्

अथ हैनं कहोलः कौषीतकेयः पप्रच्छ याज्ञवल्क्य ! इति होवाच यदेव साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरस्तं मे व्याचक्ष्वेति एष त आत्मा सर्वान्तरः कतमो याज्ञवल्क्य ! सर्वान्तरो योऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति एतं वै तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणा उभे ह्येते एषणे एव भवतः तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्य अथ मुनिरमौनं च मौनं च निर्विद्य अथ ब्राह्मणः स ब्राह्मणः केन स्यात् ? येन स्यात् तेन ईदृश एव अतोऽन्यदार्तं ततो ह कहोलः कौषीतकेय उपरराम ॥ १ ॥

स्वात्मैव सत्यं तदतिरिक्तमार्तं इत्युक्तम् । तत्साधनत्वेन स्वातिरिक्तसर्वसंन्यासो वक्तव्य इति कहोलब्राह्मणमारभ्यते—अथेति । अथ उषस्तप्रश्नप्रतिवचनानन्तरमेनं याज्ञवल्क्यं नामतः कहोलः कुषीतकस्यापत्यं कौषीतकिः तदपत्यं कौषीतकेयः पप्रच्छ । याज्ञवल्क्य ! इति होवाच । यदेव साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तरः तं मे व्याचक्ष्वेति पूर्ववत् । मुमुक्षुर्यज्ज्ञानतो निर्मुक्तबन्धो भवति एष हि ते तवात्मा । उषस्तकहोलप्रश्नप्रतिवचनाभ्यां पुनरुक्तिः स्यादिति चेन्न ; तयोरर्थविशेषावगमात् । पूर्वब्राह्मणे कार्यकरणसंघातवैलक्षण्येन वस्तुतः स्वमात्रतया च यः प्रकटितस्तस्यैवात्मनः

कहोलब्राह्मणे स्वाज्ञदृष्टिप्रसक्ताशनायादिसंसारधर्मातीतं संन्याससहितज्ञानादेव मुनिः स्वातिरिक्तभ्रमात् विमुक्तो भूत्वा निष्प्रतियोगिकब्रह्ममात्रपर्यवसन्नो भवतीति विशेषार्थसद्भावात् न पुनरुक्तिः। कथमेकस्य संसारित्वासंसारित्वे भवतः? इति चेत्, उपाधियोगायोगाभ्यामित्युक्तत्वात्। यथा रज्जुशुक्तिस्थाण्वादि अज्ञदृशां तदेव सर्परजतपुरुषवदवभासते न वस्तुज्ञदृशाम। वस्तुतः "एकमेवाद्वितीयं ब्रह्म", "नेह नानास्ति किञ्चन" इति श्रुत्यनुरोधेन न हि ब्रह्मातिरिक्तं किंचिदपि विकारजातमस्ति ब्रह्मणो निष्प्रतियोगिकस्वमात्रत्वात्। तदेव स्वाज्ञविकल्पितमूलाविद्यावीजांशमवष्टभ्य सर्वज्ञः सर्वान्तरो भवति। परमार्थतत्त्वमपेक्ष्य **सर्वान्तरः कतमो याज्ञवल्क्य!** इति प्रश्नोत्तरं मुनिराह—**य** इति। अशितुमिच्छा अशनाया। पातुमिच्छा पिपासा। ते अशनायापिपासे तयोः प्राणधर्मत्वात्। शोकमोहावन्तःकरणधर्मौ। जरामृत्यू स्थूलशरीरधर्मौ। स्वाज्ञः तद्विशिष्टो भूत्वा क्षुधितोऽहं पिपासितोऽहं स्वेष्टबन्धुजनवियोगतः शोचामि। ब्राह्मणादिर्ब्रत्यादिर्वाहमस्मि जातो मृत इत्यादिविभ्रमारूढः सन् स्वात्मानमेवंविशिष्टं मन्यते। स्वज्ञस्तु स्वात्मानमेतद्विपरीतं मन्यते। **यः** स्वज्ञात्मा **अशनायापिपासे शोकं मोहं जरां मृत्युमत्येति** अतिरिच्यते सोऽयं साक्षादव्यवहितोऽपरोक्षादगौणः सर्वान्तर आत्माकाशवदशनायादिविकारजातमस्पृश्य परमेश्वरो विजयते। वस्तुतोऽयं स्वाविद्याद्वयतत्कार्यव्यष्टिसमष्टिप्रपञ्चतदारोपापवादतदधिकरणविश्वविश्वाद्यविकल्पानुज्ञैकरसान्तगतहेयांशापह्नवसिद्धब्रह्ममात्रतयावशिष्यते। **एतं वै तमात्मानं** निष्प्रतियोगिकस्वमात्रमिति **विदित्वा ब्राह्मणा** ब्रह्मविदो ब्रह्मवेदनानन्तरं ब्रह्मभावापन्नस्य स्वात्मलोकत्वेनाकर्मब्रह्मास्मीति भावविशिष्टत्वेन स्वातिरिक्तब्रह्मादिपदवितृष्णत्वेन च कृतकृत्यत्वात् बाह्यपुत्रवित्तादिभिः स्वप्रयोजनाभावात् व्युत्तिष्ठन्तीत्याह—**पुत्रेति**। सोऽयं मनुष्यलोकः पुत्रेणैव जय्य इति लोकसाधनत्वेन पुत्रं प्रति या इच्छा सा पुत्रैषणा। तस्याः **पुत्रैषणायाश्च** स्वात्मलोकानां ततो व्युत्थानमुपपद्यते। "कर्मणा पितृलोकः" इति दारवित्तसंग्रहस्य कर्मार्थत्वात् अकर्मब्रह्मविदां कर्मतत्साधनवित्तादिभिः प्रयोजनाभावात् **वित्तैषणायाश्च** व्युत्थानं संपद्यते।

"विद्यया देवलोकः" इति विद्यासाध्यो हि ब्रह्मादिलोकः। लोकसामान्यस्य स्वातिरिक्तत्वेनासंभवं मन्यमानानां लोकैषणायाश्च व्युत्थानमुपपद्यते। एवं पुत्रैषणायाश्च वित्तैषणायाश्च **लोकैषणायाश्च व्युत्थाय** अनात्मलोकप्राप्तिसाधनैषणात्रये तृष्णामकृत्वाथ शरीरस्थितिमात्रनिमित्त**भिक्षाचर्यं चरन्ति**। साधनफलेच्छयोरेकत्वं मन्यमाना श्रुतिराचष्टे—**या** हीति। अदृष्टफलसाधनतुल्यत्वेन **या ह्येव पुत्रैषणा सा वित्तैषणा**। **या** कर्मफलसाधनधिया **वित्तैषणा सा लोकैषणा** फलार्थैव। यत एवमतः एकैवैषणा साध्यसाधनभेदेन। यद्वा **उभे ह्येते एषणे भवतः**। यस्मादेवं तस्मात् ब्रह्मविदां न ह्यस्ति कर्म तत्फलमोहः। तस्मादेव पूर्वे अतिक्रान्ता ब्राह्मणा विविदिषवो विद्वांसश्च कर्मभ्यः तत्साधनयज्ञोपवीतादिभ्यो व्युत्थाय पारिव्राज्यं प्रतिपद्य परारोपितप्रातिभासिकशरीरस्थितिमात्रप्रयोजनतया भिक्षाचर्यं चरन्तीति पुरस्तादेवेत्युक्तम्। यस्मात् पूर्वे तमात्मानं विदित्वा पारिव्राज्यं भजन्ति **तस्मात्** इदानींतनोऽपि **ब्राह्मणो** ब्रह्मवित् श्रुत्याचार्यमुखतः **पाण्डित्यं** सर्ववेदान्तार्थश्रवणजनितज्ञानं **निर्विद्य** यावत् श्रोतव्यं स्वावगतिपर्यन्तं तावत् श्रवणं कृत्वा न हि कश्चिदप्येषणात्रयमतिरस्कृत्य पाण्डित्यपदं स्प्रष्टुं पारयति। अतः स्वात्मज्ञानेनैव विहितमेषणात्रयव्युत्थानम्। यस्मात् स्वात्मज्ञानसमानकर्तृकप्रत्ययोपादानलिङ्गश्रुतिप्रमाणदृढीकृतं तस्मात् ज्ञानबलभावेन एषणाभ्यो व्युत्थाय साधनफलाश्रयविपरीतरूप**बाल्येन तिष्ठासेत्** स्थातुमिच्छेत्। किं नाम बलम्? स्वातिरिक्तास्तितादृष्टितिरस्करणम्। तद्भावो बाल्यम्। "नायमात्मा बलहीनेन लभ्यः" इति श्रुतेः। एवं **बाल्यं च पाण्डित्यं च निर्विद्य** स्वातिरिक्तकलनाविरतिपूर्वकं स्वात्मानमवगम्याथ श्रुतार्थमननात् **मुनिः** योगी भवति—

मननात् स मुनिर्भवति नारण्यवसनान्मुनिः।

इति स्मृतेः। एतावदेव हि ब्राह्मणेन कर्तव्यम्। तत्कृत्वायं कृतकृत्यो मुनिः योगी भवति। **अमौनं** पाण्डित्यं बाल्यसहकृतं **च मौनं** मननं **च निर्विद्य** निश्शेषीकृत्याथ **ब्राह्मणः** कृतकृत्यो भवति। स्वातिरिक्तप्रपञ्चोऽस्ति नास्तीति

विभ्रमापह्नवसिद्धं ब्रह्म स्वमात्रमिति प्रबोधसमकालं तन्मात्रतयावशिष्यते। इत्थंभूतो यः स ब्राह्मणो ब्रह्मैव। "ब्रह्मैव ब्रह्मवित् स्वयं" इति श्रुतेः। एवं ब्रह्मभावमापन्नो **ब्राह्मणः स्वाङ्गदृष्ट्या केन स्यात् येन स्यात्** विधिनिषेधाचरणप्रवृत्त इव भवेत्। **तेन ईदृश एव** उक्तलक्षणब्राह्मण एव भवति। तस्य प्रवृत्तिनिवृत्तितद्धेत्वन्तःकरणापह्नवसिद्धब्रह्ममात्रपदारूढत्वात् न तस्य प्रवृत्तिनिवृत्तिविभ्रमोऽस्ति। यद्ययं इयं प्रवृत्तिः इयं निवृत्तिरिति विभ्रमारूढो भवति तदा प्रवृत्तिसामान्यं हित्वा निवृत्तिरेवाश्रयणीयेत्यत्र ज्ञानवैराग्यसंपन्नस्य स्वस्मिन्नेव मुक्तिरिति न सर्वत्राचारप्रसक्तिः "तदाचारवशात् तत्तद्रूपो भवति" इति श्रुतेः। यदा प्रवृत्तिनिवृत्तिकलनासंभवप्रबोधसिद्धनिष्प्रतियोगिकब्रह्ममात्रवित् तन्मात्रतयावशिष्यते, तदतिरेकेण यद्यदेषणालक्षणं स्वातिरिक्तवदवभासते तत्तदतो ब्रह्मणोऽन्यत् आर्तं मायामात्रमसत्। तदपह्नवसिद्धं सन्मात्रमेव सदावशिष्यत इत्यत्र "पश्यतेहापि सन्मात्रमसदन्यत्" इति श्रुतेः। इत्थं **कहोलः कौषीतकेयो** याज्ञवल्क्यतो ब्रह्मयाथात्म्यमवगम्य तत्समकालं स्वातिरिक्तभ्रमत **उपरराम** ॥ १ ॥

इति पञ्चमं ब्राह्मणम्

षष्ठं ओतप्रोतब्राह्मणम्

आवरणोद्घाटनपूर्वकमात्मदर्शनम्

अथ हैनं गार्गी वाचक्नवी पप्रच्छ याज्ञवल्क्य! इति होवाच यदिदꣳ सर्वमप्सु ओतं च प्रोतं च कस्मिन्नु खल्वाप ओताश्च प्रोताश्च इति? वायौ गार्गि! इति कस्मिन्नु खलु वायुरोतश्च प्रोतश्च इति?

अन्तरिक्षलोकेषु गार्गि! इति कस्मिन्नु खल्वन्तरिक्षलोका ओताश्च प्रोताश्च इति? गन्धर्वलोकेषु गार्गि! इति कस्मिन्नु खलु गन्धर्वलोका ओताश्च प्रोताश्च इति? आदित्यलोकेषु गार्गि! इति कस्मिन्नु खल्वादित्यलोका ओताश्च प्रोताश्च इति? चन्द्रलोकेषु गार्गि! इति कस्मिन्नु खलु चन्द्रलोका ओताश्च प्रोताश्च इति? नक्षत्रलोकेषु गार्गि! इति कस्मिन्नु खलु नक्षत्रलोका ओताश्च प्रोताश्च इति? देवलोकेषु गार्गि! इति कस्मिन्नु खलु देवलोका ओताश्च प्रोताश्च इति? इन्द्रलोकेषु गार्गि! इति कस्मिन्नु खल्विन्द्रलोका ओताश्च प्रोताश्च इति? प्रजापतिलोकेषु गार्गि! इति कस्मिन्नु खलु प्रजापतिलोका ओताश्च प्रोताश्च इति? ब्रह्मलोकेषु गार्गि! इति कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्च इति? स होवाच गार्गि! मातिप्राक्षीर्मा ते मूर्धा व्यपप्तत् अनतिप्रश्न्यां वै देवतामतिपृच्छसि गार्गि! मातिप्राक्षीरिति ततो ह गार्गी वाचक्नवी उपरराम ॥ १ ॥

"यत् साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तरः" इति प्रश्नप्रतिवचनतो योऽर्थः प्रकटितः तत्स्वरूपाधिगमाय आशाकल्यब्राह्मणावधि ग्रन्थ आरभ्यते। तत्रादौ स्वाज्ञदृष्टिप्रसक्तस्वाविद्यापदतत्कार्यवियदादिपञ्चभूतभौतिकजातं स्वावरणतयावभासते। तदावरणोद्घाटनपूर्वकं तद्धर्मं विरलात्मा दर्शयितव्य इति ओतप्रोतब्राह्मणमारभ्यते—अथेति। **अथ ह** कहोलप्रश्नानन्तरं **एनं** याज्ञवल्क्यं नामतो **गार्गी** वाचक्नोः दुहिता **वाचक्नवी पप्रच्छ। याज्ञवल्क्य! इति होवाच। यदिदं सर्वं** पार्थिवविकारजातं **अप्सु** उदके दीर्घतन्तुवत् **ओतं च** तिर्यक्तन्तुवत् **प्रोतं च** सर्वमद्भिः व्याप्तं लक्ष्यते। नो चेत् सक्तुमुष्टिवत् विशीर्येत। यत् परिच्छिन्नस्थूलकार्यसामान्यं तत्तदपेक्षया सूक्ष्मपरिच्छिन्नकारणं

व्याप्यं भवितुमर्हति तद्धेतुत्वात्। यथाद्भिः पृथिवी तथा पूर्वपूर्वमुत्तरेणोत्तरेण परिच्छेद्यम्। न हि तत् स्वात्मातिरिक्तमस्ति "सत्यस्य सत्यं" इत्युक्तत्वात्। स्वातिरिक्तभूतपञ्चकतत्कार्यं सत्यं सद्विकल्पितत्वात्। तत् यत्रापह्नवपदं भजति तत् सत्यस्य सत्यं निष्प्रतियोगिकसन्मात्रमित्यर्थः। प्रकृते तु सद्विकल्पिता **आपः कस्मिन् खलु ओताश्च प्रोताश्च ? इति**। तासां कार्यत्वेन स्थूलतया परिच्छिन्नत्वात्। एवं सर्वत्र योज्यम्। **वायौ गार्गि ? इति**। अपामोतप्रोतभावोऽग्नौ वक्तव्य इति चेन्न; अग्नेरस्वतन्त्रत्वात्। न हि पार्थिवमाप्यं वा धातुमनाश्रित्य पृथिव्यादिवत् आत्मलाभः स्वतन्त्रतयास्तीति। अत एव न ह्यग्नावोतप्रोतभावो दर्शितः। **कस्मिन्नु खलु वायुरोतश्च प्रोतश्च ? इति। अन्तरिक्षलोकेषु। अन्तरिक्षलोका गन्धर्वलोकेषु गन्धर्वलोका आदित्यलोकेषु आदित्यलोकाश्चन्द्रलोकेषु चन्द्रलोका नक्षत्रलोकेषु नक्षत्रलोका देवलोकेषु देवलोका इन्द्रलोकेषु इन्द्रलोका** वैराजपदमापन्नप्रजापति**लोकेषु प्रजापतिलोका ब्रह्मलोकेषु**। अण्डारम्भकपञ्चभूततन्मात्राणि ब्रह्मलोकशब्देनोच्यन्ते। तेषां बहुत्वात् बहुवचनं युज्यते। **कस्मिन् नु खलु ब्रह्मलोका ओताश्च प्रोताश्च ? इति** पृष्टः **स होवाच** याज्ञवल्क्यः—**हे गार्गि ! मातिप्राक्षीरिति**। आगमेन प्रष्टव्यार्थमनुमानेन मातिप्राक्षीः। एवं पृच्छन्त्या **मा ते** तव **मूर्धा** शिरो **व्यपप्तत्** विस्पष्टं पतेत्। आगमविषयो हि देवताप्रश्नः। गार्गीप्रश्नस्य तदतिक्रान्तत्वात्। अतस्त्वं **अनतिप्रश्न्यां देवतां अतिपृच्छसि**। यतो मर्तुं नेच्छसि अतस्त्वं **मातिप्राक्षीः** इत्युक्ता स्वकृतापराधं विदित्वा वेपमाना सती **गार्गी वाचक्नवी उपरराम** ॥ १ ॥

इति षष्ठं ब्राह्मणम्

सप्तमं अन्तर्यामिब्राह्मणम्

सूत्रनिरूपणम्

अथ हैनमुद्दालक आरुणिः पप्रच्छ याज्ञवल्क्य! इति होवाच मद्रेष्ववसाम पतञ्जलस्य काप्यस्य गृहेषु यज्ञमधीयानाः तस्यासीद्भार्या गन्धर्वगृहीता तमपृच्छाम कोऽसीति? सोऽब्रवीत् कबन्ध आथर्वण इति सोऽब्रवीत् पतञ्जलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य! तत्सूत्रं येनायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति सोऽब्रवीत्पतञ्जलः काप्यो नाहं तद्भगवन्! वेदेति सोऽब्रवीत् पतञ्जलं काप्यं याज्ञिकाꣳश्च वेत्थ नु त्वं काप्य! तमन्तर्यामिणं य इमं च लोकं परं च लोकꣳ सर्वाणि च भूतानि योऽन्तरो यमयतीति सोऽब्रवीत्पतञ्जलः काप्यो नाहं तं भगवन्! वेदेति सोऽब्रवीत्पतञ्जलं काप्यं याज्ञिकाꣳश्च यो वै तत् काप्य! सूत्रं विद्यात् तं चान्तर्यामिणमिति स ब्रह्मवित् स लोकवित् स देववित् स वेदवित् स भूतवित् स आत्मवित् स सर्वविदिति तेभ्योऽब्रवीत् तदहं वेद तत् चेत् त्वं याज्ञवल्क्य! सूत्रमविद्वाꣳस्तं चान्तर्यामिणं ब्रह्मगवीरुदजसे मूर्धा ते विपतिष्यतीति वेद वा अहं गौतम! तत् सूत्रं तं चान्तर्यामिणमिति यो वा इदं कश्चित् ब्रूयाद्वेद वेदेति यथा वेत्थ तथा ब्रूहीति ॥ १ ॥

इदानीं ब्रह्मलोकादपि यदन्तरतमं तत्सूत्रनिरूपणं कर्तव्यमिति अन्तर्यामिब्राह्मणमारभ्यते—अथेति। अथ वाचक्नवीप्रश्नानन्तरमेनं प्रकृतं याज्ञवल्क्यं

नामत उद्दालकोऽरुणस्यापत्यमारुणिः पुरा विदितेतिहासार्थं मनसि निधाय पप्रच्छ। याज्ञवल्क्य! इति होवाच। पुरा वयं मद्रेषु देशेषु अवसाम उषितवन्तः। तदानीं नामतः पतञ्जलस्य कपिगोत्रतः काप्यस्य गृहेषु यज्ञं तच्छास्त्रमधीयाना अध्ययनं कुर्वाणाः। तस्यासीत् भार्या गन्धर्वगृहीता। तमपृच्छाम—कोऽसि? इति। सोऽब्रवीत् नामतः कबन्धः अथर्वणोऽपत्यमाथर्वण इति। सोऽब्रवीत् गन्धर्वः पतञ्जलं काप्यं याज्ञिकांश्च तच्छिष्यानस्मान्—वेत्थ हे काप्य! नु त्वं जानीषे तत् सूत्रम्। किं तत? येन सूत्रेणायं च लोकः इदं च जन्म परश्च लोकः परं च जन्म सर्वाणि च ब्रह्मादिस्तम्बान्तभूतानि सूत्रेण स्रगिव संदृब्धानि संग्रथितानि भवन्ति। त्वं तत् किं सूत्रं वेत्थ? एवं पृष्टः सोऽब्रवीत् काप्यः—नाहं तत् भगवन्! वेदेति। पुनः सोऽब्रवीत् गन्धर्वः उपाध्यायमस्मांश्च—वेत्थ नु त्वं काप्य! तमन्तर्यामिणं य इमं च लोकं परं च लोकं सर्वाणि च भूतानि योऽन्तरोऽभ्यन्तरः सन् यमयति दारुयन्त्रमिव भ्रामयतीत्यादिनान्तर्यामी विशेष्यते। एवमुक्तः सोऽब्रवीत् पतञ्जलः काप्यः—नाहं तं भगवन्! वेदेति। पुनः स गन्धर्वोऽब्रवीत्—हे काप्य! यः कश्चिदेतत् सूत्रं विद्यात् सूत्रान्तर्गतो यः तं चान्तर्यामिणं स हि ब्रह्मवित्। तद्गतविशेषांशापाये स एव परमात्मविच्च। योऽन्तर्यामी नियम्य लोकान् वेद स लोकवित्। स लोकिनोऽग्न्यादिदेवान् वेदेति स देववित्। सर्वप्रमाणभूतऋगादिवेदान् वेत्तीति स वेदवित्। अन्तर्यामिनियम्यत्वेन स्वात्मना सह सर्वाणि भूतानि वेत्तीति स भूतवित्। एवमन्तर्यामिविज्ञाने स्तुते सति अथ तदिच्छया काप्योऽभिमुखीभूतो वयं च। एवमभिमुखीभूतेभ्यस्तेभ्योऽस्मभ्यं च सूत्रमन्तर्यामिणं च स गन्धर्वोऽब्रवीत्। तदहं गन्धर्वात् लब्धागमः सन् सूत्रान्तर्यामिविज्ञानं वेद। तच्चेत् त्वं याज्ञवल्क्य! सूत्रमन्तर्यामिणं च अविद्वांश्चेत् वद। यदिह अब्रह्मविदसि ब्रह्मगवीरुदजसे ब्रह्मविदां स्वभूता गा उदजसे अन्यायेन उन्नयसि। अतो मच्छापदग्धस्य ते तव मूर्धा विपतिष्यति। एवमुक्तो याज्ञवल्क्य आह। किमिति? हे गौतम! गोत्रतः यत् गन्धर्वः तुभ्यमुक्तवान्

यत् गन्धर्वात् विदितवन्तो वयं तत् सूत्रं तमन्तर्यामिणं च वेदाहमित्युक्त इतर आह—यो वै कश्चित् त्वयोक्तमिदं ब्रूयात् वेद वेदेत्यात्मानं श्लाघयति स हि प्राकृतः। किं वृथा कत्थनेन? कार्येण तत् दर्शय यथा वेत्थ तथा ब्रूहीति ॥ १ ॥

सूत्रान्तर्यामिस्वरूपम्

स होवाच वायुर्वै गौतम! तत्सूत्रं वायुना वै गौतम! सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति तस्माद्वै गौतम! पुरुषं प्रेतमाहुर्व्यस्रꣳसिषत अस्याङ्गानीति वायुना हि गौतम! सूत्रेण संदृब्धानि भवन्तीति एवमेवैतत् याज्ञवल्क्य! अन्तर्यामिणं ब्रूहीति ॥ २ ॥

एवमाक्षिप्तो मुनिः सूत्रान्तर्यामिणोरियत्तामाह—स हेति। वर्तमानकाले ब्रह्मलोका यस्मिन् ओताश्च प्रोताश्च अप्सु पृथिवीव तत्सूत्रमागमगम्यतया वक्तव्यमिति गार्गीप्रश्ननिर्णयाय च स होवाच याज्ञवल्क्यः—वायुर्वै गौतम! तत् सूत्रम्। किं तत्? यत् पृथिव्यादीनामाकाशवत् विष्टम्भकं यदात्मकं कर्म वासनासमवायि सप्तदशात्मकं लिङ्गं व्यष्टिसमष्ट्यात्मकं यद्बाह्यभेदाः समुद्रोर्मय इव सप्त सप्त मरुद्गणाः तद्धि वायव्यतत्त्वं सूत्रं भवति नान्यत्। वायुना गौतम! सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि संग्रथितानि भवन्तीति लोके प्रसिद्धिः। यस्मात् वायुः सूत्रं तस्य सर्वविधृतत्वात् तस्मात् गौतम! पुरुषं प्रेतमुद्दिश्य इदमाहुः। किमिति? सूत्रापगमतो मणिविस्रंसनमिवास्याङ्गानि व्यस्रंसिषतेति। वायुर्हि सूत्रम्। अस्य पुरुषस्याङ्गान्यस्मिन् मणिवत् प्रोतानि वायुना सूत्रेण संदृब्धानि भवन्तीति ह याज्ञवल्क्य! त्वया यदुक्तं तदेवमेव सम्यगुक्तम् ॥ २ ॥

अन्तर्यामिणः सूत्रनियन्तृत्वम्

यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ३ ॥ योऽप्सु तिष्ठन् अद्भ्योऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ४ ॥ योऽग्नौ तिष्ठन् अग्नेरन्तरो यमग्निर्न वेद यस्याग्निः शरीरं योऽग्निमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ५ ॥ योऽन्तरिक्षे तिष्ठन् अन्तरिक्षादन्तरो यमन्तरिक्षं न वेद यस्यान्तरिक्षꣳ शरीरं योऽन्तरिक्षमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ६ ॥ यो वायौ तिष्ठन् वायोरन्तरो यं वायुर्न वेद यस्य वायुः शरीरं यो वायुमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ७ ॥ यो दिवि तिष्ठन् दिवोऽन्तरो यं द्यौर्न वेद यस्य द्यौः शरीरं यो दिवमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ८ ॥ य आदित्ये तिष्ठन् आदित्यादन्तरो यमादित्यो न वेद यस्यादित्यः शरीरं य आदित्यमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ९ ॥ यो दिक्षु तिष्ठन् दिग्भ्योऽन्तरो यं दिशो न विदुर्यस्य दिशः शरीरं यो दिशोऽन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ १० ॥ यश्चन्द्रतारके तिष्ठꣳश्चन्द्रतारकादन्तरो यं चन्द्रतारकं न वेद यस्य चन्द्रतारकꣳ शरीरं यश्चन्द्रतारकमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ ११ ॥ य आकाशे तिष्ठन् आकाशादन्तरो

यमाकाशो न वेद यस्याकाशः शरीरं य आकाशमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ १२ ॥ यस्तमसि तिष्ठꣳस्तमसोऽन्तरो यं तमो न वेद यस्य तमः शरीरं यस्तमोऽन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ १३ ॥ यस्तेजसि तिष्ठꣳस्तेजसोऽन्तरो यं तेजो न वेद यस्य तेजः शरीरं यस्तेजोऽन्तरो यमयति एष त आत्मान्तर्याम्यमृत इत्यधिदैवतमथाधिभूतम् ॥ १४ ॥ यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यꣳ सर्वाणि भूतानि न विदुर्यस्य सर्वाणि भूतानि शरीरं यः सर्वाणि भूतान्यन्तरो यमयति एष त आत्मान्तर्याम्यमत इत्यधिभूतमथाध्यात्मम् ॥ १५ ॥ यः प्राणे तिष्ठन् प्राणादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ १६ ॥ यो वाचि तिष्ठन् वाचोऽन्तरो यं वाक् न वेद यस्य वाक् शरीरं यो वाचमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ १७ ॥ यश्च-क्षुषि तिष्ठꣳश्चक्षुषोऽन्तरो यं चक्षुर्न वेद यस्य चक्षुः शरीरं यश्चक्षु-रन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ १८ ॥ यः श्रोत्रे तिष्ठन् श्रोत्रादन्तरो यꣳ श्रोत्रं न वेद यस्य श्रोत्रꣳ शरीरं यः श्रोत्रमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ १९ ॥ यो मनसि तिष्ठन् मनसोऽन्तरो यं मनो न वेद यस्य मनः शरीरं यो मनोऽन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ २० ॥ यस्त्वचि तिष्ठꣳस्त्वचोऽन्तरो यं त्वक् न वेद यस्य त्वक् शरीरं यस्त्व-

चमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ २१ ॥ यो विज्ञाने तिष्ठन् विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानꣳ शरीरं यो विज्ञानमन्तरो यमयति एष त आत्मान्तर्याम्यमृतः ॥ २२ ॥

इदानीं सूत्रनियन्तारमन्तर्यामिणं ब्रूहीति एवमुक्त आह—**यः पृथिव्या-मित्यादिना**। **यः पृथिव्यां** तिष्ठति सोऽन्तर्यामी। **पृथिव्या अन्तरः** तदभ्यन्तरत्वात्। पृथिव्यभिमानिदेवतैवान्तर्यामीत्यत आह—**यमिति**। मय्यन्यः कश्चित् प्रेरयितास्तीति **पृथिवी** देवतापि **न वेद**। **यस्य पृथिवी शरीरं** शरीरग्रहणं सर्वकरणानामुपलक्षणार्थम्। पृथिवीदेवताकरणग्रामप्रवृत्तिनिमित्त-मन्तर्यामी **य** ईश्वरः **पृथिवीमन्तरनुप्रविश्य यमयति** नियमयति **एष ते** तव मम सर्वभूतानां **चात्मा**। यस्त्वया पृष्ट **एषोऽन्तर्याम्यमृतः**। अन्तर्यामिणः सर्वभूत-गतसंसारधर्मास्पष्टत्वादमृतत्वं युज्यते। योऽप्सु तिष्ठन्नित्यादि सर्वं समान-मित्याह—**योऽप्सु तिष्ठन्** इत्यादि ॥ ३–२२ ॥

पृथिव्यादीनां स्वान्तर्याम्यवेदने मूलहेतुः

यो रेतसि तिष्ठन् रेतसोऽन्तरो यꣳ रेतो न वेद यस्य रेतः शरीरं यो रेतोऽन्तरो यमयति एष त आत्मान्तर्याम्यमृतः अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञाता नान्योऽतो-ऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्यो-ऽतोऽस्ति विज्ञाता एष त आत्मान्तर्याम्यमृतः अतोऽन्यदार्तं ततो ह उद्दालक आरुणिरुपरराम ॥ २३ ॥

महाभागा हि पृथिव्यादिदेवताः। ताः कथं मनुष्यादिवत् नियन्तृत्वेन स्वात्मनि तिष्ठन्तमन्तर्यामिणं न विदुः? इत्यत आह—**अदृष्ट** इति। कस्याप्य-विषयत्वेन न दृष्टः तथापि स्वयं दृग्रूपतया **सर्वद्रष्टा**। तथायम**श्रुतः** श्रोत्रा-

गोचरत्वात् । श्रोत्रप्रवृत्तिनिमित्तत्वात् स्वयं श्रोता । तथायममतः मनोविलक्षणत्वात् । सर्वो हि लोको दृष्टश्रुते हि संकल्पयति । यतोऽयमदृष्टोऽश्रुतः मानसवृत्तिसहस्रप्रवृत्तिनिमित्तत्वेनालुप्तमनःशक्तित्वात् सर्वमानसवृत्तिमन्ता । तथायं रूपादिवदविज्ञातः अलुप्तविज्ञानशक्तित्वात् । ज्ञप्तिमात्रतयायं विज्ञाता । तत्र यं पृथिवी न वेद यं सर्वाणि भूतानि न विदुः इत्यत्र स्वातिरिक्तद्रष्ट्राद्यभावात् **नान्योऽतोऽस्ति द्रष्टा** । तथा **नान्योऽतोऽस्ति श्रोता** । तथा **नान्योऽतोऽस्ति मन्ता** । तथा **नान्योऽतोऽस्ति विज्ञाता** । यस्मात् स्वातिरेकेण द्रष्टा श्रोता मन्ता विज्ञाता च न विद्यते तस्मादयमदृष्टोऽश्रुतोऽमतोऽविज्ञातोऽमृतः । **एष ते आत्मान्तर्याम्यमृतः । अतोऽस्मादीश्वरात् अन्यदार्तम् । ततो ह उद्दालक आरुणिरुपरराम** ॥ २३ ॥

इति सप्तमं ब्राह्मणम्

अष्टमं वाचक्नवीब्राह्मणम्

गार्ग्याः याज्ञवल्क्यं प्रति प्रश्नानुज्ञाप्रार्थना

अथ ह वाचक्नवी उवाच ब्राह्मणा भगवन्तो हन्त ! अहमिमं द्वौ प्रश्नौ प्रक्ष्यामि तौ चेन्मे वक्ष्यति न वै जातु युष्माकमिमं कश्चित् ब्रह्मोद्यं जेतेति पृच्छ गार्गि ! इति ॥ १ ॥

यत् साक्षादपरोक्षात् ब्रह्म स्वाज्ञविकल्पितसर्वान्तरं वस्तुतो निष्प्रतियोगिकस्वमात्रमवशिष्यत इति प्रकटनार्थं वाचक्नवीब्राह्मणमारभ्यते---अथेति । **अथ ह** उद्दालकोपरत्यनन्तरं पुरा मूर्धपातभयादुपरतापि पुनस्तं प्रष्टुं ब्राह्मणानुज्ञामाकांक्षती **वाचक्नवी उवाच**—हे **ब्राह्मणाः** ! **भगवन्तो** यूयं मम वचः

शृणुत । किं तत् ? हन्त ! अहमिमं याज्ञवल्क्यं पुनर्द्वौ प्रश्नौ प्रक्ष्यामि । यद्यनुमतिर्भवतां यद्ययं मत्प्रश्नद्वयोत्तरं वक्ष्यति तदा युष्माकं मध्ये याज्ञवल्क्यमिमं ब्रह्मोद्यं ब्रह्मवदनं प्रति जेता न वै कश्चित् भवेत् । तयैवमुक्ता ब्राह्मणाः पृच्छ गार्गि ! इत्यनुज्ञां ददुः ॥ १ ॥

गार्ग्याः स्वप्रश्नप्रशंसा

सा होवाच अहं वै त्वा याज्ञवल्क्य ! यथा काश्यो वा वैदेहो वा उग्रपुत्र उज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वा उपोत्तिष्ठत् एवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यामुपोदस्थां तौ मे ब्रूहीति पृच्छ गार्गि ! इति ॥ २ ॥

लब्धानुज्ञा याज्ञवल्क्यं पृच्छति—सा हेति । या पुरा भवता निरुद्धा साहं वै त्वा याज्ञवल्क्य ! यथा लोके काशीदेशभवः काश्यः प्रख्यातवीर्यः तथा विदेहानां राजा वैदेहो वा शूरान्वयजत्वादुग्रपुत्रः अवतारितज्याकमुज्ज्यं धनुरधिज्यमारोपितज्याकं कृत्वा द्वौ बाणवन्तौ बाणविशिष्टचापौ सपत्नातिव्याधिनौ शत्रुतापनदक्षौ हस्ते कृत्वा उपोत्तिष्ठेत् परेषां स्वात्मशौर्य दर्शयेत्, एवमेवाहं त्वा द्वाभ्यां शरस्थानीयप्रश्नाभ्यां उपोदस्थां त्वत्समीप उत्थितवत्यस्मि । यदि त्वं ब्रह्मवित् तदा तौ मे ब्रूहि इति । इतर आह—पृच्छ गार्गि ! इति ॥ २ ॥

सूत्रं कस्मिन् ओतमिति गार्गीप्रश्नः

सा होवाच यदूर्ध्वं याज्ञवल्क्य ! दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिंस्तदोतं च प्रोतं च ? इति ॥ ३ ॥

लब्धानुज्ञा सैनं पृच्छति—सा हेति। सा **होवाच**—**यदूर्ध्वमुपरि दिवो**ऽण्डकपालात् **यत् पृथिव्या अवाक्** अधोऽण्डकपालात् **यच्च द्यावा-पृथिव्योरन्तरा** मध्ये **इमे** द्यावापृथिव्यौ **यत् भूतं** चातीतं **भवच्च** वर्तमानं **भविष्यच्च** वर्तमानादूर्ध्वभावि यत् सर्वमेतदा**चक्षते** श्रुतिविदः। द्वैतजातं यत्रैकं भवति **कस्मिन्नेतत् सर्वमोतं च प्रोतं चेति**? अप्सु पृथिवीव ॥ ३ ॥

सूत्रमाकाशे ओतं प्रोतमिति

स होवाच यदूर्ध्वं गार्गि! दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाशे तदोतं च प्रोतं चेति ॥ ४ ॥

प्रश्नोत्तरं मुनिराह—स हेति। **स होवाच** मुनिः—हे **गार्गि**! यदूर्ध्वं **दिवः** इत्यादिना। **यत्** त्वयोक्तं तत् सर्वं सूत्रमित्याचक्षते। **तत्** सूत्रमा**काशे ओतं च प्रोतं च** भवति। यदेतत् व्याकृतं सूत्रं पृथिव्यप्स्विव कालत्रयेऽप्य-व्याकृताकाशे ओतप्रोततया वर्तते ॥ ४ ॥

गार्ग्याः तुष्टिः प्रश्नान्तरप्रार्थना च

सा होवाच नमस्तेऽस्तु याज्ञवल्क्य! यो म एतं व्यवोचो-ऽपरस्मै धारयस्वेति पृच्छ गार्गि! इति ॥ ५ ॥

स्वप्रश्नपूरणतः सन्तुष्टा वाचक्नवी आह—**सा** हेति। पुनः **सा होवाच**। **यो ममैतं** प्रश्नं **व्यवोचो** विशेषेणापाकृतवानसि। सूत्रमेव तावदितरैः दुर्वचं, त्वं तु तदधिकरणमपि ब्रवीषि। अतो **नमस्ते** तुभ्यम**स्तु**। **अपरस्मै** द्वितीय-प्रश्नाय मनो **धारयस्व** इत्युक्तः प्रत्याह—**पृच्छ गार्गि**! **इति** ॥ ५ ॥

आकाशः कस्मिन् ओतः प्रोत इति

सा होवाच यदूर्ध्वं याज्ञवल्क्य ! दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते कस्मिँस्तदोतं च प्रोतं च ? इति ॥ ६ ॥ स होवाच यदूर्ध्वं गार्गि ! दिवो यदवाक् पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्चेत्याचक्षते आकाश एव तदोतं च प्रोतं चेति कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्च ? इति ॥ ७ ॥

वाचक्नवी प्रश्नान्तरं पृच्छति—सा हेति। **सा होवाच—यदूर्ध्व**मित्यादि समानम् ॥ ६ ॥ स हेति। "सा होवाच" इत्यादिगार्ग्युक्तिमनूद्य सर्वमाकाश एव तदोतं च प्रोतं च इत्युक्त्वा उपरराम। पुनः सा होवाच—**कस्मिन् खल्वाकाश ओतश्च प्रोतश्च ? इति।** आकाशवाच्येश्वरस्य कालापरिच्छिन्नत्वेन दुर्वाच्यत्वम्। ततोऽपि दुर्वाच्यः तदधिकरणविषयकप्रश्न इत्यर्थः ॥ ७ ॥

अक्षरस्वरूपकथनम्

स होवाच एतद्वै तदक्षरं गार्गि ! ब्राह्मणा अभिवदन्ति अस्थूलमनणु अह्रस्वमदीर्घमलोहितमस्नेहमच्छायमतमोऽवायु अनाकाशमसङ्गमरसमगन्धमचक्षुष्कमश्रोत्रमवागमनोऽतेजस्कमप्राणममुखममात्रमनन्तरमबाह्यं न तदश्नाति किंचन न तदश्नाति कश्चन ॥ ८ ॥

गार्गी एवं मन्यते—मत्पृष्टप्रश्नः दुर्वचनीयः। कथमयं तदपाकरिष्यति ? इति। तत् लीलया परिजिहीर्षन् मुनिराह—स हेति। **स होवाच** याज्ञवल्क्यः—कस्मिन् खल्वाकाश ओतश्च प्रोतश्च ? इति यत् पृष्टवत्यसि काल-

त्रयेऽपि यत् न क्षीयते न क्षरतीति वा तदेतदक्षरं त्वदुक्ताकाशाधिकरणम्। एवं न केवलं मयोच्यते, किन्तु हे **गार्गि!** तदेतदक्षरं स्वातिरिक्ताविद्यापदतत्कार्यभूतभौतिकारोपापवादाधिकरणतया वस्तुतो निरधिकरणनिष्प्रतियोगिकस्वमात्रतया च ब्रह्मयाथात्म्यविदो **ब्राह्मणा अभिवदन्ति**। अभिवदन्तीत्यनेनावाच्यकथनं तदप्रतिपत्तिश्च दोषद्वयं परिहृतं स्यात्। किं तत् ब्राह्मणा अभिवदन्ति? तत् ब्रूहि इत्युक्त आह—**अस्थूल**मित्यादिना। स्वाज्ञदृष्टिविकल्पितस्थूलाण्वादिपरिमाणो यद्बोधसमकालमक्षरमात्रपदं भजति तत् **अस्थूलं अनणु अह्रस्वमदीर्घं** स्थूलादिपरिमाणचतुष्टयप्रतिषेधतो द्रव्यत्वं प्रतिषिद्धं स्यात्। द्रव्यत्वाभावेऽपि गुणत्वं स्यात् इत्यत आह—**अलोहित**मिति। लोहिताग्नेयगुणान्यत्वात्। तथा **अस्नेहं** स्नेहगुणनीरविलक्षणत्वात्। अस्तु, तर्हि सच्छायमिदं स्यात् इत्यत आह—**अच्छाय**मिति। स्वाविद्या तत्कार्यबुद्धिः वा च्छाया। तद्विलक्षणत्वात्। अस्तु, तर्हि तमो वा स्यात् **अतमः** स्वयंप्रकाशरूपत्वात्। तथेदम**वायु अनाकाशं** पञ्चभूतविलक्षणत्वात्। अत एव केनाप्य**सङ्गम्**। तथा **अरसमगन्धं** पञ्चतन्मात्रविलक्षणत्वात्। तथेदम**चक्षुष्कमश्रोत्रमवाक्** ज्ञानकर्मेन्द्रियविलक्षणत्वात्। "पश्यत्यचक्षुः स शृणोत्यकर्णः" इत्यादिश्रुतेः। तथेदम**मनोऽतेजस्कं** अन्तःकरणभूततेजोविलक्षणत्वात्। तथेदम**प्राण**माध्यात्मिकवायुविलक्षणत्वात्। तथेदम**मुखं** नीरन्ध्रत्वात्। तथेदम**मात्रं** तुरीयत्वात्। "अमात्रश्चतुर्थोऽव्यवहार्यः" इति श्रुतेः। तथेदम**नन्तरमबाह्य**मन्तर्बाह्यविभागहेतुस्थूलकायविलक्षणत्वात्। तर्हि एतत् सर्वग्रासं, तत्र **न तदश्नाति किञ्चन** स्वातिरिक्ताशनासंभवात्। तर्हि स्वयं वा कस्यचिदशनं स्यात्, **न तदश्नाति कश्चने**ति। एतदक्षरं वस्तुतः सर्वविशेषकलनाविरलमित्यर्थः॥ ८॥

अक्षरस्यास्तित्वे अनुमानोपन्यासः

एतस्य वा अक्षरस्य प्रशासने गार्गि! सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि! द्यावापृथिव्यौ

विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि! निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा इति विधृतास्तिष्ठन्ति एतस्य वा अक्षरस्य प्रशासने गार्गि! प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां च दिशमनु एतस्य वा अक्षरस्य प्रशासने गार्गि! ददतो मनुष्याः प्रशंसन्ति यजमानं देवा दर्वीं पितरोऽन्वायत्ताः ॥ ९ ॥

इत्थंभूतमक्षरं नास्तीत्याशंकायां लोकबुद्धिमनुसृत्य तदस्तित्वायानुमानमुपन्यस्यति—**एतस्येति**। यदेव साक्षात् अपरोक्षात् ब्रह्म अशनायादिधर्मातीतं **एतस्य वा अक्षरस्य प्रशासने गार्गि!** राजशासनानुवर्तिराष्ट्रवत् सूर्यश्च चन्द्रमाश्च **सूर्याचन्द्रमसौ** लोकाहोरात्रप्रकाशकदीपवत् **विधृतौ तिष्ठतः** स्याताम्। सूर्याचन्द्रमसौ लोकप्रकाशकर्मणि नियुक्तौ प्रकाशार्थत्वात्। मणिप्रदीपादिवत् येन ईश्वरेण विधृतौ सूर्याचन्द्रमसौ उदयास्तमयवृद्धिक्षयाभ्यां वर्तेते तत् सर्वप्रशासकमक्षरं अस्त्येव सर्वोद्दीपकत्वेन सर्वविधारकत्वात्। **एतस्य वा अक्षरस्य प्रशासने गार्गि!** द्यौश्च पृथिवी च द्यावापृथिव्यौ सावयवत्वगुरुत्वाभ्यां स्फुटनपतनस्वभावे अपि स्वभावविपरीतं **विधृते तिष्ठतः**। इतश्चाप्यक्षरमस्ति "येन द्यौरुग्रा पृथिवी च दृढा" इति श्रुतेः। किञ्च **एतस्य वा अक्षरस्य प्रशासने गार्गि! निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋतवः संवत्सरा** इत्यतीतानागतवर्तमानकलनाकलयितारः कालावयवाः प्रभुनियमितगणकवत् स्वस्वकलनां कलयन्ति। नासति प्रशास्तरि तदुपपद्यते। तथा **श्वेतेभ्यो** हिमवदादिपर्वतेभ्यः प्रागञ्चनात् **प्राच्यो** गङ्गाद्या **नद्यः स्यन्दन्ते** स्रवन्ति। तथा **प्रतीच्योऽन्याः** सिन्ध्वाद्याः ताः तां **दिशं** न व्यभिचरन्ति। इतश्चापि तत्प्रशासकमक्षरमस्ति। **एतस्य वा अक्षरस्य प्रशासने** हिरण्यादीन् **ददतः** प्रयच्छतो **मनुष्याः प्रशंसन्ति**। तत्र यच्च दीयते ये वा ददति ये च प्रतिगृह्णन्ति तेषामिहैव समागमो विलयश्च दृश्यते। तथापि

मनुष्या ददतां दानफलसंयोगं पश्यन्तः प्रशंसन्ति । नासति कर्मफलप्रदातरि तदुपपद्यते । तस्मादस्ति दानादिकर्मफलसंयोजयितृत्वेनाक्षरम् । तदपूर्वमिति चेन्न ; तत्संभवप्रमाणानुपपत्तेः । तथाक्षरसद्भावेऽपीति चेन्न ; तत्सद्भावप्रकाशकवेदशास्त्र-पुराणादीनां विद्यमानत्वात् तत्प्रतिपाद्यमक्षरमस्त्येव । तथा च **यजमानं देवाः** स्वयमीश्वरा अपि चरुपुरोडाशाद्युपजीवनप्रयोजना उपजीवन्ति । तथा **पितरो दर्वीं** दर्वीहोममन्वायत्ताः अनुगताः । एवं प्रशास्तुः प्रशासनादित्यर्थः ॥ ९ ॥

ज्ञानाज्ञानतत्फलसंयोजयितृत्वेनाक्षरस्यास्तित्वम्

योवा एतदक्षरं गार्गि ! अविदित्वाऽस्मिँल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्गि ! अविदित्वास्माल्लोकात्प्रैति स कृपणः अथ य एत-दक्षरं गार्गि ! विदित्वास्माल्लोकात्प्रैति स ब्राह्मणः ॥ १० ॥

इतश्चाप्यक्षरं ज्ञानाज्ञानतत्फलसंयोजयितृत्वेनास्तीत्याचष्टे—**यो वा** इति । हे **गार्गि ! यो वा एतदक्षरमविदित्वा**विज्ञाया**स्मिन् लोके बहूनि वर्षसहस्राणि जुहोति यजते तपस्तप्यते** तत् फल**मन्तवदेव भवति** पुण्यक्षयसापेक्षत्वात् । किंच **यो वा एतदक्षरं गार्गि ! अविदित्वा अस्मात् लोकात् प्रैति स कृपणः** पणक्रीतदासादिवत् स्वकृतफलं भुक्त्वा तत्क्षयतः पुनः पुनर्घटीयन्त्रवत् जन्ममरणे प्रतिपद्याभूतसंप्लवं संसरति । **अथ य एतदक्षरं विदित्वास्मात् लोकात् प्रैति** अक्षरातिरिक्तलोको नास्ति तदक्षरमहमेवेति जानाति **स** हि **ब्राह्मणः** । यदज्ञानज्ञानाभ्यां कार्पण्यब्राह्मण्यसिद्धिः तथाविधमक्षरमस्त्येव ॥ १० ॥

अक्षरस्य स्वाभाविकस्वरूपकथनम्

तद्वा एतदक्षरं गार्गि ! अदृष्टं द्रष्टृ अश्रुतꣳ श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ

नान्यदतोऽस्ति मन्तृ नान्यदतोऽस्ति विज्ञातृ एतस्मिन्नु खल्वक्षरे गार्गि ! आकाश ओतश्च प्रोतश्चेति ॥ ११ ॥

कथं पुनः तदक्षरं ? इत्यत आह—तद्वा इति। यस्याग्नेर्दहनप्रकाशशक्तिवत् सर्वप्रवृत्तिनिमित्ततया प्रशास्तृत्वं वस्तुतः स्वातिरिक्तकलनापह्नवसिद्धनिष्प्रतियोगिकस्वमात्रत्वं च स्वाज्ञस्वज्ञदृष्टिभ्यां सिद्धम्। हे गार्गि ! अदृष्टमविषयत्वात् स्वातिरिक्तद्रष्ट्रभावाच्च। स्वयं तु स्वाज्ञदृष्टिप्रसक्तसर्वद्रष्टृ विज्ञप्तिमात्रस्वरूपत्वात् "स वेत्ति वेद्यं न च तस्यास्ति वेत्ता" इति श्रुतेः। तथेदमश्रुतं श्रोत्राविषयत्वात्। स्वयं तु सर्वश्रोतृ श्रोत्रश्रवणशक्तिजनकत्वात्। तथेदममतं मनोवृत्त्यविषयत्वात्। स्वयं तु मन्तृ मतिस्वरूपत्वात्। तथेदं केनाप्यविज्ञातं बुद्धिसामान्यप्रत्ययाविषयत्वात्। स्वयं तु विज्ञातृ विज्ञानस्वरूपत्वात्। यत एवमतोऽस्मादक्षरादतिरेकेण द्रष्टृ श्रोतृ मन्तृ विज्ञातृ न कदाप्यस्ति। एतदक्षरमेव स्वाज्ञादिदृष्ट्यनुरोधेन दर्शनश्रवणमननविज्ञानक्रियाकर्तृवदवभासते। वस्तुतो निष्प्रतियोगिकस्वमात्रं हि। तदेतस्मिन् खल्वक्षरे गार्गि ! आकाशः ओतश्च प्रोतश्चेति। यदेव साक्षादपरोक्षात् ब्रह्म यदेतत् पृथिव्याद्यव्यक्तान्तसत्यस्य सत्यं स्वातिरिक्तपृथिव्यादिगतहेयांशापाये निष्प्रतियोगिकसन्मात्रं एतदेवाक्षरमित्यर्थः ॥ ११ ॥

गार्ग्या याज्ञवल्क्यप्रशंसा

सा होवाच ब्राह्मणा भगवन्तः ! तदेव बहुमन्येध्वं यदस्मान्नमस्कारेण मुच्येध्वं न वै जातु युष्माकमिमं कश्चिद्ब्रह्मोद्यं जेतेति ततो ह वाचक्नवी उपरराम ॥ १२ ॥

एवं स्वकृतप्रश्नद्वयपूरणतो याज्ञवल्क्यमकुण्ठितशक्तिमदीश्वरं मत्वा ब्राह्मणानां ब्रह्मवित्पणनैराश्यं जनयन्ती ब्राह्मणान् प्रति वाचक्नवी उवाच—सा हेति। हे ब्राह्मणा भगवन्तः ! यूयं मदीयां वाचं शृणुत। तदेव बहुमन्येध्वं मन्यध्वम्। नमस्कृत्वाकुण्ठितशक्तयेऽस्मै तस्मादस्माद्याज्ञवल्क्यान्नमस्कारेण

मुच्येध्वमिति यन्मयोच्यते तदेव बहुमन्यध्वम्। मनसाप्ययं जेतुं न हि शक्यो भवति। किमुत वादतः? न वै जात्वपि युष्माकं मध्ये कश्चिदप्येनं ब्रह्मोद्यं याज्ञवल्क्यं जेतुं भविता। मत्प्रश्नद्वयमनेन लीलयापाकृतम्। पूर्वमेव भवन्निकटे मया विज्ञापितं खलु। एतत्तुल्यो न कोऽप्यस्तीति प्रतिभातीत्युक्त्वा वाचक्नवी उपरराम ॥ १२ ॥

इति अष्टमं ब्राह्मणम

नवमं शाकल्यब्राह्मणम्

शाकल्येन देवताविषयकप्रश्नः

अथ हैनं विदग्धः शाकल्यः पप्रच्छ कति देवा याज्ञवल्क्य! इति? स ह एतयैव निविदा प्रतिपेदे यावन्तो वैश्वदेवस्य निविदि उच्यन्ते त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ओमिति होवाच कत्येव देवा याज्ञवल्क्य! इति? त्रयस्त्रिꣳशदिति ओमिति होवाच कत्येव देवा याज्ञवल्क्य! इति? षडिति ओमिति होवाच कत्येव देवा याज्ञवल्क्य! इति? त्रय इति ओमिति होवाच कत्येव देवा याज्ञवल्क्य! इति? द्वाविति ओमिति होवाच कत्येव देवा याज्ञवल्क्य! इति? अध्यर्ध इति ओमिति होवाच कत्येव देवा याज्ञवल्क्य! इति? एक इति ओमिति होवाच कतमे ते? त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति ॥ १ ॥

पृथिव्यादीनां स्थूलसूक्ष्मतरतमभावमवष्टभ्य पूर्वपूर्वस्य उत्तरोत्तरस्मिन् ओतप्रोततया सर्वान्तरं ब्रह्म प्रकाशितम्। तस्यैव साक्षादपरोक्षत्वे नियन्तृ-देवताभेदसङ्कोचविकासाधिगमाय इदं शाकल्यब्राह्मणमारभ्यते—**अथेति**। **अथ ह** वाचक्नव्युपरत्यनन्तरं नामतो **विदग्धः** शकलस्यापत्यं **शाकल्यः** पप्रच्छ। हे **याज्ञवल्क्य**! इति तं स्वाभिमुखीकृत्य **कतिसंख्याका देवा इति**। स याज्ञवल्क्यो ह किल वक्ष्यमाणया **एतया निविदा** देवतासंख्यावाचकमन्त्रपद-रूपया शाकल्यो वैश्वदेवशस्त्रविहितदेवतासंख्यायां पृष्ट इति **प्रतिपेदे**। **यावन्तो वैश्वदेवस्य** शस्त्रस्य **निविदि** संख्यायां तद्वाचकमन्त्रपदानि वैश्वदेवशस्त्रे शस्यन्ते तानि निवित्संज्ञकानि स्युः। तस्यां निविदि यावन्तो देवाः श्रूयन्ते। इतर आह—**त्रयश्च त्री च शता त्रयश्च** देवतानां **त्री च** त्रीणि च शता शतानि। पुनरप्येवं **त्रयश्च त्री च सहस्रा** सहस्राणि। एतावन्तो वै देवा इति याज्ञवल्क्येनाभिहितम्। तत् शाकल्योऽप्योमिति **होवाच**। त्वयैवमेषां मध्यमा संख्या सम्यगुक्ता। पुनरयं याज्ञवल्क्य! इति संबोध्य देवतासङ्कोचविषयसंख्यां पृच्छति—**कत्येव देवा याज्ञवल्क्य! इति**। **त्रयस्त्रिंशत् षट् त्रयो द्वावध्यर्ध एक इति**। एवं देवताविषयसंख्यां पृष्ट्वा पुनः संख्येयस्वरूपं पृच्छति—**कतमे ते**? **त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेति** ॥ १ ॥

त्रयस्त्रिंशद्देवताप्रश्नः उत्तरं च

स होवाच महिमान एवैषामेते त्रयस्त्रिंꣳशत्त्वेव देवा इति कतमे ते त्रयस्त्रिंꣳशदिति? अष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंꣳशदिन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंꣳशाविति ॥ २ ॥

प्रश्नोत्तरमाह इतरः—**स हेति**। **एषां महिमानो** विभूतयः त्रयस्त्रिंशतं देवानां **एते** त्रयश्च त्री च शतेत्येवमादयः। वस्तुतस्तु **त्रयस्त्रिंशत्त्वेव देवा इति**। **कतमे ते** त्रयस्त्रिंशत्संख्याका देवाः? इत्यत्र—**अष्टौ वसव एकादश रुद्रा द्वादशादित्याः** ते **एकत्रिंशत्**। **इन्द्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति** संख्यापूरकावित्यर्थः ॥ २ ॥

वसुविशेषकथनम्

कतमे वसव इति? अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च चन्द्रमाश्च नक्षत्राणि च एते वसव एतेषु हीदं सर्वꣳ वसु हितमिति तस्माद्वसव इति ॥ ३ ॥

तत्र वसूनां विशेषं पृच्छति—**कतमे**? इति। **कतमे वसवः**? इत्यत्र **अग्न्याद्या नक्षत्रान्ता एते वसवः**। कार्यकरणसंघातावच्छिन्नप्राणिजातकर्मफलाश्रयतया ये सर्वं जगदिदं वासयन्ति स्वयं तत्र वसन्ति च। यस्मादेवं **तस्मात् वसव इति** ॥ ३ ॥

रुद्रविशेषकथनम्

कतमे रुद्रा इति? दश इमे पुरुषे प्राणा आत्मा एकादशस्ते यदास्माच्छरीरान्मर्त्यादुत्क्रामन्ति अथ रोदयन्ति तद्यत् रोदयन्ति तस्माद्रुद्रा इति ॥ ४ ॥

अथ रुद्रविशेषं पृच्छति—**कतमे**? इति। **कतमे रुद्राः**? इत्यत्र **दश इमे पुरुषे प्राणाः** कर्मज्ञानेन्द्रियाणि **आत्मा** तदनुग्राहकं मन **एकादशः**। **ते** सर्वे प्राणा **यदास्माच्छरीरात् मर्त्यात्** प्राणिकर्मफलक्षयत **उत्क्रामन्ति, अथ** तदा **रोदयन्ति**। **यत्** यस्मादेवं **रोदयन्ति तस्मात्** ते **रुद्रा इति** ॥ ४ ॥

आदित्यविशेषकथनम्

कतम आदित्या इति? द्वादश वै मासाः संवत्सरस्य एत आदित्या एते हीदꣳ सर्वमाददाना यन्ति ते यदिदꣳ सर्वमाददाना यन्ति तस्मादादित्या इति ॥ ५ ॥

तत आदित्यविशेषं पृच्छति—**कतमे ? इति । कतमे आदित्याः ?** इत्यत्र कालात्मकसंवत्सरस्यावयवा **द्वादश वै मासाः** प्रसिद्धा एते ह्यादित्याः । यस्मात् पुनः पुनः परिवर्तमानाः सन्तः प्राणिनामायूंषि कर्मफलानि चाददाना गृह्णन्तो यन्ति गच्छन्ति । **यत्** यस्मादिदं **सर्वमाददाना यन्ति तस्मादेते आदित्याः ॥ ५ ॥**

इन्द्रादिविशेषकथनम्

कतम इन्द्रः ? कतमः प्रजापतिः इति ? स्तनयित्नुरेव इन्द्रो यज्ञः प्रजापतिरिति कतमः स्तनयित्नुः इति ? अशनिरिति कतमो यज्ञ इति ? पशव इति ॥ ६ ॥

तत इन्द्रादिविशेषं पृच्छति—**कतमः ? इति । कतम इन्द्रः ? कतमः प्रजापतिः ?** इत्यत्र **स्तनयित्नुरेव इन्द्रो यज्ञः प्रजापतिः इति । कतमः स्तनयित्नुः ? इति । अशनिरिति** वज्रम् । यः प्राणिवीर्यं प्रमापयति स हीन्द्रः तत्कर्म । तत् **कतमो यज्ञः ? इति । पशव इति ।** पशूनां यज्ञसाधनत्वात् यज्ञत्वव्यपदेशः ॥ ६ ॥

षट्स्वरूपकथनम्

कतमे षट् इति ? अग्निश्च पृथिवी च वायुश्चान्तरिक्षं चादित्यश्च द्यौश्च एते षट् एते हीदꣳ सर्वꣳ षडिति ॥ ७ ॥

षट्संख्यापूरकाः के ? इति पृच्छति—**कतमे ? इति । कतमे षट् ?** इत्यत्र पुराग्न्यादयो वसुत्वेन पठिताः । तत्र चन्द्रमसं नक्षत्राणि च वर्जयित्वा षट् भवन्ति । पूर्वोक्तत्रयस्त्रिंशादिविस्तारः **सर्वं षडेव** । वस्वादिविस्तारोऽप्यत्रैवा-न्तर्भवतीत्यर्थः ॥ ७ ॥

त्रिस्वरूपकथनम्

कतमे ते त्रयो देवाः इति ? इम एव त्रयो लोका एषु हीमे सर्वे देवा इति कतमौ तौ द्वौ देवौ इति ? अन्नं चैव प्राणश्चेति कतमोऽध्यर्ध इति ? योऽयं पवत इति ॥ ८ ॥

अथ त्रयआद्यध्यर्धान्तं पृच्छति—कतमे ? इति । **कतमे ते त्रयो देवाः** ? इत्यत्र पृथिवीमग्निं चैकीकृत्य एको देवः । अन्तरिक्षं वायुं चैकीकृत्य द्वितीयः । दिवमादित्यं चैकीकृत्य तृतीयः । एत **इम एव त्रयो लोका देवा इति** । हि यस्मात् त्रिषु देवेषु सर्वे देवा अन्तर्भवन्ति तेन एत एव देवाः त्रयः । **कतमौ तौ द्वौ देवौ** ? इत्यत्र **अन्नं चैव प्राणश्च** तौ द्वौ देवौ । अनयोर्हि सर्वेषामन्तर्भावः । **कतमोऽध्यर्ध इति ? योऽयं पवते** वायुरिति ॥८॥

अध्यर्धस्वरूपकथनम्

तदाहुर्यदयमेक इवैव पवतेऽथ कथमध्यर्ध इति ? यदस्मिन्निदꣳ सर्वमध्यार्ध्नोत् तेनाध्यर्ध इति कतम एको देव इति ? प्राण इति स ब्रह्म तदित्याचक्षते ॥ ९ ॥

पुनरध्यर्धेयत्तामेकविषयं च पृच्छति—तदाहुरिति । **यदयं** योऽयं वायुरेक **इव एक एव पवते । अथ कथमध्यर्धः** ? **इति । यदस्मिन् इदं सर्वमध्याध्नोंत्** अस्मिन् वायौ सति इदं सर्वमध्याध्नोंत् ऋद्धिं प्राप्नोति **तेनाध्यर्ध इति । कतम एको देवो** हि ? **इति । प्राण इति** । प्राणस्य सूत्रत्वेन सर्वदेवतात्मकत्वात् । परोक्षताभिधायकशब्देन **सोऽयं प्राणो ब्रह्म इत्याचक्षते** तद्विदो यं ब्रह्मेति व्यवहरन्ति । एवमनन्तदेवानां निवित्संख्याविशिष्टत्रयस्त्रिंशद्देवेष्वन्तर्भावः । तेषामप्युत्तरोत्तरेषु । यावदेकस्मिन् प्राणेऽन्तर्भावः सर्वो हि विस्तारः प्राणस्यैव । अत एवायमेकोऽनन्तश्च । नामरूपकर्मगुणशक्तिभेदादनन्तत्वं युज्यत इत्यर्थः ॥ ९ ॥

एकस्यैव प्राणस्याष्टधा भेदः

पृथिव्येव यस्यायतनमग्निर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात् याज्ञवल्क्य! वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ शारीरः पुरुषः स एष वदैव शाकल्य! तस्य का देतता इति? अमृतमिति होवाच ॥ १० ॥ काम एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात् याज्ञवल्क्य! वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं काममयः पुरुषः स एष वदैव शाकल्य! तस्य का देवतेति? स्त्रिय इति होवाच ॥ ११ ॥ रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात् याज्ञवल्क्य! वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवासावादित्ये पुरुषः स एष वदैव शाकल्य! तस्य का देवतेति? सत्यमिति होवाच ॥ १२ ॥ आकाश एव यस्यायतनꣳ श्रोत्रं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात् याज्ञवल्क्य! वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायꣳ श्रौत्रः प्रातिश्रुत्कः पुरुषः स एष वदैव शाकल्य! तस्य का देवतेति? दिश इति होवाच ॥ १३ ॥ तम एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात्

सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात् याज्ञवल्क्य ! वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं छायामयः पुरुषः स एष वदैव शाकल्य ! तस्य का देवता इति ? मृत्युरिति होवाच ॥ १४ ॥ रूपाण्येव यस्यायतनं चक्षुर्लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात् याज्ञवल्क्य ? वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायमादर्शे पुरुषः स एष वदैव शाकल्य ! तस्य का देवतेति ? असुरिति होवाच ॥ १५ ॥ आप एव यस्यायतनꣳ हृदयं लोको मनोज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात् याज्ञवल्क्य ! वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायमप्सु पुरुषः स एष वदैव शाकल्य ! तस्य का देवतेति ? वरुण इति होवाच ॥ १६ ॥ रेत एव यस्यायतनꣳ हृदयं लोको मनो-ज्योतिर्यो वै तं पुरुषं विद्यात् सर्वस्यात्मनः परायणꣳ स वै वेदिता स्यात् याज्ञवल्क्य ! वेद वा अहं तं पुरुषꣳ सर्वस्यात्मनः परायणं यमात्थ य एवायं पुत्रमयः पुरुषः स एष वदैव शाकल्य ! तस्य का देवतेति ? प्रजापतिरिति होवाच ॥ १७ ॥

इदानीमेकस्यैव प्राणस्याष्टधा भेद उपदिश्यते—पृथिवीति । **यस्यायतन**-माश्रयः **पृथिव्येव** । अनेनालोकयतीत्यग्निना पश्यतीत्यग्निर्लोकः । मानसज्योतिषा संकल्पादिकार्यं करोतीति **मनोज्योतिः** । य एवंविशिष्टस्तं **पुरुषं वै विद्यात्** विजानीयात् । **सर्वस्य** कार्यकरणसंघातात्मनः **परायणं** कारणं य एतमेवं

वेत्ति स वै वेदिता पण्डितः स्यात्। एवं याज्ञवल्क्य! त्वं न जानीषे। कथं त्वं पण्डितो भवसि? इत्याक्षिप्तो मुनिराह—वेद वा अहं तं पुरुषं सर्वस्यात्मनः परायणमिति। यदि त्वं वेत्थ तं पुरुषं तदियत्तां ब्रूहि इत्याक्षिप्त इतर आह—यं त्वमात्थ कथयसि य एवायं मातापितृजशरीरे भवः शारीरः पुरुषः हे शाकल्य! यस्त्वया पृष्टः स एष देवः। तस्य शारीरस्य का देवता? इति पृष्टः मुनिः अमृतमिति होवाच। मातापितृभुक्तान्नरसस्य शोणितशुक्लपरिणामशरीरहेतुत्वादमृतत्वम् ॥ १० ॥ किञ्च—काम इति। स्त्री-व्यतिकराभिलाषः काम एव यस्यायतनम्। हृदयेन बुद्ध्या पश्यतीति हृदयं लोकः अध्यात्ममपि काममय एव। तस्य का देवता? इति। कामस्य स्त्रीनिमित्तत्वात्। समानमन्यत्। स्त्रिय इति होवाच ॥ ११ ॥ किञ्च—रूपाणीति। शुक्लकृष्णादिरूपाण्येव यस्यायतनं य एवासावादित्ये पुरुषः तस्य का देवता? इति। सत्यमिति होवाच। अधिदेवताध्यात्मविषये आदित्य-चक्षुषी सत्यशब्देनोच्येते ॥ १२ ॥ आकाश इति। सर्वावकाशदोऽयमाकाश एव यस्यायतनम्। श्रोत्रे भवः श्रौत्रः। तत्र प्रतिश्रवणवेलायां प्रातिश्रुत्कः। तस्य का देवता? इति। दिश इति होवाच। आध्यात्मिकस्यापि दिग्भ्यो निष्पन्नत्वात् ॥ १३ ॥ तम इति। शार्वराद्यन्धकाररूपं तम एव यस्यायतनम्। अध्यात्मं तु छायामयोऽयमज्ञानमयः पुरुषः। तस्य का देवता इति? मृत्युरिति होवाच। अधिदेवताभावमापन्नमृत्योः छायामयहेतुत्वात् ॥ १४ ॥ रूपाण्येव इति। पूर्वोक्तानि साधारणरूपाणि। इह तु प्रकाशविशिष्टानि रूपाण्येव यस्यायतनम्। आदर्शादिः प्रतिविम्बाधारः। तस्य का देवता? इति। असुरिति होवाच। असोः प्रतिविम्बितपुरुषनिष्पत्तिहेतु-त्वात् ॥ १५ ॥ आप इति। साधारणा हि सर्वा आप एव यस्यायतनम्। वापीकूपाद्यप्सु विशेषावस्थानम्। तस्य का देवता? इति। वरुण इति होवाच। वरुणस्य वाप्यादिनिष्पत्तिहेतुत्वात् ॥ १६ ॥ रेत इति। रेत एव यस्यायतनम्। य एवायं पुत्रमयः पुरुषः रेतसः पुत्रनिमित्तत्वात् पुरुषगता-स्थिमज्जादीनां रेतःपरिणामत्वाच्च। तस्य का देवता? इति। प्रजापतिरिति

होवाच । पितृरूपप्रजापतेः पुत्रनिमित्तत्वात् । एवमष्टधा लोकदेवपुरुषभेदतः त्रिधात्मानं विभज्य एकैको देवो व्यवस्थितः । सर्वः प्राणभेद एवोपासनार्थं व्यपदिष्टः ॥ १७ ॥

दिग्विभागतः पञ्चधोपासनम्

शाकल्य ! इति होवाच याज्ञवल्क्यस्त्वा ँ स्विदिमे ब्राह्मणा अङ्गारावक्षयणमक्रता३ इति ॥ १८ ॥

इदानीं दिग्विभागतः पञ्चधोपासनं वक्तव्यमिति मनीषया शाकल्यस्याग्रहं जनयन्तमधिक्षिपति—**शाकल्य** ! इति । **त्वां—स्विदिति** वितर्के—**इमे** नूनं **ब्राह्मणाः** अङ्गारा अवक्षीयन्ते यस्मिन् इति **अङ्गारावक्षयणं** नूनं त्वां कृतवन्तः । त्वं तु मोहान्न बुध्यसे ॥ १८ ॥

सदेवसप्रतिष्ठदिक्प्रश्नः

याज्ञवल्क्य ! इति होवाच शाकल्यो यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः किं ब्रह्म विद्वानिति ? दिशो वेद सदेवाः सप्रतिष्ठा इति यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः ॥ १९ ॥

पुनस्तमधिक्षिपति—**याज्ञवल्क्य** ! इति । ब्राह्मणाः स्वयं भीताः सन्तः त्वामङ्गारावक्षयणमक्रता इति, **यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः** अत्युक्तवानसि । **किं ब्रह्म विद्वान्** सन् एवं ब्राह्मणानधिक्षिपसि ? इत्युक्त आहेतरः—परापरब्रह्मयाथात्म्यविज्ञानं ममास्त्येव । तेन तव किम् ? प्रकृते तु त्वया विदितापरविद्याविषये **सदेवाः सप्रतिष्ठाः दिशो वेद** । इतर आह—**यद्दिशो वेत्थ सदेवाः सप्रतिष्ठाः** सफलं यदि विज्ञानं त्वया प्रतिज्ञातं तदा तद्विषये त्वां पृच्छामि । स्थिरो भवेत्यर्थः ॥ १९ ॥

प्राचीदिक्स्थदेवता तत्प्रतिष्ठा च

किंदेवतोऽस्यां प्राच्यां दिशि असीति? आदित्यदेवत इति स आदित्यः कस्मिन् प्रतिष्ठित इति? चक्षुषीति कस्मिन्नु चक्षुः प्रतिष्ठितं इति? रूपेष्विति चक्षुषा हि रूपाणि पश्यति कस्मिन्नु रूपाणि प्रतिष्ठितानीति? हृदय इति होवाच हृदयेन हि रूपाणि जानाति हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीति एवमेवै-तद्याज्ञवल्क्य! ॥ २० ॥

सर्वं जगदात्मत्वेनावलोकयन्तं दिगात्माहमस्मीति व्यवस्थितं पूर्वाभिमुखं तत्संकल्पानुरोधेनायं पृच्छति— किमिति। **किंदेवतस्त्वमस्यां प्राच्यां दिशि असि? इति।** यो यो यां यां देवतामुपास्ते स स पुरुषस्तां तां देवतां प्रतिपद्यते। तथा च वक्ष्यति हि "देवो भूत्वा देवानप्येति" इति। यत एवमतो मुनेः ब्रह्मभूतत्वेन सर्वदेवताद्यात्मता युज्यते ब्रह्मणः सर्वात्मकत्वात्। दिगात्मनस्ते प्राच्यां दिशि का देवता? यया त्वं प्राचीदिग्रूपेण संपन्नोऽसि इत्युक्त इतर आह—**आदित्यदेवत इति।** प्राच्यां दिशि आदित्यात्मना स्थितोऽस्मीत्यर्थः। तत्प्रतिष्ठां पृच्छति— **स आदित्यः कस्मिन् प्रतिष्ठितः? इति। चक्षुषीति।** उदितोऽयमनुदितोऽयमिति चक्षुषा ह्यादित्यः प्रकाश्यते "चक्षुष आदित्यः चक्षोः सूर्योऽजायत" इति श्रुतेः। कार्यं हि कारणे प्रतितिष्ठति। **कस्मिन्नु चक्षुः प्रतिष्ठितं? इति। रूपेष्विति।** चक्षुषो रूपनिमित्तत्वात्। चक्षुषा सह प्राची दिक् सर्वा रूपभूता। **कस्मिन्नु रूपाणि प्रतिष्ठितानि? इति। हृदय इति होवाच।** रूपाणां हृदयारब्धत्वात्। रूपाकारेण हृदयमेव परिणतमित्यर्थः। यस्माल्लोको **हृदयेन हि रूपाणि जानाति**—एकीकृत्य बुद्धिमनसी हृदयमित्युच्यते—तस्मात् **हृदये ह्येव रूपाणि प्रतिष्ठितानि भवन्तीति।** याज्ञवल्क्योक्तिमनुमोदते—**एवमेवैतत् याज्ञवल्क्य! इति ॥ २० ॥**

दक्षिणदिक्स्थदेवता तत्प्रतिष्ठा च

किंदेवतोऽस्यां दक्षिणायां दिशि असीति ? यमदेवत इति स यमः कस्मिन्प्रतिष्ठित इति ? यज्ञ इति कस्मिन्नु यज्ञः प्रतिष्ठित इति ? दक्षिणायामिति कस्मिन्नु दक्षिणा प्रतिष्ठिता इति ? श्रद्धायामिति यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति श्रद्धायाꣳ ह्येव दक्षिणा प्रतिष्ठितेति कस्मिन्नु श्रद्धा प्रतिष्ठितेति ? हृदय इति होवाच हृदयेन हि श्रद्धां जानाति हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीति एवमेवैतद्याज्ञवल्क्य ! ॥ २१ ॥

किंदेवतोऽस्यामिति । किंदेवतोऽस्यां दक्षिणायां दिशि असि ? इति पूर्ववत् । यमदेवत इति । दक्षिणदिग्भूतस्य मे यमो देवता भवति । स यमः कस्मिन् प्रतिष्ठितः ? इति । यज्ञ इति । स्वकारणयज्ञप्रतिष्ठितत्वात् यमस्य । कस्मिन्नु यज्ञः प्रतिष्ठितः ? इति । दक्षिणायामिति । यज्ञस्य दक्षिणानिष्क्रीतत्वात् दक्षिणाकार्यं यज्ञ इत्यर्थः । कस्मिन्नु दक्षिणा प्रतिष्ठिता ? इति । श्रद्धायामिति । दित्सूनामास्तिक्यबुद्धिर्हि श्रद्धा । तत् कथम् ? यदा ह्येव श्रद्धत्तेऽथ दक्षिणां ददाति । तस्मात् श्रद्धायामेव दक्षिणा प्रतिष्ठिता इति । कस्मिन्नु श्रद्धा प्रतिष्ठिता ? इति । हृदय इति होवाच । श्रद्धाया हृद्वृत्तित्वात् । यतो हृदयेन हि श्रद्धां जानाति—वृत्तेः वृत्तिमत्प्रतिष्ठितत्वात्—अतो हृदये ह्येव श्रद्धा प्रतिष्ठिता भवतीति । एवमेवैतन् याज्ञवल्क्य ! इति ॥ २१ ॥

प्रतीचीदिक्स्थदेवता तत्प्रतिष्ठा च

किंदेवतोऽस्यां प्रतीच्यां दिशि असीति ? वरुणदेवत इति स वरुणः कस्मिन् प्रतिष्ठित इति ? अप्स्विति कस्मिन्नु आपः

प्रतिष्ठिता इति ? रेतसीति कस्मिन्नु रेतः प्रतिष्ठितमिति ? हृदय इति तस्मादपि प्रतिरूपं जातमाहुर्हृदयादिव सृप्तो हृदयादिव निर्मित इति हृदये ह्येव रेतः प्रतिष्ठितं भवतीति एवमेवैतद्याज्ञवल्क्य ! ॥२२॥

किंदेवतोऽस्यां इति । किंदेवतोऽस्यां प्रतीच्यां दिशि असि ? इति । वरुण इति । तद्दिग्भावमापन्नस्य मे वरुणो देवता । स कस्मिन् प्रतिष्ठितः ? इति । अप्सु इति । अपां वरुणकार्यत्वात् । कस्मिन्नु आपः प्रतिष्ठिताः ? इति । रेतसीति । "रेतस आपः" इति श्रुतेः । कस्मिन्नु रेतः प्रतिष्ठितं ? इति । हृदय इति । यतो रेतो हृत्कार्यं, कामवृत्तेः हृत्प्रभवत्वात्— हृदयाद्धि कामिनो रेतोऽवस्कन्दति—तस्मादपि प्रतिरूपं अनुरूपं लौकिकाः पुत्रं जातमाहुः । अस्य पितुः पुत्रोऽयं हृदयादिव सृप्तो विनिस्सृतः । यथा सुवर्णेन निर्मितं कुण्डलादिकं तथ हृदयेन निर्मितः । तस्मात् हृदये ह्येव रेतः प्रतिष्ठितं भवतीति । एवमेवैतत् याज्ञवल्क्य ! इति ॥ २२ ॥

उदीचीदिक्स्थदेवता तत्प्रतिष्ठा च

किंदेवतोऽस्यामुदीच्यां दिशि असीति ? सोमदेवत इति स सोमः कस्मिन् प्रतिष्ठित इति ? दीक्षायामिति कस्मिन्नु दीक्षा प्रतिष्ठिता इति ? सत्य इति तस्मादपि दीक्षितमाहुः सत्यं वदेति सत्ये ह्येव दीक्षा प्रतिष्ठितेति कस्मिन्नु सत्यं प्रतिष्ठितमिति ? हृदय इति होवाच हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितं भवतीति एवमेवैतद्याज्ञवल्क्य ! ॥ २३ ॥

किंदेवतोऽस्यामिति । सोमलतां देवतां चैकीकृत्य सोम इति निर्देशः । स कस्मिन् प्रतिष्ठितः ? इति । दीक्षायामिति । दीक्षितो हि सोमं क्रीणाति । यथावत् तेन इष्ट्वा उत्तरां गतिं प्रतिपद्यते । कस्मिन्नु दीक्षा प्रतिष्ठिता ?

इति । सत्य इति । यस्मात् सत्ये दीक्षा प्रतिष्ठिता तस्मादपि दीक्षितमाहुः—सत्यं वदेति । कस्मिन्नु सत्यं प्रतिष्ठितं ? इति । हृदय इति होवाच । यस्मात् हृदयेन हि सत्यं जानाति तस्मात् हृदये ह्येव सत्यं प्रतिष्ठितं भवतीति । एवमेवैतत् याज्ञवल्क्य ! इति ॥ २३ ॥

ध्रुवास्थदेवता तत्प्रतिष्ठा च

किंदेवतोऽस्यां ध्रुवायां दिशि असीति ? अग्निदेवत इति सोऽग्निः कस्मिन् प्रतिष्ठित इति ? वाचीति कस्मिन्नु वाक् प्रतिष्ठिता इति ? हृदय इति कस्मिन्नु हृदयं प्रतिष्ठितं ? इति ॥ २४ ॥

किंदेवतोऽस्यामिति । मेर्वग्रवासिनामूर्ध्वा दिक् ध्रुवेत्युच्यते । किंदेवतोऽस्यां ध्रुवायां दिशि असि ? इति । अग्निदेवत इति । ऊर्ध्वदिशः प्रकाशात्मकत्वात् सैवाग्निरुच्यते । सोऽग्निः कस्मिन् प्रतिष्ठितः ? इति । वाचीति । कस्मिन्नु वाक् प्रतिष्ठिता ? इति । हृदय इति । यत एतत् सर्वं सर्वात्मभावारूढयाज्ञवल्क्यहृद्विकल्पितं अतः तत् हृदयं सर्वात्मकम् । तादृशं हृदयं कस्मिन्नु प्रतिष्ठितं ? इति याज्ञवल्क्यं पृच्छति ॥ २४ ॥

हृदयाधिष्ठानकथनम्

अहल्लिकेति होवाच याज्ञवल्क्यो यत्रैतत् अन्यत्रास्मन्मन्यासै यद्ध्येतत् अन्यत्रास्मत्स्यात् श्वानो वा एनत् अद्युः वयांसि वा एनत् विमथ्नीरन्निति ॥ २५ ॥

हृदयाधिष्ठानमाह--अहल्लिकेति । हृदयाधिकरणं नामान्तरेण अहल्लिकेति होवाच याज्ञवल्क्यः । स्वापादावहन्यहनि लीयत इति अहल्लिका तनुः । सैव हृदयायतनमित्यर्थः । यत्र एतत् हृदयं अस्मत् अस्मत्तः शरीरादन्यत्र वर्तेत

इति मन्यासै मन्यसे यद्धि एतद्धृदयं अस्मदन्यत्र स्यात् भवेत् तदा एनत् शरीरं श्वानो वा अद्युः भक्षयेयुः। वयांसि वा एनत् शरीरं विमथ्नीरन्। यस्मादेवं तस्मात् मयि शरीरे हृदयं प्रतिष्ठितमित्यर्थः ॥ २५ ॥

हृदयशरीरयोरधिष्ठानकथनम्

कस्मिन्नु त्वं चात्मा च प्रतिष्ठितौ स्थ इति ? प्राण इति कस्मिन्नु प्राणः प्रतिष्ठित इति ? अपान इति कस्मिन्नु अपानः प्रतिष्ठित इति ? व्यान इति कस्मिन्नु व्यानः प्रतिष्ठित इति ? उदान इति कस्मिन्नु उदानः प्रतिष्ठित इति ? समान इति स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यते अशीर्यो नहि शीर्यते असङ्गो न हि सज्यते असितो न व्यथते न रिष्यति एतान्यष्टावायतनानि अष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान् पुरुषान्निरुह्य प्रत्युह्य अत्यक्रामत् तं त्वौपनिषदं पुरुषं पृच्छामि तं चेन्मे न विवक्ष्यसि मूर्धा ते विपतिष्यतीति तꣳ ह न मेने शाकल्यस्तस्य ह मूर्धा विपपात अपि हास्य परिमोषिणोऽस्थीन्यपजह्रुः अन्यत् मन्यमानाः ॥ २६ ॥

शरीरस्य नामरूपकर्मात्मकत्वेन हृदयप्रतिष्ठितत्वमुक्तम्। पुनर्गोलकाभिप्रायेण हृदयं शरीरे प्रतिष्ठितमिति च। अतो हृदयशरीरयोरन्योन्यप्रतिष्ठितता उक्ता। अतस्त्वां पृच्छामीत्याह—कस्मिन्नु ? इति। कस्मिन्नु त्वं च शरीरमात्मा ते हृदयं च प्रतिष्ठितौ स्थः ? इति। प्राण इति। शरीरहृदययोः प्राणायत्तत्वात्। कस्मिन्नु प्राणः प्रतिष्ठितः ? इति। अपान इति। अपानो हि प्राणायतनम्। अपानप्रतिष्ठाभावे प्राणोऽयमूर्ध्वं गच्छेत्। कस्मिन्नु अपानः प्रतिष्ठितः ? इति। व्यान इति। यदि व्यानवृत्त्या प्राणापानौ न

गृहीतौ तदा ऊर्ध्वाधोमार्गेण प्राणापानौ गच्छेताम्। **कस्मिन्नु व्यानः प्रतिष्ठितः? इति। उदान इति।** एते त्रयः किल स्थानीयोदानाभावे विष्वगेव ईयुः। **कस्मिन्नु उदानः प्रतिष्ठितः? इति। समान इति।** समानप्रतिष्ठिता एते प्राणादयः। समानो हि विराट्। स्वगतविशेषांशनिरासतः स एवात्मा भवति। यः शरीरहृदयप्राणेन्द्रियादिकरणसङ्घातप्रवृत्तिनिमित्तं यस्मिन् सर्वमोतं च प्रोतं च यन्निर्विशेषस्वरूपप्रपञ्चनाय यत्साक्षादपरोक्षादित्याद्यारम्भः यस्तु व्यष्टिसमष्टिस्थूलादिचतुरंशाढ्यस्वाविद्यापदतत्कार्यजातारोपापवादाधिकरणं यस्तु वस्तुतो निरधिकरणत्वेन निष्प्रतियोगिकस्वमात्रमवशिष्यते स **एष** चिद्धातुः। स्वाज्ञदृष्टिप्रसक्तविशेषजातं कालत्रयेऽपि स्वस्मिन् नेति नेतीति निषिध्य अपह्नवीकृत्य स्वात्ममात्रं योऽवशिष्टः **सोऽयमात्मा** केनाप्यगृह्यः। कथम्? मूर्तामूर्तकलनाविरलत्वान्न **हि गृह्यते।** तथायम**शीर्यो न हि शीर्यते।** सर्वत्र मूर्तादिविरलहेतुः संयोजनीयः। तथा**सङ्गो न हि सज्यते।** तथा**सितो न व्यथते।** अतो **न रिष्यति** न विनश्यति सन्मात्रत्वात्। इदानीं क्रममतिक्रम्य औपनिषत्पुरुषाख्यायिकातोऽपसृत्य श्रुतिः स्वेन रूपेण त्वरया निर्दिशति, पुनराख्यायिकामनुसरति च—**एतानीति।** पृथिव्येव यस्यायतनमित्यादिना यान्युक्ता-न्यष्टावायतनानि अग्निर्लोक इत्यादिना **अष्टौ लोकाः** अमृतमित्यादिना **अष्टौ देवाः** शारीरः पुरुष इत्यादिना **अष्टौ पुरुषाः। स यः** कश्चित् शारीर-प्रभृतीन् **पुरुषान् निरुह्य** अष्टचतुष्कभेदेन लोकस्थितिं प्रपञ्च्य प्राचीदिगादि-द्वारेण **प्रत्युह्य** हृदयाद्युपाधिधर्मा**नत्यक्रामत्** नेति नेतीत्यतिक्रान्तवान् स्वाज्ञ-विकल्पिताशनायादिधर्मा यत्र न दृश्यन्ते सोऽयं स्वेनैव रूपेण औपनिषदः पुरुषः उपनिषत्स्वेव वेदितव्यः तस्य प्रमाणान्तरागम्यत्वात्। य एवमौपनिषदः पुरुषः स्वातिरिक्ताष्टायतनाद्यसंभवप्रबोधसमकालं स्वमात्रमवशिष्यते **तमौपनिषदं पुरुषं** तदियत्तां त्वा त्वां **पृच्छामि।** यदि-**तं मे न विवक्ष्यसि** चेत् तदा ते तव **मूर्धा विपतिष्यतीति** याज्ञवल्क्य आह। शाकल्यस्तु तं औपनिषदं पुरुषं **न मेने** तस्यापरब्रह्ममात्रज्ञत्वेन परब्रह्मज्ञानविकलत्वात् तन्न विज्ञातवान् खलु। **तस्य ह मूर्धा विपपातेति।** श्रुतेर्वचः—**तं ह न मेन** इत्यादि।

समाप्तेयमाख्यायिका। किञ्च **अपि हास्य** शाकल्यस्यास्थीनि शिष्यैः गृहान् प्रति नीयमानानि **परिमोषिणः** तस्करा **अपजह्रुः** अपहृतवन्तः **अन्यत्** धनं नीयमानं **मन्यमानाः**। तत् किन्निमित्तम्? एवं याज्ञवल्क्यशापात्। पुरा अष्टाध्याय्या आख्यायिका सूचिता। तत्र शाकल्ययाज्ञवल्क्ययोः संवादो निर्वृत्तः। तदा पुरेऽतिथ्ये मरिष्यसि न तेऽस्थीनि गृहान् प्राप्स्यन्तीति शापो दत्तः। सैषाख्यायिका आचारार्थं विद्यास्तुतये च सूचिता ॥ २६ ॥

याज्ञवल्क्येन प्रश्नप्रकारः

अथ होवाच ब्राह्मणा भगवन्तो यो वः कामयते स मा पृच्छतु सर्वे वा मा पृच्छत यो वः कामयते तं वः पृच्छामि सर्वान् वा वः पृच्छामीति ते ह ब्राह्मणा न दधृषुः ॥ २७ ॥

पुरा नेति नेतीति स्वातिरिक्तप्रतिषेधेन ब्रह्मणो निर्देशः कृतः। पुनर्जगन्मूलप्रदर्शनमुखेनाख्यायिकामनुसृत्य निरस्तसमस्तविशेषं ब्रह्म निर्दिदिक्षति—**अथेति**। वादतो ब्राह्मणान्निर्जित्य गोधनमवाप्य **अथ**ानन्तरं तूष्णींभूतेषु ब्राह्मणेषु स **होवाच** याज्ञवल्क्यः। किमिति? हे **ब्राह्मणा भगवन्तः!** इति तान् संबोध्य **यो वो** युष्माकं मध्ये याज्ञवल्क्यं मां पृच्छामीति **कामयते स** मामागत्य **पृच्छतु। सर्वे वा** मिलित्वा **मा** मां प्रति **पृच्छत**। नो चेत् **यो वो** याज्ञवल्क्यो मां पृच्छत्विति **कामयते तं वः पृच्छामि**। **सर्वान् वा वः** युष्मानहं **पृच्छामीति**। **ते ह ब्राह्मणाः** प्रत्युत्तरं दातुं तन्निकटे स्थातुं वा मनो **न दधृषुः** न कृतवन्त इत्यर्थः ॥ २७ ॥

ब्रह्मनिर्देशाय पुरुषवृक्षयोः साधर्म्यं विशेषश्च

तान् ह एतैः श्लोकैः पप्रच्छ—

यथा वृक्षो वनस्पतिस्तथैव पुरुषोऽमृषा।

तस्य लोमानि पर्णानि त्वगस्योत्पाटिका बहिः ॥

त्वच एवास्य रुधिरं प्रस्यन्दि त्वच उत्पटः ।
तस्मात्तदातृण्णात् प्रैति रसो वृक्षादिवाहतात् ॥
मांसान्यस्य शकराणि किनाटं स्नाव तत्स्थिरम् ।
अस्थीन्यन्तरतो दारूणि मज्जा मज्जोपमा कृता ॥
यद्वृक्षो वृक्णो रोहति मूलान्नवतरः पुनः ।
मर्त्यः स्विन्मृत्युना वृक्णः कस्मात् मूलात्प्ररोहति ॥
रेतस इति मा वोचत जीवतस्तत्प्रजायते ।
धानारुह इव वै वृक्षोऽञ्जसा प्रेत्य संभवः ॥
यत्समूलमावृहेयुर्वृक्षं न पुनराभवेत् ।
मर्त्यः स्विन्मृत्युना वृक्णः कस्मान्मूलात्प्ररोहति ॥
जात एव न जायते को न्वेनं जनयेत्पुनः ।
विज्ञानमानन्दं ब्रह्म रातिर्दातुः परायणं
तिष्ठमानस्य तद्विद इति ॥ २८ ॥

एवमुपरतबाह्यान्तर्व्यापारान् ब्राह्मणानयमेव पृच्छतीत्याह—तानिति । याज्ञवल्क्यस्तान् वक्ष्यमाणैरेतैः श्लोकैः पप्रच्छ ह । किमिति ? यथा लोके वनस्पतिशब्दवाच्यो वृक्षोऽमृषा तस्यादिमध्यावसानेषु अदृष्टदृष्टनष्टस्वभावत्वात्, तथैव शिरःपाण्यादिमान् पुरुषोऽमृषा । तद्गतहेयांशापायसिद्धपुरुषोऽमृषा तस्य परमार्थसद्रूपत्वात् । तस्य पूर्वोक्तपुरुषस्य लोमानि वनस्पतेः पर्णानि । अस्येतरस्य पुरुषस्य बहिस्त्वगुत्पाटिका । वनस्पतेस्त्वच एव सकाशात अस्य पुरुषस्य रुधिरं प्रस्यन्दि । त्वच एव उत्स्फुटतीति त्वच उत्पटः । वनस्पतेः पुरुषस्य च यस्मादेवं तुल्यता तस्मात्तदातृण्णात हिंसितात प्रैति आहतात छिन्नात् वृक्षात रस इव पुरुषात् रुधिरं निर्गच्छति । अस्य

पुरुषस्य **मांसानि** वनस्पतेः **शकराणि** शकलानि। वृक्षस्य **किनाटं** काष्ठसंलग्नवल्कलरूपं पुरुषस्य **स्नाव तत् स्थिरं** च। पुरुषस्य स्नावान्तरतोऽस्थीनि भवन्ति। तथा किनाटस्यान्तरतो **दारूणि** भवन्ति। वनस्पतेः पुरुषस्य **मज्जा** मज्जाया उपमा **मज्जोपमा कृता**। अनयोर्नान्यो विशेषोऽस्ति। यत् यदि **वृक्षो वृक्णः** छिन्नो **रोहति पुनः मूलात् नवतरः** प्रादुर्भवति। एवं वनस्पतिपुरुषयोः समानम्। छिन्नस्य प्ररोहणं तु वनस्पतौ विशेषः। पुरुषे न हि तदस्ति। मृत्युना वृक्णस्य पुनः प्ररोहणं न हि दृश्यते। कुतश्चित् प्ररोहणेन तत् भवितव्यमिति। तस्मात् वः पृच्छामि—**मर्त्यो** मनुष्यः **स्विन्मृत्युना वृक्णो** मृतः पुनः **कस्मात् मूलात् प्ररोहति**? **रेतसः** प्ररोहतीति यद्येवं वदथ तथा **मैवं वोचत**। यस्मात् जीवतः पुरुषात् रेतः **प्रजायते** न मृतात्। अपि च **धानारुहो** धाना बीजं इवशब्दोऽनर्थकः। **वै वृक्षोऽञ्जसा प्रेत्य** मृत्वा **संभवो** भवेत्। **यत** यदि वनस्पतेः **समूलमावृहेयुः** वृक्षमुत्पाटयेयुः **न हि वृक्षः पुनराभवेत्**। तस्मात् वः पृच्छामि। **मर्त्यः स्वित्** सर्वस्य जगतो मूलमपि **मृत्युना वृक्णः** सन् **कस्मात मूलात् प्ररोहति**? **जात** एवेति मन्यध्वम्। किमत्र प्रष्टव्यम्? जनिष्यतो हि भावः प्रष्टव्यः न जातस्य। अयं तु **जात एव**। न ह्यत्र प्रश्न उपपद्यते इति चेन्न; जातस्य विद्यमानत्वात्। न हि तस्य पुनर्जात्याकांक्षास्ति। मृतः पुनर्जायत इति चेन्न; मृतस्याभावरूपतया वस्तुत्वात् न तस्यापि जातिरस्ति। अतो वः पृच्छामि—**को न्वेनं** मृतस्थानीयस्वाविद्यापदतत्कार्यजातं **पुनर्जनयेत्**? को न्वेनमित्याक्षेपार्थतः परमार्थवस्तुनि कार्यत्वं कारणत्वं वा मृग्यमिति द्योत्यते। एवं पृष्टा ब्राह्मणा याज्ञवल्क्येन पृष्टार्थं न जग्मुः। यत एवमतो याज्ञवल्क्यस्य ब्रह्मिष्ठता ध्रुवपदं गता। तेनैव ब्राह्मणा गावश्च जिताः। समाप्तेयमाख्यायिका। यत् स्वाज्ञदृष्टिविकल्पितस्वाविद्यापदतत्कार्यस्य स्वज्ञदृष्ट्या मूलं, यत् याज्ञवल्क्यो ब्राह्मणान् पृष्टवान् तदस्मभ्यं श्रुतिराह—**विज्ञानमानन्दं ब्रह्मेति**। **विज्ञानं** विज्ञप्तिः ज्ञप्तिमात्रत्वात्। चिन्मात्रं विज्ञानशब्दार्थः। वैषयिकविज्ञानवत् किं दुःखानुविद्धम्? नेत्याह—**आनन्दमिति**।

कार्यं चेत् कारणं किंचित् कार्याभावे न कारणम् ।
कार्यकारणतां हित्वा पूर्णबोधोऽवशिष्यते ॥

इत्यादिश्रुत्यनुरोधेन कार्यकारणकलनाविरलपूर्णज्ञप्तिमात्रस्य स्वातिरिक्तविषयज्ञाना-संभवसिद्धत्वेन निष्प्रतियोगिकपरमानन्दमात्रत्वात् न हि दुःखानुविद्धता सेद्धुं पारयति । विज्ञानानन्दयोः भेद इति चेन्न ; तयोरेकार्थपर्यवसायित्वात् । यत् विज्ञानं स आनन्द इति लौकिकज्ञानानन्दवत् परिच्छिन्नता स्यादिति तत्राह— **ब्रह्मेति** ।

सच्चिदानन्दमात्रोऽहमनुत्पन्नमिदं जगत् ।

इतिश्रुत्यनुरोधेन स्वातिरिक्तानृतजडदुःखाढ्यस्वाविद्यापदतत्कार्यापह्नवसिद्धसच्चिदा-नन्दमात्रतया उपबृंहणात् । यत् विज्ञानमानन्दं ब्रह्म प्रतिपादितं तद्याथात्म्यं यो जानाति स तन्मात्रतयावशिष्यते । यस्तु जगन्मूलत्वेन तज्जानाति क्रमेण सोऽपि तत्रैव पर्यवस्यतीत्याह—**रातिर्दातुः परायणमिति** । षष्ठ्यर्थे प्रथमा **रातिरिति** । रातेः कर्मफलधनस्य **दातुः** स्वकृतकर्मफलमर्पयतो यजमानस्य स्वाश्रमोचितसत्कर्मानुष्ठातुः **परायणं** जगन्मूलभावमापन्नेशितुः कर्माध्यक्षत्वेन कर्मिपटलपरागतित्वात् तत्तद्भावानुरोधेन कर्मफलदातृ तदेवेत्यर्थः । किञ्च यस्त्वेषणाभ्यो व्युत्थाय कर्मकृत् ब्रह्म वेत्तीति तद्वित् तस्यैवं **तिष्ठमानस्य ब्रह्मविदो** ब्रह्मैव परायणं " ब्रह्म वेद ब्रह्मैव भवति " इति वेदनसमकालब्रह्मभावा-पत्त्यनुवादिश्रुतेः ॥ २८ ॥

इति नवमं ब्राह्मणम्

इति तृतीयोऽध्यायः

चतुर्थोऽध्यायः

प्रथमं ब्राह्मणम्

जनकयाज्ञवल्क्यसंलापः

जनको ह वैदेह आसांचक्रे अथ ह याज्ञवल्क्य आवव्राज तꣳ होवाच याज्ञवल्क्य ! किमर्थमचारीः पशूनिच्छन् अण्वन्तानीति उभयमेव सम्राट् ! इति होवाच ॥ १ ॥

पञ्चमाध्याये "अष्टावायतनान्यष्टौ लोका अष्टौ देवा अष्टौ पुरुषाः स यस्तान् पुरुषान् निरुह्य प्रत्युह्यात्यक्रामत्" इति पुनः पञ्चधा निरुह्य प्रत्युह्य प्राणादिपञ्चात्मके समानाख्ये जगदात्मनि विराजि सूत्रतयावशेषिते सूत्रं बीजात्मावशेषितं भवति। नेति नेतीति तद्गतविशेषांशनिरासतः साक्षाद-परोक्षात् ब्रह्म औपनिषदं विज्ञानमानन्दं ब्रह्मेति प्रपञ्चितम्। पुनस्तस्यैव वागादिद्वारेणाधिगमः कर्तव्य इति षष्ठाध्याय आरभ्यते। ब्राह्मणद्वयसूचिता-ख्यायिका त्वाचारार्था वक्ष्यमाणब्रह्मविद्यास्तुत्यर्था वा भवति—**जनक** इति। **जनको ह वैदेहो** राजा सर्ववित् याज्ञवल्क्यदर्शनोत्सुकः सन् स्वोचितासने **आसाञ्चक्रे** स्थितवान्। **अथ** तस्मिन्नवसरे तं राजानं दिदृक्षुः तन्निकटं **याज्ञवल्क्य आवव्राज** तदनुग्रहार्थमुपगतवान्। जनकस्तु **त**मागतं याज्ञवल्क्यं विधिवत् पूजयित्वा **उवाच ह**। किमिति? **याज्ञवल्क्य! किमर्थमचारीः** आगतोऽसि? किं पुनः **पशूनिच्छन्** यद्वा **अण्वन्तान्** मत्तः सूक्ष्म-वस्तुनिर्णयान्तान् प्रश्नान् श्रोतुमिच्छन् वा समागतोऽसि? इत्युक्तो मुनिः **उभयमेव सम्राट्! इति होवाच**। वाजपेययाजी भारतवर्षाधिपो वा सम्राट् ॥ १ ॥

वाग्वै ब्रह्मेति शैलिनिमतम्

यत्ते कश्चिदब्रवीत तच्छृणवामेत्यब्रवीत् मे जित्वा शैलिनिर्वाग्वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान् ब्रूयात्तथा तच्छैलिनिरब्रवीत् वाग्वै ब्रह्मेत्यवदतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत् सम्राट्! इति स वै नो ब्रूहि याज्ञवल्क्य! वागेवायतनमाकाशः प्रतिष्ठा प्रज्ञेत्येनदुपासीत का प्रज्ञता? याज्ञवल्क्य! वागेव सम्राट्! इति होवाच वाचा वै सम्राट्! बन्धुः प्रज्ञायते ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि इष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतानि वाचैव सम्राट्! प्रज्ञायन्ते वाग्वै सम्राट्! परमं ब्रह्म नैनं वाक् जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृपभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ २ ॥

हे राजन्! त्वमनेकाचार्यसेवी। तत्तदाचार्यमुखतो यो योऽर्थस्त्वयावधृतः त्वत्तः तं तमर्थं श्रोतुमिच्छन् समागतोऽस्मि इत्याह—**यत्त** इति। **यत् ते** तुभ्यं **कश्चिदा**चार्यो**ऽब्रवीत्** **तच्छृणवामे**ति पृष्ट इतर आह—**अब्रवीदि**ति। नामतः **शैलिनिः मे** मां वादतो **जित्वा वाग्वै** वाग्देवतैव **ब्रह्मेत्यब्रवीत्** उक्तवान्। इतर आह—**यथेति**। **यथा** स्वहितकर्त्री माता यस्य विद्यते स **मातृमान्**। ततः परं पितानुशास्ता यस्य विद्यते स **पितृमान्**। यस्य उपनयनात् परं आसमावर्तनं आचार्योऽनुशास्ता स **आचार्यवान्**। एवं संस्कारत्रययुक्तस्य मनः

श्रेयोमार्गे न व्यभिचरति। **तथा** त्वां जित्वा **वाग्वै ब्रह्मेति शैलिनिरब्रवीत्।** **अवदतो हि** मूकस्यार्थज्ञानाभावात् तस्य **किं वा स्यात्? इति अब्रवीत् ते** तुभ्यमित्युक्त इतर आह—**तस्य** वागाख्यब्रह्मणः **आयतनं प्रतिष्ठां न मेऽब्रवीत्।** इतर आह—**एकपाद्वा एतद्ब्रह्म।** अनेन उपदिष्टं पादत्रय-विकलोपासनं न हि यथोक्तफलदं भवति इत्येवं मुनिनोक्तः **स सम्राट्** राजा स्वाभिमुखीकरणाय **याज्ञवल्क्य!** इति संबोध्य तं प्रार्थयति—यदि त्वमेवं **विद्वान् स वै नोऽस्मभ्यं ब्रूहि।** वाग्देवतस्य ब्रह्मणो **वाक्करणमेवायतनं** शरीरम्। **आकाश एव** तस्य **प्रतिष्ठा** आकाशस्य वागुत्पत्तिस्थितिप्रलयाधि-करणत्वात्। चतुष्पाद्ब्रह्म **एनत् प्रज्ञेत्युपासीत। याज्ञवल्क्य!** वागाख्यब्रह्मणः **का प्रज्ञता?** यथायतनप्रतिष्ठे ब्रह्मणो व्यतिरिक्ते तथा प्रज्ञापि चतुष्पदब्रह्मणो व्यतिरिक्ता। अतो **वागेव सम्राट् इति होवाच।** तत् कथं वागेव सम्राट्! उच्यते? **वाचा वै सम्राट्!** बन्धुरिव **बन्धुः ऋग्वेदादिः प्रज्ञायते।** ऋगादीनां कथं बन्धुत्वम्? हितोपदेष्टृत्वात्। **ऋग्वेद** इत्यादि **व्याख्यानानीयन्तं** व्या-ख्यातम्। यागादिधर्मजातं **इष्टम्।** होमनिमित्तं **हुतम्।** अन्नदाननिमित्त**माशितम्।** पानदाननिमित्तं **पायितम्। अयं च लोकः** इदं च जन्म **परश्च लोको** भावि जन्म **सर्वाणि च भूतानि वाचैव सम्राट्! प्रज्ञायन्ते। वाग्वै सम्राट्!** स्वगतविशेषांशापाये **परमं ब्रह्म।** एवंविदमेनं **वाक्** प्रज्ञा **न जहाति। एनं** ब्रह्मविदं प्रति **सर्वाणि भूतानि** बलि**मभिक्षरन्ति** दास्यन्ति। **देवोऽ**स्मीति ज्ञानबलात् **देवो भूत्वा**त्यन्तिकदेहाद्यभिमतिनिवृत्तौ **देवानप्येति** अपिगच्छति। **य एवं विद्वानेतदुपास्ते** स देव एव भवतीत्यत्र "तं यथा यथोपासते तथैव भवति" इत्यादिश्रुतेः। एवं मुन्युपदिष्टार्थसन्तुष्टो राजा विद्यानिष्क्रयार्थं, हस्त्यृषभमित्यत्र हस्तिश्रेष्ठः, हस्ती च ऋषभश्च हस्त्यृषभं वा, हस्तितुल्य ऋषभो यस्मिन् गोसहस्रे वर्तते तत्सर्वं **हस्त्यृषभं** वा। एवं **सहस्रं ददामीति होवाच जनको वैदेहः।** एवं राजवाक्यं श्रुत्वा **स होवाच याज्ञवल्क्यः।** किमिति? **अननुशिष्य** शिष्यं कृतार्थमकृत्वा शिष्यात् धनं **नापाहरेतेति पिता मेऽमन्यत।** ममाप्ययमेवाभिप्रायः॥ २॥

प्राणो वै ब्रह्मेति उदङ्कमतम्

यदेव ते कश्चिदब्रवीत् तच्छृणवामेत्यब्रवीन्म उदङ्कः शौल्बा-यनः प्राणो वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान् ब्रूयात् तथा तच्छौल्बायनोऽब्रवीत् प्राणो वै ब्रह्मेत्यप्राणतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदित्येकपाद्वा एतत्सम्राट्! इति स वै नो ब्रूहि याज्ञवल्क्य! प्राण एवायतनमा-काशः प्रतिष्ठा प्रियमित्येनदुपासीत का प्रियता? याज्ञवल्क्य! प्राण एव सम्राट्! इति होवाच प्राणस्य वै सम्राट्! कामायायाज्यं याजयति अप्रतिगृह्यस्य प्रतिगृह्णात्यपि तत्र वधाशङ्कं भवति यां दिशमेति प्राणस्यैव सम्राट्! कामाय प्राणो वै सम्राट्! परमं ब्रह्म नैनं प्राणो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ३ ॥

यदेव ते कश्चिदब्रवीत् इत्यादि समानम्। नामत उदङ्कः शुल्बस्यापत्यं शौल्बायनः। प्राणः प्राणवायुरेव ब्रह्मेत्यब्रवीत्। पूर्ववदायतनप्रतिष्ठे। प्रियमित्येनदुपास्ते। प्रियत्वं कथं? इत्यत्र—हे सम्राट्! प्राणस्य कामाय प्राणस्यार्थाय अयाज्यं याजयति। उग्रादेरप्रतिगृह्यस्य प्रतिगृह्णात्यपि। तत्र तस्यां दिशि वधनिमित्तमाशङ्कं वधाशङ्कं वधाशङ्केत्यर्थः। यां तस्कराद्या-कीर्णां दिशमेति तस्यां दिशि इयमाशङ्का। तच्चेत् सर्वं प्राणस्य प्रीतये भवति। प्राणो वै सम्राट्! परमं ब्रह्मेत्यादि समानम् ॥ ३ ॥

चक्षुर्वै ब्रह्मेति वर्कुमतम्

यदेव ते कश्चिदब्रवीत् तच्छृणवामेत्यब्रवीन्मे वर्कुर्वार्ष्णश्चक्षुर्वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान् ब्रूयात् तथा तद्वार्ष्णोऽब्रवीत् चक्षुर्वै ब्रह्मेत्यपश्यतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदिति एकपाद्वा एतत् सम्राट्! इति स वै नो ब्रूहि याज्ञवल्क्य! चक्षुरेवायतनमाकाशः प्रतिष्ठा सत्यमित्येनदुपासीत का सत्यता? याज्ञवल्क्य! चक्षुरेव सम्राट्! इति होवाच चक्षुषा वै सम्राट्! पश्यन्तमाहुरद्राक्षीरिति स आह अद्राक्षमिति तत्सत्यं भवति चक्षुर्वै सम्राट्! परमं ब्रह्म नैनं चक्षुर्जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ४ ॥

नामतो बर्कुः वृष्णस्यापत्यं वार्ष्णः चक्षुर्वै ब्रह्मेति। चक्षुष्यादित्योपनिषत् सत्यं चक्षुः। इतरत् श्रोत्रेण श्रुतमप्यनृतमेव तत्। तस्माद्वै सम्राट्! पश्यन्तमाहुः हस्तिनमद्राक्षीरिति। स चेदद्राक्षमित्याह तत् सत्यं भवतीत्यादि समानम् ॥ ४ ॥

श्रोत्रं वै ब्रह्मेति भारद्वाजमतम्

यदेव ते कश्चिदब्रवीत् तच्छृणवामेत्यब्रवीन्मे गर्दभीविपीतो भारद्वाजः श्रोत्रं वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान्

ब्रूयात् तथा तद्भारद्वाजोऽब्रवीत् श्रोत्रं वै ब्रह्मेत्यश्रृण्वतो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदिति एकपाद्वा एतत् सम्राट्! इति स वै नो ब्रूहि याज्ञवल्क्य! श्रोत्रमेवायतनमाकाशः प्रतिष्ठानन्त इत्येनदुपासीत कानन्तता? याज्ञवल्क्य! दिश एव सम्राट्! इति होवाच तस्माद्वै सम्राडपि यां कां च दिशं गच्छति नैवास्या अन्तं गच्छति अनन्ता हि दिशो दिशो वै सम्राट्! श्रोत्रꣳ श्रोत्रं वै सम्राट्! परमं ब्रह्म नैनꣳ श्रोत्रं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ९ ॥

नामतो गर्दभीविपीतः गोत्रतो भारद्वाजः श्रोत्रं वै ब्रह्मेति। अनन्त इत्येनदुपासीत। श्रोत्रस्य दिश एवानन्त्यम्। कश्चिदपि यां कां च दिशं गच्छति नैवास्या अन्तं गच्छति। अतोऽनन्ता हि दिशः। दिशो वै सम्राट्! इत्यादि समानम् ॥ ९ ॥

मनो वै ब्रह्मेति जाबालमतम्

यदेव ते कश्चिदब्रवीत् तच्छृणवामेत्यब्रवीन्मे सत्यकामो जाबालो मनो वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान् ब्रूयात् तथा तज्जाबालोऽब्रवीन्मनो वै ब्रह्मेत्यमनसो हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठं न मेऽब्रवीदिति एकपाद्वा एतत् सम्राट्! इति स वै नो ब्रूहि याज्ञवल्क्य! मन एवायतनमाकाशः प्रतिष्ठा आनन्द

इत्येनदुपासीत का आनन्दता ? याज्ञवल्क्य ! मन एव सम्राट् ! इति होवाच मनसा वै सम्राट् ! स्त्रियमभिहार्यते तस्यां प्रतिरूपः पुत्रो जायते स आनन्दो मनो वै सम्राट् ! परमं ब्रह्म नैनं मनो जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभꣳ सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ६ ॥

नामतः सत्यकामो जबालाया अपत्यं जाबालः । मनसि देवता चन्द्रमाः आनन्द इत्युपनिषत् । यस्मान्मन एवानन्दः तस्मात् मनसा वै सम्राट् ! स्त्रियमभिकामयमानोऽभिहार्यते प्रार्थयते । तस्यां प्रतिरूपोऽनुरूपः पुत्रो जायते पुत्रस्यानन्दहेतुत्वात् । स एव मनसा निर्वर्त्यते । तन्मनो ह्यानन्दहेतुः ॥ ६ ॥

हृदयं वै ब्रह्मेति शाकल्यमतम्

यदेव ते कश्चिदब्रवीत् तच्छृणवामेत्यब्रवीन्मे विदग्धः शाकल्यो हृदयं वै ब्रह्मेति यथा मातृमान् पितृमानाचार्यवान् ब्रूयात् तथा तच्छाकल्योऽब्रवीत् हृदयं वै ब्रह्मेति अहृदयस्य हि किꣳ स्यादित्यब्रवीत्तु ते तस्यायतनं प्रतिष्ठां न मेऽब्रवीदिति एकपाद्वा एतत् सम्राट् ! इति स वै नो ब्रूहि याज्ञवल्क्य ! हृदयमेवायतनमाकाशः प्रतिष्ठा स्थितिरित्येनदुपासीत का स्थितता ? याज्ञवल्क्य ! हृदयमेव सम्राट् ! इति होवाच हृदयं वै सम्राट् ! सर्वेषां भूतानामायतनꣳ हृदयं वै सम्राट् ! सर्वेषां भूतानां प्रतिष्ठा हृदये ह्येव सम्राट् ! सर्वाणि

भूतानि प्रतिष्ठितानि भवन्ति हृदयं वै सम्राट्! परमं ब्रह्म नैनं हृदयं जहाति सर्वाण्येनं भूतान्यभिक्षरन्ति देवो भूत्वा देवानप्येति य एवं विद्वानेतदुपास्ते हस्त्यृषभं सहस्रं ददामीति होवाच जनको वैदेहः स होवाच याज्ञवल्क्यः पिता मेऽमन्यत नाननुशिष्य हरेतेति ॥ ७ ॥

विदग्धः शाकल्यो हृदयं वै ब्रह्मेति। नामरूपकर्मात्मना हि भूतानि हृदयाश्रयाणि। तस्मात् हृदये ह्येव सम्राट्! सर्वाणि भूतानि प्रतिष्ठितानि भवन्ति। तस्मात् हृदयं स्थितिरित्युपासीत। हृदयदेवता प्रजापतिः। शिष्टमुक्तार्थम् ॥ ७ ॥

इति प्रथमं ब्राह्मणम्

द्वितीयं कूर्चब्राह्मणम्

जनकयाज्ञवल्क्ययोः गन्तव्यदेशं प्रति विचारः

जनको ह वैदेहः कूर्चादुपावसर्पन् उवाच नमस्तेऽस्तु याज्ञवल्क्य! अनु मा शाधीति स होवाच यथा वै सम्राट्! महान्तमध्वानमेष्यन् रथं वा नावं वा समाददीत एवमेव एताभि-रुपनिषद्भिः समाहितात्मासि एवं वृन्दारक आढ्यः सन् अधीतवेद उक्तोपनिषत्क इतो विमुच्यमानः क्व गमिष्यसि इति? नाहं तद्भगवन्! वेद यत्र गमिष्यामीति अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानिति ॥ १ ॥

जनको याज्ञवल्क्यं स्वाचार्यं मत्वा प्रणिपातपूर्वकं स्वात्मयाथात्म्यज्ञानं ब्रूहीति विज्ञापयतीत्याह—**जनक** इति । **जनको ह वैदेहः** स्वाचार्यं याज्ञवल्क्यं सर्वज्ञं मत्वा **कूर्चात्** स्वासनात् उत्थाय **उपावसर्पन्** पादयोर्निपतन् आचार्य-निकटे शिष्येण यद्विज्ञाप्यं तदुवाच—हे **याज्ञवल्क्य ! नमस्ते तुभ्यमस्तु । अनु मा शाधि** यथाहं कृतार्थः स्यां तथा मां आमोक्षमनुशाधि । इतिशब्दो वाक्यपरिसमाप्त्यर्थः । **स होवाच** याज्ञवल्क्यः—हे **सम्राट् ! यथा वै लोके महान्तं** दीर्घम**ध्वानं एष्यन् रथं वा नावं वा** स्थलजलसञ्चारसाधनं **समाददीत** संगृह्णीत **एवमेव एताभिः** वागादिब्रह्मोपासनो**पनिषद्भिः** समा-हित आत्मा अन्तःकरणं यस्य सोऽयं **समाहितात्मा** न केवलमुपनिषत्समाहित एवासि, किन्तु बृन्दारकैः देवैर**प्याढ्यः** पूज्यश्च **सन्** । किञ्च अधीता वेदा येन सोऽय**मधीतवेदः** । यस्मै तुभ्यमाचार्यैरुपनिषद उक्ताः स त्व**मुक्तोप-निषत्कः** । एवं सर्वविभूतिसंपन्नोऽपि सन् निष्प्रतियोगिकसन्मात्रज्ञानं विना एवं स्थलजलचररथनौस्थानीयब्रह्मोपासनोपनिषत्संपन्नोऽपि **इतोऽस्मात्** स्वावारक-वर्तमानदेहभ्रमात् **विमुच्यमानः** सन् **त्वं क गमिष्यसि** ? किं प्राप्यसे ? **इति** मुनिनाक्षिप्तः सम्राडाह—**नाहं तदियत्तां भगवन् ! वेद यत्र गमिष्यामीति** । यद्येव त्वं न विजानीषे यद्वस्तुप्रबोधसमकालं तन्मात्रमवशिष्यामीति, **अथ** स्वातिरिक्तहेयप्रबोधानन्तरं **ते** तुभ्यं मुख्याधिकारिणे वक्ष्यमाणप्रबोधसमकालं **यत्र** यस्मिन् स्वे महिम्नि **गमिष्यसि** स्वमात्रमवशिष्यसे **तत्** पद**महं ते** तुभ्यं **वक्ष्यामी**त्यनुगृहीतः सम्राडाह—तत्पदं **ब्रवीतु मे भगवानिति** । अस्माभिरु-द्धरणीयोऽयमिति केवलकृपया उपदिदेशेत्यर्थः ॥ १ ॥

दक्षिणाक्षिस्थपुरुषस्वरूपम्

इन्धो ह वै नाम एष योऽयं दक्षिणेऽक्षन् पुरुषः तं वा एतमिन्ध१ँ सन्तमिन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ॥ २ ॥

याज्ञवल्क्य आह—इन्ध इति। इन्धो दीप्तिमान ह वै नाम योऽयं चक्षुर्ब्रह्मेति पूर्वोक्तादित्यान्तर्गतः **पुरुष एष** एव **योऽयं** दक्षिणेऽक्षन् अक्षिणि विशेषतो व्यवस्थितः। सत्याभिधानस्तं वा दीप्तिमत्पुरुषमिन्धं सन्तं सन्तः **इन्द्रः परोक्षेणेत्याचक्षते**। यस्मात् **परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः**। असुरादयः प्रत्यक्षनामग्रहणप्रिया इत्यर्थः ॥ २ ॥

वामाक्षिस्थपुरुषस्वरूपम्

अथैतद्वामेऽक्षणि पुरुषरूपमेषास्य पत्नी विराट् तयोरेष संस्तावो य एषोऽन्तर्हृदय आकाशः अथैनयोरेतदन्नं य एषोऽन्तर्हृदये लोहितपिण्डः अथैनयोरेतत् प्रावरणं यदेतदन्तर्हृदये जालकमिव अथैनयोरेषा सृतिः संचरणी यैषा हृदयादूर्ध्वा नाडी उच्चरति यथा केशः सहस्रधा भिन्न एवमस्य एता हिता नाम नाड्योऽन्तर्हृदये प्रतिष्ठिता भवन्ति एताभिर्वा एतदास्रवदास्रवति तस्मादेष प्रविविक्ताहारतर इवैव भवति अस्माच्छारीरादात्मनः ॥ ३ ॥

अथैतद्वामेऽक्षणि पुरुषरूपं यं त्वं वैश्वानरमात्मानं संपन्नोऽसि **एषास्य** इन्द्रस्य **पत्नी**। **विराडन्नं** भोज्यत्वात्। तदेतदन्नं च अत्ता चेति। **तयो**रन्नान्नादभावमापन्नेन्द्राणीन्द्रयोः **एष संस्तावः** अन्योन्यसंस्थत्वम्। कोऽसावेष संस्तावः? **य एषोऽन्तर्हृदय आकाशः** हृदयान्तरावच्छिन्नाव्याकृताकाशः। **अथैनयो**रिन्द्राणीन्द्रयोः **एतदन्नं** शरीरस्थितिनिमित्तम्। किं तत्? **य एषोऽन्तर्हृदये** लोहितस्य घनीभूतत्वात् **लोहितपिण्डः** भुक्तान्नसारपरिणामः स एव। **अथैनयो**र्मिथुनीभूतेन्द्राणीन्द्रयोः भुक्तवतोः स्वपतोश्च **एतदेव** हि **प्रावरणं** भवति। किं तत् प्रावरणं? इत्यत्र **यदेतदन्तर्हृदये** बहुनाडीच्छिद्रबाहुल्यात् **जालकमिव** प्रावरणसामान्यं श्रुतिः कल्पयति। **अथैनयो**रिन्द्राणीन्द्रयोः **एषा**

सृतिर्मार्गः। अनेन जाग्रदाद्यवस्थात्रयं सञ्चरतीति **सञ्चरणी यैषा** हृदयदेशादूर्ध्वाभिमुखा **नाडी उच्चरति**। देहगतनाडीनां सुसूक्ष्मत्वदृष्टान्तमाह—**यथेति**। **यथा केशः सहस्रधा भिन्नः** अत्यन्तसुसूक्ष्मो भवति **एवमस्य** देहस्य संबन्धिन्यो **हिता नाम नाड्यः** सुसूक्ष्मरूपाः सत्यो मांसपिण्डाकारहृदये **प्रतिष्ठिता भवन्ति**। **एताभिः**रत्यन्तसूक्ष्मनाडीभिः **एतत्** शरीरमास्रवत् गच्छत् **आस्रवति** अन्नेन उपचीयमानं तिष्ठति। **तस्माद**न्नेनोपचीयमानः पिण्डः मूत्रपुरीषादिस्थूलमपेक्ष्य प्रविविक्ताहारादपि **प्रविविक्ताहारतरः** एष लिङ्गात्मा **इवैव भवति**। **अस्मात् शारीरात्** स्थूलशरीराभिमानिविश्वादात्मनस्तैजसो हि प्रविविक्तभुगित्यर्थः ॥ ३ ॥

तस्याध्यात्मप्राणलयः

तस्य प्राची दिक् प्राञ्चः प्राणा दक्षिणा दिक् दक्षिणे प्राणाः प्रतीची दिक् प्रत्यञ्चः प्राणा उदीची दिक उदञ्चः प्राणा ऊर्ध्वा दिक् ऊर्ध्वाः प्राणा अवाची दिक अवाञ्चः प्राणाः सर्वा दिशः सर्वे प्राणाः स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यते अशीर्यो न हि शीर्यते असङ्गो न हि सज्यते असितो न व्यथते न रिष्यत्यभयं वै जनक! प्राप्तोऽसीति होवाच याज्ञवल्क्यः स होवाच जनको वैदेहोऽभयं त्वा गच्छतात् याज्ञवल्क्य! यो नो भगवन्! अभयं वेदयसे नमस्तेऽस्तु इमे विदेहा अयमहमस्मि ॥ ४ ॥

एवंविदुषः सर्वात्मकतां प्रपञ्चयन् तद्गतविशेषाभयसिद्धपरमाभयतामुपदिशति—**तस्येति**। यस्तु स्थूलशरीरावच्छिन्नो विश्वो व्यष्टिसमष्ट्यैक्यज्ञानतो विराट्पदं भजति तस्यास्य विराड्भावं विहाय सूत्रभावमापन्नस्य मुख्यप्राणरूपत्वात् **तस्यास्य** प्राणात्मनः **प्राची दिक्** अञ्चतीति **प्राञ्चः प्राणाः**।

तथा दक्षिणा दिक् दक्षिणे प्राणाः। प्रतीची दिक् प्रत्यञ्चः प्राणाः। उदीची दिक् उदञ्चः प्राणाः। ऊर्ध्वा दिक् ऊर्ध्वाः प्राणाः। अवाची दिक् अवाञ्चः प्राणाः। सर्वा दिशश्च सर्वे प्राणा इति सूत्रभावमापन्नो विद्वान् सूत्रभावमपि बीजात्मावशेषं कृत्वा अथ वैराजसूत्रबीजगतविशेषांशं नेति नेतीति प्रविलाप्य तद्विलापनाधिकरणं ब्रह्मैवात्मा अगृह्य इत्यादि व्याख्यातमेतत्। हे जनक! त्वं स्वातिरिक्तभिदासामान्यापह्नवसिद्धं यत् निष्प्रतियोगिकत्वेनाद्वैतमवशिष्यते तदेतदभयं वै परमाभयमेव प्राप्तोऽसीति होवाच याज्ञवल्क्यः। स होवाच जनको वैदेहः—अभयमेव त्वा त्वां गच्छतात् गच्छतु। हे भगवन्! यस्त्वं नोऽस्मान् परमाभयं ब्रह्म वेदयसे ज्ञापयसि। एवं परमाभयदात्रे किं देयमवशिष्यते? तत्तुल्यनिष्क्रयाभावात् इयमेव निष्कृतिरस्त्विति नमस्तेऽस्तु। इमे विदेहा अयमहमस्मि। भवतामहं दासभावे स्थितः। मद्राज्यादिकं सर्वं प्रतिपद्यस्वेत्यर्थः॥ ४॥

इति द्वितीयं ब्राह्मणम्

तृतीयं ज्योतिर्ब्राह्मणम्

जनकयाज्ञवल्क्यसमागमः जनकप्रश्नश्च

जनकꣳ ह वैदेहं याज्ञवल्क्यो जगाम स मेने न वदिष्य इति अथ ह यज्जनकश्च वैदेहो याज्ञवल्क्यश्च अग्निहोत्रे समूदाते तस्मै ह याज्ञवल्क्यो वरं ददौ स ह कामप्रश्नमेव वव्रे तꣳ हास्मै ददौ तꣳ सम्राडेव पूर्वं पप्रच्छ॥ १॥

“आत्मेत्येवोपासीत”, “आत्मानमेवावेत् अहं ब्रह्मास्मीति”, “तदेतत् ब्रह्मापूर्वमनपरमनन्तरमबाह्यं अयमात्मा ब्रह्म सर्वानुभूः”, “यदेव साक्षादपरोक्षात् ब्रह्म”, “विज्ञानमानन्दं ब्रह्म” इत्यादि तृतीयचतुर्थपञ्चमाध्यायेषु

निर्विशेषं ब्रह्म प्रतिपादितम्। षष्ठाध्यायेऽपि "नाहं तत् भगवन्! वेद यत्र गमिष्यामि" इति जनकः स्वाज्ञानमवष्टभ्य "अथ वै तेऽहं तद्वक्ष्यामि यत्र गमिष्यसि" इति प्रतिज्ञाय संक्षेपतः स्वाज्ञदृष्टिविकल्पितव्यष्टिसमष्टिप्रपञ्चारोपापवादाधिकरणविराट्सूत्रबीजतुरीयस्वरूपं प्रतिपाद्य तद्गतविशेषजातं "नेति नेति" इति प्रविलाप्य तद्विलापनाधिकरणं प्रत्यगभिन्नं ब्रह्म अधिष्ठेयसापेक्षाधिष्ठानतामपि ग्रसित्वा यत् परमाभयरूपेणावशिष्टं "तदेतदभयं वै जनक! प्राप्तोऽसि" इति याज्ञवल्क्येन सम्राट् अभयं प्रापितः। इदानीं तु तमेतमर्थं स्वाज्ञविकल्पितावस्थात्रयावष्टम्भद्वारा महता तर्केणापि अयं सम्राट् परमाभयं प्रापयितव्य इतीदमारभ्यते। विद्यादानप्रतिग्रहविधिप्रकाशनार्थेयमाख्यायिका वरप्रदानसूचनतो विद्यास्तुत्यर्था च— **जनकमिति**। **जनकं ह वैदेहं** प्रति **याज्ञवल्क्यो जगाम**। स गच्छन् एवं चिन्तितवान्। किमिति? **स मेने न वदिष्य इति**। सं एनेनेति पदच्छेदः। एनेन अनेन राज्ञा संवदिष्ये संवादं करिष्ये इति। यद्वा—मदागमनप्रयोजनमद्यापि न वदिष्ये इति मेने इत्येवं संकल्पविशिष्टं याज्ञवल्क्यं जनकः तत्संकल्पकुण्ठनहेत्वाख्यायिकामाचष्टे—**अथेति**। **अथ** कालान्तरे जनकयाज्ञवल्क्यसमागमानन्तरं तयोः संवाद आसीत्। जनकस्याग्निहोत्रविषयविज्ञानसन्तुष्टो **याज्ञवल्क्यः तस्मै ह** जनकाय **वरं ददौ**। किं तत्? **स** जनको **ह कामप्रश्नमेव वव्रे**। त्वया यद्देयं तत् त्वय्येव तिष्ठतु। तद्वरं यदा वृणोमि तदा देयमिति। तथेति तस्मै याज्ञवल्क्यो वरं ददौ। तदर्थं तूष्णीमवस्थितं याज्ञवल्क्यं प्रति विज्ञाप्य **तं ह** वरं **सम्राट्** राजा एव **पूर्वमादौ पप्रच्छ** ॥ १ ॥

पुरुषस्य आदित्यज्योतिष्ट्वकथनम्

याज्ञवल्क्य! किंज्योतिरयं पुरुष इति? आदित्यज्योतिः सम्राट्! इति होवाच आदित्येनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति एवमेवैतत् याज्ञवल्क्य! ॥ २ ॥

किं पृष्टवान् राजा ? इत्यत आह—**याज्ञवल्क्य !** इति । स्वाभिमुखीकरणाय याज्ञवल्क्य ! इति संबोध्य येन ज्योतिषायं व्यवहरति **किंज्योतिरयं पुरुषः ?** **इति** । किमयमन्तःकरणज्योतिषा व्यवहरति तदतिरिक्तज्योतिषैव ? इति पृच्छति । याज्ञवल्क्योऽपि जनकाभिप्रायानुरोधेन अन्तःकरणादिव्यतिरिक्तमादित्यज्योतिः **सम्राट् ! इति होवाच** । तत् कथम् ? स्वव्यतिरेकेण चक्षुरनुग्राहकादित्येनैव **ज्योतिषायं** प्राकृतः पुरुष **आस्ते** । पल्ययते परस्मा उपदिशति । क्षेत्रमरण्यं वा गत्वा तत्र यत् विधेयं तत् **कर्म कुरुते** । **विपल्येति** विपर्येति । विशेषणबाहुल्यस्यान्तःकरणाद्यतिरिक्तात् ज्योतिःप्रसिद्ध्यर्थत्वात् याज्ञवल्क्योक्तं युक्तमित्यङ्गीकरोति—**एवमेवैतत् याज्ञवल्क्य !** इति ॥ २ ॥

ततः परं चन्द्राद्यात्मान्तज्योतिष्ट्वकथनम्

अस्तमित आदित्ये याज्ञवल्क्य ! किंज्योतिरेवायं पुरुष इति ? चन्द्रमा एवास्य ज्योतिर्भवतीति चन्द्रमसैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति एवमेवैतत् याज्ञवल्क्य ! ॥ ३ ॥ अस्तमित आदित्ये याज्ञवल्क्य ! चन्द्रमस्यस्तमिते किंज्योतिरेवायं पुरुष इति ? अग्निरेवास्य ज्योतिर्भवतीति अग्निनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति एवमेवैतत् याज्ञवल्क्य ! ॥ ४ ॥ अस्तमित आदित्ये याज्ञवल्क्य ! चन्द्रमस्यस्तमिते शान्तेऽग्नौ किंज्योतिरेवायं पुरुष इति ? वागेवास्य ज्योतिर्भवतीति वाचैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति तस्माद्वै सम्राट् अपि यत्र स्वः पाणिर्न विनिर्ज्ञायते अथ यत्र वागुच्चरति उपैव तत्र न्येतीति एवमेवैतत् याज्ञवल्क्य ! ॥ ५ ॥ अस्तमित आदित्ये याज्ञवल्क्य ! चन्द्रमस्यस्तमिते शान्तेऽग्नौ शान्तायां वाचि

किंज्योतिरेवायं पुरुष इति ? आत्मैवास्य ज्योतिर्भवतीति आत्मनैवायं ज्योतिषास्ते पल्ययते कर्म कुरुते विपल्येतीति ॥ ६ ॥

आदित्यास्तमये चन्द्रमा ज्योतिः। चन्द्रमसि अस्तमिते अग्निर्ज्योतिः। तस्मिन् शान्ते वाक् शब्दराशिः ज्योतिः। तस्यां शान्तायां आत्मैवास्य ज्योतिर्भवतीत्याह—**अस्तमित** इत्यादिना। यस्मात् वाग्ज्योतिषानुगृहीतोऽयं पुरुषः व्यवहरति तस्माद्वै सम्राट् अपि बाह्यज्योतिषोऽभावात् **यत्र स्वः पाणिः** स्वीयौ हस्तौ **न** हि विस्पष्टं **निर्ज्ञायते** तदानीं सर्वचेष्टानिरोधो भवति। **यत्र वागुच्चरति** तत्र तेन शब्दज्योतिषा श्रोत्रमनसोः नैरन्तर्यं भवति। तत्कार्यत्वं वाक् भजति। वाग्ग्रहणं गन्धादीनामुपलक्षणार्थम्। **उपैव तत्र न्येति** समीप एव विद्यमानगन्धादिं घ्राणादिः गृह्णाति। एवमित्यादि समानम्। जाग्रति चक्षुरादिकरणानि बहिर्मुखानि भवन्ति। तत्रानुग्राहकमादित्यज्योतिः। तदानीमस्य समग्रव्यवहृतिर्भवति। स्वप्ने व्यवहृतिः प्रातिभासिकी। सर्वावृतिः सुषुप्तिः। तस्मात् सुषुप्तौ शान्तायां वाचि तत्र किं ज्योतिः ? इत्यत्र— **आत्मैवास्य ज्योतिर्भवतीति**। स्वातिरिक्तकार्यकरणसङ्घातातिरेकेण स्वयं स्थित्वा तत्प्रवृत्तिनिमित्ततया अततीत्यात्मा। स एव हि प्रत्यग्ज्योतिर्भवति। आदित्यादिज्योतिषामुपरमेऽपि अन्तःकरणस्थं ज्योतिः तद्वृत्तिप्रकाशकतयावगम्यते आदित्यादिवत् अचाक्षुषत्वात्। सोऽयं विद्वान् **आत्मनैवायं ज्योतिषास्ते** प्रत्यग्भावेनास्ते। **पल्ययते** स्वयाथात्म्यं परस्मै उपदिशति। स्वातिरिक्तान्तःकरणप्रविलापनं **कर्म कुरुते**। कदाचित् **विपल्येति** स्वभावतो विपर्येति। इतिशब्द इवार्थः। वस्तुतो न विपर्येतीत्यर्थः ॥ ३–६ ॥

आत्मनो विज्ञानमयत्वम्

कतम आत्मा इति ? योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः स समानः सन् उभौ लोकावनुसंचरति ध्यायतीव

लेलायतीव स हि स्वप्नो भूत्वा इमं लोकमतिक्रामति मृत्यो रूपाणि ॥ ७ ॥

सर्वव्यतिरिक्तोऽपि करणग्रामयोगतो यथावत् न ज्ञायते। अतः त्वां पृच्छामि—**कतम आत्मा? इति**। येनात्मज्योतिषा आस्ते इत्युक्तं देहेन्द्रियमनस्सु **कतमोऽसावात्मा?** यद्वा—**योऽयं विज्ञानमयो** वा तवाभिप्रेतः, इमे देहादयो विज्ञानमया इव भान्ति। वागादिप्राणेषु तेजस्विषु **हृदि चान्तर्ज्योतिः पुरुषः** कतमः? इत्यन्तं प्रश्नवाक्यम्। अथवा कतम आत्मा? इत्येतावदेव प्रश्नवाक्यम्। योऽयमित्यादि प्रतिवचनम्। **योऽयमिति** आत्मनः प्रत्यक्षनिर्देशः। विज्ञानं बुद्धिः तदुपाधिको विज्ञानमय उच्यते। यथा चन्द्रादिसंपृक्तो राह्वादिरुपलभ्यते तथा बुद्धिवृत्तिसंपृक्तात्माधिगमः बुद्धेः तदवगत्युपायत्वात्। उक्तं हि "मनसा ह्येव पश्यति मनसा श‍ृणोति" इति। अतोऽवसीयते **विज्ञानमय** इति। युक्तमेवास्य विज्ञानप्रायत्वं ह्यन्तः उपलभ्यत्वात्। वागादिप्राणेषु तद्गतविकारजातमस्पृश्य तद्विलक्षणतया तत्प्रवृत्तिनिमित्तत्वेन तद्वृत्तिसहस्रभावाभावप्रकाशकत्वेन वस्तुतः स्वातिरिक्तप्राणाद्यपह्नवसिद्धनिष्प्रतियोगिकस्वमात्रत्वेन च यो विद्वद्धृदि **अन्तर्ज्योतिष्ट्वे**नावभासते सोऽयमात्मा उच्यते। तेनात्मज्योतिषा आस्ते लोकः। पल्ययते कर्म कुरुते। सर्वव्यवहृत्यास्पदमात्मैव। नासति परमज्योतिषि सर्वान्तरे सूर्यादिरपि न भासते। न ह्यभारूपस्य भासकता उपपद्यते। यस्मादेवं तस्मात् आत्मज्योतिरेव सर्वप्रकाशकमिति फलितोऽर्थः। एवं स्वाज्ञदृष्टिविकल्पितजाग्रदवस्थायां साधिष्ठानकरणग्रामप्रवृत्तिनिवृत्तिनिमित्तमात्मज्योतिः दर्शितम्। स्वप्नेऽप्येतदेवेति प्रदर्शयन्नाह—**स** इति। यः स्वयंज्योतिरात्मा जाग्रत्प्रपञ्चावभासकः **सोऽयं** भासकत्वादिधर्मतः स्वप्नेऽपि **समानः सन् उभौ लोकौ** स्वविकल्पितान्तःकरणमवष्टभ्य जाग्रत्स्वप्नप्रपञ्चौ समानतयानुसञ्चरति सन्निहितत्वात्। तद्योगेन तद्वानिव लक्ष्यते। यथा शुक्लरक्तनीलपीतादिकमवभासयन् तत्सदृशस्तदाकारो भवति तथान्तःकरणमवभासयन् तद्वान्। अतः कृत्स्नं क्षेत्रमवभासयन् तत्तदाकारो भवतीति स्वाज्ञलोको मुह्यति। तद्दृष्ट्यायमु-

भाविहलोकपरलोकौ वान्तःकरणोपाधियोगभ्रमादनुसञ्चरति। न स्वदृष्ट्यानुभवं दर्शयति। ध्यायतीव लेलायतीवेति कालत्रयाविकृतस्वेन ज्योतिषा ध्यानादिव्यापारवर्तीं बुद्धिं अवभासयन् तत्सदृशं ध्यायतीति लोकभ्रान्तिः। तां इवकारो निराकरोति—ध्यायतीवेति। तथा लेलायतीव लेलायमानेषु देहेन्द्रियादिषु चलत्सु स्वयमपि लेलायति चलतीव भाति। न वस्तुतः निरुपाधिकत्वात्। उपाधियोगभ्रान्तिरेव उभयलोकानुकूलध्यानलेलायमानादिव्यापृतिहेतुः न स्वतः इत्यत्र हेतुमाह—**स हीति**। य आत्मा जाग्रद्व्यापृतिहेतुधीवृत्तिसहस्रं भासयन् जागरितवत् लक्ष्यते तथा स ह्यात्मा स्वप्नादिव्यापृतिहेतुधीवृत्तिकदम्बमवभासयन् **स्वप्नो भूत्वा** तत्रत्यकार्यकरणसंघातसंबन्धशून्यः सन् स्वात्मज्योतिषा **इमं लोकं** शास्त्रीयव्यवहारास्पदमुभयलोकसञ्चारहेतुस्वाविद्यातत्कार्यक्रियाकारकफलायमान**मृत्योः रूपाणि चातिक्रामति** स्वेन ज्योतिषा तत् सर्वमतिक्रम्य वर्तते॥ ७॥

तस्यैव स्वाज्ञदृष्ट्या संसारदशानुक्रमः

स वा अयं पुरुषो जायमानः शरीरमभिसंपद्यमानः पाप्मभिः सꣳसृज्यते स उत्क्रामन् म्रियमाणः पाप्मनो विजहाति॥ ८॥

बुद्ध्याद्युपाधियोगायोगभ्रमतः संसारित्वासंसारित्वे। वस्तुतो बुद्ध्याद्युपलक्षितस्वाविद्यापदतत्कार्यकलना अस्ति नास्तीति विभ्रमासंभवप्रबोधसिद्धात्मा निष्प्रतियोगिकस्वमात्रमवशिष्यत इति सर्वोपनिषदामर्थः। तत्र स्वाज्ञदृष्टिप्रसक्तसंसारदशामनुक्रामति—**स वा** इति। यः स्वाज्ञदृष्ट्या संसारित्वेन प्रकृतः **स वायं पुरुषः** स्वकृतकर्मानुरोधेन **जायमानः**। तत् कथं अजस्य जातिः? इत्यत आह—**शरीरमभिसंपद्यमान** इति। स्वान्यत्र देहदारादावात्मात्मीयाभिमानत इत्यर्थः। तेनैव ह्ययं धर्माधर्माश्रयपाप्मभिः **संसृज्यते**। वर्तमानकर्मक्षयार्थ-

स्वात्तशरीरात् उत्क्रामन् म्रियमाण ऊर्ध्वं गच्छन् स्वसंसृष्टपाप्मनो विजहाति तैः वियुज्यते ॥ ८ ॥

तस्य लोकद्वयभजनम्

तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च सन्ध्यं तृतीयꣳ स्वप्नस्थानं तस्मिन् सन्ध्ये स्थाने तिष्ठन् एते उभे स्थाने पश्यति इदं च परलोकस्थानं च अथ यथाक्रमोऽयं परलोकस्थाने भवति तमाक्रममाक्रम्य उभयान् पाप्मन आनन्दाꣳश्च पश्यति स यत्र प्रस्वपिति अस्य लोकस्य सर्वावतो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भासा स्वेन ज्योतिषा प्रस्वपिति अत्रायं पुरुषः स्वयंज्योतिर्भवति ॥ ९ ॥

एवं जाग्रदाद्यवस्थारूढः संसारी घटीयन्त्रवत् लोकद्वयं सञ्चरन् अविश्रान्तं संसरति। तद्दृष्ट्या स्वाज्ञानावधि लोकद्वयं भोग्यत्वेन सत्यं भवतीत्याचष्टे—तस्येति। यः संसारित्वेन व्यपदिष्टः **तस्य वा एतस्य पुरुषस्य** भोग्यतया **द्वे एव स्थाने भवतः**। न ह्यस्य तृतीयादिस्थानमस्ति अवधारणात्। के ते? इत्यत आह—**इदमिति**। शरीरेन्द्रियाद्यभिमानास्पदं स्थानमिदं च जन्म शरीरवियोगोत्तरकालानुभाव्यं **परलोकस्थानं च**। यत् तयोः सन्ध्यं तत् लोकद्वयसन्धिः। तत् **सन्ध्यं तृतीयं स्वप्नस्थानम्**। **तस्मिन् सन्ध्ये स्थाने** स्वप्नमये **तिष्ठन् एते उभे स्थाने पश्यति**। के ते? इति। **इदं च परलोकस्थानं च**। स्वप्नजागरितव्यतिरेकेण उभौ लोकौ जनिमृतितोऽनुसञ्चरति। कथमयं स्वप्नासन उभौ लोकौ पश्यति? इत्यत्र आक्रमत्यनेनेति **यथाक्रमोऽयं पुरुषः** परलोकप्रतिपत्तिसाधनाविद्याकर्मपूर्वप्रज्ञातो ह्युभयमाक्रामति। यः परादिस्थानाभिमुखः तं **आक्रममाक्रम्या**वष्टभ्य धर्माधर्मफलरूपान् **उभयान् पाप्मनः** पापफलानि दुःखानि **आनन्दान्** पुण्यफलानि च

जन्मान्तराद्दृष्टवासनाप्रतिपत्तव्यक्षुद्रधर्माधर्मफलजन्मानि च **पश्यति**। कथमेतदवगम्यते? दृष्टादृष्टश्रुताश्रुतादिविषयो हि स्वप्नः। तद्विपरीतं जागरणम्। प्रायशः स्वप्नजागरितस्थानातिरेकेण उभयलोकान् आदित्यादिबाह्यज्योतिषामभावे यत् विविक्तं स्वयंज्योतिरुपलभ्यते तेनैव सर्वं पश्यति। यो हि भूतभौतिकसंसर्गशून्यः **सोऽयं** पुरुषो **यत्र प्रस्वपिति** प्रकर्षेण स्वापमनुभवति। किं उपादाय? इत्यत आह—**अस्येति**। **अस्य** दृष्टानुभूतजागरितलोकस्य कार्यकरणसङ्घातं सर्वं वासनया अवतीति **सर्वावतो मात्रामुपादाय** भूतभौतिकजातैकदेशमुपादाय संगृह्य तत्तद्वासनावासितः सन् साधनान्तरनैरपेक्ष्येण **स्वयमेव** जाग्रत्प्रपञ्चं **विहत्य** विपात्य **स्वयमेव** पुनर्नूतनप्रपञ्चं **निर्माय स्वेनैव भासा स्वेनैव ज्योतिषा** लुप्तदङ्मात्रप्रकाशेन वासनाप्रपञ्चं विषयीकुर्वन् वर्तत इति यत् तत् **प्रस्वपितीत्युच्यते**। **अत्रावस्थायामयं पुरुषः स्वयमेव** विविक्त**ज्योतिर्भवति**। साधनसामग्रीमनपेक्ष्य स्वयमेव वासनाप्रपञ्चावभासकत्वात् स्वयंज्योतिष्ट्वं युज्यत इत्यर्थः॥ ९॥

स्वप्नस्य प्रतीतिमात्रत्वम्

न तत्र रथा न रथयोगा न पन्थानो भवन्ति अथ रथान् रथयोगान् पथः सृजते न तत्रानन्दा मुदः प्रमुदो भवन्ति अथानन्दान् मुदः प्रमुदः सृजते न तत्र वेशान्ताः पुष्करिण्यः स्रवन्त्यो भवन्ति अथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते स हि कर्ता॥ १०॥

जाग्रदवस्थायामिव स्वप्नेऽपि विषया उपलभ्यन्त इत्याकाङ्क्षायां ब्रह्ममात्रदृष्ट्या सर्वावस्थास्वपि स्वातिरिक्तविषयान्तरं नास्त्येव। स्वाज्ञदृष्ट्या जाग्रति विषयबाहुल्यं तत्तदुपलब्धिश्च। तद्दृष्ट्या तत्प्रदेशस्य विपुलत्वात्। स्वप्नकल्पनाधारकण्ठस्यात्यल्पत्वेन द्रष्टव्यबाह्यपदार्थासत्त्वात् प्रतीतिमात्रोऽयं स्वप्न इत्याह—**न तत्रेति**। न हि तत्र स्वप्ने रथादिविषयाः सन्ति। तथा रथेन युज्यन्त इति

रथयोगा अश्वादयोऽपि न सन्ति । न हि तत्र रथप्रचारपन्थानो मार्गा भवन्ति । अणुस्थानीयकण्ठगतनाड्यां मेर्वादिस्थानीयरथादिकल्पनासंभवात् । तथापि तत्र मनोऽधिष्ठाय तैजसोऽथ रथान् रथयोगान् पथः सृजते । न तत्र कारणं तदनुग्राहकदेवता वास्ति । वासनानिमित्तेयं कल्पनेत्यर्थः । किञ्च न हि तत्र सुखविशेषा आनन्दाः पुत्रादिनिमित्ता मुदः चिरप्रोषितागतपुत्रादिनिमित्ताः प्रमुदो वा भवन्ति । अथायमत्रानन्दान् मुदः प्रमुदः सृजते । तथा न हि जात्वपि तत्र वेशान्ताः पल्वलाः पुष्करिण्यः तटाकाः स्रवन्त्यो नद्यो वा भवन्ति । अथ वेशान्तान् पुष्करिणीः स्रवन्तीः सृजते । एवं वासनातो यः स्रष्टा स हि तत्कर्मकर्ता । एवमस्यान्तःकरणसंबन्धभ्रान्त्या कर्तृत्वं न परामार्थतः तदस्तीत्यर्थः ॥ १० ॥

आत्मनः स्वयंज्योतिष्ट्वादिकथनम्

तदेते श्लोका भवन्ति—

स्वप्नेन शारीरमभिप्रहत्यासुप्तः सुप्तानभिचाकशीति ।
शुक्रमादाय पुनरेति स्थानꣳ हिरण्मयः पुरुष एकहꣳसः ॥११॥
प्राणेन रक्षन्नवरं कुलायं बहिष्कुलायादमृतश्चरित्वा ।
स ईयतेऽमृतो यत्र कामꣳ हिरण्मयः पुरुष एकहꣳसः ॥१२॥
स्वप्नान्त उच्चावचमीयमानो रूपाणि देवः कुरुते बहूनि ।
उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्यन् ।
आराममस्य पश्यन्ति न तं पश्यति कश्चन इति ॥ १३ ॥

तं नायतं बोधयेदित्याहुः । दुर्भिषज्यꣳ हास्मै भवति यमेष न प्रतिपद्यते अथो खल्वाहुर्जागरितदेश एवास्य एष इति यानि ह्येव जाग्रत् पश्यति तानि सुप्त इत्यत्रायं पुरुषः स्वयंज्योतिर्भवति सोऽहं भगवते सहस्रं ददामि अत ऊर्ध्वं विमोक्षाय ब्रूहीति ॥ १४ ॥

अस्मिन्नर्थे एते श्लोका भवन्तीत्याह—**तदिति**। तदेतस्मिन् उक्तार्थे **एते श्लोका** मन्त्रा **भवन्ति**। अयमात्मा स्वप्नभावेन **शारीरं** शरीरं **अभिप्रहत्य** चेष्टाविरलं कृत्वा स्वयमसुप्तोऽलुप्तदृक्छक्तिः सन् स्वबाह्याध्यात्मिकव्यापृतिनिर्वाहकान्तःकरणारूढान् सर्वानेव भावान् प्रत्यस्तमितबाह्यान्तर्व्यापृतित्वेन **सुप्तानलुप्तदृक्छक्त्याभिचाकशीति** अवभासयति। य एवं स्वातिरिक्तं पश्यति सोऽयं **हिरण्मयो** ज्योतिर्मयः **पुरुषः** एक एव जाग्रत्स्वप्नाविहलोकपरलोकौ। तेषु हंसशब्दार्थप्रत्यगभिन्नब्रह्मरूपेतरबुद्धिं हन्तीत्येकहंसः। स्वभावोऽपि **शुक्रं** ज्योतिष्मत्करणकदम्बमादायावष्टभ्य **पुनर्जागरितं स्थानमेत्य** आगच्छतीत्यर्थः॥ ११॥ किञ्च—**प्राणेनेति**। नरकोपमम**वरं कुलायमिदं** शरीरं मृतभ्रान्तिनिरासाय पञ्चवृत्त्यात्मकप्राणेन **रक्षन्** स्वयं तु **कुलायात् बहिः स्वयममृतः** सन् **चरित्वा यत्र कामं** वासनारूपः कामो यत्र यस्यामवस्थायामुदेति यो **हिरण्मयः पुरुषः एकहंस** इत्युक्तः सोऽयं विज्ञानात्मा तं काममीयते तमवष्टभ्य तद्विषयावस्थां गच्छतीत्यर्थः॥१२॥ किञ्च—**स्वप्नान्त** इति। **स्वप्नान्ते** स्वप्नस्थाने देवतिर्यगाद्युच्चावचयोनि**मीयमानो** गम्यमानो **देवो** द्योतनावान् विज्ञानात्मा **बहून्यनन्तानि** वासना**रूपाणि कुरुते** निर्वर्तयति। **उतेव स्त्रीभिः** वयस्यैर्वा **सह मोदमान इव जक्षदिव उतापि** सिंहव्याघ्रादिदर्शनतो **भयानि पश्यन्निव** पश्यति॥ १३॥ **आराममिति**। **सर्वे** जीवा **अस्यात्मानो** यद्यत् वासनानिर्मितं ग्रामं पुरं स्त्रियमन्नाद्यमित्याद्यारमणमाक्रीडनमारामं गन्धर्वनगरतुल्यं सत्यवत् **पश्यन्ति**। **कश्चन** कोऽपि य एवंरूपकल्पनाधिकरणं तत्तद्रूपेण निरधिकरणरूपेण वा **न पश्यति**। स्वात्मभूतमपि यन्न पश्यति अहो भाग्यहीनोऽयं लोक इति श्रुतिराक्रोशति। स्वाज्ञदृष्टिप्रसक्तजाग्रदादावपि तत्कल्पनाधिकरणं स्वयंज्योतिरात्मा तत्कलनामस्पृश्य विविक्त उपलभ्यते। यत् विकल्पजातं स्वप्नाद्यवस्थारूपं तदायतनमधिकरणं यो न वेद **तं नावबोधयेदित्याहुः** सन्तः। बोधितोऽप्ययं सहसा न प्रतिबुध्यते। किन्तु विपरीतं गृह्णातीत्याह— **दुर्भिषज्यमिति**। यः स्वाज्ञादिदृष्टिप्रसक्तस्वातिरिक्तप्रपञ्चारोपापवादाधारतया वस्तुतो निराधारस्वमात्रता

चावशिष्यते तद्वित् तदेव भवति। प्रमाणतो ज्ञापितोऽपि बोधितोऽपि यमात्मानमेष स्वाज्ञो यथावन्न प्रतिपद्यते तस्य स्वाज्ञनदृढपटावृतत्वेन मूढत्वात्। तथाविधायास्मै श्रुत्याचार्यकृतपरमार्थोपदेशस्तु जात्यन्धबधिरमूकादिदोषचिकित्सावत् दुर्भिषज्यं भवति तत्त्वतोऽप्यधिकतरदुःखायासहेतुः भवतीत्यत्र—

> अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत्।
> महानरकसाम्राज्ये स तेन विनियोजितः॥ इति,
> न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्।

इति च श्रुतेः स्मृतेश्च। यत एवमतः स्वाज्ञस्य सफलं कर्मोपदिश्य क्रमेण चित्तशुद्ध्युपायः कथनीयः। तद्विना परमार्थोपदेशो न कर्तव्यः। "स हि स्वप्नो भूत्वा इमं लोकमतिक्रामति मृत्यो रूपाणि" इत्युक्तरीत्या यतः स्वप्ने स्वयंज्योतिरात्मा तद्वहिर्विविक्त उपलभ्यते। य एवमुपलब्धः स एवाथो अपि खलु जागरितदेशेऽपि वर्तत इत्याहुः। स्थानद्वयप्रविभक्तात्मन एकत्वात्। न चेहपरलोकाभ्यामन्यत् सन्ध्यं स्थानमस्ति। किन्तु इहलोक एव जागरितदेशः। तत्र यो विज्ञानात्मावभासते स एषोऽस्य स्वप्नस्थानः स्वात्मा स्वयंज्योतिः। तत्र हेतुमाह—यानीति। विज्ञानात्मा जागरितदेशे यान्यस्यादीनि पश्यति तान्येव सुप्तोऽपि पश्यतीति तदसत्; तत्र करणोपरमात् नान्यज्योतिषः संभवोऽस्ति। तथा चोक्तं "न तत्र रथाः" इत्यादि। तस्मात् अत्रायं पुरुषः स्वयंज्योतिरतिक्रामति इति च। इहलोकपरलोकजाग्रत्स्वप्नाद्यतिरेकेण नित्यः सन् आत्मा वर्तत इति याज्ञवल्क्येन यत् प्रतिपादितं तच्छ्रुत्वा सम्राट् यतोऽहं त्वयैवं बोधितः अतो हे भगवन्! ते तुभ्यं सहस्रं ददामि। अत ऊर्ध्वं विमोक्षाय ब्रूहि इति॥ १४॥

अवस्थात्रयेऽप्यस्य असङ्गत्वकथनम्

स वा एष एतस्मिन् संप्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नायैव स यत्तत्र

किंचित् पश्यति अनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुष इति एवमेवैतत् याज्ञवल्क्य ! सोऽहं भगवते सहस्रं ददामि अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १५ ॥ स वा एष एतस्मिन् स्वप्ने रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव स यत्तत्र किंचित् पश्यत्यनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुष इति एवमेवैतद्याज्ञवल्क्य ! सोऽहं भगवते सहस्रं ददामि अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १६ ॥ स वा एष एतस्मिन् बुद्धान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति स्वप्नान्तायैव ॥ १७ ॥

जनकेनैवं याज्ञवल्क्यः प्रार्थितः सन् एवमाह—स वा इति । य एषः स्वप्ने स्वयंज्योतिष्ट्वेन दर्शितः स वै प्रकृतः स्वयंज्योतिः पुरुषः एतस्मिन् संप्रसादे स्वापे जाग्रत्स्वप्नयोरन्तर्बाह्यविक्षेपकलुषितत्वेन तदपेक्षया स्वापस्य निर्दुष्टत्वेन सम्यक् प्रसीदतीति संप्रसादः स्वाप उच्यते । तस्मिन् संप्रसादे स्वप्नात् सुषुप्तिं जिगमिषुः विज्ञानात्मा स्वप्नावस्थ एव सन् रत्वा धीविकल्पितस्त्र्यादिरतिमनुभूयानेकधा इष्टबन्धुदर्शनादिना चरित्वा तत्कृतश्रममलब्ध्वा दृष्ट्वैव पुण्यं च पापं च तत्फलं च न तु कृत्वेत्यर्थः । कर्तैव पुण्यादिफलमनुभवति न द्रष्टा । तस्मात् स्वप्नो भूत्वा इमं लोकमतिक्रामति मृत्यो रूपाणि । एवं स्वावस्थानुभवोत्तरकालं पुनः पुनः प्रतिन्यायं प्रत्यहं प्रतियोन्याद्रवति निर्गच्छति । पुनः स्वप्नस्थानायैव जागरितवत् स्वप्नेऽपि करोतीत्यत आह—स यदिति । सोऽयमात्मा स्वप्ने यत्किञ्चित् पुण्यपापफलं यथा जाग्रति पश्यति तद्वत् पुण्यपापफलं पश्यति । स्वप्नदृक् तेनानन्वागतोऽननुबद्धो भवति । यदि स्वप्ने पापपुण्यादिकं कृतं तदा तेन बध्येत । न हि स्वप्ने पापादिकृत् पापिनमात्मानं मन्यते । नापि लोकः तं गर्हति बहिष्करोति वा । अतोऽयं तेनानन्वागतो भवति । स्वप्ने कृत्युपलब्धिमात्रं न तत्र क्रियास्ति ।

मूर्तस्य मूर्तसंश्लेषो युज्यते। न ह्यमूर्तस्य कुत्रापि संश्लेषोऽस्ति। यत एवमतो **असङ्गो ह्ययं पुरुषः** स्वप्नदृशस्तत्रत्यकर्मणा संश्लिष्टत्वात्। यतोऽसङ्गः ततोऽमृतो भवतीति मुनेर्वचनं सम्राट् श्रुत्वा तदनुमोदनं कृत्वा स्वकृतार्थतां पृच्छतीत्याह—**एवमिति। एवमेवैतत् याज्ञवल्क्य! सोऽहं भगवते सहस्रं ददामि अत ऊर्ध्वं विमोक्षायैव ब्रूहीति** मोक्षपदार्थैकदेशकर्मविवेकस्य दर्शितत्वात्। अत ऊर्ध्वं विमोक्षायैव ब्रूहीति ॥ १५ ॥ कथं पुनस्तत्रासङ्गत्वं? इत्यत आह— **स वा इति। स वै पुरुषः** संप्रसादात् प्रत्यागतः स्वप्ने यथाकामं **रत्वा चरित्वा दृष्ट्वैव पुण्यं** चेत्यादि पूर्ववत्। बुद्धान्ताय जागरितस्थानायैव स्वप्नस्थानतो द्रवति। यथासौ स्वप्ने तज्जदोषतो न लिप्यते तथा बुद्धान्ते जागरितकर्मसङ्गदोषतो न लिप्यत इत्यत आह—**स यदिति। स यत् तत्र बुद्धान्ते किंचित् पश्यति अनन्वागतस्तेन भवति असङ्गो ह्ययं पुरुषः।** एतस्मिन् बुद्धान्ते यदुक्तं दृष्ट्वेति तदनुपपन्नम्। तत्रायं पुण्यपापे करोति। तत्फलभूतस्वर्गादिकं पश्यति अनुभवति तथा व्यवहरति च। तेनास्यासङ्गता कुतः? इति चेन्न; कर्तृत्वतत्सङ्गादेः स्वविकल्पितान्तःकरणोपाधिधर्मत्वेन स्वस्य तद्वृत्तिभावाभावप्रकाशकत्वेन तत्प्रवृत्तिनिमित्तमात्रत्वात् असङ्गता उपपद्यते। उक्तं चैतत् "ध्यायतीव लेलायतीव" इति। तस्मात् दृष्ट्वैव पुण्यं च पापं चेति सम्यगुक्तम्। न हि परमार्थतोऽस्य कर्तृत्वसंगत्वे भवतः। तथा च स्मृतिः "शरीरस्थोऽपि न करोति न लिप्यते" इति। अत एवास्यासङ्गत्वं निरङ्कुशमित्यर्थः। असङ्गो ह्ययं पुरुषः इत्याद्युक्तार्थम् ॥ १६ ॥ स्थानत्रयेऽप्ययमसङ्ग इत्याह— **स वा इति। स वा एष एतस्मिन्नित्यादि** खण्डद्वयेनासङ्गतैव प्रतिपादिता। यतः स्थानद्वयेऽस्यासङ्गता अतः स्वापेऽप्यसङ्गता अस्याविरुद्धा। स्थानत्रयधर्मविलक्षणत्वेनातोऽयममृतः **प्रतियोन्याद्रवति स्वप्नान्तायैव।** शिष्टमुक्तार्थम् ॥ १७ ॥

आत्मनोऽसङ्गत्वे महामत्स्यदृष्टान्तः

तद्यथा महामत्स्य उभे कूलेऽनुसंचरति पूर्वं चापरं च एवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च ॥

"स वा एष एतस्मिन्" इत्यादि खण्डत्रयेण या सिसाधयिषिता सेयमात्मनः सर्वत्रासङ्गता साधिता। अतोऽयमसङ्गात्मा स्थानत्रयातिरेकेण साधितः। उक्तं चैतत् "स हि स्वप्नो भूत्वा इमं लोकमतिक्रामति" इति। एवं प्रतिपादितार्थं दृष्टान्तेन स्पष्टयति—**तद्यथेति**। तत् तत्र यथा लोके महांश्चासौ नादेयो मत्स्यश्चेति **महामत्स्यः** स्वच्छन्दचारी नद्या **उभे कूले पूर्वं चापरं च सञ्चरति**, एवं चरन्नपि स्रोतसो वेगेन न ह्यपाकृष्यते, **एवमेवायं पुरुषः स्वप्नान्तं च बुद्धान्तं चेति एतावुभावन्तौ अनुसञ्चरति** तत्प्रयोजककामकर्मभ्यामसङ्गत्वेन विलक्षणो भवतीत्यर्थः॥ १८॥

आत्मनोऽवस्थात्रयवैलक्षण्ये श्येनदृष्टान्तः

तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रान्तः संहत्य पक्षौ संलयायैव ध्रियत एवमेवायं पुरुष एतस्मा अन्ताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यति॥ १९॥

स्थानत्रयासङ्गात्मनः संसारित्वमाविद्यकम्। तत्र जागरिते ससङ्गः समृत्युरिव स्वप्ने तद्वियुक्त इव। स्वापे तु न हि कामकर्मप्रसक्तिः दृश्यते। तत्रत्यकारणतापाये तदवच्छिन्नस्य नित्यमुक्तता प्रसीदति। तथा च वक्ष्यति "तस्यैतदतिच्छन्दा अपहतपाप्मा" इति। एवमवस्थात्रयवैलक्षण्यमात्मनो विवक्षुः दृष्टान्तं प्रकटयति—**तद्यथेति**। **यथास्मिन्** भौतिकाकाशे **श्येनो वा सुपर्णो वा** क्षिप्रचारी शीघ्रसञ्चारी **विपरिपत्य** चिरं विहृत्य पतनतः **श्रान्तः सन् पक्षौ संहत्य** सङ्कुच्य, सम्यक् लीयत इति संलयो नीडः तस्मै **संलयायैव** स्वयं **ध्रीयते** धार्यते तथा **एवमेवायं पुरुषः एतस्मा अन्ताय** स्वापाय **धावति यत्र** स्वापान्ते **सुप्तो न कञ्चन कामं कामयते**। न कंचनेत्यविशेषतोऽभिधानात् स्वप्नबुद्धान्तर्गताः सर्वे कामाः प्रतिषिध्यन्ते। तथा **न कञ्चन**

जाग्रत्प्रविभक्तस्वप्नं पश्यति । जाग्रद्दर्शनमपि स्वप्न इति श्रुतेराशयः । तथा च श्रुतिः "त्रय आवसथाः त्रयः स्वप्नाः" इति । यथा पक्षी पतनजश्रमापनुत्तये नीडाभिमुखो भवति तथायं जाग्रत्स्वप्नयोर्व्यवहृत्य श्रान्तः सन् क्रियाकारककलनास्पृष्टनीडस्थानीयमात्मानं प्रविशति । तदा निरायासानन्दभुक् विलक्ष्यते ॥

अविद्यातत्कार्यनिरूपणम्

ता वा अस्य एता हिता नाम नाड्यो यथा केशः सहस्रधा भिन्नः तावताणिम्ना तिष्ठन्ति शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य पूर्णा अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रत् भयं पश्यति तदत्राविद्यया मन्यते अथ यत्र देव इव राजेव अहमेवेदꣳ सर्वोऽस्मीति मन्यते सोऽस्य परमो लोकः ॥ २० ॥

स्वाविद्यातत्कार्यसङ्गासङ्गाभ्यामवस्थात्रयावच्छिन्नत्वं तदतीतत्वं च उक्तम् । तत्राविद्यातत्कार्यनिरूपणार्थमियं खण्डिकारभ्यते—**ता वा** इति । **अस्य** शिरःपाण्यादिमतः पुरुषस्य **ता वा एता हिता नाम नाड्यः यथा केशः सहस्रधा भिन्नः तावता** तावत्परिमाणेन **अणिम्ना** अणुत्वेन **तिष्ठन्ति** । ताश्च पुनः **शुक्लस्य नीलस्य पिङ्गलस्य हरितस्य लोहितस्य** वातपित्तश्लेष्मणामितरेतरसंयोगजरसस्य वर्णैः **पूर्णा** विचित्राश्च भवन्ति । तासु नाडीषु सप्तदशात्मकं लिङ्गशरीरं वर्तते । तदाश्रित्य हि स्वबाह्यान्तर्विलसितनानाविधवासना वर्तन्ते । **अथ** एवं सति **यत्र** यस्मिन् काले केचन तस्कराः स्वप्नसदृशं मां **घ्नन्तीव**त्यविद्याप्रत्ययो जायते । तथा **जिनन्तीव** वशीकुर्वन्तीव । केचन न घ्नन्तीव न वशीकुर्वन्तीव । तथा **हस्तीव** एनं **विच्छाययति** विद्रावयति । **गर्तं** जीर्णकूपादिं प्रति **पततीव** पतन्तमात्मानमवधारयति । किं बहुना ? मृषाविद्यावासनया **यदेव** चोरव्याघ्रयक्षराक्षसादिजुष्टजगद्भयं **पश्यति** भयहेत्वभावेऽपि स्वाविद्ययैव

एतत् भयं **मन्यते**। **अथ च पुनः यत्र** एतस्मिन् काले स्वाविद्यैव इन्द्रादिदेव **इव** मन्वादिराजा **इव** च आत्मानं **मन्यते**। जाग्रन्मनोरथमात्र-देवराजादिवासनावासितः तद्भावमेतीत्यर्थः। कदाचित् अविद्याक्षयसापेक्ष-प्रभवविद्यया **अहमेवेदं सर्वोऽस्मीति मन्यते**। **अस्यात्मनः** सर्वात्मभावोऽयं **परमो लोकः**। यथा स्वप्ने स्वयंज्योतिष्ट्वं प्रत्यक्षमुपलभ्यते तथैव फलीभूत-विद्यायां सर्वात्मभावरूपो मोक्षः प्रत्यक्षमुपलभ्यते। स्वाज्ञानफलं घ्नन्तीव जिनन्तीवेत्यादि। संसृतिपतनरूपो बन्धः। स्वज्ञानफलं मोक्षः। बन्धमोक्षकलना-विरलब्रह्ममात्रे बन्धमोक्षहेतुस्वाज्ञानस्वज्ञाने विकल्पिते। ते तु निष्प्रतियोगिक-ज्ञानावधि व्यावहारिकपदं गते। वस्तुतो बन्धमोक्षकलनापह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रतयावशिष्यते।

नाविद्यास्तीह नो माया शान्तं ब्रह्मेदमक्लमम्।

इति श्रुतेः। ब्रह्ममात्रावस्थितिर्हि परमो लोक इत्यर्थः॥ २०॥

स्वातिरिक्तासहब्रह्मस्वरूपम्

तद्वा अस्य एतदतिच्छन्दा अपहतपाप्म अभयꣳ रूपं तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरं तद्वा अस्य एतदाप्तकाममात्मकाममकामꣳ रूपꣳ शोकान्तरम्॥ २१॥

स्वातिरिक्तासहं ब्रह्म कीदृशं? इत्यत आह—**तद्वा** इति। यत् निष्प्रतियोगिकब्रह्ममात्रं **तद्वा** तदेव स्वात्मयाथात्म्यम्। तद्धि **अतिच्छन्दाः** अतिच्छन्दमित्यर्थः रूपपरत्वात्। गायत्र्यादिच्छन्दोवाची सान्तः। असावन्यः स्वरान्तः। अतिच्छन्दा इति पाठः स्वाध्यायपरो द्रष्टव्यः। अस्ति च लोके स्वच्छन्दः परच्छन्द इति। छन्दःशब्दः कामवाचकः। तस्मादेतत् अति-च्छन्दमित्युन्नेयम्। कामविरलमेतत् पदमित्यर्थः। धर्माधर्मविषयककामसत्त्वात् कथमतिच्छन्दता? इत्यत आह—**अपहतपाप्मेति**। पाप्मशब्देन धर्माधर्मा-

वुच्येते। उक्तं चैतत् "पाप्मभिः संसृज्यते पाप्मनो विजहाति" इति च। यत्र धर्माधर्माख्यः पाप्मापहतः तदास्पदं तत् धर्मवर्जितमित्यर्थः। किञ्च **एतद्रूपमभयं** भयहेतुद्वितीयप्रलयात्। यदेतद्विद्याफलं तदतिच्छन्दाः **अपहतपाप्म अभयं रूपं** संसारधर्मास्पृष्टम्। एतदतीतब्राह्मणावसानेऽभिहितं "अभयं वै जनक प्राप्तोऽसि" इति। तद्वृत्त्यर्थमत्रापि प्रपञ्चितम्। उपरिष्टादप्येतदेव विशदीक्रियते "ब्रह्माभयं वै ब्रह्म" इति। इत्थं परमाभयमापन्नो विद्वान् स्वातिरिक्तबाह्यान्तःकलनां न जहातीत्यत्र दृष्टान्तमाचष्टे—**तद्यथेति**। तत् तत्र **यथा** लोके कामुकः कश्चित् **प्रियया स्त्रिया** कामिन्या **संपरिष्वक्तः** सन् स्वात्मनो **बाह्यं किंचन** किंचिदपि **न वेद**, तथा **न ह्यन्तरं** वा किंचिद्भयमस्तीति वेद, **तथैवमेवायं पुरुषो** विज्ञानात्मा पारमार्थिकभावमापन्न**प्राज्ञेनात्मना संपरिष्वक्तो** यदि तदा **न बाह्यं** भेदजातं **वेद नान्तरम**भयमस्तीति वा वेद। अस्य तुर्यैकदृष्टित्वात्। तथा च खिलश्रुतिः—

> नात्मानं न परं चैव न सत्यं नापि चानृतम्।
> प्राज्ञः किंच न संवेत्ति तुर्यं तत् सर्वदृक् सदा॥

इति। यदेवं स्वातिरिक्तासंभवप्रबोधसिद्धं **तद्वा** तदेवास्यात्मनो याथात्म्य**रूपं** कामनीयकलनासंभवेऽपि स्वाज्ञदृष्टिप्रसक्तकामानां ब्रह्मात्मतयाप्तत्वाद**आप्तकामं** आत्ममात्रकामत्वाद**आत्मकामं**, अमनस्कत्वाद**कामं**, यदेवं रूपमवशिष्यते तत् **शोकान्तरं** शोचनीयविषयासंभवात् शोकविरलमित्यर्थः॥ २१॥

तत्र विशोकपदप्राप्तिः तीर्णत्वं च

अत्र पिता अपिता भवति माता अमाता लोका अलोका देवा अदेवा वेदा अवेदा अत्र स्तेनोऽस्तेनो भवति भ्रूणहा अभ्रूणहा चाण्डालोऽचाण्डालः पौल्कसोऽपौल्कसः श्रमणो अश्रमणस्तापसोऽतापसोऽनन्वागतं पुण्येनानन्वागतं पापेन तीर्णो हि तदा सर्वान् शोकान् हृदयस्य भवति॥ २२॥

शोचनीयपित्रादिभेदसत्त्वात् कथं एतत् विशोकपदमर्हति? इत्यत आह— **अत्रेति**। यदेतदतिच्छन्दमभवदित्यादिवस्तुयाथात्म्यमत्रास्मिन् ब्रह्ममात्रे स्वाज्ञदृष्ट्या पित्रादितापसान्तकलनोपलक्षितस्वाविद्यापदतत्कार्यजातं विद्यत इति यत् तत् स्वज्ञदृष्ट्या अपित्राद्यतापसान्तपदं पित्रादिविलयाधिकरणं ब्रह्म भवति। परमार्थदृष्ट्या निष्प्रतियोगिकब्रह्ममात्रमवशिष्यते। तन्मात्रावस्थिते स्वातिरिक्तपित्राद्यसंभवप्रबोधनिष्पन्नत्वात्। यस्य यो जनकः तस्य स **पिता**। तथा या जनयित्री सा **माता**। कर्मभिः जेतव्या **लोकाः**। कर्मफलभोक्तारो **देवाः**। साध्यसाधनसंबन्धविधायकमन्त्रब्राह्मणात्मका ऋगादयो **वेदाः**। ब्रह्मस्वहर्ता **स्तेनः**। गर्भविच्छेदकृत् **भ्रूणहा**। शूद्रब्राह्मणीसंपर्कजः **चण्डालः**। स एव **चाण्डालः**। जातितो वा शूद्रक्षत्रियवनितोत्पन्नः पुल्कस एव **पौल्कसः**। जातितो वा कर्मत्यागनिमित्तः परिव्राट् **श्रमणः**। वानप्रस्थो हि **तापसः**। पित्रादितापसान्तग्रहणं सर्ववर्णाश्रमोपलक्षणार्थम्। किं बहुना? एतदभयं ब्रह्म येन केनापि शास्त्रविहित**पुण्यकर्मणा** विहिताकरणप्रतिषिद्धाचरण**पापकर्मणा** **वानन्वागतं** तत्संबन्धविरलमित्यर्थः। किं पुनरसंबन्धकारणं? इत्यत आह— **तीर्णो हीति**। यदैवमभयं ब्रह्मास्मीति जानाति **तदैव हृदयस्या**न्तःकरणस्य वृत्तिविशेषान् **शोकान्** नानाविधकामान् **तीर्णो**ऽयमतीतो **भवति**। तन्मात्रतयायमवशिष्यत इत्यत्र वक्ष्यति च—

> यदा सर्वे प्रलीयन्ते कामा येऽस्य हृदि श्रिताः।
> अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते॥

इति॥ २२॥

अस्य कदापि स्वयंज्योतिष्ट्वक्षत्यभावः

यद्वै तन्न पश्यति पश्यन् वै तन्न पश्यति न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् पश्येत्॥ २३॥ यद्वै तन्न जिघ्रति जिघ्रन् वै तन्न जिघ्रति न हि घ्रातुर्घ्रातेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीय-

मस्ति ततोऽन्यद्विभक्तं यज्जिघ्रेत् ॥ २४ ॥ यद्वै तन्न रसयते रसयन् वै तन्न रसयते न हि रसयितुः रसयतेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् रसयेत् ॥ २५ ॥ यद्वै तन्न वदति वदन् वै तन्न वदति न हि वक्तुर्वक्तेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्वदेत् ॥ २६ ॥ यद्वै तन्न शृणोति शृण्वन् वै तन्न शृणोति न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यच्छृणुयात् ॥ २७ ॥ यद्वै तन्न मनुते मन्वानो वै तन्न मनुते न हि मन्तुर्मतेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यन्मन्वीत ॥ २८ ॥ यद्वै तन्न स्पृशति स्पृशन् वै तन्न स्पृशति न हि स्प्रष्टुः स्पृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यत् स्पृशेत् ॥ २९ ॥ यद्वै तन्न विजानाति विजानन् वै तन्न विजानाति न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात् न तु तद्द्वितीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् ॥ ३० ॥

अत्रायं पुरुषः स्वयंज्योतिर्भवतीति यः प्रकृतः स्वयंज्योतिरात्मा आगन्तुकाविद्याकामकर्मविरल इत्युक्तम्। तत्रैवं चिन्त्यं—कामकर्मादिवत् स्वयंज्योतिष्ट्वमप्यागन्तुकम्। कुतः? संप्रसादानुपलब्धत्वात्। एतच्छङ्कानिरसनाय स्त्रीपुंदृष्टान्तपूर्वकमुपलब्धस्यात्मनः स्वयंज्योतिष्ट्वस्य सुप्तावग्रहणनिमित्तमेकीभावः "सुषुप्तस्थान एकीभूतः" इति श्रुतेः। न तु कामकर्मादिवत् स्वयंज्योतिष्ट्वमा-

गन्तुकम्। सवितुरौष्ण्यप्रकाशवत् स्वाभाविकमेतत्। अस्त्वेतत् स्वयंज्योतिष्ट्वं स्वयंज्योतिरपि सुप्तौ न पश्यतीति विप्रतिषिद्धम्। स्वभावतश्चैतन्यं किंचिदपि न जानातीत्याशङ्कायां कदापि स्वयंज्योतिष्ट्वक्षतिः नास्तीति प्रकटयितुमिदमाम्नायते—**यद्वै तत्** इत्यादिना। **यद्वै तत्** स्वापे भेदजातं **न पश्यतीति** जानीषे युक्तं चैतत्, स्वापावस्थाप्रवेशस्य चक्षुर्मनआदिदर्शनकरणोपरतिपूर्वकत्वात् वस्त्वन्तराभावाच्च। तस्मादयं न किंचित् पश्यति। स्वापादौ स्वातिरिक्तं नास्तीति **पश्यन्नेव** स्वातिरिक्तं **न पश्यति** भास्यघटादिविषयाभावे दीपादेर्भास्यसापेक्षभासकता निवर्तते। यथा दीपप्रकाशस्य न हि विपरिलोपोऽस्ति तथा **न हि द्रष्टुः** स्वरूपभूत**दृष्टेः विपरिलोपो** विनाशो **विद्यते**। कुतः? **अविनाशित्वात्**। एवं चेत् अविनाशित्वमस्यास्तु, किं न पश्यति? इत्यत आह—**न त्विति**। **ततः** स्वस्माद**तिरेकेण विभक्तं यत् पश्येत्** यदुपलभ्येत **द्वितीयं** वस्तु **न तु** नैव स्वभिन्नं **द्वितीयं** वस्त्वस्ति ग्राह्यग्राहकविषयकरणानां परेण एकीभूतत्वात् चैतन्यदृष्टिरेकैव अवशिष्यते॥ २३॥ **यद्वै तन्न जिघ्रति** इत्यादि **यद्वै तन्न विजानाति** इत्यन्तं "यद्वै तन्न पश्यति" इत्युक्तार्थसमानमित्यर्थः॥ २४–३०॥

जाग्रत्स्वप्नवत् स्वापे विशेषज्ञानाभावः

यत्र वान्यदिव स्यात् तत्रान्योऽन्यत् पश्येत् अन्योऽन्यत् जिघ्रेत् अन्योऽन्यत् रसयेत् अन्योऽन्यत् वदेत् अन्योऽन्यच्छृणुयात् अन्योऽन्यन्मन्वीत अन्योऽन्यत् स्पृशेत् अन्योऽन्यत् विजानीयात्॥ ३१॥

कथं पुनः स्वापे जाग्रत्स्वप्नवत् विशेषं न विजानाति? इत्यत आह—**यत्रेति**। **यत्र** यस्मिन् जागरिते स्वप्ने वा स्वात्मनो**ऽन्यत्** वस्त्वन्तर**मिव** स्वाज्ञदृष्टिविकल्पितं **स्यात् तत्रान्योऽन्यत् पश्येत्**। तथा च दर्शितं "स्वप्ने

प्रत्यक्षतो घ्नन्तीव जिनन्तीव ” इति। तत्रान्योऽन्यत् जिघ्रेत् रसयेत् वदेत् शृणुयात् मन्वीत स्पृशेत् विजानीयादिति। एवं विभ्रमहेत्वविद्या यदि शान्ता तदा तद्विकल्पितवस्त्वन्तराभावात् को वा केन कं पश्येत् शृणुयात् विजानीयात्? वस्तुतः क्रियाकारकफलोपलक्षितस्वातिरिक्तप्रपञ्चग्रासं ब्रह्म निष्प्रतियोगिकस्वमात्रतयावशिष्यत इत्यर्थः॥ ३१॥

स्वमात्रतयावशिष्टात्मस्वरूपम्

सलिल एको द्रष्टाद्वैतो भवति एष ब्रह्मलोकः सम्राट्! इति हैनमनुशशास याज्ञवल्क्यः एषास्य परमा गतिः एषास्य परमा संपत् एषोऽस्य परमो लोक एषोऽस्य परम आनन्द एतस्यैवानन्द-स्यान्यानि भूतानि मात्रामुपजीवन्ति॥ ३२॥

स्वमात्रतयावशिष्टात्मा कीदृशः? इत्यत आह—**सलिल** इति। य एवं स्वातिरिक्तकलनाविरलः सोऽयमात्मा स्वातिरिक्तकल्मषाभावात् सलिलवत् स्वच्छभूतः। तत्तुल्यः कोऽप्यस्तीत्यत आह—**एक** इति। द्वित्वापादकस्वाज्ञ-दृष्टिप्रसक्तौ तद्भावाभावद्रष्टा दृङ्मात्ररूपत्वात्। दृश्यसापेक्षद्रष्टुः सविशेषता स्यात् इत्यत आह—**अद्वैत** इति। द्रष्ट्रतिरिक्तदृश्याद्यभावतो द्रष्टा द्रष्ट्टत्वमुत्सृज्य निष्प्रतियोगिकाद्वैतरूपो **भवती**त्यर्थः। “प्रपञ्चोपशमः शिवोऽद्वैतः” इति श्रुतेः। य एवमद्वैतः स **एष** ब्रह्मैव लोको **ब्रह्मलोकः** तदतिरिक्तलोकादेर्मृग्य-त्वात्। हे **सम्राट्!** इत्येनं राजानं संबोध्य मयोक्तो य आत्मा स्वाज्ञादि-दृष्टिप्रसक्तस्वातिरिक्तजाग्रदाद्यवस्थावच्छिन्नप्रपञ्चमोहे सत्यसति निष्प्रतियोगिक-स्वमात्रतयावशिष्यत इति **याज्ञवल्क्योऽनुशशासे**ति श्रुतेर्वचनम्। किमिति? या स्वमात्रावस्थानलक्षणा तृप्तिः **सैषास्य** विज्ञानमयस्य **परमा गतिः** पर्यवसान-भूमित्वात्। “सा काष्ठा सा परा गतिः” इति श्रुतेः। किंच **एषैवास्य परमा संपत्** मोक्षसाम्राज्यरूपत्वात्। **एषोऽस्य परमो लोकः** कर्मादिसाधनबहिर्भूत-

ज्ञानमात्रनिष्पन्नत्वं परमत्वम्। एषोऽस्य परम आनन्दः निष्प्रतियोगिकतृप्तिरूपत्वात्। एतस्यैव निरंशाखण्डानन्दस्य स्वाज्ञदृष्टिप्रविभक्तमात्रां कलामन्यानि ब्रह्मादिस्तम्बान्तभूतानि विषयेन्द्रियसंयोगजां मत्वा उपजीवन्ति आनन्दिनो भवन्ति। वस्तुतोऽयमखण्डानन्दः। न हि तत्र उपजीव्यानि भूतानि सन्ति अखण्डानन्दस्य सन्मात्रत्वात् इत्यर्थः ॥ ३२ ॥

मानुषाद्यानन्देयत्ताप्रपञ्चनम्

स यो मनुष्याणाꣳ राद्धः समृद्धो भवति अन्येषामधिपतिः सर्वैर्मानुष्यकैर्भोगैः संपन्नतमः स मनुष्याणां परम आनन्दः अथ ये शतं मनुष्याणामानन्दाः स एकः पितृणां जितलोकानामानन्दः अथ ये शतं पितृणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दः अथ ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दो ये कर्मणा देवत्वमभिसंपद्यन्ते अथ ये शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः अथ ये शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः अथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दो यश्च श्रोत्रियोऽवृजिनोऽकामहतः अथ एष एव परम आनन्द एष ब्रह्मलोकः सम्राट्! इति होवाच याज्ञवल्क्यः सोऽहं भगवते सहस्रं ददामि अत ऊर्ध्वं विमोक्षायैव ब्रूहीति अत्र ह याज्ञवल्क्यो बिभयांचकार मेधावी राजा सर्वेभ्यो मा अन्तेभ्य उदरौत्सीदिति ॥ ३३ ॥

विषयेन्द्रियसङ्गजपरमानन्दमात्रावयवब्रह्मादिमनुष्यपर्यन्तानुभूतानन्दतारतम्यकथनद्वारेण मात्रिणमखण्डानन्दमभिव्यक्तीकर्तुं तदुपायमानुषाद्यानन्देयत्तां प्रपञ्चयति—**स य** इत्यादिना। **मनुष्याणां** मध्ये **स य:** कश्चित् **राद्धो**ऽविकल: समग्रावयवसंपन्न: **समृद्ध** उपभोगोपकरणसंपन्नो **भवति**। किंच समानजातीयानामन्येषां **अधिपति:** स्वतन्त्र: मनुष्याणामुपभोगकरणानि यानि तै: **सर्वै: मानुष्यकै: भोगै: संपन्नतम:**। **स** हि **मनुष्याणां परम आनन्द:**। तत्रानन्दानन्दिनोरभेदनिर्देशात् विषयानन्दोऽपि परमानन्दस्य नार्थान्तरम्। अत्र प्रियव्रत: तत्तुल्यो वा सार्वभौमो राजा उदाहर्तव्य:। एवं सार्वभौमानन्दमादिं कृत्वा शतगुणोत्तरोत्तरक्रमेण भूमिकां प्रतिपाद्य अथ यत्र विषयविषयिसंयोगजानन्द: शतगुणोत्तरोत्तरक्रमेण वर्धमान: काष्ठां भजति यत्र गणना समाप्यते तमेव परमानन्दं विवक्षन् आह—**अथेति**। ये **मनुष्याणां** एवंप्रकारा: **शतमानन्द**भेदा मिलिता यदि तदा **स एको**ऽयं स्वार्जितकर्मणा **जितलोकानां पितृणामानन्द:**। तस्य मनुष्यादिशतगुणपरिमितत्वात् पित्रानन्द **एको भवति**। सोऽपि शतगुणीकृतो **गन्धर्वलोक आनन्दो** भवति। सोऽपि शतगुणीकृतो यदि तदा अग्निहोत्रादिश्रौतकर्मणा देवत्वं प्रतिपन्ना: तेषां **कर्मदेवानामानन्दो** भवति। कर्मदेवानां शतगुणितानन्दस्तु आजानत उत्पत्तित एव ये देवा: ते आजानदेवा:। तेषामेक **आनन्दो** भवति। **यश्च** अधीतवेदवेदार्थ: **श्रोत्रिय:** पापजातं वृजिनं, तद्रहितोऽयम**वृजिन:**। स्वातिरिक्तविषयसमुदायतृष्णारहितोऽयम**कामहत:**। तस्याजानदेवै: समानानन्द इत्येतत्। चशब्दाच्छतगुणीकृतपरिमाणोऽयं विराट्छरीरायमाणप्रजापतिलोके **आनन्दो** भवति। तथा तादृशविज्ञानवान् **श्रोत्रियोऽवृजिनोऽकामहत** इत्युक्तार्थम्। एवं तत् शतगुणीकृतपरिमाण एक आनन्दो **ब्रह्मलोके** हिरण्यगर्भानन्द:। नात: परमानन्दगणना विद्यते। एवं ब्रह्मलोकाद्यानन्दपरम्परा यद्ब्रह्मानन्दमहोदधिकणमात्रतां भजति, यश्चैवं श्रोत्रियप्रत्यक्ष:, **अथ स एष एव परम आनन्द:** निष्प्रतियोगिकभूमानन्दरूपत्वात् "यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा", "विज्ञानमानन्दं ब्रह्म" इति श्रुते:। श्रोत्रियावृजिनत्वे तु सर्वत्र तुल्ये।

विशेषस्तु—अकामहत एव आनन्दशतगुणवृद्धिहेतुः। तथाविधानन्दाप्तिसाधनानि श्रोत्रियत्वावृजिनत्वाकामहतत्वान्यभिहितानि। कामसामान्यविरलश्रोत्रियप्रत्यक्षो हि परमानन्दः सर्वकामसङ्कल्पासम्भवप्रबोधसमकालमवशिष्यत इत्यत्र "सर्वविशेषं नेति नेतीति विहाय यदवशिष्यते तदद्वयं ब्रह्म",

यावद्यावन्मुनिश्रेष्ठ स्वयं सन्त्यज्यतेऽखिलम्।
तावत् तावत् परालोकः परमात्मैव शिष्यते॥ इति,
यच्च कामसुखं लोके यच्च दिव्यं महत्सुखम्।
तृष्णाक्षयसुखस्यैते नार्हतः षोडशीं कलाम्॥

इति च श्रुतिस्मृती मानम्। **एष ब्रह्मलोकः सम्राट्! इति होवाच याज्ञवल्क्यः। सोऽहमेवमनुशिष्टो भगवते तुभ्यं सहस्रं गवां ददामि। अत ऊर्ध्वं विमोक्षायैव** ब्रूहीति सम्राड्वचो निशम्य **याज्ञवल्क्यो विभयाञ्चकार** भीतवान्। न हि **याज्ञवल्क्यो** वक्तुं सामर्थ्याभावात् अज्ञानाद्वा बिभयाञ्चकार। किं तर्हि? **मेधावी राजा सर्वेभ्यो मा अन्तेभ्यो** मत्प्रश्ननिर्णयावसानेभ्य **उदरौत्सीत्** अवरोधं कृतवान्। यद्यन्मया विमोक्षप्रश्नरूपं निर्णीतं मदीयं विज्ञानं कामप्रश्नव्याजेन अपहरतीति भयकारणमेतत् नान्यदित्यर्थः॥ ३३॥

विस्तरेण सनिमित्तसंचरणवर्णनम्

स वा एष एतस्मिन् स्वप्नान्ते रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव॥ ३४॥

पुरा विज्ञानमयः स्वयंज्योतिरात्मा स्वप्ने प्रदर्शितः। स्वप्नान्तबुद्धान्तसंचारेण कार्यप्रपञ्चासङ्गत्वं अतिरिक्तत्वं चाभिहितम्। महामत्स्यदृष्टान्तेन च "घ्नन्तीव जिनन्तीव" इति स्वाविद्यातत्त्वं निर्धारितम्। तथा विद्यया सर्वात्मभावोऽपि प्रकटितः। सोऽस्य परमो लोक इति यः स्वयंज्योतिरात्मा स एष स्वाज्ञविकल्पितविशेषसामान्यापाये निरंशाखण्डपरमानन्दतया निष्प्रतियोगिकस्वमात्र-

मवशिष्यत इत्येतावता ग्रन्थेन प्रकाशितम् । एवं विद्याविद्याकार्ये मोक्षबन्धने निर्दिष्टे । तथापि मदुक्तं सर्वं दृष्टान्तं मत्वा दार्ष्टान्तिकस्थानीयमोक्षबन्धने सहेतुके कामप्रश्नार्थभूते त्वया वक्तव्ये इति पुनः पर्यनुयुङ्क्ते सम्राट् । "अत ऊर्ध्वं विमोक्षायैव ब्रूहि" इति पृच्छतः अयमाशयः—यत् दार्ष्टान्तिकत्वेन वर्णितं तदेव विस्तरेण वर्णनीयमिति । तदर्थोऽयमारम्भः—स वा इत्यादिना । **स वा एष एतस्मिन् स्वप्नान्ते रत्वा** इति पूर्ववत् । बुद्धान्तायैव द्रवतीत्यादि संसारो वर्ण्यते ॥ ३४ ॥

आत्मनो देहान्तरप्राप्तौ शकटदृष्टान्तः

तद्यथा अनः सुसमाहितमुत्सर्जत् यायात् एवमेवायꣳ शारीर आत्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन् याति यत्रैतदूर्ध्वोच्छ्वासी भवति ॥ ३५ ॥

यथायं स्वप्नान्तात् बुद्धान्तमागतः तथास्मात् देहात् देहान्तरं प्रतिपद्यत इत्यत्र दृष्टान्तमाह—**तद्यथेति** । **तत्** तत्र **यथा अनः** शकटः **सुसमाहितं** संसारोपयोग्युपकरणेन संपन्नं यावद्भारभरितं शाकटिकेनाप्यधिष्ठितं सत् **उत्सर्जत्** शब्दं कुर्वत् **यायात्** गच्छेत् तथा **एवमेव अयं** शरीरे भवः **शारीर आत्मा** स्वप्नबुद्धान्ताविव पाप्मसंयोगवियोगलक्षणजन्ममरणाभ्यां इहलोकपरलोकावनुसंचरति । **प्राज्ञेनात्मनान्वारूढो**ऽधिष्ठित **उत्सर्जन् याति** । उक्तं चैतत् "आत्मनैवायं ज्योतिषास्ते" इति । स्वभास्यप्राणप्रधानलिङ्गे गच्छति सति तदुपाधिरप्यात्मा गच्छतीव गच्छति । उक्तं हि तत् "ध्यायतीव लेलायतीव" इति । स्वाङ्गदृष्ट्यायमात्मा यमदूतैर्मर्मसु निकृत्यमानेषु हा हतोऽस्मीति आर्तशब्दं कुर्वन् याति । कदा ? इत्यत्र—एतदिति क्रियाविशेषणम् । **यत्रैतदूर्ध्वोच्छ्वासी भवति** । एवमुत्क्रान्तिकाले परवशीकृतचित्ततया पारलौकिकस्मृतिलोपो जायते । यस्मादेवं तस्मात् चरमावस्थागमनात् पुरैव पुरुषार्थसाधनकर्तव्यतायामप्रमत्ता भवतेति श्रुतिराह—यत्रोच्छ्वासी भवतीति ॥ ३५ ॥

ऊर्ध्वोच्छ्वासित्वे आम्रादिदृष्टान्तः

स यत्रायमणिमानं न्येति जरया वा उपतपता वा अणिमानं निगच्छति तद्यथा आम्रं वा उदुम्बरं वा पिप्पलं वा बन्धनात् प्रमुच्यते एवमेवायं पुरुष एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति प्राणायैव ॥ ३६ ॥

कदा एवं स्यात्? इत्यत आह—**स यत्रेति**। **सोऽयं** पिण्डात्मा **यत्र** यस्मिन् काले यं **अणिमानं** कार्श्यं नितरामेति; किंनिमित्तं? इत्यत्र स्वाभाविक-**जरया वा** कार्श्यं गच्छति। ज्वरादिना उपतपतीत्युपतापः तेन **उपतपता वा अणिमानं निगच्छति**। पिण्डात्ममानिनः षड्भावविकारध्रौव्यात् वैराग्यहेतोः उत्सर्जन यातीत्युक्तम्। तत् कथं? इत्यत्र दृष्टान्त उच्यते—**तद्यथेति**। **तत्** तत्र **यथा आम्रं** फलं **उदुम्बरं पिप्पलं वा** यस्मिन् रसो बध्यत इति बन्धनं रसः। तस्मात् रसबन्धनात् **प्रमुच्यत** इति विषमानेकदृष्टान्ततो दार्ष्टान्तिकमृतेरप्य-नियतदेशकालनिमित्तता द्योत्यत इति यत् तत् वैराग्यप्रदर्शनार्थम्। **एवमेवायं पुरुषो** लिङ्गात्मा **एभ्यः** चक्षुराद्यङ्गेभ्यः **संप्रमुच्य** सह वायुना उपसंहृत्य **पुनः प्रतिन्यायं प्रतियोन्याद्रवति**। यथा स्वप्नबुद्धान्तौ पुनः पुनः गच्छति तथा नानायोनिमृच्छति। किमर्थम्? **प्राणायैव**। प्राणव्यूहाय हि गमनं देहान्तरं प्रतिपद्यते। प्राणिमात्रगतागतेः कर्मफलक्षयाक्षयवैचित्र्यनिमित्तत्वात्। किं बहुना? स्वाविद्यापदतत्कार्यस्थित्यादिरपि कर्मनिमित्त इत्यर्थः ॥ ३६ ॥

सर्वभूतानामात्मप्रतीक्षणम्

तद्यथा राजानमायान्तमुग्राः प्रत्येनसः सूतग्रामण्योऽन्नैः पानैरावसथैः प्रतिकल्पन्तेऽयमायाति अयमागच्छतीति एवꣳ हैवं-विदꣳ सर्वाणि भूतानि प्रतिकल्पन्ते इदं ब्रह्म आयाति इदमाग-च्छतीति ॥ ३७ ॥

उक्तार्थे लोकप्रसिद्धदृष्टान्तमाचष्टे—तद्यथेति। तत् तत्र यथा पट्टाभिषिक्त-राजानमायान्तमुग्राः क्रूरकर्माणः प्रत्येनसि पापकर्मणि तस्करादिदण्डादौ नियुक्ताः प्रत्येनसः वर्णसङ्करविशेषाः सूता ग्रामनेतारो ग्रामण्यश्च अस्मद्राजा आगच्छतीति मत्वा भक्ष्यभोज्यादिलक्षणैरन्नैः पानैर्यथोक्तसंभारविशिष्टतक्रादिभिः आवसथैः सौधैः प्रतिकल्पन्ते। एवमादितदुचितोपस्करैः तदागमनमार्गमलङ्कृत्य अयं सम्राट् आयाति अयमागच्छतीति तदागमनं प्रतीक्षन्ते। एवं हैवं कर्मफलविदं संसारिणं इदं ब्रह्म आयाति इदमागच्छतीति सर्वाणि चक्षुरादिकरणग्रामतदध्यक्षादित्यादिसहितभूतानि प्रतिकल्पन्ते प्रतीक्षन्त इत्यर्थः॥ ३७॥

सर्वप्राणानामात्मानुगमनम्

तद्यथा राजनं प्रयियासन्तमुग्राः प्रत्येनसः सूतग्रामण्योऽभिसमायन्ति एवमेव इममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति यत्रैतदूर्ध्वोच्छ्वासी भवति॥ ३८॥

एवं स्वस्थानं त्यक्त्वा स्थानात् स्थानान्तरं जिगमिषुं के नु गच्छन्ति के वा न गच्छन्ति? इत्यत्र दृष्टान्तमाह—तद्यथेति। तद्यथा राजानं प्रकर्षेण यातुमिच्छन्तं प्रयियासन्तं प्रत्येनसः सूतग्रामण्यः तमेवाभिमुख्येन समायन्ति न ह्याज्ञप्ताः तमनुगन्तुं पारयन्ति, एवमिममात्मानमन्तकाले सर्वे वागादयः प्राणा एवाभिसमायन्ति सहैव गच्छन्ति। न हि ज्ञातयोऽनुयन्ति। यत्रैतदूर्ध्वोच्छ्वासी भवति व्याख्यातमेतत्॥ ३८॥

इति तृतीयं ब्राह्मणम्

चतुर्थं शारीरकब्राह्मणम्

संप्रमोक्षणं तदियत्तावर्णनं च

स यत्रायमात्मा अबल्यं न्येत्य संमोहमिव न्येति अथैनमेते प्राणा अभिसमायन्ति स एतास्तेजोमात्राः समभ्याददानो हृदयमेव अन्ववक्रामति स यत्रैष चाक्षुषः पुरुषः पराङ् पर्यावर्तते अथारूपज्ञो भवति ॥ १ ॥

अत्र प्रस्तुतं संसारोपवर्णनम् । प्रकृतपुरुषः संसरन् "एभ्योऽङ्गेभ्यः संप्रमुच्य पुनः प्रतिन्यायं प्रतियोन्याद्रवति" इत्युक्तम् । कस्मिन् काले तत्संप्रमोक्षणं? तदियत्ता वर्णयितव्या इतीदं ब्राह्मणमारभ्यते—**स यत्रेति**। संसारित्वेन यः प्रस्तुतः **सोऽयमात्मा यत्र** यस्मिन् काले **अबल्यमबलभावं** दुर्बलत्वं नितरामेत्य देहगतदौर्बल्यमात्मन्यध्यस्य तथा **संमोहमिव** संमोहतामिव **न्येति** निगच्छति । न चास्य संमोहोऽसंमोहो वास्ति नित्यचैतन्यस्वभावत्वात् । लौकिकैरुत्क्रान्तिसमये यः करणोपसंहरणनिमित्तो व्याकुलीभावो लक्ष्यते । तथा च संमूढोऽयमिति लौकिका अपि वदन्ति । यद्वा—उभयत्र इवशब्दप्रयोगो योज्यः अबल्यमिव न्येति असंमोहमिव न्येतीति । उभयस्यापि परोपाधि-निमित्तत्वाविशेषात् । **अथास्मिन्** काले **एते** एनमात्मानं वागदयः **प्राणा अभिसमायन्ति** । तदास्य शारीरात्मनोऽङ्गेभ्यः संप्रमोक्षणम् । तत् केन प्रकारेणात्मानमभिसमायन्ति? इत्यत्र—**सोऽयमात्मा एतास्तेजसो मात्राः** चक्षुरादिकरणानि निर्लेपधिया **समभ्याददानः** पुण्डरीकाकारहृ**दयमेव अन्वव-क्रामति** हृदयाभिव्यक्तविज्ञानो भवतीत्यर्थः । उक्तं चैतत् "शुक्रमादाय पुनरेति स्थानं" इति । तस्य चलनाचलनादिः बुद्ध्यादिचलनसापेक्षः न स्वतः स्वस्याखण्डचिन्मात्रत्वात् । स्वाज्ञदृष्ट्या बुद्धिगतविक्रिया अध्यारोप्यते । पुनस्तेजो-मात्राभ्यादानं कदा? इत्यत्र—**सोऽयं** चक्षुषि भवः **चाक्षुषः पुरुषः यत्र** यस्मिन् काले परि समन्तात् **पराङ् पर्यावर्तते, अथास्मिन्** काले **अरूपज्ञो**

भवति रूपं न जानाति। तदायमात्मा चक्षुरादितेजोमात्राः समभ्याददानो भवतीत्यर्थः ॥ १ ॥

सर्वेन्द्रियोपरमणेन तस्य सर्वकलनाराहित्यम्

एकीभवति न पश्यतीत्याहुः एकीभवति न जिघ्रतीत्याहुः एकीभवति न रसयत इत्याहुः एकीभवति न वदतीत्याहुः एकीभवति न शृणोतीत्याहुः एकीभवति न मनुत इत्याहुः एकीभवति न स्पृशतीत्याहुः एकीभवति न विजानातीत्याहुः तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतेन एष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वान्येभ्यो वा शरीरदेशेभ्यः तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तꣳ सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेव अन्ववक्रामति तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च ॥ २ ॥

सर्वेन्द्रियोपरमणलिङ्गेन तं पार्श्वस्थाः सर्वकलनारहितं कथयन्तीत्याह—**एकीभवतीति**। तत्पार्श्वस्था आहुः। किमिति? स्वापकाल इव करणग्रामविलयाधिकरण **एकीभवति** "यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणः चक्षुरादित्यं" इत्यादि यदुक्तं तत् तथा। चक्षुरादिकरणानां स्वाधिकरणदेवताभावं गतत्वात् एनं **न पश्यतीत्याहुः**। तथा घ्राणस्य तद्देवतैकीभूतत्वात् **न जिघ्रतीत्याहुः**। समानमन्यत्। जिह्वादिकरणानां वरुणादिदेवतैकीभूतत्वात् **न रसयते न वदति न शृणोति न मनुते न स्पृशति न विजानातीत्याहुः**। अस्याः करणसन्ततेः हृदये उपसंहृतत्वात्। **तस्य हैतस्य हृदयस्याग्रं** नाडीनिर्गमनद्वारं **प्रद्योतते**। **तेनैष आत्मा** विज्ञानमयो हृदयात् **निष्क्रामति**। तथा च श्रुतिः—"कस्मिन्नहमुत्क्रान्ते उत्क्रान्तो भविष्यामि कस्मिन् वा प्रतिष्ठिते

प्रतिष्ठास्यामीति स प्राणमसृजत" इति। सर्वत्रात्मज्योतिः व्योमवदसङ्गं वर्तते। तद्विकल्पितस्थूलदेहात्तजनिमृतिगमनागमनादिविक्रिया शरीरनिष्ठैव। न ह्येषा तदधिकरणचैतन्यनिष्ठेत्यज्ञानतः करणजालाभिमतिमेत्य तेन साकमुत्क्रामतीत्युक्तम्। केन द्वारेण निष्क्रामति? इत्यत्र यस्यादित्यलोकप्रापकज्ञानं कर्म वा स्यात् सोऽयं चक्षुष्टो निष्क्रामति। तथा यस्य ब्रह्मलोकाप्तिनिमित्तज्ञानं कर्म वास्ति स मूर्धन्यनाड्या निष्क्रम्य तत् पदं भजति। तथा स्वर्गनरकादिप्रापकनानाविधकर्मनिमित्तवशादन्येभ्यो वा शरीरदेशेभ्यः तमुत्क्रामन्तं विज्ञानात्मानं परलोकं प्रति जिगमिषुं राजानमिव भृत्याः सर्वे वागादयः प्राणा अनूत्क्रामन्ति। तदैष आत्मा स्वप्न इव सविज्ञानो विशेषविज्ञानवान् भवति। न हि स्वातन्त्र्येण विज्ञानवान् कर्मपरवशत्वात्। सविज्ञानमेव च गन्तव्यमन्ववक्रामति अनुगच्छति। अत एव स्वातन्त्र्यार्थं तत्काले श्रद्धालुभिः अप्रमादेन स्वात्मानुसन्धानं कर्तव्यमित्यत्र—

यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेबरम्।
तं तमेवैति कौन्तेय! सदा तद्भावभावितः॥

इति स्मृतेः। यो यथा विज्ञानी भवति तं परलोकं जिगमिषुं विद्या च कर्म च विद्याकर्मणी समन्वारभेते। पूर्वकृतविहिताविहितकर्मफलानुभववासना पूर्वप्रज्ञा च तं समन्वारभते। यस्मादेवं तस्मात् विद्याकर्मादि शुभमेव समाचरेत्॥ २॥

देहिनो देहान्तरप्राप्तौ दृष्टान्तः

तद्यथा तृणजलायुका तृणस्यान्तं गत्वान्यमाक्रममाक्रम्य आत्मानमुपसꣳहरति एवमेवायमात्मा इदꣳ शरीरं निहत्याविद्यां गमयित्वान्यमाक्रममाक्रम्य आत्मानमुपसꣳहरति॥ ३॥

एवं यथानुरूपविद्याकर्मसंभारसंभृतो देही वर्तमानदेहमुत्सृज्य देहान्तरं यातीत्यत्र दृष्टान्तमाचष्टे—तद्यथेति। तत् तत्र यथा तृणजलायुका जलभूचर-

जन्तुविशेषः तृणस्यान्तं तृणमध्यं गत्वा अन्यमाक्रमं तृणान्तरमाक्रम्यावष्टभ्य प्रसारितवासनयान्यमात्मानमुपसंहरति अत्रात्मभावमारभते यथा स्वप्ने देहान्तरस्थ एव तत्तत्कर्मवासनावैचित्र्यवशात् देहान्तरं परिकल्प्य पूर्वदेहवासनां त्यजति, एवमेव यः प्रकृतः सोऽयमात्मा संसारी इदं शरीरं पूर्वाधिष्ठितं निहत्य स्वप्नप्रतिपित्सुवत् पातयित्वा अविद्यामचेतनभावं गमयित्वा स्वात्मोपसंहारेणान्यमाक्रममाक्रम्यात्मानमुपसंहरति पुनर्देहान्तरमारभत इत्यर्थः ॥ ३ ॥

देहान्तरप्राप्तिप्रकारः

तद्यथा पेशस्कारी पेशसो मात्रामुपादाय अन्यत् नवतरं कल्याणतरꣳ रूपं तनुते एवमेवायमात्मा इदꣳ शरीरं निहत्याविद्यां गमयित्वान्यत् नवतरं कल्याणतरꣳ रूपं कुरुते पित्र्यं वा गान्धर्वं वा दैवं वा प्राजापत्यं वा ब्राह्मं वा अन्येषां वा भूतानाम् ॥ ४ ॥

किं नित्योपात्तमेव उपादानमुपसंहृत्य पुनर्देहान्तरं स्वीकरोति ? यद्वा पूर्वोपचितमेव पुनरादत्ते ? इत्यत्र दृष्टान्तमाह—तद्यथेति । तत्तत्र यथा पेशः सुवर्णं करोतीति पेशस्कारी स्वर्णकारः पेशसो मात्रामेकदेशमुपादाय पूर्वरचनापेक्षयान्यत् नवतरं कल्याणादपि कल्याणतरं रूपं तनुते निर्मिनोति एवमेवायमात्मेत्यादि पूर्ववत् । "द्वे वाव ब्रह्मणो रूपे" इत्युक्तरीत्या यानि पृथिव्यादिपञ्चभूतानि पेशस्स्थानीयानि तान्युपमृद्य उपमृद्य अन्यदन्यच्च नवतरं कल्याणतरं देहान्तररूपं कुरुते । तत् किम् ? पितृभ्यो हितं तल्लोकभोगयोग्यं पित्र्यं वा । तथा गन्धर्वाणामुपभोगयोग्यं गान्धर्वं वा । तथा देवानां दैवम् । प्रजापतेः प्राजापत्यम् । तथा ब्रह्मण इदं ब्राह्मं वा । यथाकर्म यथाश्रुतं अन्येषां वा भूतानां संबन्धि शरीरान्तरं कुरुत इत्यनुषज्यते ॥ ४ ॥

कामादिपदार्थानामेकत्र प्रदर्शनम्

स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोमयो वायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमयोऽक्रोधमयो धर्ममयोऽधर्ममयः सर्वमयः तद्यदेतत् इदंमयोऽदोमय इति यथाकारी यथाचारी तथा भवति साधुकारी साधुर्भवति पापकारी पापो भवति पुण्यः पुण्येन कर्मणा भवति पापः पापेन। अथो खल्वाहुः काममय एवायं पुरुष इति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते यत्कर्म कुरुते तदभिसंपद्यते ॥ ५ ॥

यैः कामादिभिः संयुक्तः तन्मयो भवति ते सर्वे पदार्थाः पुञ्जीकृत्य एकत्र प्रदर्श्यन्ते—**स वा** इति। **स वा अयमेवं** संसार्यात्मा स्वगतविशेषांशापाये "तदेतद्ब्रह्म अपूर्वं", "यत् साक्षादपरोक्षात् ब्रह्म", "विज्ञानमानन्दं ब्रह्म" इति श्रुत्यर्थज्ञानैकसिद्धं **ब्रह्मैव** निष्प्रतियोगिकब्रह्ममात्रमित्यर्थः। तद्याथात्म्याज्ञानविकल्पिता बुद्धिः विज्ञानं तदुपाधिकस्तन्मयः योऽयं **विज्ञानमयः**। प्राणेषु हृद्यन्तर्ज्योतिरित्युक्तं विज्ञानमयत्वाद्युपाधिनिमित्तं न वस्तुतः ध्यायतीवेत्युक्तम्। मनःसन्निकर्षान्**मनोमयः**। येन चेतनश्चलतीति लक्ष्यते स हि पञ्चवृत्त्यात्मकः प्राणः। तदध्यक्षस्तन्मयः। रूपशब्ददर्शनश्रवणकाले **चक्षुर्मयः श्रोत्रमयः**। तत्तदिन्द्रियव्यापृतिकाले तत्तन्मयो भवतीत्यर्थः। पार्थिवादिशरीरारम्भे **पृथिवीमयो** भवति। तथा वरुणादिलोकगताप्छरीरारम्भे **आपोमयो** भवति। तथा वायव्यशरीरारम्भे **वायुमयो** भवति। तथाकाशादिशरीरारम्भे **आकाशमयो** भवति। एवं तैजसदेवशरीरारम्भे **तेजोमयो** भवति। तद्विपरीतातेजोमयपश्वादि-

भूतप्रेतपिशाचादिशरीरारम्भे **अतेजोमयो** भवतीत्येवं कार्यकरणसंघातमयः सन् आत्मा इदं मया प्राप्तव्यमिति विपरीत**काममयो** भवति। तत्र दोषदर्शनतोऽय**मकाममयो** भवति। स्वेप्सितकामकुण्ठनजक्रोधवृत्त्युदये **क्रोधमयो** भवति। विवेकतः क्रोधवृत्तिशान्तितोऽय**मक्रोधमयो** भवति। एवं कामाकामक्रोधाक्रोधाभ्यां तन्मयतामेत्य **धर्माधर्ममयश्च** भवति धर्माधर्मप्रवृत्तेः कामक्रोधमूलत्वात्। तथा च स्मृतिः—

यद्यद्धि कुरुते जन्तुः तत्तत् कामस्य चेष्टितम्।

इति। धर्माधर्ममयो भूत्वायं **सर्वमयो** भवति सर्वस्य धर्माधर्मनिमित्तत्वात्। किं बहुना? **तत् यदेतत् इदंमयः** गृह्यमाणविषयादिमयः ततोऽय**मदोमयः** अदसः परोक्षत्वेन विप्रकृष्टत्वात्। यथावत्कर्तुं यथावच्चरितुं च शीलमस्येति **यथाकारी यथाचारी तथा भवति**। यथाकारीति विशेषणं **साधुकारी साधुर्भवतीति**। यथाचारीति विशेषणं **पापकारी पापो भवतीति**। ताच्छील्यप्रत्ययोपादानात् **पुण्यः पुण्येन कर्मणा भवति पापः** पापेनेति पुण्यपापमात्रतः तन्मयता। न हि ताच्छील्यमपेक्षते। ताच्छील्ये तु तन्मयत्वातिशयो विशेषः। कामादिपूर्वकपुण्यादिकारिता सर्वमयत्वहेतुः देहपरम्पराप्तिकारणत्वात्। एतद्विषयो हि विधिप्रतिषेधशास्त्रफलमर्हति। **अथो** अप्यन्य **एवमाहुः**। किमिति? पुण्यपापवृत्तिकारणं काम एवेति। कामप्रयुक्तो हि खलु पुण्यापुण्यकर्म उपचिनोति। न हि निष्कामधीनिर्वर्त्यं कर्म पुण्यापुण्योपचयहेतुर्भवति। यस्मादेवं तस्मात् काम एव सर्वसंसारमूलम्। तथा च श्रुतिः—"कामान् यः कामयते मन्यमानः स काममभिजायते तत्र तत्र" इति। तस्मात् **काममय एवायं पुरुषः** यादृशकामेन **यथाकामो भवति तत्क्रतुर्भवति**। यस्मिन् विषये कामलेशोऽभिव्यज्यते स कामोऽध्यवसायलक्षणक्रतुत्वेन परिणमते। अथानन्तरं क्रिया प्रवर्तते। यद्विषयकक्रतुरध्यवसायो **भवति** तद्विषयकं **कर्म कुरुते** निर्वर्तयति। **यत् कर्म कुरुते तत्कर्मफलमभिसंपद्यते**। यस्मादेवं तस्मात् संसारित्वलक्षणसर्वमयत्वे हेतुः काम एवेत्यर्थः॥ ९॥

कामस्यैव बन्धमोक्षमूलकत्वम्

तदेष श्लोको भवति—

तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य ।
प्राप्यान्तं कर्मणस्तस्य यत्किंचेह करोत्ययम् ।

तस्माल्लोकात् पुनरैत्यस्मै लोकाय कर्मण इति नु कामयमानोऽथा-कामयमानो योऽकामो निष्काम आप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति ॥ ६ ॥

सर्वानर्थमूलकामसंभवासंभवाभ्यां संसारित्वासंसारित्वलक्षणबन्धमोक्षौ स्यातामित्यस्मिन्नर्थे एष श्लोको मन्त्रो भवतीत्याह—तदेष श्लोको भवतीति । यत्र कामो जायते तदेव तत्रैवासक्तः सन् यत्फलासक्तितः कर्म करोति तत्साधन-कर्मणा सहैव तत्फलमेतीत्यत्र—मनो हि लिङ्गं मनसः प्रधानत्वात् । यद्वा—लीनमर्थं गमयतीति लिङ्गम् । सप्तदशात्मकमस्य संसारिणो यत्र सक्तं वासनावासितं मनो भवति । एवं मनःसंयोगवशादेवास्य तत्कर्मणा तत्फलाप्तिः । यत एवमतः संसारमूलं मन एवेति सिद्धम् । यस्य कामो विषयमस्पृश्य स्वात्मन्येव विलीयते तस्यैवं ब्रह्मविदः विद्यमानोऽपि कर्माभासो न तद्बन्धनाय भवति । तथा च श्रुतिः "पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ति कामाः" इति । किञ्च कर्मणोऽन्तमवसानं फलसमाप्तिं प्राप्य भुक्त्वा पुनरिहलोकं प्राप्य अयं यत्किंचित् कर्म करोति तत्कर्मफलम-मुष्मिन् लोके भुक्त्वा तदुपभोगक्षयतः तस्मात् लोकात् पुनरैत्यागच्छति । किमर्थम् ? अयमस्मै लोकाय कर्मप्राधान्यतः कर्मण इति पुनः कर्म कृत्वा तत्फलभोगायामुं लोकं एवन्नु कामयमानः संसरति । फलासक्तस्य हि गतिरुक्ता । न ह्यकामस्य क्रिया तत्फलं वा उपपद्यते । कथं पुनरकामयमानो भवति ? कामनीयविषयाभावादकाम एवाकामयमानः । कथमकामता ? इत्यत्र कामा

यस्मान्निर्गताः सोऽयं **निष्कामः**। कामनिर्गमनं कुतः? इत्यत्र स्वेन यदाप्तव्यं तस्याप्तत्वात् **आप्तकामः**। कथमाप्यन्ते कामाः? इत्यत्र यस्यात्मैव कामो नान्यः सोऽयमात्मकामः आत्मनः परिच्छेदसामान्यविरलत्वात्। आत्मैवानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव भवति। "यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत् शृणुयान्मन्वीत विजानीयात्?" इत्यादिस्वातिरिक्तवस्तुदर्शनश्रवणमननाद्यसम्भवश्रुतेः। एवं स्वातिरिक्तकलना अस्ति नास्तीति विभ्रमापह्नवसिद्धं ब्रह्म स्वमात्रमिति यो जानाति तस्य ब्रह्ममात्रविदः स्वातिरेकेण देहो वा तत्र वागादयः प्राणा वा स्थित्वा पुनः देहात् **नोत्क्रमन्ति**। येषां पुनः स्वातिरेकेण प्राणोपलक्षितस्थूलसूक्ष्मादिदेहाभासाः सन्तीति भ्रान्तिः तद्दृष्ट्या प्राणादयः स्वाधिकरणे विलयं भजन्तु। वस्तुतो ब्रह्ममात्रभावापत्तेः स्वातिरिक्तप्राणोपलक्षितस्वाविद्यापदतत्कार्यसंभूतिस्थितिप्रलयकलना अस्ति नास्तीति विभ्रमापह्नवपूर्वकत्वात्। अत एवायं ब्रह्ममात्रवित् स्वाज्ञदृष्टिप्रसक्तस्वातिरिक्तप्रपञ्चमोहे सत्यसति ब्रह्मैव सन् ब्रह्माप्येति इत्युपचर्यते। "आप्तेः स्वभावत्वात् आप्तिमात्रावशेषः न हि ग्रामान्तराप्तिवत्" इति नामार्थविवेकोक्तेः॥ ६॥

सर्वकामप्रलयसमकालं ब्रह्मभावापत्तिः

तदेष श्लोको भवति—

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथ मर्त्योऽमृतो भवति अत्र ब्रह्म समश्नुते॥ इति।

तद्यथाहिनिर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीत एवमेवेदँ शरीरँ शेते अथायमशरीरोऽमृतः प्राणो ब्रह्मैव तेज एव सोऽहं भगवते सहस्रं ददामीति होवाच जनको वैदेहः॥ ७॥

कथं पुनर्ब्रह्ममात्रप्रबोधतः तद्भावापत्तिर्भवति स्वातिरिक्तनानाविषयारूढकामानां विद्यमानत्वात्? इत्याकाङ्क्षायां ब्रह्ममात्रस्य निष्प्रतियोगिकत्वेन तत्प्रति-

योगितया न हि स्वातिरिक्तविषया वा तदारूढकामा वा सन्ति तेषामाविद्यकत्वेन कारणतुल्यत्वात् । यद्याभासतो वा कामादयः सन्तीति यो मन्यते तद्दृष्टिमाश्रित्य सर्वकामप्रलयसमकालं ब्रह्मभावापत्तिः स्यादित्यस्मिन् अर्थे **तदेष श्लोको मन्त्रो भवतीत्याह—तदेष** इति । अस्याप्तकामस्य ब्रह्मविदो **यदा** यस्मिन् काले स्वातिरिक्तं हरतीति **हृत्** अन्तःकरणं तस्मिन् **हृदि** समाश्रिता ये **सर्वे कामा** ब्रह्मातिरिक्तं न किंचिदस्तीति प्रबोधसमकालं **प्रमुच्यन्ते** समूलतो विशीर्यन्ते ब्रह्ममात्रतया समाप्यन्ते **अथ** तदा स्वातिरिक्तकामान् मृत्युपदं प्रापयतीति **मर्त्यो** विद्वान् स्वातिरिक्तकामासम्भवप्रबोधसमकालं **अमृतो भवति** । किं वर्तमानदेहपातात् ऊर्ध्वं ? इत्यत आह—**अत्रे**ति । अत्र स्वाज्ञदृष्टिविकल्पित-शरीरे परमार्थदृष्ट्या,

> यथैव मृन्मयः कुम्भः तद्वद्देहोऽपि चिन्मयः ।

इति श्रुत्यनुरोधेन ब्रह्ममात्रपर्यवसन्ने ब्रह्ममात्रदृष्ट्या जीवन्नेव ब्रह्ममात्रावस्थिति-लक्षणकैवल्यं प्रतिपद्यत इत्यर्थः । "स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवति", "य एवं निर्बीजं वेद निर्बीज एव स भवति" इत्यादिब्रह्ममात्र-प्रबोधसमकालं तद्भावापत्तिश्रुतेः । यत एवमतो मोक्षो न हि देशान्तरे कालान्तरे वा विद्यते । मोक्षस्य स्वातिरिक्तकामादिरस्ति नास्तीति विभ्रमासंभव-प्रबोधसमकालं स्वमात्रतयावशिष्टत्वादित्यत्र—

> न मोक्षो नभसः पृष्ठे न पाताले न भूतले ।
> सर्वाशासंक्षये चेतःक्षयो मोक्ष इतीष्यते ॥

इति श्रुतेः । यतः स्वमात्रावस्थानं मोक्षः अत एव स्वाज्ञदृष्टिदृष्टप्राणादयो नोत्क्रामन्ति । स्वस्वकारणे समवनीयन्ते नाममात्रमवशिष्यन्ते । तदानीं विद्वान् देहादिरस्ति नास्तीति विभ्रमविरलो भूत्वा ब्रह्ममात्रतयावशिष्यत इत्यत्र दृष्टान्त उच्यते—**तद्यथे**ति । **तत्** तत्र **यथा** लोके अहिर्यस्यां निलीयत इत्य**हिनिर्ल्वयनी** सर्पत्वक् स्वाश्रयवल्मीकादौ **मृता** प्रत्यस्ता अहिना परित्यक्ता **शयीत** वर्तते **एवमेवायं** विद्वान् स्वेन त्यक्तमिदं सर्पनिर्मोकस्थानीयं **शरीरं** मृतमिव **शेते**

चेतनवत् चलतु वा। **अथेतरः** सर्पस्थानीयोऽयं विद्वान् सर्पवत् तत्र विद्यमानोऽपि **अशरीर एव।** न हि पूर्ववत् गच्छामि तिष्ठामीति मन्यते देहात्मदृष्टेः परित्यक्तत्वात्। यतोऽयमशरीरः अत एवायम**मृतः।** तथापि प्राणितीति **प्राणः** स्वज्ञदृष्टिप्रसक्तप्राणादिप्रवृत्तिनिमित्तत्वात्। तथा च वक्ष्यति "प्राणस्य प्राणं" इति। प्राणशब्देनात्र परमात्मोच्यते। यः परमात्मा तत् **ब्रह्मैव।** किं पुनः? तत् **तेज एव** निष्प्रतियोगिकचिन्मात्रत्वात्। एवं याज्ञवल्क्येन जनकाय कामप्रश्नवरो दत्तः इत्येवं जनकयाज्ञवल्क्याख्यायिकारूपिण्या श्रुत्या प्राणिभ्यो बन्धमोक्षोपाय उक्तः। इदानीं जनकेनैवमुक्तमिति श्रुतिराह। किमिति? यत एवाहं त्वया स्वातिरिक्तास्तिताभ्रमतो विमोक्षितः अतस्तुभ्यं **भगवते** विद्यानिष्क्रयाय **सहस्रं ददामीति होवाच जनक** इत्याद्युक्तार्थम्॥ ७॥

ससाधनात्मज्ञानतः कृतकृत्यता

तदेते श्लोका भवन्ति—

अणुः पन्था विततः पुराणो माꣳ स्पृष्टोऽनुवित्तो मयैव।
तेन धीरा अपियन्ति ब्रह्मविदः स्वर्गं लोकमित ऊर्ध्वं विमुक्ताः॥८॥

मुनिना निरवशेषब्रह्मविद्या उपदिष्टा। राज्ञः सर्वस्वमपि निष्क्रयाय न कल्पते। विदेहराज्यमात्मानं चानिवेदयित्वा सहस्रं ददामीत्युक्तवान्। अत्र को हेतुः? सम्राट् अध्यात्मविद्यारसिकः ब्राह्मणोक्तार्थमेव पुनः मन्त्रैरपि श्रोतुमिच्छन् न हि सर्वं निवेदयति। वक्ष्यति च ब्राह्मणान्ते "सोऽहं भगवते विदेहान् ददामि इमां चापि सह दास्याय" इति। किञ्च ब्रह्मविद्यासाधनत्वेन संन्यासोऽपि वर्णनीयः। ससाधनात्मज्ञानतः कृतकृत्यता स्यात् इत्यस्मिन् अर्थे विस्तरप्रतिपादका एते श्लोका मन्त्रा भवन्ति—**तदेते श्लोका भवन्तीति।** निष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणकैवल्यसाधनज्ञानपन्था मार्गोऽ**णुः** दुर्विज्ञेयत्वात्। कुतः? **विततः** विस्तीर्णः अनन्तकोटिजन्मसुकृतसाध्यत्वात्। तथा च श्रुतिः—

जन्मान्तरशताभ्यस्ता मिथ्या संसारवासना ।
सा चिराभ्यासयोगेन विना न क्षीयते क्वचित् ॥

इति । वितर इति पाठान्तरम् । विस्पष्टतरणहेतुरित्यर्थः । सोऽयं पन्थाः तार्किकादिसमयवत् इदानीन्तन इत्यत आह—पुराण इति । चिरन्तनत्वेन श्रुतिप्रकाशितत्वात् । कथं त्वयावगतं ? इत्यत आह—**मां स्पृष्ट** इति । **मां स्पृष्टो** मया श्रुत्याचार्यमुखतो लब्ध इत्यर्थः । केवलं न हि मया लब्धः किन्तु **मयैवानुवित्तः** । यथा भुक्तेः तृप्त्यवसानता तथा वेदनफलावसानता ह्यनुवित्तिः । तन्मात्रनिष्ठा सापि मयैव लब्धेत्यर्थः । किमसौ मन्त्रदृक् एक एव ब्रह्मविद्याफलं प्राप्तवान् नान्यः ? मयैवानुवित्त इत्यवधारणात् इति चेत् ; सत्यं, "नातः परं वेदितव्यं हि किंचित्" इति ब्रह्ममात्रनिष्ठारूढदृष्ट्या स्वातिरिक्तमुमुक्षोरभावात् मयैवानुवित्त इत्युक्तिरुपपद्यते । "प्राप्तव्यं सर्वमत्र संपन्नं" इति श्रुतेः ब्रह्मविद्यास्तुतिपरत्वात् न ह्यन्यो ब्रह्मवित् वेदनफलं नाप्नोतीत्युक्तम् । "तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत्" इति श्रुत्यनुरोधेन **तेन** ब्रह्मविद्यामार्गेण बहवो **धीरा ब्रह्मविद** इतोऽस्मादात्यन्तिकस्वातिरिक्तापह्नवप्रबोधादूर्ध्वमुत्तरक्षणं जीवन्त एव **विमुक्ताः** सन्तः **स्वर्गं लोकं** ब्रह्मविद्याफलं कैवल्य**मपियन्ति** तन्मात्रतयावशिष्यन्ते । स्वर्गलोकशब्दस्य त्रिविष्टपवाचित्वेऽपि ब्रह्मविद्याप्रकरणात् स्वमात्रावशेषतया गीयते लोक्यत इति च स्वर्गं लोकं ब्रह्मैवेत्यर्थः ॥ ८ ॥

मुमुक्षूणां मोक्षमार्गे विप्रतिपत्तिः

तस्मिन् शुक्लमुत नीलमाहुः पिङ्गलꣳ हरितं लोहितं च ।
एष पन्था ब्रह्मणा हानुवित्तः तेनैति ब्रह्मवित् पुण्यकृत्तैजसश्च ॥९॥

मुमुक्षूणां मोक्षमार्गे विप्रतिपत्तिं दर्शयति—**तस्मिन्निति** । यः करणग्रामसंघातभौतिकदेहोऽवभासते **तस्मिन्** देहे विद्यमाना याः सुषुम्नाद्या नाड्यः श्लेष्मादिरसपूर्णा भवन्ति तत्र केचन मुमुक्षवः "चक्षुष्टो वा मूर्ध्नो वा

अन्येभ्यो वा शरीरदेशेभ्यः'' इत्युक्तोत्क्रान्तिनाडीमध्ये शुक्लं सुषुम्नाच्छिद्रं "तयोर्ध्वमायन् अमृतत्वमेति" इति श्रुत्यनुरोधेन ब्रह्मप्रापकद्वारमाहुः। केचन मुमुक्षवः इडा पिङ्गला वरुणा गान्धारी विश्वोदरा यशस्विनीति नाड्यः षट् दक्षिणमार्गप्रापकाः। तासां मध्ये इडाद्वारं **नीलम्**। पिङ्गलाद्वारं **पिङ्गलम्**। वरुणाद्वारं **हरितम्**। गान्धारीद्वारं **लोहितम्**। चशब्दात् विश्वोदरायशस्विन्यो-र्द्वारे कृष्णकपिशरूपे भवत इत्यनुवर्तते। यान्येवमुत्तरदक्षिणद्वाराणि पुरुषार्थ-साधनत्वेन उक्तानि तान्यपि परमार्थापेक्षया संसारप्रतिपत्तिसाधनान्येव। यस्मादेवं तस्मात् श्रोत्रियत्वावृजिनत्वाकामहतत्वसाधनसहकृतस्वातिरिक्तसर्वप्रपञ्चा-संभवप्रबोधसिद्धब्रह्ममात्रप्रबोधरूपोऽयमेष **पन्था ब्रह्मणा** सन्त्यक्तसर्वैषणो भूत्व-ब्रह्मभावमापन्नब्राह्मणेन **ह्यनुवित्तः** लब्धोऽयमात्मेत्यर्थः। कीदृशोऽयमेवंवित्? इत्यत आह—**पुण्यकृदिति**। पूर्वं श्रवणादि पुण्यं कर्म करोतीति **पुण्यकृत्**। त्यक्तैषणो भूत्वा निष्प्रतियोगिकब्रह्ममात्रं तेजः स्वात्मेति ज्ञानसमकालं **तैजसो** भवति। चशब्दतः तन्मात्रतयावशिष्यत एवेत्यर्थः। अथ यो वा **ब्रह्मवित्** स पुण्यकृत् तैजसश्चेति ब्रह्मवित्स्तुतिरेषा। पुण्यकृति तैजसे च योगिनि प्रसिद्धमेता न्माहात्म्यमित्यर्थः॥ ९॥

तत्तन्मार्गानुसारिणां फलम्

अन्धं तमः प्रविशन्ति येऽविद्यामुपासते।
ततो भूय इव ते तमो य उ विद्यायाꣳ रताः॥ १०॥

एवमेतन्मार्गेतरमार्गानुसारिणां फलं प्रकटयति—**अन्धमिति**। ये त्वविद्वांसः साध्यसाधनलक्षणामविद्यामुपासते ते इडादिनाडीमार्गात् उत्क्रम्य स्वर्गाख्यमन्धं **तमः प्रविशन्ति** स्वकृतक्षयतः पुनः कर्मभूमौ पतन्तीत्यर्थः। **य उ ये** तु अपरविद्यायां **रता** व्यवसायिनो भवन्ति **ते** परमार्थज्ञानफलमपेक्ष्य **ततस्तस्मात्** नीलादिनाडीद्वारादपि शुक्लनाडीद्वारतो **भूयो** बहुतरमिव **तमः प्रविशन्ति**। कथं पुनः धूमादिमार्गादपि अर्चिरादिमार्गगतस्य भूरितमःप्रवेशः? इति चेत्;

उच्यते—धूमादिमार्गफलस्य क्षणिकत्वेन पुनरावृत्तिः भवति । स कदाचित् श्रुत्याचार्यप्रसादतो वेदान्तश्रवणादिना स्वातिरिक्तेषणातो व्युत्थाय झटिति श्रुतज्ञानफलं ब्रह्ममात्रावस्थानलक्षणकैवल्यमेति । तदपेक्षयार्चिरादिमार्गफलब्रह्म-लोकस्य ब्रह्मकल्पान्तस्थायित्वेनार्चिरादिना तत्प्रविष्टस्य कर्मभूमिवत् न सहसा कैवल्यं स्यादिति कालविलंबः ततो भूय इव तमः प्रविशतीत्युक्तं युक्तमित्यर्थः ॥१०॥

अविदुषां स्ववेदनानुरूपफलम्

अनन्दा नाम ते लोका अन्धेन तमसावृताः ।

ताꣳस्ते प्रेत्याभिगच्छन्ति अविद्वाꣳसोऽबुधो जनाः ॥ ११ ॥

"नान्यः पन्था अयनाय विद्यते" इति श्रुतिसिद्धपरमार्थज्ञानोपायं विना उपायान्तरालम्बिनो ह्यविद्वांसः स्ववेदनानुरूपं फलं प्राप्नुवन्तीत्याह—**अनन्दा** इति । स्वातिरिक्तप्रपञ्चासंभवब्रह्ममात्रं ये न जानन्ति ते ह्यविद्वांसः । किं ते केवलाविद्वांसः? **अबुधश्च** बुधेरवगमार्थस्य क्विप्प्रत्ययान्तस्य धातोः रूपं, आत्मावगतिः, तद्विरला इत्यर्थः । अत एव जननादिधर्मिणो **जनाः** प्राकृता इत्यर्थः । **ते** जना ये त्वन्धेन **तमसावृता** आच्छादिताः **ते** **अनन्दा** अनानन्दा **नाम** **लोकाः** परमानन्दापेक्षया दुःखात्मकाः । तथा-विधान् तान् लोकानविद्वांसः **प्रेत्य** मृत्वाभिगच्छन्ति परमार्थात् हीयन्त इत्यर्थः ॥ ११ ॥

कस्यचिदेव विदुषः कृतकृत्यत्वम्

आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ।

किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ॥ १२ ॥

अविद्वद्विपरीतो विद्वान् कश्चिदेव कृतकृत्यो भवतीत्याह—**आत्मानमिति** । यः पुरुष एव **पूरुषो** विद्वान् "तदेतत् ब्रह्मापूर्वमनपरं", "विज्ञानमानन्दं

ब्रह्म", "अथैष एव परम आनन्दः" इत्यादिश्रुत्यनुरोधेन स्वातिरिक्तानात्मप्रपञ्चासंभवप्रबोधसिद्धमात्मानमयमहमस्मीति विजानीयात् चेत् तदा तद्वेदनसमकालमेव विद्वान् तन्मात्रतयावशिष्यते। तन्मात्रस्थिते स्वातिरिक्तशरीरशोषणपोषणादिकलनेच्छापह्नवपूर्वकत्वात् कृतकृत्यो भवतीत्यर्थः। कृतकृत्यस्यापि तन्निष्ठाप्रच्युत्यभावाय शरीरेन्द्रियनिग्रहेच्छा स्यादित्यत आह—किमिच्छन्निति। स्वात्तब्रह्मनिष्ठाया निष्प्रतियोगिकाचलत्वेन तच्च्युतिस्मृतेरप्यसंभवात् स्वानात्तं किं फलमिच्छन्, कस्य वा प्रयोजनाय कामाय करणसंघातशरीरं कृच्छ्रचान्द्रायणादिना संज्वरेत् शोषयेत् पोषयेद्वा? तद्दृष्ट्या शोषणपोषणार्हशरीरादिरस्ति नास्तीति विभ्रमो न हि सेद्धुं पारयतीत्यर्थः॥ १२॥

ब्रह्मभावापन्नस्य कर्तव्यताभावः

यस्यानुवित्तः प्रतिबुद्ध आत्मा अस्मिन् संदेह्ये गहने प्रविष्टः।
स विश्वकृत् स हि सर्वस्य कर्ता तस्य लोकः स उ लोक एव॥

एवं ब्रह्मभावापन्नस्य ब्रह्मरूपत्वेन किंचित्कर्तव्यता स्यादित्यत आह—यस्येति। यस्य ब्रह्मविदो ब्राह्मणस्यात्मायमहमस्मीति अनुवित्त उपलब्धः प्रतिबुद्धः स्वमात्रतया साक्षात्कृतः, यः पुरास्मिन् संदेह्ये बहुसन्देहास्पदे गहने विषमे विवेकविज्ञानप्रतिपक्षे हृदयकुहरे तत्रत्यलिङ्गशरीरचलनादिप्रवृत्तिनिमित्तत्वेन तद्वृत्तिसहस्रासङ्गतया तद्भावाभावप्रकाशकत्वेन तन्निरूपितप्रकाश्यप्रकाशककलनाविरलत्वेन च प्रविष्ट इव प्रविष्टः सोऽयं स्वाज्ञदृष्टिप्रसक्तानात्मप्रपञ्चापह्नवसिद्धः परमात्मा स्वमात्रमवशिष्यते। स हि पुनः स्वाज्ञदृष्ट्या मायाबीजांशयोगतो विश्वकृदीश्वरवदवभासते। किमस्य नाममात्रतो विश्वकृत्त्वं? तत्राह—स हि सर्वस्य कर्तेति। सर्वप्रपञ्चोत्पत्तिस्थितिप्रलयकृत्त्वात्। किं तस्य लोको भिन्नः? तत्राह—स उ लोक एवेति। "इदं सर्वं यदयमात्मा", "अहमेवेदं सर्वं" इति श्रुत्यनुरोधेन सर्वमात्मतया लोक्यत इति लोकशब्देन आत्मा उच्यत इत्यर्थः॥ १३॥

अस्मिन् जन्मन्येव ब्रह्मवेदनम्

इहैव सन्तोऽथ विद्मस्तद्वयं न चेदवेदीर्महती विनष्टिः ।
ये तद्विदुरमृतास्ते भवन्ति अथेतरे दुःखमेवापियन्ति ॥ १४ ॥

यतः पर एवात्मा ब्राह्मणेन स्वमात्रतया वेदितव्यः स्वाज्ञदृष्ट्या गहने प्रविष्टोऽप्यसंसारी भवति स हि विश्वस्य कर्ता । वस्तुतः तत्सर्वकलनापह्नव-सिद्धब्रह्ममात्रतयावशिष्यत इत्यस्मिन् जन्मन्येव ब्राह्मणेन वेदितव्यः । अन्यथा महाननर्थो भवेदित्याहायं मन्त्रः—इहेति । इहैव स्वाज्ञानविकल्पितदेहे वसन्तो वयं स्वविकल्पिताविद्यापदतत्कार्यजातापह्नवसिद्धं ब्रह्म अथ स्वमात्रमिति विद्मो विजानीमः । एवं चेत् कृतकृत्या भविष्याम इत्यर्थः । न चेदिहावेदीः न वयमेवं विदितवन्तश्चेत् का हानिः ? इत्यत्र—महती अनन्तकोटिजन्मादिलक्षणा विनष्टिः । यस्मादेवं तस्मात् वयं निष्प्रतियोगिकब्रह्ममात्रवेदनसमकालं तन्मात्र-तयावशिष्याम इत्यर्थः । वयमिव ये ब्रह्म स्वमात्रमिति विदुः त एवामृता मुक्ता भवन्ति । यद्येवमितरे न विदुः अब्रह्मविदस्ते जन्ममरणादिलक्षणं दुःखमेवापियन्ति । न हि कदापि ते परमसुखं भजन्ति । यतो ब्रह्मज्ञानतो जन्मादिदुःखपरम्परा एनं न मुञ्चति अतो जनिमद्भिः अपारदुःखध्वान्त-ग्रासचित्सूर्यं ब्रह्म स्वमात्रमिति वेदितव्यम् । एवं वेदनसमकालं तेऽपि परमसुखं भजन्तीत्यर्थः ॥ १४ ॥

यः स्वात्मानं जानाति सोऽयमात्मैव

यदैतमनुपश्यत्यात्मानं देवमञ्जसा ।
ईशानं भूतभव्यस्य न ततो विजुगुप्सते ॥ १५ ॥

यः श्रुत्याचार्यमुखतः स्वात्मानं जानाति सोऽयमात्मैव भवतीत्याह—यदेति । यदा यस्मिन् काले श्रुत्याचार्यदर्शितवर्त्मना एतं प्रत्यगभिन्नं परमात्मानं अनुपश्यति साक्षात्करोति, किंविशेषणविशिष्टं ? इत्यत्र स्वमात्रतया द्योतनात्

देवं, भूतभव्यस्य तत्कालावच्छिन्नप्राणिपटलस्य कर्माध्यक्षत्वेन **ईशानमहमस्मीति** ज्ञात्वा **ततः** तद्वेदनान्तरं स्वातिरिक्तदेहादिकं **न** हि **विशेषेण जुगुप्सते** गोपायितुं नेच्छति । तथा चोक्तं—

किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत् ।

इति । स्वात्ममात्रावगतेः देहाद्यनात्मा अस्ति नास्तीति विभ्रमापह्नवपूर्वकत्वात् । आत्मवित् आत्मैव भवतीत्यर्थः ॥ १५ ॥

अपरब्रह्मभेदोपासकानामपि स्वानुरूपफलम्

यस्मादर्वाक् संवत्सरः अहोभिः परिवर्तते ।
तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतम् ॥ १६ ॥

आत्मानमयमहमस्मीत्यञ्जसा पश्यतः तद्भावापत्तिरुक्ता । इदानीमपरब्रह्म-भेदोपासका अपि कामनाधिया तमात्मानमुपास्य स्वभावनानुरूपं फलं लभेयुरित्याह—**यस्मादिति** । **यस्मा**दीशाना**दर्वाक् संवत्सरः** कालात्मा स्वावयवा**होभि**रहोरात्रैः **परिवर्तते** परिच्छिद्यते तादृशकालात्मनोऽपि कारणं स्वभास्यादित्यादि**ज्योतिषा**मपि भासकज्योतीरूपमात्मानं **आयु**रिति **देवा उपासते** । यतो ज्योतिर्न म्रियतेऽतस्तद**मृतं** ज्योतिः । यस्मादायुर्गुणविशिष्टं ज्योतिरुपास्य देवा आयुष्मन्तो भवन्ति तस्मादायुष्कामेन एवमुपास्यं ब्रह्मेत्यर्थः ॥ १६ ॥

तदभेदोपासकानां ततोऽप्युत्कृष्टफलम्

यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः ।
तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम् ॥ १७ ॥

किञ्च तदभेदोपासकानां ततोऽप्युत्कृष्टफलमाचष्टे—**यस्मिन्निति** । **यस्मिन्** ब्रह्मण्यक्षरे **पञ्च पञ्चजना** गन्धर्वादयः गन्धर्वाः पितरो देवाः असुरा

रक्षांसि आकाशश्च ओतप्रोततया यत्र प्रतिष्ठितः, उक्तं हि "एतस्मिन्नु खल्वक्षरे गार्गि! आकाश ओतश्च प्रोतश्च" इति। य एतत्सर्वकल्पनाधारस्तमेतमेवात्मानममृतं ब्रह्म अहमस्मीति मन्ये जान इत्यर्थः। पुराहमज्ञानान्मर्त्यो भूत्वा श्रुत्याचार्यप्रसादलब्धज्ञानतो विद्वान् सन् मर्त्यभावं विहाय विद्वानमृतो भूत्वा अमृतं ब्रह्म स्वमात्रमिति मन्यते तदेव भवतीत्यर्थः॥ १७॥

विद्वद्गम्यब्रह्मस्वरूपम्

प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रं मनसो ये मनो विदुः।
ते निचिक्युर्ब्रह्म पुराणमग्र्यम्॥ १८॥

विद्वद्गम्यं ब्रह्म कीदृशं? इत्यत आह—प्राणस्येति। यः प्राणादिप्राणननिमित्तं स हि प्राणस्यापि प्राणः। तं प्राणस्यापि प्राणं तथा चक्षुषोऽपि चक्षुरुत श्रोत्रस्यापि श्रोत्रं काष्ठलोष्टसमप्राणचक्षुःश्रोत्रादिकरणजातं येन चैतन्यज्योतिषा प्राणनादिव्यापारवत् भवति तद्धि चक्षुराद्यनुग्राहकमनसोऽपि मनः मननादिप्रवृत्तिनिमित्तमिति ये विदुः ते ब्रह्मविद्वरीयांसः यत्करणग्रामप्रवृत्तिनिमित्तं यद्भावाभावप्रकाशकं यद्वस्तुतो निष्प्रतियोगिकब्रह्ममात्रतया विशिष्टं तदेव हि ब्रह्म पुराणं चिरन्तनत्वात्। स्वाज्ञदृष्टिप्रसक्तविकृतिसामान्यासङ्गतया अग्रे भातत्वात् अग्र्यमिति निचिक्युः निश्चयेन ज्ञातवन्तः। "तद्यदात्मविदो विदुः" इति श्रुतेः। वेदनसमकालं कृतकृत्या भवन्तीत्यर्थः॥ १८॥

तद्ब्रह्मदर्शनोपायः

मनसैवानुद्रष्टव्यं नेह नानास्ति किंचन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥ १९॥

तद्ब्रह्मदर्शनोपायमाचष्टे—मनसेति। श्रुत्याचार्योपदिष्टपरमार्थज्ञानसंस्कृतमनसैवानुद्रष्टव्यम्। किं तत्? ब्रह्मयाथात्म्यम्। किमिति? स्वातिरिक्तकलना-

पह्नवसिद्धं ब्रह्म निष्प्रतियोगिकभावरूपम् । स्वाज्ञदृष्टिप्रसक्ततदतिरिक्तं तु निष्प्रतियोगिकाभावरूपम् । परमार्थदृष्ट्या न तयोर्व्याप्यव्यापकभास्यभासकाधेयाधारभावादिकल्पना सेद्धुं पारयतीति ब्रह्मणो नानात्वेनाद्वैतरूपत्वात् । स्वाज्ञानुभूतिप्रमाणसिद्धनानात्वे सति कथमद्वैतं निष्प्रतियोगिकं ? इत्यत आह—**नेह नानास्ति किंचनेति** । इह निष्प्रतियोगिकाद्वैतब्रह्ममात्रे दिवान्धस्थानीयस्वाज्ञविकल्पितनानात्वस्य तदनुभूतसूर्याद्यभाववत् मृषात्वात् तत् कथं प्रमाणपदवीमर्हति ? इति नानानिषेधः प्रसक्तः । तस्मात्तन्निषेधमर्हतीति । इह निष्प्रतियोगिकब्रह्ममात्रे किञ्चन किञ्चिदपि स्वाज्ञविकल्पितनाना वा स्वज्ञविकल्पिततन्निषेधो वापि नास्ति शशविषाणवदवस्तुत्वात् । तथा च श्रुतिः "पश्यतेहापि सन्मात्रमसदन्यत्", "ब्रह्मव्यतिरिक्तं न किंचिदस्ति" इति,

तथा च—

नात्मभावेन नानेदं न स्वेनापि कथञ्चन ।
न पृथङ्नापृथक् किंचिदिति तत्त्वविदो विदुः ॥

इति गौडपादाचार्योक्तेश्च । इत्थं निष्प्रतियोगिकत्वेन प्रसिद्धब्रह्ममात्रे यः स्वाज्ञो नानात्वमारोपयति नानेव वा पश्यति सोऽयमविद्वान् मृत्योः जनिमृतिलक्षणसंसारात् मृत्युमविच्छिन्नप्रवाहरूपमाप्नोति अनन्तकल्पकोटिकालं संसरतीत्यर्थः ॥ १९ ॥

अनानापदमेव सदानुसन्धेयम्

एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम् ।
विरजः पर आकाशादज आत्मा महान् ध्रुवः ॥ २० ॥
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ।
नानुध्यायात् बहून् शब्दान् वाचो विग्लापनꣳ हि तत् ॥ इति ॥

"उदरमन्तरं कुरुते", "अथ तस्य भयं भवति" इति श्रुतितो नानात्वदर्शनं भयहेतुः। अतोऽनानाग्रासमनानापदमेव सदानुसन्धेयमित्याह—**एकधेति**। **यदेतत्** ब्रह्ममात्रप्रबोधं विना प्रत्यक्षादिप्रमाणशतेनापि न प्रमीयत इत्यप्रमयम**प्रमेयम्**। कूटस्थत्वात् **ध्रुवम्**। तत् किम्? स्वाज्ञविकल्पित-स्वातिरिक्तप्रपञ्चे सत्यसति **एकधैवानुद्रष्टव्यम्**। अप्रमेयं द्रष्टव्यमिति विरुद्धमुच्यत इति चेन्न; उभयसिद्धेरप्यविरोधात्। प्रत्यक्षादिप्रमाणमेयं स्वाविद्यापदतत्कार्यजातं तदपह्नवसिद्धमप्रमेयं तत् स्वातिरेकेण द्रष्टुमशक्यमपि स्वमात्रतया द्रष्टुं शक्य-मित्यत्र—"अहमस्मीत्यभिध्यायेत् ध्येयातीतं" इति श्रुतेः। स्वमात्रसिद्धे स्वाति-रिक्तापह्नवपूर्वकत्वात्। यदप्रमेयं तत् स्वमात्रतया द्रष्टुं शक्यमित्युभयमप्यविरुद्ध-मित्यर्थः। यस्त्वप्रमेयतया दृष्टः सोऽयमात्मा **विरजः** रजआदिगुणप्रभवधर्माधर्म-विरलत्वात्। अत एवाकाशादेरपि **परः** ततोऽपि सूक्ष्मत्वात्। सूक्ष्मत्वे स्तम्बादिवत् जन्मभाक् स्यादित्यत आह—**अज** इति। जन्मादिहेतुमायावैरल्यात् स्वतः परतो वा स्वयं न जायते, स्वस्माद्वा किंचिदपि न जायत इत्यजत्वं निरङ्कुशमित्यर्थः। अत एवायमात्मा **महान्** त्रिविधपरिच्छेदशून्यत्वात्। अत एवायं **ध्रुवः** सन्मात्रत्वात्। य एवमीदृशविशेषणविशिष्टः तमेवात्मानं,

आत्ममात्रमिदं सर्वमात्मनोऽन्यन्न किंचन।

इति **धीरो** ब्रह्मविद्वरो देशिकशास्त्रोपदेशतो **विज्ञाय ब्राह्मणो** ब्रह्मविद्वरीयान् भूत्वा स्वातिरिक्तवस्तुजिज्ञासापह्नवपूर्वकं स्वमात्रपर्यवसानलक्षणां **प्रज्ञां** ज्ञप्तिरूपां **कुर्वीत**। यद्वा—प्रज्ञोत्पत्तिहेतुसाधनचतुष्टयसंन्यासपुरस्सरवेदान्तश्रवणमननादिकं कुर्यादित्यर्थः। ततो वेदान्तश्रवणातिरेकेण **बहून् शब्दान् नानुध्यायात्** नानुचिन्तयेत्। स्वात्मप्रतिपत्तिविपरीतव्यापृतिनिरसनपूर्वकमात्मावगतिमात्रहेतु-व्यापृतिरनुज्ञायते। "ओमित्येवं ध्यायथ आत्मानमन्या वाचो विमुञ्चथ" इति श्रुतेः। अन्यथा बहुशब्दानुकरणं तु **वाचो विशेषेण ग्लापनं** ग्लानिकरं **हि तत्**। यावत् ब्रह्मावगतिः तावत् तदुपायव्यापृतिर्भवेत्। इतिशब्दो मन्त्रपरिसमाप्त्यर्थः॥ २०–२१॥

स्वात्मयाथात्म्ये कृत्स्नवेदसमन्वयः

स वा एष महानज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन एतमेव विदित्वा मुनिर्भवति एवमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति एतद्ध स्म वा एतत्पूर्वे विद्वाꣳसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थाय अथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणा उभे ह्येते एषणे एव भवतः । स एष नेति नेत्यात्मा अगृह्यो न हि गृह्यते अशीर्यो न हि शीर्यते असङ्गो न हि सज्यते असितो न व्यथते न रिष्यति एतमु हैवैते न तरत इत्यतः पापमकरवमित्यतः कल्याणमकरवमिति उभे उ हैवैष एते तरति नैनं कृताकृते तपतः ॥ २२ ॥

ब्राह्मणतो मन्त्रतश्च स्वात्मयाथात्म्यं यथावत् प्रतिपादितम् । तथा चास्मिन् प्रपाठके उक्तानुवादमनूद्य योऽर्थः प्रकाशितः तत्रैव कृत्स्नवेदसमन्वयो भवतीत्यर्थप्रकाशनाय इयं खण्डिकारभ्यते—स वा इति । स इत्युक्तः परामृश्यते । कथम्? पूर्वं जनकप्रश्नारम्भे कतम आत्मा? इति योऽयं विज्ञानमयः प्राणेष्वित्येतदुक्तं सोऽयं विज्ञानमयः स्वयं ज्योतिरात्मा स्वात्तो-

पाधितद्धर्मगामाविद्यकत्वेन कारणतुल्योपदेशेन स्वातिरिक्तास्तिताभ्रमतो मोक्षितः परमात्मभावमापादितः खलु। **स वा एष महानज आत्मा** पर एव नान्य इत्यर्थः। **योऽयं विज्ञानमयः प्राणेष्विति** व्याख्यातम्। **य एषोऽन्तर्हृदये** हृत्पुण्डरीकमध्ये लिङ्गशरीराश्रयत्वेन योऽयमव्याकृताकाशो वर्तते लिङ्गशरीरावच्छिन्ने **तस्मिन् शेते** तद्वृत्तिप्रवृत्तिनिमित्ततया तिष्ठति। यद्वा-- संप्रसादकालीनहृदयाकाशे निरुपाधिकत्वेन स्वस्वभावे शेते। क्वैष तदाभूत् ? इत्यस्य प्रतिवचनत्वेन व्याख्यातमेतत्। यः स्वभावमापन्नो विज्ञानमयः स हि **सर्वस्य** ब्रह्मेन्द्रादेः **वशी** ब्रह्मादीनां तद्वशवर्तित्वात्। "एतस्य वा अक्षरस्य प्रशासने" इत्युक्तत्वात्। न केवलं वशी किंतु **सर्वस्य ईशानः** ईशिता च "भीषास्मात् वातः पवते" इत्यादिश्रुतेः। किमीशितृत्वं राजभृत्ययोरिव सातिशयं ? तत्राह—**सर्वस्याधिपतिरिति**। सर्वात्मत्वेन सर्वमधिष्ठाय पालयितृत्वात्। यतः सर्वाधिपतिः अत ईशानः। यत एवमतो वशीति विशेषणत्रयस्य हेतुहेतुमद्भावो द्रष्टव्यः। य एवं हृद्यन्तर्ज्योतिः विज्ञानमयः पुरुष उक्तः **सोऽयं** शास्त्रीयकर्मणा **साधुना न भूयान्न वर्धते नो एवायं** शास्त्रप्रतिषिद्धेनासाधुना कर्मणा **कनीयान**ल्पतरो भवति। पूर्वावस्थातो जात्वपि न वर्धते न हीयते चेत्यर्थः। सर्वविकारास्पृष्टचिद्रूपत्वात् परानुग्रहादिकर्मजविकृतिः स्यादित्यत आह—**एष सर्वेश्वर इति**। ईश्वरस्य सर्वप्राणिकृतकर्माध्यक्षत्वेऽपि तत्रात्मात्मीयाभिमानवैरल्यतो विकृतत्वं सिद्धमित्यर्थः। किञ्च **एष भूताधिपतिरि**त्युक्तार्थम्। **एष भूतपालः** सर्वपालयितृत्वात्। **एष सेतुर्विधरणः** सर्वविधारयितृत्वात्। किमर्थम्? **एषां** सत्यादिचतुर्दश**लोकानामसंभेदाय** असाङ्कर्याय परमेश्वर एव सेतुरिव सेतुः। तत्तद्वर्णाश्रमादिमर्यादापालकत्वात् सेतुत्वं युज्यते। एवंविदात्मैवास्य ज्योतिर्भवतीति विद्याफलम्। काम्यैकदेशवर्जितं कृत्स्नं कर्मकाण्डं सत्त्वशुद्धिहेतुभूतं सत् तादर्थ्येन विनियुज्यत इत्याह—**तमिति**। यः स्वयंज्योतिः महानज आत्मेति प्रकृतः **तमेतमौ**पनिषदं पुरुषं मन्त्रब्राह्मणात्मक**वेदानुवचनेन ब्राह्मणा विविदिषन्ति** तद्याथात्म्यमुपनिषद्वाक्यैः वेदितुमिच्छन्ति। यद्वा—कर्मकाण्डगोचरमन्त्रब्राह्मणात्मकवेदानुवचनेन विविदिषन्ति। कथं? **यज्ञेन**

निष्कामबुद्धयानुष्ठितेन चित्तशुद्धिमेत्य अथ औपनिषदं पुरुषं विविदिषन्ति "विशुद्धसत्त्वस्ततस्तु तं पश्यते निष्कलं ध्यायमानः" इति,

ज्ञानमुत्पद्यते पुंसां क्षयात् पापस्य कर्मणः ।

इति श्रुतेः स्मृतेश्च । एवं विधिवत् यज्ञसंस्कृतस्य आदौ सत्त्वशुद्धिर्जायते । ततो ज्ञानमप्रतिबद्धं भविष्यति । ज्ञानसमकालं कृतकृत्यो भवतीत्यर्थः । तथा **दानेन** तस्यापि पापक्षयपूर्वकं सत्त्वशुद्धिप्राप्यज्ञानद्वारा मुक्तिहेतुत्वात् । **तपसा** कृच्छ्रचान्द्रायणादिना विचारात्मकेन वा विविदिषन्ति । तथा च श्रुतिस्मृती—"तपसा ब्रह्म विजिज्ञासस्व",

तपसा प्राप्यते सत्त्वं सत्त्वात् संप्राप्यते मनः ।
मनसा प्राप्यते त्वात्मा ह्यात्मापत्त्या निवर्तते ॥

इति । "तपसा कल्मषं हन्ति" इति च । **तथानाशकेन** प्राणमात्रधारणहेतुना "प्राणसन्धारणार्थं यथोक्तकाले विमुक्तो भैक्षमाचरन्" इति श्रुतेः । न त्वशननिवृत्तिः, तथात्वे मृतिः स्यात् । यद्वा—वेदपठनपाठनयज्ञदानतपःशब्देन निष्कामकर्मोच्यते । तत्सत्त्वशुद्धिजज्ञानतो मोक्षसाधनं भवतीति कर्मकाण्डस्यापि मुक्तिहेतुत्वमभिहितम् । एवं यथाप्रकाशितोपायेन आत्मानं विदित्वा मुनिर्योगी भवति । न हि प्रकारान्तरेण मुनित्वं संभवति "मननात् स मुनिर्भवति" इति स्मृतेः । **एतमेव विदित्वा मुनिर्भवतीत्यवधारणात्** न ह्युपायान्तरेण मुनित्वं संभवति । विदित्वा मुनिर्भवतीत्यनेन विद्वत्संन्यासोऽभिहित इत्याह—**एतमेवेति** । स्वमात्रतया एतस्मिन् विदिते "तत् केन कं पश्येत्" इत्यादिक्रियाकारकफलासंभवश्रुत्यनुरोधेन अथ मौनमेवावशिष्यते । अत एव **एतमेव** यथावत् विदित्वा क्रियाकारकफलमार्गतः **प्रव्राजिनः** ब्रह्ममात्र**लोकमिच्छन्तः प्रव्रजन्ति** सर्वकर्मसंन्यासं कुर्वन्तीत्यर्थः । एतमेवेत्यवधारणात् बाह्यलोकत्रयाभिलाषिणां न हि पारिव्राज्याधिकारोऽस्तीत्यवगम्यते । तेषां लोकत्रयावृतदृष्टित्वात् । यथा पुत्रकर्मविद्यादि लोकत्रयसाधनं तथा तत्संन्यास एव स्वात्मलोकाप्तिसाधनमित्यर्थः । यस्मादेवं तस्मादात्मलोकार्थिनः सर्वैषणानिवृत्ति-

पारिव्राज्यकरणानुकूलार्थवादवाक्यमनुक्रामति—**एतदिति। एतत् ह स्म वै** किल **पूर्वे** प्राक्कालीना **विद्वांसः** बाह्यलोकत्रयोपलक्षितप्रजां **न कामयन्ते।** पुत्रादि लोकत्रयसाधनं नानुतिष्ठन्तीत्यर्थः। मृगतृष्णिकायामुदकदर्शिन इव ये त्वविद्वांसः ते प्रजादिसाधनैः लोकत्रयमिच्छन्तु, न वयमित्याह—**किमिति।** बाह्यानात्मलोका यत्र समाप्यन्ते तस्मिन्नात्मलोके स्वमात्रधियाधिष्ठिते मरुमरीचिकास्थानीयानात्मलोकत्रयसाधनप्रजादिना **किं करिष्यामः?** आत्मलोकावगतेरनात्मलोकतत्कार्याभावप्रबोधपूर्वकत्वात्। **येषां नोऽस्माकं** अनात्मप्रपञ्चापह्नवसिद्धो**ऽयमात्मा** स्वमात्रतया लोक्यत इति **लोको** भवति। एवं स्वात्मलोकाः किं कृतवन्तः? इत्यत आह—**त** इति। **ते ह स्म** किल **पुत्रैषणायाश्चे**त्यादि **न रिष्यति** इत्यन्तं व्याख्यातम्। यः स्वातिरिक्तकलना नेति नेति स्वमात्रदृक् **तमेतं** ब्रह्मभावारूढं **उ हैवैते** पुण्यपापे **न तरतः** नाप्नुत इत्यर्थः। तद्दृष्ट्या स्वातिरेकेण पुण्यपापवैरल्यादित्यत्र "पुण्यं पापं च चिन्मात्रं" इति "स्वाज्ञदृष्टिप्रसक्तपुण्यपापादि स्वज्ञदृष्ट्या चिन्मात्रमेव" इति श्रुतेः। यतः पुण्यपापादिकं स्वाज्ञदृष्टिप्रसक्तं अतः **पापं** कर्मा**करवं** कृतवानस्मि तेन नरकपातः स्यादिति। तथातो यज्ञदानादिलक्षणं **कल्याणं** कर्मा**करवं** कृतवानस्मि। तेनाहं देहपातानन्तरं तत्फलं स्वर्गं विशामीति च विषादहर्षाविनं ब्रह्मविदं न स्पृशतः। एवं विषादहर्षमूलभूते पुण्यपापे सफलकर्मणी **एष** ब्रह्मवित् **तरति**। ब्रह्मज्ञानसमकालमुभे अपि कर्मणी क्षीयेते इत्यर्थः। किञ्च **कृतं** नित्यं कर्म तदकरणम**कृतं च कृताकृते नैनं तपतः** तद्दृष्ट्या कृताकृतप्रभवसन्तापहेतुस्वाज्ञानवैरल्यादित्यर्थः॥ २२॥

सम्यज्ज्ञानिनः सर्वकर्माभावः

तदेतदृचाभ्युक्तम्—

एष नित्यो महिमा ब्राह्मणस्य न वर्धते कर्मणा नो कनीयान्।
तस्यैव स्यात् पदवित् तं विदित्वा न लिप्यते कर्मणा
पापकेन॥ इति॥

तस्मादेवंवित् शान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्यति सर्वमात्मानं पश्यति नैनं पाप्मा तरति सर्वं पाप्मानं तरति नैनं पाप्मा तपति सर्वं पाप्मानं तपति विपापो विरजोऽविचिकित्सो ब्राह्मणो भवति एष ब्रह्मलोकः सम्राट्! एनं प्रापितोऽसीति होवाच याज्ञवल्क्यः सोऽहं भगवते विदेहान् ददामि मां चापि सह दास्याय इति ॥ २३ ॥

ब्रह्मज्ञानाग्निना विद्वान् निर्दहेत् कर्मबन्धनम्। इति,

"क्षीयन्ते चास्य कर्माणि" इति,

ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा।

इत्यादिश्रुतिस्मृत्यनुरोधेन सम्यज्ज्ञानिनः सर्वकर्माभावो ब्राह्मणेन प्रतिपादितः। तमेतमर्थं मन्त्रोऽप्यनुवदतीत्याह—तदेतदिति। ब्राह्मणेन योऽर्थोऽभिहितः तमेतमर्थं मन्त्रेणाभ्युक्तं प्रकाशितम्। किमिति? स्वातिरिक्तं नेति नेतीति स्वमात्रपदवीं गतस्य ब्राह्मणस्य ब्रह्ममात्रावस्थानलक्षणोऽयमेष महिमा नित्यः स्वाभाविकत्वात्। कथं पुनरस्य नित्यत्वं? इत्यत्र हेतुमाह—नेति। शुभकर्मणा न वर्धते वृद्धिविक्रियां नाप्नोति। तथाशुभेन कर्मणा नो कनीयानपक्षयविक्रियां नाप्नोति। एवमुपचयापचयविक्रियास्पृष्टत्वेनाविक्रियत्वात् नित्यत्वं सिद्धमित्यर्थः। यस्मादेवं तस्मात् तस्यैव महिम्नः स्वरूपमेव पदं, तद्याथात्म्यज्ञः पदवित् स्यात्। सोऽयं पदवित् महिमानं विदित्वा धर्माधर्मलक्षणपुण्यपापयोरपि स्वातिरिक्तधिया हेयत्वेन पापकत्वम्। तेन पापकेन कर्मणायं न लिप्यते न संबध्यत इत्यर्थः। यस्मात् ब्राह्मणस्य महिमा स्वातिरिक्तपुण्यपापग्रासः तस्मात् एवंवित् बाह्येन्द्रियेन्द्रियार्थतः शान्तः तथा अन्तःकरणवृत्तितत्कार्यतो दान्तः तथा सर्वैषणाविनिर्मुक्त उपरतः संन्यासीत्यर्थः। द्वन्द्वसहिष्णुः तितिक्षुः बाह्यान्तःकरणव्यापृतिरहितः समाहितो भूत्वायमात्मन्येव स्वदेहे

स्वात्मानं प्रत्यक्चेतयितारं परमात्माभेदेन **पश्यति** । किं देह एव पश्यति ? इत्यत्र यद्यत् स्वाज्ञदशायां स्वातिरिक्तत्वेन दृष्टं तत्तत् **सर्वमात्मानं** आत्ममात्रं **पश्यति** । न ह्यात्मनोऽतिरिक्तमणुमात्रं वा पश्यति स्वातिरिक्तस्यालब्धात्मकत्वात् ।

आत्ममात्रमिदं सर्वमात्मनोऽन्यन्न किञ्चन ।

इति श्रुतेः । एवं स्वात्मानं निष्प्रतियोगिकब्रह्ममात्रं पश्यन्तम**एनं** वस्तुदृष्ट्या लब्धात्मकोऽयं **पाप्मा न** हि **तरति न** स्प्रष्टुं पारयति । अयमात्ममात्रदृक् स्वमात्रतया **सर्वं पाप्मानं तरति** ग्रसति । **न चैनं** कृताकृतलक्षणः **पाप्मा** स्वफलतस्**तपति** न स्पृशति । **अयं तु सर्वं पाप्मानं तपति** स्वातिरिक्तहेतुनापह्नवं करोति । यत एवमतो**ऽयं विपापो विरजोऽविचिकित्सः** । निष्पापत्वान्निर्गुणत्वान्निर्विचिकित्सत्वादयं "ब्रह्ममात्रमसन्न हि" इति श्रुत्यनुरोधेन स्वातिरिक्तासदविद्यापदतत्कार्यमस्तिनास्तीति विभ्रमासंभवप्रबोधतो **ब्राह्मणो भवति** मुख्यावधूतो भवतीत्यर्थः । **योऽयमेष ब्रह्मलोकः** यत्र हि ब्रह्म स्वमात्रं लोक्यते हे **सम्राट्!** योऽयमेष ब्रह्मलोकः परमाभयरूपेणावशिष्यते तमेतं परमाभयलक्षणं ब्रह्मलोकं **प्रापितोऽसीति होवाच याज्ञवल्क्यः** । एवं याज्ञवल्क्येन परमाभयं प्रापितः सम्राडेवमाह—किमिति ? **सोऽहमेवं** त्वया परमाभयं प्रापितः **सन् भगवते** तुभ्यं **यावत् विदेहान् देशान्** तैः **सह मां च दास्याय ददामीति** । समाप्तेयं पुरुषार्थोपयोगिनी ब्रह्मविद्या । एतावद्धि पुरुषेण ज्ञातव्यं यत् प्राप्य ब्राह्मणः कृतकृत्यो भवति । एतद्धि कृत्स्नवेदानुशासनमित्यर्थः ॥ २३ ॥

आख्यायिकोपसंहारः

स वा एष महानज आत्मान्नादो वसुदानो विन्दते वसु य एवं वेद ॥ २४ ॥

आख्यायिकामुपसंहरति—**स वा** इति । सोऽयं जनकयाज्ञवल्क्याख्यायिकायां प्रपञ्चितः **स वा एष महानज आत्मा** स्वाज्ञदृष्टिप्रसक्तान्नं स्वावशेषतयात्तीत्य**न्नादः** प्रसक्तप्राणिकर्मानुरोधेन वसु कर्मफलं ददातीति **वसुदानः** ।

तमेतमन्नादवसुदानगुणविशिष्टं **यो वेद स सर्वात्मा सन्** सर्वमन्नमत्ति । **वसु** कर्मफलजातं **विन्दते** लभते ॥ २४ ॥

सर्ववेदान्तार्थनिर्देशः

स वा एष महानज आत्मा अजरोऽमरोऽमृतोऽभयो ब्रह्म अभयं वै ब्रह्म अभयꣳ हि वै ब्रह्म भवति य एवं वेद ॥ २५ ॥

इदानीं बृहदारण्यकोपनिषदि सर्ववेदान्तेषु च योऽर्थोऽभिहितः एतावान् सोऽर्थ इत्यस्यां खण्डिकायां निर्दिशति—**स वा** इति । **स वा एष महानज आत्मा** प्रज्ञानघनः स्वारोपिताविद्यापदवन्न जीर्यत इत्य**जरः** यतो न जीर्यते । अतोऽयम**मरः** यतो जनिमृतिरहितः । अत एवा**मृतः** । अमृतत्वादेवा**भयः** स्वस्यैव सर्वग्रासत्वेन स्वभयजनकमृत्युवैरल्यात् । अयमेवार्थो हि पुरा " अभयं वै जनक ! प्राप्तोऽसि " इति योऽर्थोऽभिहितः तदुपसंहरणार्थम् । **अभयं ब्रह्म** स्वमात्रतयोपबृंहणात् । ब्रह्मैवाभयमिति प्रसिद्धमेतत् । लोके **यः** स्वाज्ञदृष्टि-विकल्पितस्वातिरिक्तास्तिताप्रभवभयसामान्यापह्नवसिद्ध**मभयं ब्रह्म** स्वमात्रमिति **वेद सोऽभयं हि वै ब्रह्म भवति** निष्प्रतियोगिकब्रह्ममात्रतयावशिष्यते " यदव-शिष्यते तदद्वयं ब्रह्म " इति श्रुतेः ॥ २५ ॥

इति चतुर्थं ब्राह्मणम्

पञ्चमं मैत्रेयीब्राह्मणम्

याज्ञवल्क्यचरितम्

अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी च तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी अथ ह याज्ञवल्क्योऽन्यद्वृत्तमुपाकरिष्यन् ॥ १ ॥

मधुकाण्डे यत् ब्रह्मतत्त्वं निर्धारितं आगमात्रत: पुनस्तस्यैव याज्ञवल्कीय-काण्डेन तर्कितोऽपि प्रतिपक्षीभूतान् वादेन निर्जित्य सन्मात्रं ब्रह्म "विज्ञानमानन्दं ब्रह्म" इति समर्थितम्। तदेव हि पुन: षष्ठे शिष्याचार्यसंवादरूपेण उपसंहृतम्। इदानीं तु तन्निगमनस्थानीयं मैत्रेयीब्राह्मणमारभ्यते। एतत् कृत्स्नं ब्राह्मणं प्रायशो मधुकाण्डे व्याख्यातम्। यानि तत्र न व्याख्यातानि तान्येवात्र व्याख्यायन्ते—**अथेति**। अथेति हेत्वर्थ आनन्तर्यार्थो वा। हेतुप्रधानानि हि वाक्यानि पुरा दृश्यन्ते। तदनन्तरमागमप्रधानेन ससंन्यासमात्मज्ञानममृतत्व-साधनमित्यवगम्यते। यत एवमतोऽमृतत्वप्रतिपित्सुभि: तर्कागमाभ्यां स्वातिरिक्त-कलनासंन्यासिसिद्धस्वमात्रज्ञानं तन्मात्रावस्थानलक्षणकैवल्यसाधनमिति प्रतिपत्त-व्यमित्यर्थ:। अत्र हकारो वृत्तावद्योतक:। पुरावृत्ताख्यायिका तु—**याज्ञवल्क्य-स्य द्वे भार्ये बभूवतु:** आस्ताम्। के ते? इत्यत्र—नामतो **मैत्रेयी च कात्यायनी च। तयोर्ह** किल **मैत्रेयी ब्रह्मवादिनी बभूव**। अपरा **कात्यायनी** तु गृहप्रयोजनान्वेषणलक्षण**स्त्रीप्रज्ञैव तर्हि** तस्मिन् काले। **अथैवं** सति **याज्ञवल्क्य:** स्वात्तगार्हस्थ्यवृत्तात् **अन्यत् वृत्तं** पारिव्राज्य**मुपाकरिष्यन्** उपाचिकीर्षु: सन् उवाचेत्यर्थ:॥ १॥

तस्य पारिव्राज्यकथनम्

मैत्रेयि! इति होवाच याज्ञवल्क्य: प्रव्रजिष्यन् वा अरेऽय-मस्मात्स्थानादस्मि हन्त तेऽनया कात्यायन्या अन्तं करवा-णीति॥ २॥

किमुवाच? इत्यत आह—**मैत्रेयीति**। **याज्ञवल्क्य:** प्रव्रजिष्यन् ज्येष्ठ-भार्यां **मैत्रेयि! इति** संबोध्य त्वमनुजानीहि। **अस्मात्** गार्हस्थ्यात् **प्रव्रजिष्यन् अस्मि**। शिष्टं व्याख्यातम्॥ २॥

मैत्रेयीप्रश्नः

सा होवाच मैत्रेयी यन्नु म इयं भगोः सर्वा पृथिवी वित्तेन पूर्णा स्यात् स्यां न्वहं तेनामृता आहो३नेति नेति होवाच याज्ञवल्क्यो यथैवोपकरणवतां जीवितं तथैव ते जीवितꣳ स्यादमृतत्वस्य तु नाशास्ति वित्तेनेति ॥ ३ ॥ सा होवाच मैत्रेयी येनाहं नामृता स्यां किमहं तेन कुर्यां ? यदेव भगवान् वेद तदेव मे विब्रूहीति ॥ ४ ॥

सैवमुक्ता उवाच—सा हेति। वित्तसाध्येन कर्मणा किमहममृता आहो नेति ? नेति होवाच याज्ञवल्क्यः हीत्यादि समानम् ॥ ३–४ ॥

याज्ञवल्क्येन उपदेशः

स होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती सती प्रियमवृधत् हन्त तर्हि भवति ! एतद्व्याख्यास्यामि ते व्याचक्षाणस्य तु मे निदिध्यासस्वेति ॥ ५ ॥

प्रियैव खलु नोऽस्मभ्यं भवती प्रियमेवावृधत् वर्धितवत्यसि। अतस्तुष्टोऽहम्। हन्त ! इच्छसि अमृतत्वसाधनं तत् ते तुभ्यं व्याख्यास्यामि शृण्वित्यर्थः ॥ ५ ॥

आत्मलक्षणं अमृतत्वसाधनं च

स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामाय पतिः प्रियो भवति न वा अरे जायायै कामाय जाया प्रिया भवति आत्मनस्तु कामाय जाया प्रिया ...

भवति न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति आत्मनस्तु कामाय वित्तं प्रियं भवति न वा अरे पशूनां कामाय पशवः प्रिया भवन्ति आत्मनस्तु कामाय पशवः प्रिया भवन्ति न वा अरे ब्रह्मणः कामाय ब्रह्म प्रियं भवति आत्मनस्तु कामाय ब्रह्म प्रियं भवति न वा अरे क्षत्रस्य कामाय क्षत्रं प्रियं भवति आत्मनस्तु कामाय क्षत्रं प्रियं भवति न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति आत्मनस्तु कामाय लोकाः प्रिया भवन्ति न वा अरे देवानां कामाय देवाः प्रिया भवन्ति आत्मनस्तु कामाय देवाः प्रिया भवन्ति न वा अरे वेदानां कामाय वेदाः प्रिया भवन्ति आत्मनस्तु कामाय वेदाः प्रिया भवन्ति न वा अरे भूतानां कामाय भूतानि प्रियाणि भवन्ति आत्मनस्तु कामाय भूतानि प्रियाणि भवन्ति न वा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवति आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि ! आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदꣳ सर्वं विदितम् ॥ ६ ॥ ब्रह्म तं परादात् योऽन्यत्रात्मनो ब्रह्म वेद क्षत्रं तं परादात् योऽन्यत्रात्मनः क्षत्रं वेद लोकास्तं परादुः योऽन्यत्रात्मनो लोकान् वेद देवास्तं परादुः योऽन्यत्रात्मनो देवान् वेद वेदास्तं परादुः योऽन्यत्रात्मनो वेदान्

वेद भूतानि तं परादुः योऽन्यत्रात्मनो भूतानि वेद सर्वं तं परादात् योऽन्यत्रात्मनः सर्वं वेद इदं ब्रह्म इदं क्षत्रमिमे लोका इमे देवा इमे वेदा इमानि भूतानि इदꣳ सर्वं यदयमात्मा ॥ ७ ॥ स यथा दुन्दुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद्ग्रहणाय दुन्दुभेस्तु ग्रहणेन दुन्दुभ्याघातस्य वा शब्दो गृहीतः ॥ ८ ॥ स यथा शङ्खस्य ध्मायमानस्य न बाह्यान् शब्दान् शक्नुयाद्ग्रहणाय शङ्खस्य तु ग्रहणेन शङ्खध्मस्य वा शब्दो गृहीतः ॥ ९ ॥ स यथा वीणायै वाद्यमानायै न बाह्यान् शब्दान् शक्नुयाद्ग्रहणाय वीणायै तु ग्रहणेन वीणावादस्य वा शब्दो गृहीतः ॥ १० ॥ स यथा आर्द्रैधाग्नेरभ्याहितस्य पृथग्धूमा विनिश्चरन्ति एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतत् यत् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानानि इष्टꣳ हुतमाशितं पायितमयं च लोकः परश्च लोकः सर्वाणि च भूतान्यस्यैवैतानि सर्वाणि निःश्वसितानि ॥ ११ ॥ स यथा सर्वासामपाꣳ समुद्र एकायनमेवꣳ सर्वेषाꣳ स्पर्शानां त्वक् एकायनमेवꣳ सर्वेषां गन्धानां नासिके एकायनमेवꣳ सर्वेषां रसानां जिह्वा एकायनमेवꣳ सर्वेषाꣳ रूपाणां चक्षुरेकायनमेवꣳ सर्वेषाꣳ शब्दानाꣳ श्रोत्रमेकायनमेवꣳ सर्वेषाꣳ संकल्पानां मन एकायनमेवꣳ सर्वासां विद्यानाꣳ हृदयमेकायनमेवꣳ सर्वेषां कर्मणाꣳ हस्तावेकायनमेवꣳ सर्वेषामानन्दानामुपस्थ एकायन-

मेवꣳ सर्वेषां विसर्गाणां पायुरेकायनमेवꣳ सर्वेषामध्वनां पादावेकायन-
मेवꣳ सर्वेषां वेदानां वागेकायनम् ॥ १२ ॥ स यथा सैन्धव-
घनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एव एवं वा अरेऽयमात्मानन्त-
रोऽबाह्यः कृत्स्नः प्रज्ञानघन एव एतेभ्यो भूतेभ्यः समुत्थाय
तान्येवानुविनश्यति न प्रेत्य संज्ञास्तीति अरे ब्रवीमीति होवाच
याज्ञवल्क्यः ॥ १३ ॥ सा होवाच मैत्रेयी अत्रैव मा भगवान्
मोहान्तमापीपिपत् न वा अहमिमं विजानामीति स होवाच न
वा अरेऽहं मोहं ब्रवीमि अविनाशी वा अरेऽयमात्मानुच्छित्ति-
धर्मा ॥ १४ ॥ यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति
तदितर इतरं जिघ्रति तदितर इतरꣳ रसयते तदितर
इतरमभिवदति तदितर इतरꣳ शृणोति तदितर इतरं मनुते
तदितर इतरꣳ स्पृशति तदितर इतरं विजानाति यत्र त्वस्य
सर्वमात्मैवाभूत् तत्केन कं पश्येत् तत्केन कं जिघ्रेत् तत्केन
कꣳ रसयेत् तत्केन कमभिवदेत् तत्केन कꣳ शृणुयात् तत्केन कं
मन्वीत तत्केन कꣳ स्पृशेत् तत्केन कं विजानीयात् येनेदꣳ सर्वं
विजानाति तं केन विजानीयात् स एष नेति नेत्यात्मा अगृह्यो
न हि गृह्यते अशीर्यो न हि शीर्यते असङ्गो न हि सज्यते
असितो न व्यथते न रिष्यति विज्ञातारमरे केन विजानीयादिति ?
उक्तानुशासनासि मैत्रेयि ! एतावदरे ! खल्वमृतत्वमिति होक्त्वा
याज्ञवल्क्यो विजहार ॥ १५ ॥

देशिकागमाभ्यामात्मनि दृष्टे श्रुते पुनस्तर्केण मते अथ विज्ञाते इदमेतदिति निर्धारिते किं भवति ? इत्यत आह—**इदमिति** । यत् स्वाज्ञदशायां इदन्त्वेनानुभूतं तदिदानीं ब्रह्ममात्रतया **विदितं** भवतीत्यर्थः । कार्यसामान्यप्रलयतः तन्निरूपितकारणतापाये कार्यकारणकलनाविरलोऽ**यमात्मा सैन्धवघनवत् अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन** एकल आत्मा स्वमात्रमवशिष्यत इत्युक्त्वा **न प्रेत्य संज्ञास्तीति मोहान्तं** मोहमध्यं **आपीपिपत्** गमितवानसि मोहितवानसीति यावत् । **अतो न वा अहमिममात्मानं विजानामीत्युक्तः स होवाच—न ह्यहं मोहं ब्रवीमि** । यतोऽयमात्मा **अविनाशी** अविक्रियत्वात् **अतोऽयमात्माऽनुच्छित्तिधर्मा** । एवमध्यायचतुष्टयेऽप्येक एवात्मा निर्धारितः । तत्प्रापकोपायास्तु भिद्यन्ते । " अथात आदेशो नेति नेति " इति यश्चतुर्थाध्याये निर्दिष्टः स एव हि पञ्चमे याज्ञवल्क्यशाकल्यसंवादेऽपि निर्धारितः । पञ्चमान्ते च पुनः जनकयाज्ञवल्क्यसंवादे पुनरिह उपनिषत्समाप्तौ च । एवमध्यायचतुष्टयेऽपि एक एवात्मा नान्यः कश्चिदस्तीति एतत्प्रदर्शनाय अन्तेऽप्युपसंहारः कृतः । " स एष नेति नेति " इत्यादिना स्वाज्ञविकल्पितस्वातिरिक्तविशेषजातमपनिह्नुते । तदपह्नवसिद्धनिष्प्रतियोगिकब्रह्ममात्रगोचरं ससंन्यासं विज्ञानं तन्मात्रावस्थानलक्षणकैवल्यसाधनमिति विवक्षन्नाह—**एतावदिति** । **अरे मैत्रेयि !** " यदेव भगवान् वेद तदेव मे ब्रूहि " इति यत् पृष्टवत्यसि तदेव तेऽमृतत्वसाधनमुक्तम् । **एतावद्धि** त्वया विज्ञेयम् । एवममृतत्वसाधनमात्मज्ञानं स्वप्रियभार्यायै याज्ञवल्क्य **उक्त्वा** किं कृतवान् ? इत्यत्र प्रव्रजिष्यन्निति यत् प्रतिज्ञातं तत् चकारेत्याह—**याज्ञवल्क्यो विजहारेति** । परिव्राट्पदं गतवानित्यर्थः । येयं संन्यासपर्यवसाना सेयं ब्रह्मविद्या परिसमाप्ता । एतावान् हि परमार्थोपदेशः । एतद्धि सकलवेदान्तानुशासनस्वातिरिक्तसामान्यसंन्याससहकृतनिष्प्रतियोगिकब्रह्ममात्रज्ञानं तन्मात्रावस्थानलक्षणविकलेबरकैवल्यसाधनं, नान्यदिति सिद्धम् ॥ ६–१५ ॥

इति पञ्चमं ब्राह्मणम्

षष्ठं वंशब्राह्मणम्

आचार्यशिष्यवंशवर्णनम्

अथ वꣳशः पौतिमाष्यात् पौतिमाष्यो गौपवनाद्गौपवनः पौतिमाष्यात् पौतिमाष्यो गौपवनाद्गौपवनः कौशिकात् कौशिकः कौण्डिन्यात् कौण्डिन्यः शाण्डिल्यात् शाण्डिल्यः कौशिकाच्च गौतमाच्च गौतमः ॥ १ ॥ आग्निवेश्यादाग्निवेश्यो गार्ग्याद्गार्ग्यो गार्ग्याद्गार्ग्यो गौतमाद्गौतमः सैतवात् सैतवः पाराशर्यायणात् पाराशर्यायणो गार्ग्यायणाद्गार्ग्यायण उद्दालकायनादुद्दालकायनो जाबालायनाज्जाबालायनो माध्यन्दिनायनात् माध्यन्दिनायनः सौकरायणात् सौकरायणः काषायणात् काषायणः सायकायनात् सायकायनः कौशिकायनेः कौशिकायनिः ॥ २ ॥ घृतकौशिकात् घृतकौशिकः पाराशर्यायणात् पाराशर्यायणः पाराशर्यात् पाराशर्यो जातूकर्ण्यात् जातूकर्ण्य आसुरायणाच्च यास्काच्चासुरायणस्त्रैवणेस्त्रैवणिरौपजङ्घनेः औपजङ्घनिरासुरेरासुरिः भारद्वाजाद्भारद्वाज आत्रेयात् आत्रेयो माण्टेर्माण्टिर्गौतमाद्गौतमो गौतमाद्गौतमो वात्स्याद्वात्स्यः शाण्डिल्यात् शाण्डिल्यः कैशोर्यात् काप्यात् कैशोर्यः काप्यः कुमारहारितात् कुमारहारितो गालवात् गालवो विदर्भीकौण्डिन्यात् विदर्भीकौण्डिन्यो वत्सनपातो बाभ्रवात् वत्सनपात् बाभ्रवः पथः सौभरात् पन्थाः सौभरोऽयास्यादाङ्गिरसात् अयास्य आङ्गिरस आभूतेस्त्वाष्ट्रात् आभूतिस्त्वाष्ट्रो विश्वरूपात्त्वा-

ष्ट्राद्विश्वरूपस्त्वाष्ट्रोऽश्विभ्यामश्विनौ दधीच आथर्वणात् दध्यङ् आथर्वणो दैवात् अथर्वा दैवो मृत्योः प्राध्वꣳसनात् मृत्युः प्राध्वꣳसनः प्रध्वꣳसनात् प्रध्वꣳसन एकऋषेः एकर्षिर्विप्रचित्तेर्वि-प्रचित्तिर्व्यष्टेर्व्यष्टिः सनारोः सनारुः सनातनात् सनातनः सनगात् सनगः परमेष्ठिनः परमेष्ठी ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ३ ॥

अथ वंशब्राह्मणमारभ्यते—अथेति । मधुकाण्डवंशब्राह्मणवत् याज्ञवल्कीय-काण्डगतवंशब्राह्मणमपि समानमित्यर्थः ॥ १—३ ॥

इति षष्ठं ब्राह्मणम्

इति चतुर्थोऽध्यायः

पञ्चमोऽध्यायः

प्रथमं ब्राह्मणम्

शान्तिपाठः ओङ्कारोपासनं च

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्ण-मादाय पूर्णमेवावशिष्यते । ॐ ३ खं ब्रह्म खं पुराणं वायुरं खमिति ह स्माह कौरव्यायणीपुत्रो वेदो यं ब्राह्मणा विदुर्वेदैनेन यद्वेदितव्यम् ॥

अतीताध्यायचतुष्टये "आत्मेत्येवोपासीत", आत्मानमेवावेदहं ब्रह्मास्मीति", "तदेतद्ब्रह्म अपूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः", "यदेव साक्षादपरोक्षात् ब्रह्म", "विज्ञानमानन्दं ब्रह्म", "अभयं वै जनक प्राप्तोसि", "नेति नेति न ह्येतस्मादिति नेत्यन्यत् परमस्ति" इत्यादिवाक्यतः स्वातिरिक्तव्यष्टिसमष्ट्यात्मकस्वाविद्यापदतत्कार्यजातस्थूलादिभागचतुष्टयमपि चतुर्नेतिशब्दतोऽपह्नवं कृत्वा तदपह्नवसिद्धं ब्रह्म निष्प्रतियोगिकस्वमात्रमिति निर्धारितम्। तद्विज्ञानमेवामृतत्वसाधनमिति च यदुक्तं तत् खिलकाण्डगतप्रथमब्राह्मणेन विस्पष्टं प्रतिपाद्य अथ मन्दाधिकारिणां तत्पदारोहाय तदुपायत्वेन पुरस्तादनुक्तान्युपासनानि वक्तव्यानीति खिलकाण्डमारभ्यते—**पूर्ण**मिति। यत् न कुतश्चित् व्यावृत्तं व्यापि तत्। यत् **अद** इति परोक्षाभिधायि सर्वनाम तदपि **पूर्णं** निरुपाधिकत्वात्। यत् **इदं**शब्दवाच्यं व्यवहारापन्नं तदपि **पूर्णं** शबलात्मना व्याप्तत्वात्। यत् अदःशब्दवाच्यं कारणभावापन्नं पूर्णं ब्रह्म तदेव हि इदंशब्दवाच्यं कार्योपाध्यवच्छिन्नमिव भाति। वस्तुतः कार्यकारणकलनाविरलमित्यर्थः।

> यदेवेह तदमुत्र यदमुत्र तदन्विह।
> मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

इति श्रुतेः। इदंशब्दगोचरद्वैतप्रपञ्चारोपाधिकरणत्वेन **पूर्णात्** तत्प्रपञ्चापवादाधिकरणतया **पूर्णं** ब्रह्म **उदच्यते** उद्रिच्यतेऽतिरिच्यत इत्यर्थः। एवं कार्यकारणात्मना **पूर्णस्य** वस्तुनः व्यष्टिसमष्टिस्वाविद्योपाधिसापेक्षकार्यकारणकलनाविरलं अहं ब्रह्मास्मीति तथाविधं **पूर्णमादाय** विदित्वा तद्वेदनसमकालं स्वातिरिक्तकार्यकारणकलनास्ति नास्तीति विभ्रमापह्नवसिद्धं निष्प्रतियोगिक**पूर्णमेव** ब्रह्म **स्वमात्रमवशिष्यत** इति संक्षेपेण सर्ववेदान्तसारार्थः प्रकाशितः। विस्तरार्थस्तु महावाक्यरत्नावलीप्रभालोचने सम्यक् प्रपञ्चित इत्यर्थः। पूर्णब्रह्मणो निष्प्रतियोगिकनिर्विशेषत्वेन तदवगत्युपायाभावमाशङ्क्य तदवगत्युपायत्वेन "एतद्वै सत्यकाम! परं चापरं च ब्रह्म यदोङ्कारः" इति श्रुत्यनुरोधेन प्रणवालम्बनादिना निर्विशेषं ब्रह्म

स्वावशेषतयावगन्तुं शक्यमित्याह—**ओमिति**। योऽयं सर्ववेदान्तार्थः "पूर्णमदः" इत्यादि "पूर्णमेवावशिष्यते" इत्यन्तश्रुत्या सूत्रितः सोऽयमर्थ ओङ्कारेण सूत्र्यते। तत् कथम्? स्थूलसूक्ष्मबीजतुर्यांशाढ्याकाराद्यर्धमात्रान्तावयवविशिष्ट-प्रणवो ब्रह्माभिधानम्। व्यष्टिसमष्टिभेदेन तत् द्विविधम्। तत्र व्यष्टिप्रणवाभिधेयं विश्वविश्वादितुर्यप्राज्ञान्तम्। समष्ट्यभिधेयं तु विराड्विराडादितुर्यबीजान्तम्। तदुभयैक्याभिधेयं तु ओत्रोत्राद्यविकल्पानुज्ञैकरसान्तम्। तत्राकारादिमात्रात्रयप्रपञ्चा-रोपाधिकरणं सविशेषम्। तदपवादाधिकरणमर्धमात्राभागत्रयाभिव्यक्तं निर्विशेषम्। अकारादिपञ्चदशमात्रातद्व्यष्टिसमष्ट्यारोपापवादाधिकरणगतहेयांशापह्नवसिद्धनिष्प्र-तियोगिकपूर्णचैतन्यं तुर्यतुर्यमिति प्रणवार्थः संक्षेपेणोक्तः। अयमेवार्थो दीपिकादौ विस्तरेणाभिहितः। तत्रार्धमात्राभिव्यक्तं किंविशेषणविशिष्टं? इत्यत्र—**खं ब्रह्मेति**। खंशब्देनार्धमात्रोच्यते। तस्या गुणसाम्यतया व्योमवन्निरवयवत्वात्। तत्राप्य-सङ्गतयाभिव्यक्तं निर्गुणं ब्रह्मेत्यर्थः। खमिति विशेषणयोगात् कार्यं ब्रह्मेत्याह—**खं पुराणमिति**। खादिभूतभौतिकविलक्षणत्वेन तत्कारणत्वात् चिरन्तनं ब्रह्मेत्यर्थः। तस्य परमाकाशत्वात् चिरन्तनत्वं युज्यते। अकारादिमात्रात्रयाप-वादाधिकरणस्वरूपमुक्त्वा तन्मात्रात्रयप्रपञ्चारोपाधिकरणस्वरूपमाह—**वायुरं ख-मिति** "वायुर्वै गौतम! तत् सूत्रं" इति श्रुतिसिद्धसूत्रात्मकवायुग्रहणमकारा-दिमात्रात्रयप्रञ्चारोपाधिकरणविश्वविश्वाद्यनुज्ञैकरसाविकल्पान्तचैतन्योपलक्षणार्थम्। सूत्रात्मकवायोः सोपाधिकत्वात्। कोऽयमुपाधिः? तदवच्छिन्नः कीदृशः? तयोरियत्ता का? इत्यत आह—**अं खमिति**। अकारादिमात्रात्रयप्रपञ्चोऽयमुपाधिः। तदारोपाधारो हि तदवच्छिन्नः। तद्याथात्म्यं खं परमाकाशमेवेत्यर्थः। कथं त्वया एतदवगतं? इत्यत्र—**आह स्म** ह्येवं **कौरव्यायणीपुत्रो** मन्त्रदृक् मुनिः। किमिति? **यं ब्राह्मणाः** पररूपेण अपररूपेण वा **विदुः** जानन्ति। तेषां वेदनहेतुः कः? इत्यत्र **वेदोऽयमोङ्कारः**। "ओमित्येतदक्षरं" इत्यारभ्य "आत्मनात्मानं य एवं वेद" इत्यन्तं, "अन्यत्र धर्मात्" इत्यारभ्य "ब्रह्मलोके महीयते" इत्यन्तं, "एतद्वै सत्यकाम! परं चापरं च" इत्यारभ्य "परात् परं पुरुषमीक्षते" इत्यन्तं, एवमेनेन परापरब्रह्माभिधा-

नालम्बनप्रतीकभावमापन्नोङ्कारेण यत् वेदितव्यं तमेतमर्थं अयं मन्त्रदृक् मुनिः वेद । यत एवमाह स्म अतोऽयं विजानातीत्यर्थः ॥

इति प्रथमं ब्राह्मणम्

द्वितीयं ब्राह्मणम्

प्रजापतिना दमाद्युपदेशः

त्रयः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुः देवा मनुष्या असुरा उषित्वा ब्रह्मचर्यं देवा ऊचुः ब्रवीतु नो भवानिति तेभ्यो हैतदक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुर्दाम्यतेति न आत्थेति ओमिति होवाच व्यज्ञासिष्टेति ॥ १ ॥ अथ हैनं मनुष्या ऊचुः ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुः दत्तेति न आत्थेति ओमिति होवाच व्यज्ञासिष्टेति ॥ २ ॥ अथ हैनमसुरा ऊचुः ब्रवीतु नो भवानिति तेभ्यो हैतदेवाक्षरमुवाच द इति व्यज्ञासिष्टा३ इति व्यज्ञासिष्मेति होचुः दयध्वमिति न आत्थेति ओमिति होवाच व्यज्ञासिष्टेति तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुः द द द इति दाम्यत दत्त दयध्वमिति तदेतत् त्रयꣳ शिक्षेत् दमं दानं दयामिति ॥ ३ ॥

एवमोङ्काराभिधेयपरापरब्रह्मप्रतिपत्तौ दमादेः साधनत्वादिति तद्विधानार्थमिदं ब्राह्मणमारभ्यते—**त्रय इति**। **त्रयस्त्रिसंख्याकाः** प्रजापतेरपत्यानि **प्राजापत्या** मिलित्वा शिष्यभावमेत्य **ब्रह्मचर्यमूषुः** उषितवन्तः। के ते? **देवा मनुष्या असुराश्च**। त एवं **ब्रह्मचर्यमुषित्वा** किं कृतवन्तः? इत्यत्र **देवाः** पितरं **प्रत्यूचुः**। किमिति? **नोऽस्मभ्यं भगवान् ब्रवीतु** अनुशासनमिति। तैरेवं पृष्टः प्रजापतिः **तेभ्यो हैतदेवाक्षरमुवाच द इति**। किं मया उपदिष्टाक्षरार्थं **व्यज्ञासिष्ट** विज्ञातवन्तः? प्लुतिर्नवेति विकल्पार्थः। एवमाक्षिप्ता देवा **ऊचुः—व्यज्ञासिष्म** विज्ञातवन्तो वयमिति। यद्येवं विज्ञातवन्तः तदा तदुच्यतामित्युक्ता देवा **ऊचुः—दाम्यतेति** स्वभावतो दान्ता यूयं भवतेति **नोऽस्मानात्थ** कथयसीत्यर्थः। **पिता** तदुक्तं **ओमित्यङ्गीकृत्य व्यज्ञासिष्टेति होवाच**। मनुष्याः किं कृतवन्तः? इत्यत आह—**अथेति**। हे मनुष्याः! स्वभावतो लुब्धा यूयं, अतो यथाशक्ति संविभजत **दत्तेति**। **समानमन्यत्**। हे असुराः! यतो यूयं स्वभावतो निर्दयाः अतः स्वस्वभावमुत्सृज्य **दयध्वं** प्राणिमात्रेषु दयां कुरुतेत्यर्थः। एवं प्रजापत्यनुशासनं अद्याप्यनुवर्तते। यः पुरा देवादीनन्वशात् सोऽद्याप्यनुशास्त्येव। कथं? देव्या स्तनयित्नुरूपया। कथमेषा श्रूयते? **दैवी वाक्** स्वयं **स्तनयित्नुर्भूत्वा द द द इति**। दकारत्रयग्रहणं **दाम्यत दत्त दयध्वमित्युपलक्षणार्थम्**। स्तनयित्नुः अनुकृतिः अनुकरणं, न हि स्तनयित्नुशब्दः त्रिरेव, नियमाभावात्। यतोऽद्यापि प्रजापतिः दाम्यत दत्त दयध्वं इत्यनुशशास **तस्मात् एतत् त्रयं दमं दानं दयामिति शिक्षेत्** उपादद्यात्। यस्मादेवमन्वशात् तस्मात्तदनुशासनं सर्वैरप्यनुवर्तनीयमित्यर्थः॥ १—३॥

इति द्वितीयं ब्राह्मणम्

तृतीयं ब्राह्मणम्

सोपाधिकब्रह्मोपासनमभ्युदयनिश्श्रेयसफलदम्

एष प्रजापतिर्यत् हृदयमेतद्ब्रह्म एतत्सर्वं तदेतत् त्र्यक्षरꣳहृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद यं इत्येकमक्षरं एति स्वर्गं लोकं य एवं वेद ॥

"वायुरं खं" इति यत् सोपाधिकं ब्रह्मोक्तं तदुपासनमभ्युदयनिश्श्रेयसफलदमिति तदर्थमिदं ब्राह्मणमारभ्यते--एष इति। कः पुनरसावनुशास्ता? इत्यत्र एष प्रजापतिः। यत् हृदयमिति हृदयगा बुद्धिरुच्यते। तस्मिन्नेव हृदये शाकल्यब्राह्मणान्ते नामरूपकर्मोपसंहारः कृतः। दिग्विभागद्वारेण सर्वभूतात्मभूतं हृदयं प्रजापतिः। एतद्धि ब्रह्म बृहत्त्वेन सर्वात्मकत्वात् ब्रह्म एतत् सर्वमुक्तम्। यस्मात् हृदयं ब्रह्म तस्मात् तदुपास्यम्। किं तदुपासनम्? हृदयमिति नाम त्र्यक्षरम्। कानि तान्यक्षराणि? इत्यत्र हृ इत्येकमक्षरम्। अभिहरति हृङ् मो हरति कर्मण एतत् रूपं इति यो वेद अस्मै हृदयाय ब्रह्मणे स्वाश्चेन्द्रियाणि अन्ये च शब्दादयो विषयाः स्वं स्वं कार्यमभिहरन्ति। एवं हृ इत्येकमक्षरं यो वेद अस्मै विदुषे स्वाश्च अन्ये च तद्विज्ञानानुरोधेन बलिं हरन्तीत्यर्थः। तथा द इत्येकमक्षरम्। एतदपि दाञो रूपं हृदयनामाक्षरत्वेन निबद्धम्। अत्रापि हृदयाय ब्रह्मणे स्वाश्च अन्ये च स्वं स्वं वीर्यं ददति। एवं दकार इति यो वेद अस्मै स्वाश्च अन्ये च स्वेप्सितं ददतीत्यर्थः। तथा यं इत्येकमक्षरम्। इणो गत्यर्थस्य यं इत्येतत् रूपम्। अस्मिन् नाम्नि बद्धमिति यो वेद स हि स्वर्गं लोकमेति नामाक्षरविशिष्टफलं प्राप्नोति। विशिष्टोपासनेन चित्तशुद्धिप्राप्यज्ञानफलमपि प्राप्नोतीत्यर्थः॥

इति तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम्

हृदयब्रह्मणः सत्यत्वेन उपासनम्

तद्वैतदेव तदास सत्यमेव स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति जयतीमाँल्लोकान् जित इन्न्वसावसत् य एवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति सत्यꣳ ह्येव ब्रह्म ॥

हृदयाख्यब्रह्मणः सत्यत्वेन उपासनविधित्सया इदं ब्राह्मणमारभ्यते—तदिति। तच्छब्देन हृदयं ब्रह्म परामृश्यते। वाशब्देन एतत् ब्रह्म स्मर्यते। एतदेव तदिति वक्ष्यमाणं बुद्धौ सन्निधीकृत्याह—एतदेवेति। तदास बभूव। किं तत्? सत्यमेव। सच्च त्यच्च मूर्तामूर्तात्मकं सत्यं ब्रह्म। तस्य पञ्चभूत-भौतिकात्मकत्वात्। स यः कश्चित् ह एतन्महत् यक्षं पूज्यत्वात् प्रथमजं हिरण्यगर्भं सत्यं ब्रह्मेति वेद तस्य इदं फलं—स इमान् लोकान् जयति। जितो वशीकृतः। इन्नु इत्थं यथा ब्रह्मणा असौ शत्रुरिति वाक्यशेषः। असच्च असौ असंश्च असन्नसौ शत्रुर्विजितो भवेदित्यर्थः। तस्यैतत् फलं पुनः निगमयति—स एवमेतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति। अतो विद्यानुरूपं फलं युक्तमित्याह—सत्यं ह्येव ब्रह्मेति। हिरण्यगर्भो भवतीत्यर्थः॥

इति चतुर्थं ब्राह्मणम्

पञ्चमं ब्राह्मणम्

सत्यस्य ब्रह्मणो महद्यक्षत्वनिरूपणम्

आप एवेदमग्र आसुः ता आपः सत्यमसृजन्त सत्यं ब्रह्म ब्रह्म प्रजापतिं प्रजापतिर्देवाꣳस्ते देवाः सत्यमेव उपासते तदेतत्

त्र्यक्षरꣳ सत्यमिति स इत्येकमक्षरं ति इत्येकमक्षरं यं इत्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृतमुभयतः सत्येन परिगृहीतꣳ सत्यभूयमेव भवति नैवं विद्वाꣳसमनृतꣳ हिनस्ति ॥१॥

कथं पुनः सत्यस्य ब्रह्मणो महद्यक्षत्वं ? इत्याशङ्कायां तन्निरूपणार्थमिदं ब्राह्मणमारभ्यते—**आप** इति । **आप एवेदमग्र आसुरि**त्यत्र अग्निहोत्राद्याहुतय आप उच्यन्ते । तासां द्रवात्मकत्वात् अप्त्वं युज्यते । तास्तु कर्मसमवायित्वमपरित्यज्य इतरभूतसहिताः सत्योऽव्याकृतात्मना जगतो बीजभूता भवन्ति । ता एव हीदं जगदग्रे आसुः । तदानीं नान्यत् किञ्चन विकृतिरासीत् । **ताः पुनरापः सत्यमसृजन्त** । तस्मात् सत्यं प्रथमजम् । तद्धि सूत्रात्मजन्म अव्याकृतव्याकरणहेतुत्वात् । **तत् सत्यं ब्रह्म** । कुतः ? विराडपेक्षया बृहत्त्वात् । यदेवं सत्यं ब्रह्म महद्यक्षं तत् सूर्यादिकारणं **प्रजापतिं** विराजमसृजतेत्यनुषज्यते । सोऽयं प्रजापतिर्विराट् क्रमेण **देवानसृजत** । यस्मात् सूत्रं विराडादेरपि कारणं तस्मान्महद्यक्षं सत्यं ब्रह्म । विराट्सृष्टास्ते **देवाः** स्वपितरमनादृत्य **सत्यमेव उपासते** । सत्याख्यब्रह्मणः प्रथमजत्वेन महद्यक्षत्वात् तदुपासनमेव युक्तमित्यर्थः । किंप्रकारकं तदुपासनं ? इत्यत्र—**तदेतन्नाम त्र्यक्षरम्** । तद्गताक्षराणि कानि ? इत्यत आह—**स** इति । तत्र तकार इकारो निर्देशार्थः । तेषां **प्रथमोत्तमे अक्षरे** सकारयकारौ **सत्यं** तत्र अनृताख्यमृत्योरभावात् । **मध्यतो** मध्येऽनृत**म्** । अनृतं हि मृत्युः मृत्य्वनृतयोः तकारसामान्यात् । तदेतन्मृत्युरूपमनृत**मुभयतः** सकारयकारलक्ष्य**सत्येन परिगृहीतं** व्याप्तं कवलितमित्यर्थः । यतः सत्येन कवलितं अतः **सत्यभूयमेव** सत्यबाहुल्यमेव **भवति** । अतः तदनृतमकिंचित्करमित्यर्थः । एवमनृताकिंचित्करतां यो वेद तेन प्रमादत उक्तमप्यनृतं तं न **हिनस्ति** ॥ १ ॥

सत्यस्य संस्थानप्रदर्शनं तदुपासनं च

तद्यत् तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन् पुरुषस्तावेतावन्योन्यस्मिन् प्रतिष्ठितौ

रश्मिभिरेषोऽस्मिन् प्रतिष्ठितः प्राणैरयममुष्मिन् स यदा उत्क्रमिष्यन् भवति शुद्धमेवैतन्मण्डलं पश्यति नैनमेते रश्मयः प्रत्यायन्ति ॥२॥

अधुना सत्यस्य संस्थानप्रदर्शनपूर्वकं तदुपासनमुच्यते—**तद्यदिति**। यदक्षरमित्यभिहितं **तत् सत्यं** ब्रह्म। समष्ट्यादिभिदामाश्रित्य द्विधेव दृश्यते। तत्र समष्टौ आधिदैविकभावमेत्य सोऽसावादित्यो भवति। कोऽसौ किंविशेषण-विशिष्टः? **य एतस्मिन्** आदित्य**मण्डले पुरुषो**ऽवभासते **सोऽसावेष आदित्यः**। स हि सत्यं ब्रह्म। **यश्च** व्यष्टिपरिच्छेदमेत्य **योऽयम**ध्यात्मसंज्ञकः **दक्षिणेऽक्षन्** अक्षिणि **पुरुषः**। चशब्दात् सोऽपि सत्यं ब्रह्मेति संबध्यते। **तौ एतौ** आदित्यमण्डलाक्ष्याधारौ संस्थानविशेषौ तावुभौ **अन्योन्यस्मिन् प्रतिष्ठितौ** तयोरन्योन्योपकारकत्वात्। कथमेवं? इत्यत्र—एष आदित्यः **स्वरश्मिभिः** अनुग्रहं कुर्वन् अध्यात्मपरिच्छिन्नचक्षुषि **प्रतिष्ठितो** भवति। तथायं चाक्षुषोऽपि **प्राणै**रादित्यमनुगृह्णन् **अमुष्मिन्** अधिदैवे प्रतितिष्ठति। **सोऽस्मिन्** शरीरे विज्ञानमयो भोक्ता **यदा** यस्मिन् काले **उत्क्रमिष्यन् भवति** तदासौ चाक्षुषः आदित्यरश्मीन् उपसंहृत्य चन्द्रमण्डलमिव **शुद्धमेव एतन्मण्डलं पश्यति**। **एनं** चाक्षुष**मेते रश्मयः न प्रत्यायन्ति** न प्रत्यागच्छन्ति परस्परोपकार्योपकारक-भावात्। स्थानद्वयाधिकरणं सत्याख्यं ब्रह्मेत्यर्थः ॥ २ ॥

सत्यस्य व्याहृत्यवयवत्वम्

य एष एतस्मिन् मण्डले पुरुषः तस्य भूरिति शिर एकं शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहरिति हन्ति पाप्मानं जहाति च य एवं वेद ॥ ३ ॥

तस्य व्याहृत्यवयवतामाह—**य** इति। **य एषो**ऽयमधिदेवताभावमापन्नोऽत्र **एतस्मिन् मण्डले पुरुषः तस्य** सत्याभिधानस्य सर्वा व्याहृतयोऽवयवा भवन्ति।

तत् कथं? येयं भूरिति व्याहृतिः सैव तस्य शिरः प्राथम्यात्। तत् सामान्यं श्रुतिराह—एकं शिरः तथैतदक्षरमेकं भूरिति। तथा भुव इति बाहू द्वौ द्वित्वसामान्यात्। तथा सुवरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे प्रतितिष्ठत्याभ्यामिति प्रतिष्ठे पादावित्यर्थः। तस्य व्याहृत्यवयवसत्याख्यब्रह्मण इयमुपनिषत् रहस्याभिधानम्। कासौ? इत्यत आह—अहरिति। यो वेद स विद्वान् हन्ति पाप्मानं जहातीति वेदनफलम्॥ ३॥

अधिदैववदध्यात्ममपि समानम्

योऽयं दक्षिणेऽक्षन् पुरुषः तस्य भूरिति शिर एकꣳ शिर एकमेतदक्षरं भुव इति बाहू द्वौ बाहू द्वे एते अक्षरे स्वरिति प्रतिष्ठा द्वे प्रतिष्ठे द्वे एते अक्षरे तस्योपनिषदहमिति हन्ति पाप्मानं जहाति च य एवं वेद॥ ४॥

अधिदैववत् अध्यात्ममपि समानमित्याह—योऽयमिति। योऽयं दक्षिणेऽक्षन् पुरुषः तस्य भूरिति शिरः इत्यादि पूर्ववत्। तस्योपनिषत् अहमिति प्रत्यग्रूपत्वात्। हन्तेर्जहातेरर्थः पूर्ववत्॥ ४॥

इति पञ्चमं ब्राह्मणम्

षष्ठं ब्राह्मणम्

सत्यस्यैव मानसोपाधिवैशिष्ट्योपासनम्

मनोमयोऽयं पुरुषो भाःसत्यः तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य ईशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंच॥

तस्यैव पुनः मानसोपाधिवैशिष्ट्योपासनविधित्सया इदं ब्राह्मणमारभ्यते—**मन** इति। मनस्युपलभ्यमानत्वात् **मनोमयोऽयं पुरुषः भाःसत्यः** भास्वरः मनसः सर्वार्थावभासकत्वात्। **तस्मिन् अन्तर्हृदये** परिमाणतो **यथा व्रीहिर्वा यवो वा** एवंपरिमाणोऽयमात्मा योगिभिः हृदयान्तरुपलभ्यते। **स एष सर्वस्य** भेदजातस्य **ईशानः** स्वामी। तथा **सर्वस्य अधिपतिः**। "अहमेवेदं सर्वं" इति श्रुत्यनुरोधेन **सर्वमधिष्ठाय** पालयितृत्वात्। **यदिदं किञ्च** यत्किंचित् यावत् जगदिदं **प्रशास्ति**। एवं मनोमयोपासकस्य ईश्वरत्वं फलमित्यर्थः॥

इति षष्ठं ब्राह्मणम्

सप्तमं ब्राह्मणम्

सत्यब्रह्मणो विशिष्टफलकमुपासनान्तरम्

विद्युद्ब्रह्मेत्याहुः विदानात् विद्युत् विद्यत्येनं पाप्मनो य एवं वेद विद्युद्ब्रह्मेति विद्युत् ह्येव ब्रह्म॥

पुनः सत्याख्यब्रह्मणो विशिष्टफलं उपासनान्तरं विधातव्यमिति इदं ब्राह्मणमारभ्यते—**विद्युदिति**। ब्राह्मणा **विद्युत् ब्रह्मेत्याहुः**। श्रुतिरेव तत् निर्वक्ति—**विदानात् विद्युदिति**। तमसोऽवखण्डनात्। इत्थं विद्युद्वत् प्रकाश-गुणविशिष्टं ब्रह्म **यो वेद** असावेनमात्मानं प्रति प्रतिकूलभूतान् सर्वान् **पाप्मनः** अवखण्डयति। विद्युद्वत् प्रकाशात्मकं ब्रह्म इत्युपासनात् प्रत्यक्प्रकाशपर्यवसन्नो भवतीत्यर्थः॥

इति सप्तमं ब्राह्मणम्

अष्टमं ब्राह्मणम्

सत्यवाचो धेनुवदुपासनम्

वाचं धेनुमुपासीत तस्याश्चत्वारः स्तनाः स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः तस्या द्वौ स्तनौ देवा उपजीवन्ति स्वाहाकारं च वषट्कारं च हन्तकारं मनुष्याः स्वधाकारं पितरस्तस्याः प्राण ऋषभो मनो वत्सः ॥

केवलाभ्युदयफलं इदं ब्राह्मणमारभ्यते---वाचमिति । वागिति शब्दराशिः । तन्मयीं वाचं धेनुं धेनुरिव । यथा धेनुः स्ववत्साय चतुर्भिः स्तनैः पयः क्षरति तथैवं वाग्धेनुः देवादिभ्यो वक्ष्यमाणैः स्तनैः पय इव अन्नं क्षरति । तस्या एतस्याः के स्तनाः कथं देवादिभ्यः क्षरति ? इत्यत्र—तस्या वाचो धेन्वा द्वौ स्तनौ वत्सस्थानीया देवा उपजीवन्ति । कौ तौ ? इत्यत्र स्वाहाकारं च वषट्कारं च । ताभ्यां हि देवेभ्यो हविर्दीयते । हन्तकारं मनुष्या उपजीवन्ति । मनुष्येभ्यो हन्त इत्यन्नं प्रयच्छन्ति हि । स्वधाकारं पितर उपजीवन्ति । पितृभ्यः स्वधास्त्विति स्वधां प्रयच्छन्ति । तस्या वाचो धेन्वा ऋषभः प्राणः । प्राणेन हि वाक् प्रसूयते । मनो वत्सः । मनसारोपितविषये हि वाक् प्रवर्तते । अत एव हि मनो वत्सस्थानीयम् । एवं वाग्धेनूपासनात् वाञ्छितार्थसिद्धिर्भवतीत्यर्थः ॥

इत्यष्टमं ब्राह्मणम्

नवमं ब्राह्मणम्

सत्यब्रह्मणो जाठराग्नित्वेन उपासनम्

अयमग्निर्वैश्वानरो योऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदिदमद्यते तस्यैष घोषो भवति यमेतत्कर्णावपिधाय शृणोति स यदा उत्क्रमिष्यन् भवति नैनं घोषꣳ शृणोति ॥१॥

पूर्ववदुपासनान्तरविधित्सया इदं ब्राह्मणमारभ्यते—**अयमिति** । **अयमग्निर्वैश्वानरः** । कोऽसौ ? इत्यत आह—**योऽयमन्तः पुरुषे** जाठराग्निः वर्तते । **येन** जाठराग्निना **इदमन्नं पच्यते** । किं तदन्नम् ? प्राणिभिः **यदिदमद्यते** भुज्यते तदेवान्नमित्यर्थः । तत्स्वरूपमाह—**तस्येति** । **तस्य** जाठराग्नेः अन्नं पचतः **घोषो भवति** । **यं घोषं**—**एतदिति** क्रियाविशेषणं—अङ्गुलीभ्यां **कर्णावपिधाय शृणोति** तमेतं प्रजापतिमित्युपासीत । तद्भावानुरोधेन वैश्वानरो भवति । प्रासङ्गिकमिदमरिष्टमुच्यते । **सो**ऽन्तःशरीरे भोक्ता **यदा उत्क्रमिष्यन् भवति** तदानीं **नैनं घोषं शृणोति** सः ॥१॥

इति नवमं ब्राह्मणम्

———

दशमं ब्राह्मणम्

उक्तोपासनानां गतिकथनम्

यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा लम्बरस्य खं तेन

स ऊर्ध्व आक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खं तेन स ऊर्ध्व आक्रमते स लोकमागच्छति अशोकमहिमं तस्मिन् वसति शाश्वतीः समाः ॥

अस्मिन् प्रकरणे उपासनाभेदानां इयं गतिरिति सूचनार्थमिदं ब्राह्मणमारभ्यते—यदेति। यदा वै पुरुषो विद्वान् अस्मात् लोकात् प्रैति स्वात्तशरीरं परित्यजति स तदा खेचरवायुमागच्छति। स वायुस्तत्र स्वात्मनि प्रविष्टाय तस्मै विजिहीते तत्प्रवेशानुकूलच्छिद्रं विदधाति। किंपरिमाणं छिद्रं? इत्यत्र दृष्टान्तमाह—यथेति। यथा रथचक्रस्य छिद्रं प्रसिद्धम्। तादृशछिद्रेण विद्वान् ऊर्ध्व आक्रमते ऊर्ध्वं गच्छति। स विद्वानादित्यमागच्छति। सोऽयं ब्रह्मलोकद्वारनिरोधकोऽप्यादित्यः तस्मा एवंविदुषे द्वारं प्रयच्छति। स तत्र विजिहीते। यथा लम्बरस्य वादित्रविशेषस्य खं छिद्रं तेन स ऊर्ध्व आक्रमते। स चन्द्रमसमागच्छति। सोऽपि तस्मै विजिहीते। यथा दुन्दुभेः खं प्रसिद्धं तेन स ऊर्ध्व आक्रमते। स विद्वान् प्राजापत्यलोकमागच्छति। किंविशेषणविशिष्टं? अशोकमहिमं नीहारायमाणमानसदुःखवर्जितं शारीरदुःखवर्जितं च। तं प्राप्य तस्मिन् वसति शाश्वतीः समाः। तत्र आब्रह्मकल्पमुषित्वा तेन सह मुक्तो भवतीत्यर्थः॥

इति दशमं ब्राह्मणम्

एकादशं ब्राह्मणम्

शरीरदुःखसहनममृतत्वसाधनम्

एतद्वै परमं तपो यत् व्याहितस्तप्यते परमꣳ हैव लोकं जयति य एवं वेद एतद्वै परमं तपो यं प्रेतमरण्यꣳ हरन्ति परमꣳ

हैव लोकं जयति य एवं वेद एतद्वै परमं तपो यं प्रेतमग्नावभ्यादधति परमꣳ हैव लोकं जयति य एवं वेद ॥

अप्रतीकारपूर्वकं शारीरदु:खसहनं विवेकयुक्तं सत् अमृतत्वसाधनमिति इदं ब्राह्मणमारभ्यते—एतदिति। यत् व्याहितो ज्वरादिव्याधितः संतप्यते तत्प्रतीकारं तत्प्रयुक्तविषादं चाकुर्वन् एवमाधिव्याध्यादि देहस्यैव नात्मनः इति जानन् स इति यत् तदेतत् वै परमं तपः। य एवं वेद सोऽयमेवंविधतपसा दग्धकिल्बिषो भूत्वा परमं हैव लोकं जयति। तथैतत् मुमूर्षुः आदावेव संकल्पयति। किं तत्? ऋत्विजोऽन्त्यकर्मणे यं प्रेतं ग्रामादरण्यं हरन्तीति यत् एतद्वै परमं तपः। यत् ग्रामादरण्यगमनं तत् तपो भवतीति प्रसिद्धम्। य एवं विद्वान् स परमं हैव लोकं जयति। यं प्रेतं अग्नावभ्यादधति अग्निप्रवेशसामान्यात् एतद्वै परमं तपः। य एवं वेद स परमं लोकं जयति ॥

इत्येकादशं ब्राह्मणम्

द्वादशं ब्राह्मणम्

उपासनान्तरविधिः

अन्नं ब्रह्मेत्येक आहुः तन्न तथा पूयति वा अन्नं ऋते प्राणात् प्राणो ब्रह्मेत्येक आहुः तन्न तथा शुष्यति वै प्राण ऋतेऽन्नात् एते ह त्वेव देवते एकधाभूयं भूत्वा परमतां गच्छतः तद्ध स्माह प्रातृदः पितरं किꣳस्विदेव एवं विदुषे साधु कुर्यां किमेवास्मा असाधु कुर्यामिति? स ह स्माह पाणिना मा प्रातृद

कस्त्वेनयोरेकधाभूयं भूत्वा परमतां गच्छतीति ? तस्मा उ हैतदुवाच वीति अन्नं वै वि अन्ने हीमानि सर्वाणि भूतानि विष्टानि रमिति प्राणो वै रं प्राणे हीमानि सर्वाणि भूतानि रमन्ते सर्वाणि ह वा अस्मिन् भूतानि विशन्ति सर्वाणि भूतानि रमन्ते य एवं वेद ॥

उपासनान्तरमाह—**अन्नमिति**। यत् प्राणिभिरद्यते तदन्नं **ब्रह्मेत्येक** आचार्या आहुः। तत् युक्तमेवेत्यत्र **तन्नेत्याह** अन्नं ब्रह्मेति **तथा न** ग्रहीतव्यम्। कुतः? **प्राणादृते अन्नं पूयति वै** पूतिभावमापद्यत एव। तत् कथं ब्रह्म भवितुमर्हति? ब्रह्म ह्यविनाशि। तथा **प्राणो ब्रह्मेत्येक** आहुः। **तथा** तदपि **न** ग्रहीतव्यम्। कुतः? **अन्नादृते प्राणोऽपि शुष्यति वै**। अन्नमृते प्राणः स्वात्मानं धारयितुं न हि शक्नोति। तस्मादन्नादृते प्राणः शुष्यत्येव। यस्मात् एकैकस्य ब्रह्मत्वं न संभवति तस्मात् **एते** अन्नप्राणदेवते **एकधाभूयं भूत्वा परमतां** ब्रह्मत्वं **गच्छतः** प्राप्नुत इत्यर्थः। **तदेतत्** एवमध्यवस्य नामतः **प्रातृदः** आत्मनः **पितरमाह स्म**। **किंस्वित्** इति वितर्के। यथा मया ब्रह्म परिकल्पितं एवं **एवंविदुषे** किंस्वित् साधु **कुर्यां इति**। अन्नप्राणैक्य-ब्रह्मवित् साध्वसाधुकरणतो न वर्धते न हीयते वेति वादिनं पुत्रं स्वपाणिना **वारयन् मा प्रातृद**! मैवं वोचः। **कस्त्वेनयोः** अन्नप्राणयो**रेकधाभूयं भूत्वा परमतां गच्छति**? न कश्चिदपि विद्वाननेन दर्शनेन परमतां गच्छति। तस्मान्नैवं वक्तुमर्हसि। यद्येवं, ब्रवीतु भवान् कथं परमतां गच्छति इति? एवं पृष्टवते **तस्मा उ ह एतत्** वक्ष्यमाणमु**वाच**। किं तत्? **अन्नं वै वि। अन्ने हीमानि सर्वाणि भूतानि विष्टानि** आश्रितानि। अतोऽन्नं वि इत्युच्यते। किञ्च सवितारमिति चोक्तवान्। किं पुनः तत् **रम्? प्राणो वै रम्**। कुतः? **प्राणे हि** यस्मात् **इमानि सर्वाणि भूतानि रमन्ते** अतो रं प्राणः। प्राणस्य सर्वभूताश्रयत्वेन रतिगुणविशिष्टत्वात्। इदानीमेवंविदः फलमाचष्टे—**सर्वाणि ह वा अस्मिन् भूतानि विशन्तीति**। एवमन्नप्राणगुणज्ञानवान्।

अस्मिन् विदुषि सर्वाणि भूतानि विशन्ति । सर्वाणि भूतानि रमन्ते य एवं वेद तस्येदं फलमित्यर्थः ॥

इति द्वादशं ब्राह्मणम्

त्रयोदशं ब्राह्मणम्

उक्थरूपेण प्राणोपासनम्

उक्थं, प्राणो वा उक्थं प्राणो हीद९ँ सर्वमुत्थापयति उत् हास्मा उक्थवित् वीरस्तिष्ठत्युक्थस्य सायुज्य९ँ सलोकतां जयति य एवं वेद ॥ १ ॥

उक्थरूपेण उपासनान्तरविधित्सया इदं ब्राह्मणमारभ्यते—उक्थमिति । महाव्रताख्यक्रतौ यत् शस्त्रं शंसन्ति तदुक्थम् । किं पुनः तदुक्थम् ? प्राणो वा उक्थम् । शस्त्राणामुक्थवत् प्राणस्य करणग्रामप्रधानत्वात् तदुक्थमित्युपासीत । कथं प्राणस्य उक्थत्वं ? इत्यत आह—प्राण इति । प्राणो हि यस्मात् इदं सर्वमुत्थापयति उत्थापनात् उक्थं प्राणः । न ह्यप्राणः कश्चिदुत्तिष्ठति । उपासनाफलमेतत् । उत् ह अस्मा एवंविदे उक्थवित् प्राणवित् वीरः पुत्रः तिष्ठत्युत्तिष्ठति । दृष्टफलमेतत् । अदृष्टफलं तु उक्थस्य सायुज्यं सलोकतां जयति य एवं वेदेति ॥ १ ॥

यजुष्ट्वेन प्राणोपासनम्

यजुः, प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यन्ते युज्यन्ते हास्मै सर्वाणि भूतानि श्रैष्ठ्याय यजुषः सायुज्य९ँ सलोकतां जयति य एवं वेद ॥ २ ॥

तथा यजुष्ट्वेन प्राणोपासनमाह—यजुरिति । यजुरित्येवं प्राणमुपासीत । प्राणो वै यजुः । तत् कथम्? प्राणे हि यस्मात् सर्वाणि भूतानि युज्यन्ते । न ह्यसति प्राणे केनचित् योगः संभवति । अतः प्राणो वै यजुः । दृष्टफलं—अस्मा एवंविदे सर्वाणि भूतानि श्रैष्ठ्याय युज्यन्ते । अदृष्टफलं तु यजुषः प्राणस्य सायुज्यं सलोकतां जयति य एवं वेदेति ॥ २ ॥

सामतया प्राणोपासनम्

साम, प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्यञ्चि, सम्यञ्चि हास्मै सर्वाणि भूतानि श्रैष्ठ्याय कल्पन्ते साम्नः सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ३ ॥

तथा सामतया प्राणोपासनमाह—सामेति । प्राणं सामतया उपासीत । प्राणो वै साम । कथम्? प्राणे हि यस्मात् सर्वाणि भूतानि सम्यक् अञ्चन्त इति सम्यञ्चि । प्राणस्य साम्यापत्तिहेतुत्वात् सामत्वम् । हास्मै सर्वाणि भूतानि न केवलं सम्यञ्चि किन्तु श्रेष्ठभावायास्मै कल्पन्ते । साम्नः सायुज्यमित्यादि समानम् ॥ ३ ॥

क्षत्त्रतया प्राणोपासना

क्षत्त्रं, प्राणो वै क्षत्त्रं प्राणो हि वै क्षत्त्रं त्रायते हैनं प्राणः क्षणितोः प्र क्षत्त्रमत्रमाप्नोति क्षत्त्रस्य सायुज्यꣳ सलोकतां जयति य एवं वेद ॥ ४ ॥

क्षत्त्रतया प्राणोपासना कार्येत्याह—क्षत्त्रमिति । क्षत्त्रतया प्राणमुपासीत । प्राणो हि वै क्षत्त्रम् । प्रसिद्धमेतत् । कथम्? प्राणो ह्येनं देहं त्रायते पालयति । कस्मात्? क्षणितोः क्षतात् शस्त्रादिहिंसितात् पुनर्मांसेन पूरयति ।

तस्मात् क्षतत्राणात् प्राणस्य क्षत्त्रत्वं प्रसिद्धम् । विद्वत्फलं—प्रक्षत्त्रं अत्रम् । न त्रायतेऽन्येन केनचिदिति अत्रम् । क्षत्त्रं प्राणः । तं अत्रं क्षत्त्रं प्राणं प्राप्नोति प्राणो भवतीत्यर्थः । क्षत्त्रस्य सायुज्यं सलोकतां जयतीति पूर्ववत् ॥ ४ ॥

इति त्रयोदशं ब्राह्मणम्

चतुर्दशं ब्राह्मणम्

गायत्रीब्रह्मोपासनम्

भूमिरन्तरिक्षं द्यौः इत्यष्टावक्षराणि अष्टाक्षर९ह वा एकं गायत्र्यै पदम् । एतदु हैवास्या एतत् स यावदेषु त्रिषु लोकेषु तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ १ ॥

अनेकोपाधिविशिष्टब्रह्मोपासनमुक्त्वा इदानीं गायत्र्युपाधिविशिष्टब्रह्मोपासनं वक्तव्यमिति इदं ब्राह्मणमारभ्यते— **भूमिरिति** । **भूमिरन्तरिक्षं द्यौरिति** एतान्य**ष्टावक्षराणि** यत्पादाक्षराण्यष्टौ तदिदम**ष्टाक्षरम्** । ह वा इति प्रसिद्धिद्योतकौ । **एकं** प्रथमं **गायत्र्यै** गायत्र्याः पदम् । द्यौरित्यत्र दकारोपरि विद्यमानो यकारस्तु अष्टसंख्यापूरकः । उ हैवास्या गायत्र्याः भूम्यादिलक्षणं पदमष्टाक्षरत्वसामान्यात् । एवमेतत् त्रैलोक्यात्मकं गायत्र्याः प्रथमपदं यो वेद तस्यैतत् फलम् । स विद्वान् त्रिषु लोकेषु यावत् जेतव्यं तावत् ह सर्वं जयति **योऽस्या एतदेवं पदं वेद** । छन्दोजातमतिक्रम्य गायत्रीछन्द एव किमर्थं गृहीतं? इत्यत्र गायत्त्राणनतो गायत्र्याः प्रधानत्वात् । सर्वछन्दसामात्मभूतप्राणात्मकत्वात् क्षतत्राणनाच्च प्राणस्य क्षत्रता उक्ता । प्राणे हि गायत्री ब्राह्मण्याधारत्वात् । अतस्तन्मूलं परमपुरुषार्थः ॥ १ ॥

गायत्रीद्वितीयपदनिर्वचनम्

ऋचो यजूꣳषि सामानीत्यष्टावक्षराणि अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम् । एतदु हैवास्या एतत्स यावतीयं त्रयी विद्या तावद्ध जयति योऽस्या एतदेवं पदं वेद ॥ २ ॥

गायत्र्या द्वितीयपदं विशिनष्टि— ऋच इति । ऋचो यजूंषि सामानीति त्रयीविद्यानामाक्षराणि । एतान्यप्यष्टावेव । तथैव अष्टाक्षरं ह वा एकं गायत्र्यै पदम् । द्वितीयमेतत् उ हैवास्या एतत ऋग्यजुस्सामलक्षणं अष्टाक्षरत्वसामान्यात् । स यावतीयं त्रयी विद्या तया यावत् जेतव्यं तावत् ह जयति योऽस्या एतदेवं पदं वेद ॥ २ ॥

गायत्रीतृतीयपदादिव्याख्या

प्राणोऽपानो व्यान इत्यष्टावक्षराणि अष्टाक्षरꣳ ह वा एकं गायत्र्यै पदम् । एतदु हैवास्या एतत्स यावदिदं प्राणि तावद्ध जयति योऽस्या एतदेवं पदं वेद अथास्या एतदेव तुरीयं दर्शितं पदं परोरजा य एष तपति यद्वै चतुर्थं तत तुरीयं दर्शितं पदमिति ददृश इव ह्येष परोरजा इति सर्वमु ह्येवैष रज उपर्युपरि तपति एवꣳ हैव श्रिया यशसा तपति योऽस्या एतदेवं पदं वेद ॥ ३ ॥

गायत्र्याः तृतीयपदादि व्याचष्टे—प्राण इति । तथा प्राणोऽपानो व्यान इति प्राणादिनामाक्षराणि अष्टौ । तथा गायत्र्याः तृतीयपदम् । स यावदिदं प्राणिजातं तावत् ह जयति । योऽस्या एतदेवं गावत्रीतृतीयपदं वेद स यथोक्तफलभाक् भवतीत्यर्थः । अथ अनन्तरं गायत्र्याः तुर्यपदमुच्यते । किं तत् ? एतदेव वक्ष्यमाणं तुरीयं दर्शितं पदम् । परोरजा य एष तपतीत्यर्थं श्रुतिरेव व्याचष्टे । यद्वै चतुर्थमिति प्रसिद्धं तदिह तुर्यशब्देनोच्यते । दर्शितं

पदमित्यत्र ददृश इव दृश्यत इव ह्येष मण्डलान्तर्गतः पुरुषः अतो दर्शितं पदमभिधीयते। **परोरजा** इत्यत्र **सर्वमु ह्येवैष** मण्डलस्थः पुरुषः **रजः** तज्जं सर्वलोकं **तदुपर्युपर्याधिपत्येन** सर्वं लोकं **रजोजातं तपति**। सर्वलोकाधिपत्यख्यापनार्थेयमुपर्युपरीति वीप्सा। यथासौ सविता सर्वाधिपत्यलक्षणया क्रियया तपति तथैवं **योऽस्या एतदेवं** तुरीयं पदं दर्शितं वेद सोऽयं विद्वान् **श्रिया यशसा तपति ॥ ३ ॥**

तुरीयपदविवरणम्

सैषा गायत्री एतस्मिꣳस्तुरीये दर्शिते पदे परोरजसि प्रतिष्ठिता तद्वैतत् सत्ये प्रतिष्ठितं चक्षुर्वै सत्यं चक्षुर्हि वै सत्यं तस्मात् यदिदानीं द्वौ विवदमानावेयातां अहमदर्शमहमश्रौषमिति य एवं ब्रूयादहमदर्शमिति तस्मा एव श्रद्दध्याम तद्वै तत् सत्यं बले प्रतिष्ठितं प्राणो वै बलं तत् प्राणे प्रतिष्ठितं तस्मादाहुर्बलꣳ सत्यादोजीय इति एवं वैषा गायत्री अध्यात्मं प्रतिष्ठिता सा हैषा गयाꣳस्तत्रे प्राणा वै गयाः तत्प्राणाꣳस्तत्रे तद्यत् गयाꣳस्तत्रे तस्मात् गायत्री नाम स यामेवामूꣳ सावित्रीमन्वाह एषैव स यस्मा अन्वाह तस्य प्राणाꣳस्त्रायते ॥ ४ ॥

तुर्यपदं विशदयति—**सैषेति**। या प्राणादिलक्षणा त्रिपदोक्ता **सैषा गायत्री एतस्मिन् तुरीये दर्शिते पदे परोरजसि प्रतिष्ठिता** आदित्यस्य मूर्तामूर्तरसत्वात। अत एव हि वस्तुजातं रसवत् प्रतिष्ठितम्। रसापाये नीरसदारुवत् अप्रतिष्ठितमेव भवति। यथा रसवत्तरुः प्रतिष्ठितः तथा मूर्तामूर्तात्मिका त्रिपदा गायत्री सवितृप्रतिष्ठिता त्रिभिः पादैः गायत्र्याः सवितृरसत्वात्। यद्वत् त्रिपदा सवितृप्रतिष्ठिता **तद्वै तत्** तुरीयं **सत्ये प्रतिष्ठितम्**।

किं तत् सत्यं? इत्यत्र—**चक्षुर्वै सत्यम्**। कथं? **चक्षुर्हि वै सत्यं** इति। हकारः प्रसिद्धिद्योतकः। कथं प्रसिद्धिः? इत्यत्र प्रसिद्धत्वात्। **तस्मात् यदिदानीमेव द्वौ विवदमानौ** विरुद्धं पदं तौ एयातां आगच्छेयाताम्—**अहमदर्शं** दृष्टवानस्मि। अन्य आह—न तु मया दृष्टं किन्तु **अहमश्रौषं तद्वस्तु** इति। **तयोर्य एवं ब्रूयात् अहमदर्शमिति तस्मा एव श्रद्दध्याम**। न पुनः यो ब्रूयात् अहमश्रौषमिति श्रोतुर्मृषाश्रवणमपि संभवति। न हि चक्षुः मृषा दर्शनं द्रष्टुं पारयति मृषाया अचाक्षुषत्वात्। तस्मात् नाश्रौषमित्युक्तवते श्रद्दध्याम। तस्मात् सत्यप्रतिपत्तिहेतुत्वात् **तत् सत्यं** तस्मिन् चक्षुरात्मके सत्ये त्रिभिरेभिः पादैः सह तुरीयं प्रतिष्ठितम्। उक्तं चैतत् "स आदित्यः कस्मिन् प्रतिष्ठित इति चक्षुषीति"। यत् पादत्रयाश्रयं तद्वै **तुरीयं बले प्रतिष्ठितम्**। किं तत् बलम्? **प्राणो वै बलम्**। तस्मिन् बलवति प्राणे **प्रतिष्ठितं सत्यम्**। तथा चोक्तं—"सूत्रे तदोतं च प्रोतं च" इति। यस्मादेवं **तस्मात् आहुर्बलं वै सत्यादोजीयः** ओजस्तरम्। आश्रितापेक्षयाश्रयस्य बलवत्त्वप्रसिद्धेः। **इत्येवमु हैवैषा गायत्री अध्यात्मं** या प्राणे **प्रतिष्ठिता** तस्यां गायत्र्यां हि जगत् प्रतिष्ठितम्। सर्वे देवाः कर्माणि फलं च यत्रैकं भवन्ति सैषा प्राणरूपिणी गायत्री जगत आत्मा। **सा हैषा गयान् तत्रे** त्रातवती। केऽपि पुनर्गयाः? प्राणा वागादयो हि गयाः। तान् तत्रे। सैषा गायत्री **तत्** तत्र **यत्** यस्मात् **गयान् तत्रे** एवं गयत्राणतो **गायत्री नाम** प्रथिता। **सोऽयमाचार्योऽ**ष्टवर्षं माणवकमुपनीय **यामेव अमूं सावित्रीं अन्वाह** पच्छः अर्धर्चशः समस्तां च, **एषैव** हि साक्षात् प्राणो जगत आत्मा माणवकाय समर्पिता। या ह इदानीं व्याख्याता, यैः **सोऽयमाचार्यो यस्मै** माणवकाय **अन्वाह** अनुवक्ति सेयं गायत्री **तस्य** माणवकस्य नरकादिपतनात् **गयान्** प्राणान् **त्रायते** रक्षतीत्यर्थः ॥ ४ ॥

गायत्र्या आनुष्टुभनिराकरणम्

तां हैतामेके सावित्रीमनुष्टुभमन्वाहुः वागनुष्टुप् एतद्वाच-मनुब्रूम इति न तथा कुर्यात् गायत्रीमेव सावित्रीमनुब्रूयात् यदिह

वा अप्येवंवित् बह्विव प्रतिगृह्णाति न हैव तत् गायत्र्या एकंचन पदं प्रति ॥ ९ ॥

या गयत्राणकरी तामेवैके अनुष्टुभमाहुः उपपत्तितः। तन्निराकृत्य विचक्षणा गायत्रीमेवाहुरित्याह—**तामिति**। **तामेव एके** शाखिनः **अनुष्टुप्**छन्दस्कामाहुः। तत्र उपपत्तिः **वाक् अनुष्टुप्** सरस्वती। तामेव माणवकाय **अनुब्रूम इति** वदन्ति। यदेवं वदन्ति तत् मृषैव इति अपर आहुः। तत् कथम्? **गायत्रीमेव सावित्रीमनुब्रूयात्**। अन्यथा **न कुर्यात्**। कस्मादेवम्? यस्मात् प्राणो गायत्रीत्युक्तम्। उक्ते हि प्राणे वाक् च सरस्वती च। अनेन प्राणाश्च एतत् सर्वं माणवकाय समर्पितं भवति। किञ्च प्रसङ्गादागतमिदमुक्त्वा अथ गायत्रीविदं स्तौति—**यदिति**। इदानीं **यदिह वापि एवंवित् बह्विव प्रतिगृह्णाति**, विदुषः सर्वात्मकत्वात्, **न हैव तत्** प्रतिग्रहजातं **गायत्र्या एकञ्चन पदैकं प्रत्यपि** पर्याप्तम् ॥ ९ ॥

गायत्रीवित्स्तुतिः

स य इमाꣳस्त्रींल्लोकान् पूर्णान् प्रतिगृह्णीयात् सोऽस्या एतत्प्रथमं पदमाप्नुयात् अथ यावतीयं त्रयी विद्या यस्तावत् प्रतिगृह्णीयात् सोऽस्या एतद्द्वितीयं पदमाप्नुयादथ यावदिदं प्राणि यस्तावत्प्रतिगृह्णीयात् सोऽस्या एतत्तृतीयं पदमाप्नुयात् अथास्या एतदेव तुरीयं दर्शितं पदं परोरजा य एष तपति नैव केनचनाप्यं कुत उ एतावत् प्रतिगृह्णीयात् ॥ ६ ॥

पुनर्गायत्रीविदं स्तौति—**स य इति**। **स** यस्तु गायत्रीवित् **इमान्** गोऽश्वादिधनसंपूर्णान् भूरादीन् **त्रीन् लोकान् पूर्णान् प्रतिगृह्णीयात्** तत् प्रथमपदविज्ञानफलम्। **सोऽस्या एतत् प्रथमं पदमाप्नुयात्**। न हि तं प्रतिग्रहदोषः

स्पृशतीत्यर्थः। अथ पुनः **यावतीयं त्रयी विद्या यस्तावत् प्रतिगृह्णीयात् सोऽस्या एतत् द्वितीयं पदमाप्नुयात्**। द्वितीयपदविज्ञानफलं तेन भुक्तं स्यात्। तथाथ **यावदिदं प्राणि यस्तावत् प्रतिगृह्णीयात् सोऽस्या एतत् तृतीयं पदमाप्नुयात्**। तृतीयपदज्ञानफलमनेन भुक्तं स्यादिति विकल्प्य एतदुच्यते--न चैवं दाता प्रतिग्रहीता च विद्यत इति यत् तत् विद्यास्तुतये। दाता प्रतिग्रहीता च तौ संभाव्येते। तथापि न हि तदा तत्प्रयुक्तदोषादिः सेद्धुं पारयति। कस्मात्? चतुर्थपदविज्ञानस्य परमपुरुषार्थसाधकत्वेन तत्प्रतिपन्थिसर्वदोषग्रासत्वात्। तत् चतुर्थपदं दर्शयति। किं तत्? **अथास्या एतदेव तुरीयं दर्शितं पदम्। परोरजा य एष तपति तच्चैतत् नैव** केनचिदपि प्रतिग्रहेण अस्यानाप्यं अप्राप्यमस्ति। पूर्वोक्तत्रीणि पदान्यपि नैवाप्यानि केनचित् परमार्थतः। **कुत उ एतावत् प्रतिगृह्णीयात्**। यस्मादेवं तस्मात् गायत्री एवंप्रभाववतीत्यर्थः ॥ ६ ॥

तुर्यगायत्र्युपस्थानम्

तस्या उपस्थानं गायत्र्यसि एकपदी द्विपदी त्रिपदी चतुष्पदी अपत् असि नहि पद्यसे नमस्ते तुरीयाय दर्शिताय पदाय परोरजसेऽसावदो मा प्रापदिति यं द्विष्यात् असावस्मै कामो मा समृद्धीति वा न हैवास्मै स कामः समृध्यते यस्मा एवमुपतिष्ठतेऽहमदः प्रापमिति वा ॥ ७ ॥

तुर्यगायत्र्युपस्थानमुच्यते—**तस्या** इति। **तस्या** उपेत्य स्थानं **उपस्थानम्**। अनेन मन्त्रेण नमस्करणम्। कोऽसौ मन्त्रः? इत्यत्र—हे चतुष्पदे! त्वं **गायत्र्यसि**। त्रैलोक्यपादेन **एकपदी**। त्रयीविद्यारूपेण **द्विपदी**। प्राणादिना त्रिपद्यसि। चतुर्थपादेन **चतुष्पद्यसि**। एवं चतुर्भिः पादैः उपासकैः पद्यसे। वस्तुतः स्वेन रूपेण **अपदसि**। कथम्? **न हि पद्यसे** स्वारोपितविशेषस्य

नेति नेतीति प्रविलापितत्वात्। अतोऽव्यवहार्यपदाय **नमस्ते तुरीयाय दर्शिताय पदाय परोरजसे असौ शत्रुः** तत्प्राप्तिविघ्नकरः **अदः** तत् कार्यं तत्प्राप्तिविघ्नकर्तृत्वं **मा प्रापत्** मैव प्राप्नोतु। इतिशब्दो मन्त्रपरिसमाप्त्यर्थः। स्वयं विद्वान् **यं द्विष्यात्** द्वेषं कुर्यात् तं प्रयत्नेन उपस्थानं असौ शत्रुरमुकनामेति नाम गृह्णीयात्। **असावस्मै शत्रवे कामो मा समृद्धि** समृद्धिं मा प्राप्नोतु इति **वा उपतिष्ठते। न हैवास्मै कामः समृध्यते** यस्मा **एवमुपतिष्ठते अहमदो** देवदत्ताभिप्रेतं **प्रापमिति वा** उपतिष्ठते। असावदो मा प्रापदित्यादि-मन्त्रत्रयस्य यथाकामं विकल्पः॥ ७॥

गायत्र्या मुखविधानाय अर्थवादः

एतद्ध वै तज्जनको वैदेहो बुडिलमाश्वतराश्विमुवाच यन्नु हो तद्गायत्रीविद् अब्रूथाः अथ कथꣳ हस्तीभूतो वहसीति मुखꣳ ह्यस्याः सम्राट्! न विदांचकारेति होवाच तस्या अग्निरेव मुखं यदिह वा अपि बह्विव अग्नावभ्यादधति सर्वमेव तत् संदहति एवꣳ हैव एवंवित् यद्यपि बह्विव पापं कुरुते सर्वमेव तत् संप्साय शुद्धः पूतोऽजरोऽमृतः संभवति॥ ८॥

गायत्र्या मुखविधानाय अर्थवाद उच्यते—**एतदिति**। **एतद्ध** किल **वै** स्मर्यते। तत्तत्र गायत्रीविज्ञानविषये **जनको ह वैदेहः** नामतो **बुडिलः** अश्वतराश्वस्य अपत्यं **आश्वतराश्विः** तं किल उक्तवान्। **यन्नु** इति वितर्के। **हो** अहो इत्येतत् तत् यतो **गायत्रीवित् अब्रूथा** गायत्रीविदस्मीति यदब्रूथाः किमिदम्? तद्वचोरूपम्। **अथ कथं** यदि गायत्रीवित् असत्प्रतिग्रहादोषेण **हस्तीभूतो वहसीति** स्मारितो **मुखं ह्यस्या** गायत्र्या हे **सम्राट्! नैव विदाञ्च-कार** न विज्ञातवानस्मीति **होवाच** एकाङ्गविकलत्वात्। गायत्रीविज्ञानफलं शृणु—**तस्या** गायत्र्या **अग्निरेव मुखम्। यदि ह वा अपि बह्विव** इन्धनं

अग्नावभ्यादधति सर्वमेव तत् सन्दहत्येव इन्धनमग्निः । एवं हैव एवंवित् गायत्र्यास्त्वग्निर्मुखमित्येवंवित् स्वयं यद्यपि बह्विव पापं करोति प्रतिग्रहादिपापजातं संप्साय सम्यक् भक्षयित्वा शुद्धः अग्निवत् पूतश्च । तस्मात् प्रतिग्रहदोषात् गायत्र्यात्मा अजरोऽमृतश्च संभवति ॥ ८ ॥

इति चतुर्दशं ब्राह्मणम्

पञ्चदशं ब्राह्मणम्

ज्ञानकर्मादिफलोपसंहारः

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । तत् त्वं पूषन्! अपावृणु सत्यधर्माय दृष्टये । पूषन्! एकर्षे! यम! सूर्य! प्राजापत्य! व्यूह रश्मीन् समूह तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि । वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् । ॐ ३ क्रतो! स्मर कृतꣳ स्मर क्रतो! स्मर कृतꣳ स्मर । अग्ने! नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

ज्ञानकर्मसमुच्चयानुष्ठानफलं प्रकृतोपस्थानं च उपसंहर्तुमिदं ब्राह्मणमारभ्यते—**हिरण्मयेनेति** । एतन्मन्त्रपञ्चकमीशावास्यविवरणे पदशो व्याख्यातमिह संक्षेपतो व्याख्यायते । गायत्रीपदचतुष्टयगतविशेषासंभवप्रबोधसिद्धमपदं निष्प्रतियोगिकब्रह्ममात्रमिति जानतः तन्मात्रावस्थानलक्षणकैवल्यभाक्त्वात् अयमत्र न विवक्षितः । पादत्रयवित् चतुर्थपादाप्तये तत्प्राप्त्यन्तरायनिरसनपूर्वकं गायत्र्यात्मानं

सवितारं मार्गं याचते। कथम्? हे **पूषन्** सर्वजगत्पोषक! **हिरण्मयेन** असमाहितचेतसां स्वप्राप्तिपिधानभूतपात्रेण **सत्यस्य** ब्रह्मणः **ते मुखं** स्वरूपं स्वप्राप्तिद्वारं वा पिहितमिव **पिहितमिति यत् तत् त्वमपावृणु** त्वद्दर्शनप्रतिबन्धमपनय। किमर्थमपाकरणं? इत्यत्र **सत्यधर्माय दृष्टये** सत्यात्मास्मीति ज्ञानायेत्यर्थः। पूषन्नित्यादिविशेषणपञ्चकविशिष्ट हिरण्यगर्भ! मम त्वत्प्राप्त्यन्तरायतावक**रश्मीन् व्यूह** विगमय। यथा त्वामहं द्रक्ष्ये तथा तावकरस्मीन् **समूह** संक्षिप्य उपसंहर। झटिति **यत्ते रूपं कल्याणतमं तत्ते पश्यामि**। कथं पश्यसि? इत्यत्र—**योऽसौ** व्याहृतिस्थानीयगायत्रीपदावयवात्मा स्वगतविशेषापायाधिकरणरूपेण निरधिकरणः स्वेन रूपेण वा स्वमात्रतया सर्वत्र पूरणात् **पुरुषः** शिष्यते **सोऽसावहमस्मीति** त्वां प्रपद्ये न तु भृत्यवदित्यर्थः। स्वात्मदशायामध्यात्मपरिच्छिन्नो यः प्राणवायुरधिदैवभावमापन्नबाह्यानिलं प्रत्यप्येतु। तथान्यानि करणानि स्वं स्वं देवताभावं भजन्तु। पुरा मदधिष्ठितस्थूलशरीरं तु भस्मावसानतया पृथिवीं भजतु। **ओं क्रतो**! इति संबोध्य हे सत्यसङ्कल्प! मत्कृते यत् स्मर्तव्यं तत् **स्मर**। द्विरुक्तिरादरार्था। किञ्च हे **अग्ने**! उत्तरेण **सुपथा मां नय**। त्वत्पदाप्त्यन्तरायभूतमस्मज्जुहुराणमेनः पापजातं **युयोधि** वियोजय विनाशयेत्यर्थः। इदानीं वयं पूर्ववत् सपर्यां कर्तुं न शक्नुमः। किन्तु **भूयिष्ठां ते नमउक्तिं विधेम** नमस्कारोक्त्या परिचरामेत्यर्थः। जरठत्वादन्यत्कर्तुं न हि शक्नुमः। केवलकृपया स्वात्मभावं दत्वा मामुद्धरेत्यर्थः॥

इति पञ्चदशं ब्राह्मणम्

इति पञ्चमोऽध्यायः

षष्ठोऽध्यायः

प्रथमं ब्राह्मणम्

प्राणस्य ज्येष्ठत्वश्रेष्ठत्वे तद्वेदनफलं च

यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति प्राणो वै ज्येष्ठश्च श्रेष्ठश्च ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति अपि च येषां बुभूषति य एवं वेद ॥ १ ॥

सप्तमाध्यायगतगायत्रीब्राह्मणे गायत्री प्राण इत्युक्तम्। पुनः उक्थयजुस्सामक्षत्रादिभावैः प्राणस्य उपासनमभिहितम्। पुनः पुनर्विशेषता अस्यापि खिलकाण्डत्वात्। येन वागादयो ज्यैष्ठ्यश्रैष्ठ्यभाजो भवन्ति। कथं प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यभाक्त्वम्? पूर्वत्र यदनुक्तं विशिष्टफलं प्राणोपासनं तद्वक्तव्यमिति अष्टमाध्याय आरभ्यते। ईशावास्यादिमुक्तिकोपनिषदन्तं विशिष्टं शास्त्रमिति उपोद्घातप्रकरणे प्रतिज्ञातत्वात् तदनुरोधेन छान्दोग्यपञ्चमाध्याये "यो ह वै ज्येष्ठं च" इत्यारभ्य "य एतानेवं पञ्चाग्नीन् वेद स शुद्धः पूतः पुण्यलोको भवति" इति दशमखण्डिकान्तं योऽर्थोऽभिहितः सोऽयमर्थोऽत्र बृहदारण्यकाष्टमाध्याये च यो ह वै ज्येष्ठं इत्यादि ब्राह्मणद्वयेन यतो वर्णितः अतोऽत्र न पुनर्वक्तव्यमवशिष्यते। अत्र यान्यनुक्ताक्षराणि तानि हि व्याख्यातव्यानि। तथापि संक्षेपतः कृत्स्नं व्याख्यायते। तत्रादौ वेदनफलप्ररोचनाय इदमुच्यते—**यो ह वा** इत्यादिना। **यः** कश्चित्—**ह वा** इत्यवधारणार्थौ—वक्ष्यमाणज्येष्ठश्रेष्ठगुणं **वेद** सोऽयं **स्वानां ज्येष्ठश्च श्रेष्ठश्च भवति**। एवं फलाभिमुखीभूतं प्रत्याह—**प्राणो वै ज्येष्ठश्च श्रेष्ठश्चेति**। शुक्लशोणितसंबन्धः प्राणादीनामवशिष्टत्वेऽपि प्राणप्रवेशानन्तरं शुक्लादि प्ररोहतीति चक्षुराद्यपेक्षया प्राणस्य ज्येष्ठत्वम्। प्राणस्य निषेककालादारभ्य गर्भपोषणहेतुत्वात्। अस्तु प्राणस्य

ज्येष्ठत्वं, श्रेष्ठता कुतः? इत्यत्र प्राणग्रामसंवादतः तस्य श्रेष्ठताप्यवगम्यते। एवं ज्येष्ठश्रेष्ठगुणप्राणं **यो वेद स स्वानां ज्येष्ठश्च श्रेष्ठश्च भवति**। स्वातिरेकेण योऽन्यो ज्येष्ठश्च श्रेष्ठश्च भविष्यामीति बुभूषति तेषामप्ययं ज्येष्ठश्च श्रेष्ठश्च भवति। उपासनोत्कर्षतायाः फलोत्कर्षताहेतुत्वात्॥ १॥

वसिष्ठगुणकवागुपासनाफलम्

यो ह वै वसिष्ठां वेद वसिष्ठः स्वानां भवति वाग्वै वसिष्ठा वसिष्ठः स्वानां भवति अपि च येषां बुभूषति य एवं वेद॥ २॥

वसिष्ठादिगुणविशिष्टवागाद्युपासनया स्वानां तद्गुणविशिष्टो भवतीत्याह—**यो** हेति। **यो ह वै वसिष्ठ**गुणवतीं वाचं वेद **वसिष्ठो** ह **स्वानां भवति**। कथं वाचो वसिष्ठता? इत्यत्र **वाग्वै वसिष्ठा**। यतो वाग्मिनो धनवन्तो वसन्ति अतो वसिष्ठगुणवद्वागुपासनात् स्वदर्शनानुरूपेण ज्ञातिमध्ये **वसिष्ठो भवती**त्यर्थः॥ २॥

प्रतिष्ठागुणवच्चक्षुरुपासनाफलम्

यो ह वै प्रतिष्ठां वेद प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे चक्षुर्वै प्रतिष्ठा चक्षुषा हि समे च दुर्गे च प्रतितिष्ठति प्रतितिष्ठति समे प्रतितिष्ठति दुर्गे य एवं वेद॥ ३॥

प्रतिष्ठागुणवच्चक्षुरुपासनाफलमाह—**यो** हेति। **यो ह वै**—प्रतितिष्ठत्यनयेति प्रतिष्ठा—तां **वेद**, प्रतिष्ठागुणवच्चक्षुर्वेदनफलं—सोऽयं विद्वान् समे देशे काले च यथा **प्रतितिष्ठति** तथा **दुर्गे** दुर्गमनप्रदेशे दुर्भिक्षकाले वा प्रतितिष्ठति। कथम्? प्रतिष्ठागुणवच्चक्षुः। **चक्षुर्वै प्रतिष्ठा**। कथम्? **चक्षुषा हि समे च दुर्गे** दृष्ट्वा **प्रतितिष्ठति**। यत एवमतः तदनुरूपं फलम्। **समे च दुर्गे च प्रतितिष्ठती**त्यर्थः॥ ३॥

संपद्गुणकश्रोत्रवेदनफलम्

यो ह वै संपदं वेद सꣳहास्मै पद्यते यं कामं कामयते श्रोत्रं वै संपत् श्रोत्रे हीमे सर्वे वेदा अभिसंपन्नाः सꣳहास्मै पद्यते यं कामं कामयते य एवं वेद ॥ ४ ॥

संपद्गुणविशिष्टश्रोत्रवेदनफलमाह—यो हेति। यो ह वै संपद्गुणविशिष्टं श्रोत्रं वेद स विद्वान् यं कामं कामयते सं हास्मै कामः पद्यते। कथम्? संपद्गुणवत् श्रोत्रं वै संपत्। कथम्? श्रोत्रे सति सर्वे वेदा अभिसंपन्ना भवन्ति। श्रोत्रवतो हि वेदविहितकर्मानुकूलकामः संपद्यते। य एवं वेद स विद्वान् यं कामं कामयते तद्विज्ञानानुरूपं फलं हास्मै संपद्यते ॥ ४ ॥

आयतनगुणवन्मनोवेदनफलम्

यो ह वा आयतनं वेद आयतनꣳ स्वानां भवति आयतनं जनानां मनो ह वा आयतनमायतनꣳ स्वानां भवति आयतनं जनानां य एवं वेद ॥ ५ ॥

आयतनगुणवन्मनोवेदनफलमाह—यो हेति। यो ह वा आयतनगुणवन्मनो वेद सोऽयं स्वानामायतनं अन्येषां जनानां च भवति। किं तत्? मनो ह वा आयतनं इन्द्रियेन्द्रियार्थानामाश्रयत्वात्। य एवमिन्द्रियप्रवृत्तिनिवृत्ती संकल्पायत्ते इति वेद सोऽयं विद्वान् दर्शनानुरूपं फलं स्वानामन्येषां च आयतनं भवतीत्यर्थः ॥ ५ ॥

प्रजापतिगुणयुक्तरेतोवेदनफलम्

यो ह वै प्रजापतिं वेद प्रजायते ह प्रजया पशुभिः रेतो वै प्रजापतिः प्रजायते ह प्रजया पशुभिर्य एवं वेद ॥ ६ ॥

प्रजापतिगुणविशिष्टरेतोवेदनफलमाह—**यो** **हेति**। **यो ह वै प्रजापति-गुणवद्रेतो वेद स प्रजायते ह प्रजया पशुभिः** संपन्नो भवति। कोऽयं प्रजापतिः ? इत्यत्र—**रेतो वै प्रजापतिः**। रेतोग्रहणं प्रजननेन्द्रियोपलक्षणार्थम्। **य एवमेवं वेद** सोऽयं **प्रजया पशुभिः प्रजायत** इति दर्शनानुरूपं फलमित्यर्थः ॥ ६ ॥

वागादिप्राणानां विवादः तत्र ब्रह्मवाक्यं च

ते ह इमे प्राणा अहꣳश्रेयसे विवदमाना ब्रह्म जग्मुः तद्धोचुः को नो वसिष्ठ इति ? तद्धोवाच यस्मिन् व उत्क्रान्ते इदꣳ शरीरं पापीयो मन्यते स वो वसिष्ठ इति ॥ ७ ॥

वागादयः प्राणा विवदमानाः प्राजापत्यसूत्रवाक्यार्थमहमेवेति सर्वे मत्वा पृथक् पृथक् उत्क्रम्य आगत्य प्राजापत्यसूत्रार्थविषयः प्राण एवेति विज्ञाय प्राणशरणा बभूवुरित्याह—**ते** **हेति**। **ते ह इमे प्राणाः** स्वस्वश्रेयसे विरुद्धं वदन्तो **ब्रह्म जग्मुः**। **तत्** **होचुः** तं गत्वा ऊचुः। किमिति ? **को नोऽस्माकं** मध्ये **वसिष्ठः** ? **इति**। **तत्** ब्रह्म तान् **होवाच**। किमिति ? **वो** युष्माकं मध्ये **यस्मिन् उत्क्रान्ते शरीरमिदं** पूर्वस्मादतिशयेन **पापीयः** पापतमं शावं **मन्यते** लोकः **स वो** युष्माकं मध्ये **वसिष्ठो** भविष्यति। जीवतोऽपि पापीय एव शरीरम्। ततोऽपि पापवत्तममित्युक्तिः वैराग्य-प्रदर्शनार्था। प्रजापतिर्जानन्नपि वसिष्ठं सर्वेषामप्रियशङ्कया नोक्तवान् ॥ ७ ॥

वागादीनां स्वस्ववीर्यपरीक्षणाय क्रमादुत्क्रमणम्

वाक् होच्चक्राम सा संवत्सरं प्रोष्य आगत्य उवाच कथमशकत मदृते जीवितुमिति ? ते होचुर्यथा अकला अवदन्तो वाचा प्राणन्तः प्राणेन पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा

प्रजायमाना रेतसा एवमजीविष्मेति प्रविवेश ह वाक् ॥ ८ ॥
चक्षुर्होच्चक्राम तत् संवत्सरं प्रोष्य आगत्य उवाच कथमशकत मदृते
जीवितुमिति ? ते होचुर्यथा अन्धा अपश्यन्तश्चक्षुषा प्राणन्तः
प्राणेन वदन्तो वाचा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा प्रजाय-
माना रेतसा एवमजीविष्मेति प्रविवेश ह चक्षुः ॥ ९ ॥ श्रोत्रꣳ
होच्चक्राम तत् संवत्सरं प्रोष्य आगत्य उवाच कथमशकत मदृते
जीवितुमिति ? ते होचुर्यथा बधिरा अशृण्वन्तः श्रोत्रेण प्राणन्तः
प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा विद्वाꣳसो मनसा प्रजायमाना
रेतसा एवमजीविष्मेति प्रविवेश ह श्रोत्रम् ॥ १० ॥ मनो
होच्चक्राम तत् संवत्सरं प्रोष्य आगत्य उवाच कथमशकत मदृते
जीवितुमिति ? ते होचुर्यथा मुग्धा अविद्वाꣳसो मनसा प्राणन्तः
प्राणेन वदन्तो वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण प्रजायमाना
रेतसा एवमजीविष्मेति प्रविवेश ह मनः ॥ ११ ॥ रेतो होच्चक्राम
तत् संवत्सरं प्रोष्य आगत्य उवाच कथमशकत मदृते जीवितुमिति ?
ते होचुर्यथा क्लीबा अप्रजायमाना रेतसा प्राणन्तः प्राणेन वदन्तो
वाचा पश्यन्तश्चक्षुषा शृण्वन्तः श्रोत्रेण विद्वाꣳसो मनसा एवमजी-
विष्मेति प्रविवेश ह रेतः ॥ १२ ॥

ब्रह्मणैवमुक्ता वागादयः स्वात्मनो वीर्यपरीक्षणाय क्रमात उच्चक्रमुः इत्याह—वागित्यादिना । प्राणानां मध्ये प्रथमं वागेव हास्मात् शरीरादुच्चक्राम । सेयं वाक् उत्क्रम्य संवत्सरमात्रं प्रोष्य पुनरागत्य उवाच । किमिति ? हे चक्षुरादिप्राणाः ! यूयं मत् ऋते मां विना जीवितुं कथमशकत शक्तवन्तः ?

इत्येवमुक्ताश्चक्षुरादय **ऊचुः** । किमिति ? **यथा** लोके **अकला मूका** वाचा **अवदन्तोऽपि प्राणेन** प्राणनव्यापारं कुर्वन्तः **चक्षुषा** रूपजातं **पश्यन्तः श्रोत्रेण** शब्दजातं **शृण्वन्तः मनसा** कार्याकार्यादिकं **विद्वांसः रेतसा प्रजायमानाः** पुत्रानुत्पादयन्तः **एवमजीविष्म** वयमिति । प्राणैरेवमुक्ता वाक् नाहं वसिष्ठोऽस्मीति स्वाभिमतिमुत्सृज्य व्रीलिता पुनः शरीरं प्रविवेश हेत्यर्थः । तथा **चक्षुः श्रोत्रं मनः** प्रजातिरित्येतत् सर्वं समानमित्याह—चक्षुरित्यादिना ॥ ८–१२ ॥

मुख्यप्राणस्य वागादिवारितस्य अनुत्क्रमणेच्छा

अथ ह प्राण उत्क्रमिष्यन् यथा महासुहयः सैन्धवः पड्वीशशंकून् संवृहेत् एवꣳ हैव इमान् प्राणान् संववर्ह ते होचुर्मा भगवः! उत्क्रमीः न वै शक्ष्यामस्त्वदृते जीवितुमिति तस्यो मे बलिं कुरुतेति तथेति ॥ १३ ॥

वागुत्क्रमणागमनानन्तरं प्राणोऽप्युत्क्रमणव्यापारं कुर्वन् वागादिभिः वारितो नोत्क्रमितुमिच्छतीत्याह—अथेति । **अथ ह प्राणः** स्वस्थानादुत्क्र**मिष्यन्** तदानीं वागादयोऽपि प्रचलिता भवन्तीत्यत्र—**यथा** लोके **महान् सुहयः** सिन्धुदेशजत्वात् **सैन्धवः पड्वीशशङ्कून्** पादबन्धनकीलान् **संवृहेत्** उद्यच्छेत् युगपदुद्धृत्य खं नयेत् अश्वारोहे आरूढे परीक्षणाय एवमेव वागादीन् **संववर्ह** स्वस्थानादुद्धृतवान् स्थानात् भ्रंशितवानित्यर्थः । **ते ह** वागादयो भीता **ऊचुः** । किमिति ? **हे भगवो** भगवन् ! **मा उत्क्रमीः** यस्मान्न **शक्ष्यामः त्वदृते जीवितुमिति** । यद्येवं भवद्भिः मम श्रेष्ठता विज्ञाता तदाहमत्र श्रेष्ठः स्याम् । योऽहमेवंविधः **तस्य उ** मम **बलिं कुरुत** । एवं कल्पितोऽयं प्राणसंवादः विदुषो विशिष्टफलज्ञापनार्थः । एवं श्रेष्ठपरीक्षणप्रकारोपदेशः । अनेनायं श्रेष्ठ इति ज्ञातुं शक्यते । न ह्यन्यथा जडानां करणानां मिथः संवादो वत्सरमात्रमेकैकस्य निर्गमनं संभवति । प्राणोपासनाय इयं कल्पनेत्यर्थः ॥ १३ ॥

वागादिभिः मुख्यप्राणस्य बलिदानम्

सा ह वागुवाच यद्वा अहं वसिष्ठास्मि त्वं तद्वसिष्ठोऽसीति यद्वा अहं प्रतिष्ठास्मि त्वं तत्प्रतिष्ठोऽसीति चक्षुर्यद्वा अहꣳ संपदस्मि त्वं तत्संपदसीति श्रोत्रं यद्वा अहमायतनमस्मि त्वं तदायतनमसीति मनो यद्वा अहं प्रजातिरस्मि त्वं तत्प्रजातिरसीति रेतस्तस्यो मे किमन्नं किं वास इति ? यदिदं किंच आ श्वभ्य आ कृमिभ्य आ कीटपतङ्गेभ्यस्तत्तेऽन्नमापो वास इति न ह वा अस्य अनन्नं जग्धं भवति न अनन्नं परिगृहीतं य एवमेतदनस्यान्नं वेद तद्विद्वाꣳसः श्रोत्रिया अशिष्यन्त आचामन्ति अशित्वा आचामन्ति एतमेव तदनं अनग्नं कुर्वन्तो मन्यन्ते ॥ १४ ॥

ये मा उत्क्रमीरिति प्राणं प्रार्थितवन्तः बलिं कुरुतेत्याज्ञप्ताः ते तथा कर्तुमुद्युक्ताः। तत्रादौ क्रमेण वागादिर्बलिं ददान एवमुवाचेत्याह—सा हेति। ये प्राणस्य बलिं करवाम इति प्रतिज्ञातवन्तः तत्रादौ वागेवमुवाच ह। किमिति ? यद्वा यद्यप्यहं त्वत्प्रसादात् वसिष्ठास्मि यन्मम वसिष्ठत्वं तत् तवैव। अतस्त्वं तद्वसिष्ठोऽसीति। यद्वा अहं प्रतिष्ठास्मीत्यादि समानमन्यत्। संपदायतनप्रजातिगुणान् क्रमेण समर्पितवन्त इत्यर्थः। यद्येवं मद्बलिदायिनो यूयं ब्रूत किं तत् ? य एवं ज्येष्ठश्रेष्ठत्वादिगुणविशिष्टस्तस्य उ मम किमन्नं ? किं वासः ? इति पृष्टा वागादय आहुः—यदिदं लोके किञ्चाल्पं आ श्वभ्य आ कृमिभ्यः आ कीटपतङ्गेभ्यः सह प्राणिभिः यद्यत् अद्यमानं तत् सर्वं ते तवान्नम्। आपस्ते वासः वस्त्रमाप एव। प्राणिभिः यद्यत् अद्यते तत् सर्वं अनस्य प्राणस्य अन्नं नेतरस्येति। य एवं वेद न ह वा अस्य अनन्नं जग्धं भवति अन्नसामान्यस्य प्राणायत्तत्वात्। सर्वं प्राणस्येति स्तुत्यर्थमेतत्। तथा विदुषो न अनन्नं परिगृहीतं भवतीति यत् तत् सर्वं

प्राणस्येदमन्नं अन्नसामान्यात् । ताः प्राण एवेति प्राणात्मदर्शनमिह विधित्सितं न तु सर्वान्नममार्गेण परिगृह्य भक्षयेदिति । यस्माच्च आपो वासः प्राणस्य तस्मात् **विद्वांसः ब्राह्मणाः श्रोत्रियाः अशिष्यन्तो** भक्षमाणा **आचामन्ति अशित्वा आचामन्ति** । एवं पूर्वोत्तरापोशनं कुर्वतां कोऽभिप्राय इत्यत्र— **एतमेव अनं प्राणमनग्नं कुर्वन्तो मन्यन्ते** । अपां प्राणस्य वासोरूपत्वात् । "यदपः पिबामि प्राणस्य तद्वासः प्राणस्यापो वासः" इत्युक्तत्वात् । एवं भोक्ष्यमाणस्य भुक्तवतश्च यदाचमनं तत् प्राणस्य वास इति दर्शनमात्रं विधीयते तस्याप्राप्तत्वात् ॥ १४ ॥

इति प्रथमं ब्राह्मणम्

द्वितीयं श्वेतकेतुब्राह्मणम्

सर्वसंसारगत्युपसंहारः

श्वेतकेतुर्ह वा आरुणेयः पञ्चालानां परिषदमाजगाम स आजगाम जैवलिं प्रवाहणं परिचारयमाणं तमुदीक्ष्याभ्युवाद कुमार३ इति स भो३ इति प्रतिशुश्राव अनुशिष्टो न्वसि पित्रेति ओमिति होवाच ॥ १ ॥

सप्तमाध्यायान्ते "अग्ने नय" इति मन्त्रेण समुच्चयकारिणा मार्गयाचनं कृतम् । सुपथेति विशेषणात् मार्गान्तरमस्तीति द्योत्यते । तदियत्तापरिज्ञानपूर्वकं सर्वसंसारगत्युपसंहारः कर्तव्य इति इदं ब्राह्मणमारभ्यते— **श्वेतकेतुरिति** । कर्मकाण्डस्य एषा निष्ठेति सर्वसंसारगत्युपसंहारार्थं विद्यास्तुत्यर्थं च इयमाख्यायिका । केयं ? इत्यत्र—नामतः **श्वेतकेतुः** अरुणस्यापत्यमारुणिः तदपत्यम**आरुणेयः**—

ह्शब्द ऐतिह्यार्थः—पित्रानुशिष्टोऽस्मीति महता गर्वेण—यावद्भूम्याधिपत्याय पञ्चैव अलमिति प्रसिद्धाः जैवलिप्रमुखाः पञ्चालाः—तेषां परिषदं सभामागत्य तत्रत्यान् जेष्यामीत्याजगाम । अत्रत्यजयेन किं कार्यं? इत्यालोच्य जीवलस्यापत्यं जैवलिं नामतः प्रवाहणं भृत्यैः परिचारयमाणं राजानं प्रति स श्वेतकेतुः त्वरयाजगाम । विद्यागर्वसंपन्नं तमुदीक्ष्य तद्गतगर्वोऽपनेतव्य इति स्वागतादि-सपर्यामकृत्वैव तद्दर्शनमात्रेण अभ्युवाद । किमिति? कुमार! इति भर्त्सनार्थ-प्लुत्या संबोध्य ततः स भोः! इति प्रतिशुश्राव प्रतिरूपं प्रत्युक्तवान् । तदुक्तफ्लुतितः क्रुद्धो राजा किं त्वं पित्रानुशिष्टोऽसि? इत्युवाच । इतर ओमिति होवाच ॥ १ ॥

राजकृतपञ्चप्रश्नाः

वेत्थ यथेमाः प्रजाः प्रयत्यो विप्रतिपद्यन्ता३ इति? नेति होवाच वेत्थो यथेमं लोकं पुनरापद्यन्ता३ इति? नेति हैवोवाच वेत्थो यथासौ लोक एवं बहुभिः पुनः पुनः प्रयद्भिर्न संपूर्यता३ इति? नेति हैवोवाच वेत्थो यतिथ्यामाहुत्याꣳ हुतायामापः पुरुष-वाचो भूत्वा समुत्थाय वदन्ती३ इति? नेति हैवोवाच वेत्थो देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा? यत् कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते पितृयाणं वापि हि न ऋषेर्वचः श्रुतम् । द्वे सृती अश्रृणवं पितॄणामहं देवानामुत मर्त्यानाम् । ताभ्यामिदं विश्वमेजत् समेति यदन्तरा पितरं मातरं चेति नाहमत एकंचन वेदेति होवाच ॥ २ ॥

यदि ते यत्र कुत्रापि संशयोऽस्ति तत् पृच्छ वदामि इति मन्यमानं प्रति राजा पृच्छतीत्याह— वेत्थेति । हे कुमार! यद्येवं त्वं वेत्थ विजानासि

किं तत्? यथा येन प्रकारेण इमाः प्रजाः प्रयत्यो म्रियमाणा विप्रतिपद्यन्ता विप्रतिपद्यन्ते। विचारणार्थेयं प्लुतिः। विप्रतिपत्तिस्तु मार्गद्वैविध्यं यत्र भवति तत्र काश्चित् प्रजाः सुपथा गच्छन्ति। तद्वैपरीत्येन काश्चिदिति। तत् किं वेत्थ? इति पृष्टो नेति होवाच इतरः। किं तर्हि वेत्थ? यथा इमं लोकं पुनरापद्यन्ता पुनरापद्यन्ते यथा पुनरागच्छन्ति इमं लोकम्। नेति होवाच। वेत्थ यथा प्रसिद्धोऽयं लोकः येन पुनः पुनः असकृत् प्रयद्भिः म्रियमाणैः यथा च न संपूर्यता न संपूर्यते। तं किं वेत्थ? इति। नेति होवाच। वेत्थो यतिथ्यां यत्संख्याकायामाहुत्यामाहुतौ हुतायां पुरुषस्य या वाक् सैव यासां ताः पुरुषवाचो भूत्वा पुरुषशब्दवाच्या वाग्भूत्वा यदा पुरुषाकारपरिणतास्तदा पुरुषवाचो भवन्ति। समुत्थाय सम्यगुत्थाय उद्भूताः सत्यो वदन्तीति। नेति होवाच। यद्येवं वेत्थ देवयानस्य वा पथो मार्गस्य येनासौ प्रतिपद्यते इति प्रतिपदं पितृयाणस्य वा प्रतिपदं यथा विशिष्टं कर्म कृत्वा देवयानं वा पन्थानं प्रतिपद्यन्ते पितृयाणं वा यत् कृत्वा प्रतिपद्यन्ते तत् कर्म प्रतिपच्छब्दवाच्यमित्यर्थः। तां प्रतिपदं किं त्वं वेत्थ? देवलोकपितृलोकप्रतिपत्तिसाधनं किं त्वं वेत्थ? इत्येतदर्थप्रकाशकं ऋषेर्मन्त्रस्य सुवचो वाक्यं न श्रुतमस्ति मन्त्रस्याप्यस्य अर्थप्रकाशकत्वात्। कोऽसौ मन्त्रः? इत्यत आह—द्वे इति। द्वे सृती द्वौ मार्गौ अशृणवं श्रुतवानस्मि। तयोरेका पितृलोकप्रापिका। अपरा देवलोकप्रापिका। के पुनराभ्यां सृतिभ्यां पितॄन् देवांश्च गच्छन्ति? उतापि मर्त्यानां संबन्धिन्यौ। मनुष्या एव गच्छन्ति ताभ्यां सृतिभ्याम्। इदं विश्वं अखिलं जगत् समेति सम्यक् गच्छति। ते च द्वे सृती यदन्तरा ययोरन्तरा यत् यस्मात् तदन्तः मध्ये पितरं मातरं च कौ तौ मातापितरौ? द्यावापृथिव्यावण्डकपाले। इयं वै माता असौ पितेति ब्राह्मणेन व्याख्यातः। अण्डकपालयोर्मध्ये संसारविषय एवैते सृती न हि मुख्यामृतत्वगमनायेत्यर्थः। इतर आह—नाहमतोऽस्मात् प्रश्नसमुदायात् एकञ्चन एकमपि न वेद नाहं वेदेति होवाच श्वेतकेतुः॥ २॥

श्वेतकेतोः स्वपितरं प्रत्येव गमनम्

अथैनं वसत्या उपमन्त्रयांचक्रे अनादृत्य वसतिं कुमारः प्रदुद्राव स आजगाम पितरं त९ होवाचेति वाव किल नो भवान् पुरानुशिष्टानवोचदिति कथ९ सुमेधः! इति? पञ्च मा प्रश्नान् राजन्यबन्धुरप्राक्षीत् ततो नैकंचन वेदेति कतमे त इति इम इति ह प्रतीकान्युदाजहार ॥ ३ ॥

विद्याभिमानं हित्वा राज्ञा वस इहेति प्रार्थितोऽपि स्वपितरं प्रति जगामेत्याह—अथेति। यः पञ्चालानां परिषदमाजगाम सोऽयं श्वेतकेतुः स्वागमप्रयोजनमकृत्वा अथ राजप्रश्नोपरत्यनन्तरं विद्याप्रयुक्तगर्वं दूरतः परित्यज्य पलायितुमिच्छन्तं प्रकृतं श्वेतकेतुं राजा इह वसन्तु भवन्त इति वसत्या वसतिप्रयोजनेन उपमन्त्रयांचक्रे इदं पाद्यं इदं आचमनीयमित्याद्युपमन्त्रणं कृतवान्। एवं स्वापराधेन अवमानितः श्वेतकेतुः राज्ञा दीयमानां तां वसतिमनादृत्य पितरं प्रति प्रदुद्राव। स च आजगाम पितरम्। तं गत्वा उवाच। किमिति? कथं वाव किल नोऽस्मान् पुरा भवान् समावर्तनकाले सर्वाभिः विद्याभिः अनुशिष्टान् अवोचदिति। पुत्रस्य सोपालम्भं वचः श्रुत्वा पिता—हे सुमेधः! कथं ईदृशं दुःखं ते प्रादुर्भूतं? इति पित्रा पृष्ट आह—शृणु मद्यथावृत्तम्। राजन्या बन्धवोऽस्येति कश्चन राजन्यबन्धुः पञ्च पञ्चसंख्याकान् प्रश्नान् मां अप्राक्षीत्। तत्राहं नैकञ्चन वेद न विज्ञातवानस्मि। कतमे ते प्रश्नाः? इति पृष्टः तत्प्रश्नस्य प्रतीकानि मुखानि उदाजहार उदाहृतवान् ॥ ३ ॥

पित्रा गौतमेन राजानं प्रत्यागमनादि

स होवाच तथा नस्त्वं तात जानीथा यथा यदहं किंचन वेद सर्वमहं तत्तुभ्यमवोचं प्रेहि तु तत्र प्रतीत्य ब्रह्मचर्यं वत्स्याव इति

भवानेव गच्छत्विति स आजगाम गौतमो यत्र प्रवाहणस्य जैवलेरास तस्मा आसनमाहृत्य उदकमाहारयांचकार अथ हास्मा अर्घ्यं चकार तꣳ होवाच वरं भगवते गौतमाय दद्म इति ॥ ४ ॥

पुत्रक्रोधोपशमनं कुर्वन् पिता उवाचेत्याह—स हेति। क्रुद्धं पुत्रं प्रति पिता एवमुवाच। किमिति? हे तात वत्स! नोऽस्मान् त्वं गृह्णीथाः। यदहं किञ्चन विज्ञानजातं वेद तत् सर्वं तुभ्यमवोचं इत्येव जानीथाः। कोऽन्यः त्वत्तः प्रियतरो मेऽस्ति? यत् राज्ञा पृष्टं तदहमप्येतन्न जानामि। तस्मात् प्रेहि आगच्छ। तं प्रतीत्य गत्वा ब्रह्मचर्यं वत्स्यावः विद्याग्रहणार्थम्। नाहं तन्मुखं द्रष्टुमुत्सहे। भवानेव गच्छत्विति। स आजगाम गोत्रतो गौतमः आरुणिः यत्र प्रवाहणस्य जैवलेः आस आसनं आस्थायिका। तस्मै गौतमाय तदनुरूपमासनमाहृत्य भृत्यैः उदकमाहारयाञ्चकार। अथ हास्मै पुरोधसा अर्घ्यं मन्त्रवत् मधुपर्कं च चकार कारयामास। एवं विधिवत् संपूज्य तं होवाच। किमिति? वरं भगवते गौतमाय दद्मः इति ॥ ४ ॥

वरप्रदात्रे राज्ञे मुनिवचनम्

स होवाच प्रतिज्ञातो म एष वरो यां तु कुमारस्यान्ते वाचमभाषथाः तां मे ब्रूहीति ॥ ५ ॥

प्रतिवचनं मुनिराह—स हेति। स होवाच गौतमः—यस्त्वया प्रतिज्ञातो मम एष वरः तत्रात्मानं दृढीकुरु। यां तु कुमारस्यान्ते समीपे प्रश्नरूपां वाचमभाषथाः तां मे ब्रूहीति ॥ ५ ॥

राज्ञः प्रत्युत्तरम्

स होवाच दैवेषु वै गौतम! तद्वरेषु मानुषाणां ब्रूहीति ॥

प्रत्युत्तरं राजोवाच—**स** हेति। हे **गौतम**! मत्तो वरलिप्सया यं त्वं प्रार्थयसे तद्वरं मनुष्याणामन्यतमं प्रार्थय ॥ ६ ॥

मुनिना स्वाभिलषितवरकथनम्

स होवाच विज्ञायते हास्ति हिरण्यस्यापात्तं गोअश्वानां दासीनां प्रवाराणां परिधानस्य मा नो भवान् बहोरनन्तस्यापर्यन्तस्याभ्यवदान्योऽभूदिति स वै गौतम तीर्थेन इच्छासा इति उपैम्यहं भवन्तमिति वाचा ह स्मैव पूर्व उपयन्ति स ह उपायनकीर्त्या उवास ॥ ७ ॥

स्वाभिलषितवरं मुनिरुवाच—**स** हेति। **स होवाच** गौतमः। यस्त्वं दित्ससि तेन न हि मे प्रयोजनमस्तीति भवता विज्ञायते। यस्त्वं दित्ससि तन्ममाप्यस्ति। किं तत्? इत्यत्र—**हिरण्यस्यापात्तं** प्राप्तं तथा **गवाश्वानां दासीनां प्रवाराणां** परिवाराणां **परिधानस्य** च। न हि मानुषवित्तेष्वविद्यमानं त्वत्तो मे प्रार्थनीयमस्ति। त्वया तु वरं भवते गौतमाय दद्म इति प्रतिज्ञातं तत् कर्तव्यं वा न वेति त्वमेव जानीषे। मम त्वेवमाशयः—पुरा वदान्यो भूत्वा मत्कृते तद्विपरीतो मा भवेति। त्वं तु **बहोः** प्रभूतस्य **अनन्त**साधनफलस्य **अपर्यन्तस्य** अपरिसमाप्तस्य ईदृशस्य वित्तस्य **अभ्यवदान्योऽभूत्**। न ह्यदेयं त्वया किंचिदस्तीति। एवमुक्त आह—**स वा** इति। हे **गौतम**! **स त्वं तीर्थेन** शास्त्रीयन्यायेन मत्तो विद्यामिच्छासै इच्छसे। यत एवमतस्त्वं मत्तो विद्यामाप्नुहि। एवमुक्तो गौतमस्तमाह—**भवन्तं** शिष्यत्वेन **अहमुपैमीति वाचा ह स्मैव** किल **पूर्वे** ब्राह्मणाः क्षत्रियान् वैश्यान् वा शिष्यवृत्त्या **उपयन्ति** न ह्युपायनशुश्रूषादिभिः। अतः **स** गौतमः **उपायनकीर्त्या** कीर्तनमात्रेणैव **उवास** नोपायनं चकारेत्यर्थः ॥ ७ ॥

राज्ञा क्षमापणपूर्वकं वरप्रदानम्

स होवाच यथा नस्त्वं गौतम ! मापराधास्तव च पितामहा यथेयं विद्या इतः पूर्वं न कस्मिंश्चन ब्राह्मण उवास तां त्वहं तुभ्यं वक्ष्यामि को हि त्वैवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति ? ॥८॥

मया क्षुभितोऽयमिति मत्वा स्वापराधं क्षमापयन् तत्काङ्क्षितवरं ददातीत्याह—**स** हेति। **स होवाच** राजा। किमिति? गौतमं व्याकुलितं मत्वा क्षमापयन् हे **गौतम !** यथा महान्तः अनन्तापराधिन्यपि तत्कृतापराधं विस्मृत्य तमनुगृह्णन्ति **तथा नोऽस्मान्** प्रति **त्वं मापराधाः** अपराधं माकार्षीः। न स्मर्तव्योऽस्मदपराध इत्यर्थः। **तव च पितामहा** अस्मत्पितामहेषु यथापराधान्न जहुः तथास्मत्कृतापराधान् विस्मृत्य पितामहवृत्तमेव भवता पालनीयमित्यर्थः। **यां** त्वं प्रार्थितवानसि **सेयं विद्या** त्वत्संप्रदानात् प्राक् **न कस्मिंश्चिदपि ब्राह्मणे उवास** उषितवती। यथा मयोक्तं तथा त्वमपि जानीषे। सर्वदा क्षत्रियपरम्परायामेव इयं विद्या आगता। अत इयं मया परिरक्षिता। इतः परं न हि मया रक्षितुं शक्या। अत**स्तुभ्यं वक्ष्यामि। को** ह्यन्योऽपि **हि** यस्मा**देवं ब्रुवन्तमर्हति प्रत्याख्यातुमिति** ॥ ८ ॥

आदौ चतुर्थप्रश्नापाकरणम्

असौ वै लोकोऽग्निर्गौतम ! तस्यादित्य एव समित् रश्मयो धूमोऽहरर्चिर्दिशोऽङ्गारा अवान्तरदिशो विस्फुलिङ्गाः तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुत्यै सोमो राजा संभवति ॥ ९ ॥

आदौ चतुर्थप्रश्नमपाकरोति—असाविति। हे **गौतम! असौ** द्यौर्लोकोऽग्निः द्युलोके अग्निदृष्टिः कार्येत्यर्थः। **तस्य आदित्य एव समित्**

द्युलोकस्यादित्येन समिन्धनात्। **रश्मयो धूमः** समिध उत्थानसाम्यात्। **अहरर्चिः** प्रकाशसाम्यात्। **दिशोऽङ्गारा** उपशमसामान्यात्। **अवान्तरदिशो विस्फुलिङ्गाः** विक्षेपसामान्यात्। **तस्मिन्** एवंगुणविशिष्टे द्युलोकाग्नौ **देवाः** इन्द्रादयः **श्रद्धां जुह्वति। तस्या आहुत्यै** आहुतेः **सोमो राजा** पितॄणां ब्राह्मणानां वा **संभवति** "श्रद्धा वा आपः" इति श्रुतेः। "वेत्थो यतिथ्यामाहुत्यां हुतायां आपः पुरुषवाचो भूत्वा समुत्थाय वदन्ति" इति प्रश्ननिर्णयविषये असौ लोकोऽग्निः इति प्रस्तुतम्। तस्मादापः कर्मसमवायिन्यः। शरीरारम्भकश्रद्धा वाच्येति निश्चीयते। शरीरादिकर्तृत्वे पञ्चभूतानां कारणत्वं तत्रापां प्राधान्यमित्यर्थः॥ ९॥

द्वितीयाहुतिस्वरूपम्

पर्जन्यो वाग्निर्गौतम! तस्य संवत्सर एव समित् अभ्राणि धूमो विद्युदर्चिः अशनिरङ्गारा ह्रादुनयो विस्फुलिङ्गाः तस्मिन्नेतस्मिन्नग्नौ देवाः सोमꣳ राजानं जुह्वति तस्या आहुत्यै वृष्टिः संभवति॥ १०॥

द्वितीयाहुतिस्वरूपमाह---**पर्जन्य** इति। **पर्जन्यो** नाम वृष्टिकरणाभिमानी। सोऽयमग्निः। **तस्य संवत्सर एव समित्**। संवत्सरान्तर्गतवर्षाद्यृतुभिः पर्जन्याग्नेः समिद्धत्वात्। **अभ्राणि धूमः** धूमवत् दृश्यमानत्वात्। **विद्युदर्चिः** प्रकाशसामान्यात्। **अशनिरङ्गाराः** उपशान्तत्वकाठिन्यसामान्यात्। **ह्रादुनयः** स्तनयित्नुशब्दा **विस्फुलिङ्गाः** विक्षेपानेकत्वसामान्यात्। **तस्मिन् एतस्मिन्** आहुत्यधिकरणे होतारो **देवाः सोमं राजानं जुह्वति**। द्युलोकाग्नौ श्रद्धायां हुतायां योऽसौ सोमो राजा अभिनिर्वृत्तः अयमेव द्वितीयपर्जन्येऽग्नौ हूयते। अस्याश्च सोमाहुतेः **वृष्टिः संभवति** इति॥ १०॥

तृतीयाहुतिस्वरूपम्

अयं वै लोकोऽग्निर्गौतम ! तस्य पृथिव्येव समित् अग्निर्धूमो रात्रिरर्चिश्चन्द्रमा अङ्गारा नक्षत्राणि विस्फुलिङ्गाः तस्मिन्नेतस्मिन्नग्नौ देवा वृष्टिं जुह्वति तस्या आहुत्या अन्नꣳ संभवति ॥ ११ ॥

तृतीयाहुतिस्वरूपमाह—अयमिति । हे **गौतम** ! प्राणिकर्मफलाश्रयोऽ**यं वै लोकः अग्निः** । **तस्याग्नेः पृथिव्येव समित्** पृथिव्या ह्ययं लोकः समिध्यते । **अग्निर्धूमः** पृथिव्याश्रयोत्थानसामान्यात् । पार्थिवेन्धनद्रव्यमाश्रित्य ह्यग्निरुत्तिष्ठति । **रात्रिरर्चिः** समित्संबन्धप्रसवसामान्यादग्नेः समित्संबन्धतो ह्यर्चिः संभवति । तथा पृथिवीसंबन्धतः पृथिवीच्छायां शार्वरं तम आचक्षते । **चन्द्रमा अङ्गाराः** तत्प्रभवत्वसामान्यात् । **नक्षत्राणि विस्फुलिङ्गाः** विस्फुलिङ्गवत् अनेकत्वसामान्यात् । **तस्मिन्नि**त्यादि पूर्ववत् । **वृष्टिं जुह्वति तस्या आहुत्या अन्नं संभवति** अन्नस्य वृष्टिप्रभवत्वात् ॥ ११ ॥

चतुर्थाहुतिस्वरूपम्

पुरुषो वा अग्निर्गौतम ! तस्य व्यात्तमेव समित् प्राणो धूमो वागर्चिश्चक्षुरङ्गाराः श्रोत्रं विस्फुलिङ्गाः तस्मिन्नेतस्मिन्नग्नौ देवा अन्नं जुह्वति तस्या आहुत्यै रेतः संभवति ॥ १२ ॥

चतुर्थाहुतिस्वरूपमाह—पुरुष इति । हे **गौतम** ! शिरःपाण्यादिमान् **पुरुषो वा अग्निः** । **तस्य व्यात्त**मपावृतं यन्मुखं **तदेव समित्** वृत्तस्वाध्यायादेः विवृतमुखप्रभवत्वात् । **प्राणो धूमः** उत्थानसामान्यात् । मुखाद्धि प्राण उत्तिष्ठति । **वागर्चिः** व्यञ्जकत्वसामान्यात् । वाचोऽभिधेयव्यञ्जकत्वात् । **चक्षुरङ्गाराः** प्रकाशाश्रयत्वात् । **श्रोत्रं विस्फुलिङ्गाः** विक्षेपसामान्यात् । **तस्मिन् एतस्मिन् अग्नौ देवा अन्नं जुह्वति** प्राणानां देवत्वोपपत्तेः । **तस्या आहुत्यै रेतः संभवति** रेतसोऽन्नपरिणामत्वात् ॥ १२ ॥

पञ्चमाहुतिस्वरूपम्

योषा वा अग्निर्गौतम ! तस्या उपस्थ एव समित् लोमानि धूमो योनिरर्चिः यदन्तः करोति तेऽङ्गारा अभिनन्दा विस्फुलिङ्गाः तस्मिन्नेतस्मिन्नग्नौ देवा रेतो जुह्वति तस्या आहुत्यै पुरुषः संभवति स जीवति यावज्जीवति अथ यदा म्रियते ॥ १३ ॥

पञ्चमाहुतिस्वरूपमाह—**योषेति । योषेति** स्त्री पञ्चमो होमाधारोऽग्निः । **तस्या उपस्थ एव समित्** उपस्थेन हि सा समिध्यते । **लोमानि धूमः** तदुत्थानसामान्यात् । **योनिरर्चिः** लोहितवर्णसामान्यात् । **यदन्तः करोति** मिथुनव्यापृतेरन्तःकरणत्वात्, **ते अङ्गारा** वीर्योपशमत्वसामान्यात् । **अभिनन्दाः** सुखलवा **विस्फुलिङ्गाः** क्षुद्रत्वसामान्यात् । **तस्मिन् एतस्मिन् अग्नौ देवा रेतो जुह्वति । तस्या आहुत्यै पुरुषः संभवति** । इत्थं द्युपर्जन्यायं-लोकपुरुषयोषित्सु क्रमेण हूयमाना आपः श्रद्धासोमवृष्ट्यन्नरेतोभावेन स्थूलादि-तारतम्यमापद्यमानाः पुरुषशरीरमारभन्ते । "यतिथ्यामाहुत्यां हुतायामापः पुरुषवाचो भूत्वा समुत्थाय वदन्ति" इति यश्चतुर्थः प्रश्नः स निर्णीतः । पञ्चम्यामाहुतौ योषाग्नौ हुतायां रेतो भूत्वा आपः पुरुषवाचो भवन्तीति योऽर्थः **स पुरुष** एवं क्रमेण जातो **जीवति** । कियन्तं कालं ? इत्यत्र **यावदस्मिन्** शरीरे स्थितिनिमित्तं कर्म विद्यते तावत् **जीवति** । **अथ** तादृशकर्मक्षये **यदा म्रियते** ॥ १३ ॥

म्रियमाणस्य कारणप्राप्तिः

अथैनमग्नये हरन्ति तस्याग्निरेवाग्निर्भवति समित् समित् धूमो धूमोऽर्चिरर्चिरङ्गारा अङ्गारा विस्फुलिङ्गा विस्फुलिङ्गास्तस्मि-न्नेतस्मिन्नग्नौ देवाः पुरुषं जुह्वति तस्या आहुत्यै पुरुषो भास्वरवर्णः संभवति ॥ १४ ॥

यदायं म्रियते तदायं कारणभावमेतीत्याह—अथेति। अथ कालतो मरणानन्तरमेनं मृतं ऋत्विजोऽग्नये आज्याहुत्यै हरन्ति। तस्य एवमाहुतिभावमापन्नस्य होमाधिकरणतया प्रसिद्धोऽग्निरेवाग्निर्भवति। तथा समिद्धूमार्चिरङ्गारविस्फुलिङ्गाः सर्वे यथाप्रसिद्धा एव भवन्ति। तस्मिन् एतस्मिन् होमाधिकरणाग्नौ देवाः पुरुषमन्त्याहुतियोग्यं जुह्वति। "पुरुषाहुतिर्यस्य प्रियतमः" इति श्रुतेः। तस्या आहुत्यै आहुतेः पुरुषो भास्वरवर्णोऽयं संभवति निषेकादिचरमाहुत्यन्तकर्मभिः संस्कृतत्वात् तस्य दिव्यदेहसंपत्तिः भवतीत्यर्थः॥ १४॥

प्रथमप्रश्ननिराकरणम्

ते य एवमेतद्विदुः ये चामी अरण्ये श्रद्धाꣳ सत्यमुपासते तेऽर्चिरभिसंभवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षात् यान् षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यमादित्यात् वैद्युतं तान् वैद्युतान् पुरुषो मानस एत्य ब्रह्मलोकान् गमयति तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति तेषां न पुनरावृत्तिः॥ १५॥

इदानीं प्रथमप्रश्नं निराकरोति—ते य एवमिति। य एवं पञ्चाग्निदर्शनं विदुः पञ्चाग्निदर्शनस्यार्चिरादिप्रतिपत्तिसाधनत्वात्। के पुनस्ते? य एवं विदुः गृहस्था ये चामी आरण्या वानप्रस्थाः परिव्राजकाश्च, तेषामरण्यालयत्वात्, श्रद्धां पुरस्कृत्य सत्यं हिरण्यगर्भाख्यं ब्रह्मोपासते ते खल्वर्चिरभिसंभवन्ति। न तद्विपरीता गृहस्थाः तेषां गतेर्भिन्नत्वात्। न ह्यर्चिश्शब्देन केवलं ज्वलनमभिधीयते किन्तु उत्तरमार्गप्रतिपत्तिसाधनार्चिरभिमानिनी देवता उच्यते। तामभिसंभवन्ति। ततोऽर्चिषोऽहः। अर्चिश्शब्दो यथा देवतापरः तथाहरादिशब्दोऽप्यातिवाहिकदेवताविषय इत्यर्थः। अर्चिरभिमानिदेवतामादौ प्रतिपद्य

ततोऽहरभिमानिनीं देवतामह्नः सकाशात् आपूर्यमाणपक्षदेवतां प्रतिपद्यन्ते। तत आपूर्यमाणपक्षात् यान् षण्मासान् उदङ् उत्तरां दिशं आदित्यः सविता एति तान् मासान् प्रतिपद्यन्ते। ततः षण्मासेभ्यः तदभिमानिदेवताभिः देवलोकाभिमानिदेवतां प्रतिपद्यन्ते। देवलोकादादित्यं आदित्यात् वैद्युतं विद्युदभिमानिदेवतां प्रतिपद्यन्ते। तान् विद्युद्भावमापन्नान् वैद्युतान् ब्रह्मणो मनसा सृष्टो मानसो मानवः पुरुषः कश्चिदेत्य आगत्य मुमुक्षून् ब्रह्मलोकान् गमयति। उपासनोपासकादितारतम्यभिदां निम्नोन्नतस्थानभेदमादाय बहुवचनम्। ते मुमुक्षवः तेन मानवेन गमिताः सन्तः तेषु ब्रह्मलोकेषु पराः प्रकृष्टाः सन्तः स्वयं परावतः संवत्सरान् कल्पान्तपरिमितान् वसन्ति। एवं ब्रह्मलोकगतानां न ह्यस्ति पुनरावृत्तिः "यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते" इति श्रुतेः॥ १९॥

धूमादिमार्गेयत्ताकथनम्

अथ ये यज्ञेन दानेन तपसा लोकान् जयन्ति ते धूममभिसंभवन्ति धूमात् रात्रिꣳ रात्रेरपक्षीयमाणपक्षमपक्षीयमाणपक्षात् यान् षण्मासान् दक्षिणादित्य एति मासेभ्यः पितृलोकं पितृलोकात् चन्द्रं ते चन्द्रं प्राप्य अन्नं भवन्ति ताꣳस्तत्र देवा यथा सोमꣳ राजानमाप्यायस्व अपक्षीयस्वेति एवमेनाꣳस्तत्र भक्षयन्ति तेषां यदा तत्पर्यवैति अथेममेवाकाशमभिनिष्पद्यन्ते आकाशात् वायुं वायोर्वृष्टिं वृष्टेः पृथिवीं ते पृथिवीं प्राप्यान्नं भवन्ति ते पुनः पुरुषाग्नौ हूयन्ते ततो योषाग्नौ जायन्ते लोकान् प्रत्युत्थायिनस्त एवमेवानुपरिवर्तन्ते अथ य एतौ पन्थानौ न विदुस्ते कीटाः पतङ्गा यदिदं दन्दशूकम्॥ १६॥

अपुनरावृत्तिलक्षणार्चिरादिमार्गेयत्तां प्रतिपाद्य श्रद्धासत्यादिसाधनविरलानां कामिनां पुनरावृत्तिसाधनं धूमादिमार्गेयत्ताख्यापनार्थं खण्डिकेयमारभ्यते—अथेति। अथ पुनर्ये नैवंविदो गृहस्थाः केवलकर्मिणोऽग्निहोत्रादिलक्षणेन **यज्ञेन** बहिर्वेदि भिक्षमाणेषु द्रव्यविभागलक्षण**दानेन** बहिर्वेद्येव दीक्षादिव्यतिरिक्तकृच्छ्रचान्द्रायणादिलक्षण**तपसा लोकान् जयन्ति**—तत्तद्भावानुरोधेन फलतारतम्यात् लोकानिति बहुवचनम्—**ते धूममभिसंभवन्ति** धूमाभिमानिदेवतां प्रतिपद्यन्ते। **धूमात् रात्रिं** ततोऽ**पक्षीयमाणपक्ष**देवतां ततो **यान् षण्मासान्** दक्षिणां दिशमादित्य **एति** तान् मासान् देवताविशेषान् प्रतिपद्यन्ते। **मासेभ्यः पितृलोकं पितृलोकात्** चन्द्रमसं **ते चन्द्रं प्राप्य अन्नं भवन्ति। तान् तत्र** अन्नभूतान् **यथा सोमं राजानमिह** ह **यज्ञे** ऋत्विजः **आप्यायस्व अपक्षीयस्वेति भक्षयन्ति एवमेनान्** चन्द्रं प्राप्तान् कर्मिणो भृत्यानिव स्वामिनो भक्षयन्ति उपभुञ्जते **देवाः**। आप्यायस्व अपक्षीयस्वेति न मन्त्रः। किं तर्हि? आपूर्यापूर्यावश्यं चमसस्थं भक्षणेन अपक्षयं च कृत्वा पुनः पुनः भक्षयन्ति। एवं देवता अपि सोमलोके लब्धशरीरान् कर्मिणः स्वोपकरणभूतान् पुनः पुनः विश्रामयन्ति उपभुञ्जते। तद्धि तेषां कर्मिणामाप्यायनमिव। **यदा** यस्मिन् काले **तत्** यज्ञदानादिलक्षणं सोमलोकप्रापकं कर्म **पर्यवैति** परिक्षीयते **अथ** कर्मक्षयानन्तरं तदा **इममेव** प्रसिद्ध**माकाशमभिनिष्पद्यन्ते**। यास्ताः श्रद्धाशब्दवाच्या आपः सोमाकारपरिणतिमेत्य कर्मिणामुपभोगार्हाम्मयशरीरारम्भका भवन्ति। तत् कर्मक्षयात् महातपसंतप्तहिमपिण्डवत् अम्मयशरीरं प्रविलीयते। पुनस्ता आप आकाशभूता इव भवन्ति। तदिदमुच्यते इममेवाकाशमभिनिष्पद्यन्ते इति। तेऽपि कर्मिणः तथाविधशरीराः सन्तः पुरोवातात् इतश्चामुतश्च नीयन्ते। तत **आकाशात् वायुं वायोर्वृष्टिं** प्रतिपद्यन्ते। उक्तं हि "तत्पर्जन्याग्नौ सोमं राजानं जुह्वति" इति। ततो वृष्टिरूपेण इमां **पृथिवीं** पतन्ति। तां **प्राप्य** व्रीहियवाद्यन्नभावं भजंति। तदुक्तं "वृष्टिं जुह्वति तस्या आहुत्या अन्नं संभवति" इति। ते **पुनः पुरुषाग्नौ हूयन्ते। ततो** रेतो भूत्वा **योषाग्नौ** हूयन्ते। ततः पुनः **जायन्ते**। ततो लोकं

प्रत्युत्थायिनोऽग्निहोत्रकर्मानुतिष्ठन्ति। ततो धूमादिना पुनः सोमलोकमिति। एवं कर्मिणो घटीयन्त्रवत् अविश्रान्तं परिभ्रमन्ति। यावत् सर्वकलना-संभवप्रबोधसिद्धब्रह्मभावापत्तिः तावदित्यर्थः। अथ पुनर्ये उत्तरायणदक्षिणायन-पन्थानौ न विदुः तत्साधनीभूतज्ञानं कर्म च अनुतिष्ठन्ति ते किं भवन्ति? इत्यत्र—कीटाः पतङ्गाः यदिदं दन्दशूकं भवन्ति। एवं हीयं संसारगतिरति-कष्टा। ततः पुनर्निर्गमनमतिदुर्लभमित्यत्र श्रुतिः "तानीमानि क्षुद्राणि अस-कृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं तेनासौ लोको न संपूर्यते तस्मात् जुगुप्सेत" इति। एवं प्रश्नाः सर्वे निर्णीताः "असौ वै लोकः" इत्यादिना चतुर्थप्रश्नः "यतिथ्यामाहुत्यां" इत्यादिः प्राथम्येन। पञ्चमस्तु द्वितीयत्वेन "देवयानस्य वा पथः प्रतिपदं पितृयाणस्य वा" इति दक्षिणोत्तरमार्गप्रतिपत्तिसाधनकथनेन। तेनैव प्रथमोऽपि अग्नेरारभ्य केचिदर्चिः प्रतिपद्यन्ते केचित् धूममिति विप्रतिपत्तिः। पुनरावृत्तिश्च द्वितीयः प्रश्नः—आकाशादिक्रमेण इमं लोकं वागच्छन्तीति। तेनैव असौ लोको न संपूर्यते कीटपतङ्गादिप्रतिपत्तेश्च केषांचित् इति, तृतीयोऽपि प्रश्नो निर्णीतः॥ १६॥

इति द्वितीयं ब्राह्मणम्

तृतीयं ब्राह्मणम्

महत्त्वसिद्धये मन्थानकर्म

स यः कामयेत महत् प्राप्नुयामिति उदगयने आपूर्यमाण-पक्षस्य पुण्याहे द्वादशाहमुपसद्व्रती भूत्वा औदुम्बरे कꣳसे चमसे वा सर्वौषधं फलानीति संभृत्य परिसमूह्य परिलिप्याग्निमुपसमाधाय परिस्तीर्य आवृता आज्यꣳ सꣳस्कृत्य पुꣳसा नक्षत्रेण मन्थꣳ संनीय जुहोति—यावन्तो देवास्त्वयि जातवेदः! तिर्यञ्चो घ्नन्ति पुरुषस्य

कामान् । तेभ्योऽहं भागधेयं जुहोमि ते मा तृप्ताः सर्वैः कामै-स्तर्पयन्तु स्वाहा । या तिरश्ची निपद्यतेऽहं विधरणी इति । तां त्वा घृतस्य धारया यजे सꣳराधनीमहꣳ स्वाहा ॥ १ ॥

एवं ज्ञानकर्मणोर्गतिरुक्ता । तत्र ज्ञानं स्वायत्तम् । कर्म तु दैवमानुषवित्त-द्वयायत्तम् । तदर्थं वित्तमुपार्जनीयम् । तत्साधनीभूतमहत्त्वसिद्धये मन्थानं कर्म आरभ्यते—**स य** इति । **स यः कामयेत** स यो वित्तार्थी कर्मण्यधिकृतो यः कामयेत । किमिति ? **महत्त्वं प्राप्नुयामिति** । तद्विधित्सितकालो विधीयते—आदित्यस्य उदगयनम् । तत्र **आपूर्यमाणशुक्लपक्षस्य** तत्रापि **पुण्याहे** स्वात्मनः सर्वसिद्धिप्रदे द्वादशाहे यत्र कर्म चिकीर्षितं प्राक् पुण्याहमेवारभ्य **द्वादशाह-मुपसद्व्रतं** उपसदः प्रसिद्धा ज्योतिष्टोमे । तत्र च स्तनोपचयापचयद्वारेण पयोभक्षणं तत् व्रतम् । तत्र च तत्कर्मानुपसंहारात् पयोभक्षणमात्रं उपादीयते । स्मार्तं हीदं मन्थनकर्म । अत एव चावसथ्याग्नावेव तत् कर्म विधीयते । सर्वा वाक् स्मार्तैवेति । **उपसद्व्रती भूत्वा** पयोव्रती सन् **औदुम्बरवृक्षमये कंसे चमसे**—तस्यैव विशेषणं कंसाकारे चमसाकारे वा औदुम्बरे । आकारे विकल्पः, न औदुम्बरत्वे । **सर्वौषधं** सर्वासामोषधीनां समूहं यथासंभवं यथाशक्ति च सर्वा ओषधीः समाहृत्य तत्र ग्राम्या व्रीहियवाद्या वक्ष्यमाणा यथासंभवं **फलानि** च यथाशक्ति । **इतिशब्दः** समस्तसंभारोपदर्शनार्थः । अन्यदपि यत् संभरणीयं तत् सर्वं **संभृत्य** क्रमस्तु गृह्योक्तो द्रष्टव्यः परिसमूहनपरिलेपनभूमि-संस्कारः **अग्निमुपसमाधाय** इतिवचनात् । आवसथ्याग्नौ होमविधानात् कर्मणः स्मार्तत्वात् विद्यमानस्यैव उपसमाधानम् । **दर्भैः परिस्तीर्य** स्थालीपाकावृत् परिगृह्य तया **संस्कृत्य** पुंनाम्ना **पुंसा नक्षत्रेण** पुण्याहसंयुक्तेन **मन्थं** सर्वौषधफलं तत्र औदुम्बरे चमसे दधिमधुनी घृतेन वा उपसिच्य एकया उपमन्थिन्या उपमथ्य **सन्नीय** मध्ये संस्थाप्य औदुम्बरस्रुवेण आवापस्थाने वक्ष्यमाणैरेतैः **मन्त्रैः आज्यं जुहोति** । वक्ष्यमाणमन्त्रानुदाहरति । **यावन्त** इत्यादिमन्त्रद्वयमस्यां खण्डिकायामभिहितम् ॥ १ ॥

तत्रोपयोगिमन्त्रोदाहरणम्

ज्येष्ठाय स्वाहा श्रेष्ठाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्राणाय स्वाहा वसिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति वाचे स्वाहा प्रतिष्ठायै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति चक्षुषे स्वाहा संपदे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति श्रोत्राय स्वाहा आयतनाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति मनसे स्वाहा प्रजात्यै स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति रेतसे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ २ ॥ अग्नये स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सोमाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भुवः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूर्भुवः स्वः स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ब्रह्मणे स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति क्षत्राय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भूताय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति भविष्यते स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति विश्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति सर्वाय स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति प्रजापतये स्वाहेत्यग्नौ हुत्वा मन्थे सꣳस्रवमवनयति ॥ ३ ॥

ज्येष्ठाय स्वाहेत्यादिमन्त्रानुदाहरति—ज्येष्ठायेति । ज्येष्ठाय स्वाहेत्यारभ्य द्वे द्वे आहुती कृत्वा स्रुवावलेपनमाज्यं मन्थे **मन्थे संस्रावयति** । एतस्मादेव ज्येष्ठं **मन्थे संस्रवमवनयति** अपरया उपमन्थिन्या पुनर्मथ्नाति ॥ २, ३ ॥

पुनस्तत्कर्मकरणम्

अथैनमभिमृशति भ्रमदसि ज्वलदसि पूर्णमसि प्रस्तब्धमसि एकसभमसि हिंकृतमसि हिंक्रियमाणमसि उद्गीथमसि उद्गीयमानमसि श्रावितमसि प्रत्याश्रावितमसि आर्द्रे संदीप्तमसि विभूरसि प्रभूरसि अन्नमसि ज्योतिरसि निधनमसि संवर्गोऽसीति ॥ ४ ॥ अथैनमुद्यच्छति आमꣳस्यामꣳहि ते महि स हि राजा ईशानोऽधिपतिः स माꣳराजा ईशानोऽधिपतिं करोत्विति ॥ ५ ॥ अथैनमाचामति तत्सवितुर्वरेण्यं मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः माध्वीर्नः सन्त्वोषधीर्भूः स्वाहा भर्गो देवस्य धीमहि मधु नक्तमुतोषसो मधुमत्पार्थिवꣳरजः मधु द्यौरस्तु नः पिता भुवः स्वाहा धियो यो नः प्रचोदयात् मधुमान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः माध्वीर्गावो भवन्तु नः स्वः स्वाहेति सर्वां च सावित्रीमन्वाह सर्वाश्च मधुमतीरहमेवेदꣳ सर्वं भूयासं भूर्भुवः स्वः स्वाहेति अन्तत आचम्य पाणी प्रक्षाल्य जघनेनाग्निं प्राक्शिराः संविशति प्रातरादित्यमुपतिष्ठते दिशामेकपुण्डरीकमसि अहं मनुष्याणामेकपुण्डरीकं भूयासमिति यथेतमेत्य जघनेनाग्निमासीनो वꣳशं जपति ॥ ६ ॥

अथैनमिति । अथैनमभिमृशति भ्रमदसीत्यनेन मन्त्रेण । **अथैनमुद्यच्छति** सह पात्रेण हस्ते गृह्णाति **आमं स्यामं हि** तेत्यनेन मन्त्रेण । **अथैनमाचामति** भक्षयति । किं तत् ? कथम् ? गायत्रीप्रथमपादेन मधुमत्या एकया व्याहृत्या च प्रथमया प्रथमं ग्रासमाचामति । तथा गायत्रीमधुमतीव्याहृतीनां द्वितीयपादेन द्वितीयं ग्रासमाचामति । तथा गायत्रीमधुमतीव्याहृतीनां तृतीयपादेन

तृतीयं ग्रासमाचामति। सर्वां गायत्रीं मधुमतीं व्याहृतीं च त्रिरुक्त्वा अहमेवेदं सर्वं भूयासमिति चान्ते भूर्भुवः स्वः स्वाहेति समस्तं भक्षयति। तथा चतुर्भिः ग्रासैः तत् सर्वं परिसमाप्यते। तथा पूर्वमेव निरूपयेत्। ततः पात्रोपलिप्तं तत् पात्रं सर्वं निर्णिज्य तूष्णीं प्राशयेत्। ततः पाणी प्रक्षाल्याचम्य जघनेनाग्निं पश्चादग्नेः प्राक्शिराः संविशति। ततः प्रातः सन्ध्यामुपास्य आदित्यमुपतिष्ठते—दिशामेकपुण्डरीकमित्यनेन मन्त्रेण। यथागतमेत्यागत्य जघनेनाग्निमासीनो वंशं जपति ॥ ४–६ ॥

आचार्यवंशजपक्रमः

तꣳ हैतमुद्दालक आरुणिर्वाजसनेयाय याज्ञवल्क्यायान्तेवासिने उक्त्वा उवाच अपि य एनꣳ शुष्के स्थाणौ निषिञ्चेत् जायेरन् शाखाः प्ररोहेयुः पलाशानीति ॥ ७ ॥ एतमु हैव वाजसनेयो याज्ञवल्क्यो मधुकाय पैङ्ग्यायान्तेवासिने उक्त्वा उवाच अपि य एनꣳ शुष्के स्थाणौ निषिञ्चेत् जायेरन् शाखाः प्ररोहेयुः पलाशानीति ॥ ८ ॥ एतमु हैव मधुकः पैङ्ग्यश्चूलाय भागवित्तयेऽन्तेवासिने उक्त्वा उवाच अपि य एनꣳ शुष्के स्थाणौ निषिञ्चेत् जायेरन् शाखाः प्ररोहेयुः पलाशानीति ॥ ९ ॥ एतमु हैव चूलो भागवित्तिर्जानकय आयस्थूणायान्तेवासिने उक्त्वा उवाच अपि य एनꣳ शुष्के स्थाणौ निषिञ्चेत् जायेरन् शाखाः प्ररोहेयुः पलाशानीति ॥ १० ॥ एतमु हैव जानकिरायस्थूणः सत्यकामाय जाबालायान्तेवासिने उक्त्वा उवाच अपि य एनꣳ शुष्के स्थाणौ निषिञ्चेत् जायेरन् शाखाः प्ररोहेयुः पलाशानीति ॥ ११ ॥ एतमु हैव सत्य-

कामो जाबालोऽन्तेवासिभ्य उक्त्वा उवाच अपि य एन॰ शुष्के स्थाणौ निषिञ्चेत् जायेरन् शाखाः प्ररोहेयुः पलाशानीति तमेतं नापुत्राय वानन्तेवासिने वा ब्रूयात् ॥ १२ ॥

तत्क्रममाचष्टे—**तमिति**। एतदर्थाचार्यपरम्परा तु उद्दालकप्रभृति सत्यकामान्तं एकैकस्मात् गुरोः एकैकेनासादितम्। सत्यकामस्तु स्वान्तेवासिभ्योऽसंख्यातेभ्य उक्त्वा उवाच। किं तत्? **अपि य एनं शुष्के स्थाणौ** विगतप्राणेऽप्येनं मन्थं भक्षणाय संस्कृतं **निषिञ्चेत्** प्रक्षिपेत् **जायेरन्नेव** अस्मिन् नीरसस्थाणावपि **शाखाः प्ररोहेयुः पलाशानि** पर्णानि। किमुत अनेन कर्मणा वाञ्छितार्थः सिद्ध्येत् इति। विचित्रफलमेतत् कर्मेत्यर्थः। यत एवमेतत्कर्म एतादृशमेतत् कर्म अतो गोपनीयम्। सर्वत्र विद्याधिगमे तीर्थानि षट्। प्राणविद्याधिगमे तु तीर्थद्वयमेवानुज्ञातम्। किं तत्? पुत्रश्च अन्तेवासी चेति ॥ ७–१२ ॥

सर्वौषधत्वेन ख्यातस्य कथनम्

चतुरौदुम्बरो भवति औदुम्बरः स्रुव औदुम्बरश्चमस औदुम्बर इध्म औदुम्बर्यौ उपमन्थन्यौ दश ग्राम्याणि धान्यानि भवन्ति व्रीहियवास्तिलमाषा अणुप्रियङ्गवो गोधूमाश्च मसूराश्च खल्वाश्च खलकुलाश्च तान् पिष्टान् दधनि मधुनि घृत उपसिञ्चति आज्यस्य जुहोति ॥ १३ ॥

चतुरेति। **चतुरौदुम्बरो भवतीति** व्याख्यातम्। **दश ग्राम्याणि धान्यानि भवन्तीति** ग्राम्यधान्यानां दशत्वं विशदयति—**व्रीहियवा** इति। **अणुप्रियङ्गव** इत्यत्र अणवश्च अणुशब्दवाच्याः। क्वचित् देशे प्रियङ्गवः प्रसिद्धाः कङ्गुशब्देन। **खल्वा** निष्पावा वल्लशब्दवाच्याः। लोके **खलकुलाः**

कुलुत्थाः । इत्येतद्व्यतिरेकेण यथाशक्ति सर्वौषधयो ग्राह्याः फलानि चायाज्ञिकानि वर्जयित्वेत्यर्थः ॥ १३ ॥

इति तृतीयं ब्राह्मणम्

चतुर्थं ब्राह्मणम्

पुत्रमन्थविधानम्

एषां वै भूतानां पृथिवी रसः पृथिव्या आपः अपामोषधय ओषधीनां पुष्पाणि पुष्पाणां फलानि फलानां पुरुषः पुरुषस्य रेतः ॥ १ ॥

स्वात्मोत्पादनीयपुत्रो यादृग्जन्म यैर्वा गुणैर्विशिष्टः पितृतुल्यलोक्यो भवतीति यत् तत्प्रतिपादनाय इदं ब्राह्मणमारभ्यते । मन्थं कर्म कृतवतः प्राणदर्शिन एवास्यां विद्यायामधिकारः । यदा पुत्रमन्थं चिकीर्षति तदा मन्थं कृत्वा पत्न्या ऋतुकालं प्रतीक्ष्य कर्म एतत् कुर्यादित्याह—**एषामिति** । **एषां चराचरभूतानां पृथिवी रसः** सारभूतः । तस्याः सर्वभूतमधुत्वेन उक्तत्वात् । **पृथिव्या आपो रसः** अप्सु हि पृथिवी ओतप्रोतभावं गता । **अपां ओषधयः** तत्कार्यत्वात् ओषधीनां रसत्वम् । **ओषधीनां पुष्पाणि** । **पुष्पाणां फलानि** । **फलानां पुरुषः** । **पुरुषस्य रेतः** "सर्वेभ्योऽङ्गेभ्यः तेजः संभूतं" इति श्रुतेः ॥ १ ॥

प्रजापतिना रेतःप्रतिष्ठाचिन्तनम्

स ह प्रजापतिरीक्षांचक्रे हन्तास्मै प्रतिष्ठां कल्पयानीति स स्त्रियꣳ ससृजे ताꣳ सृष्ट्वा अध उपास्ते तस्मात् स्त्रियमध उपासीत स एतं प्राञ्चं ग्रावाणमात्मन एव समुदपारयत् तेनैनामभ्यसृजत् ॥ २ ॥

यतः सर्वभूतसारं रेतः अतः का नु खल्वस्य प्रतिष्ठा भवति ? इति प्रजापतिः व्यचिन्तयदित्याह—**स हेति**। **स ह प्रजापतिः** का नु अस्य योग्या ? इति **ईक्षाञ्चक्रे**। ततः किं कृतवान् ? इत्यत्र **स स्त्रियं ससृजे**। **तामेवं सृष्ट्वा अध उपास्ते**। प्रजोत्पादनव्यापृतिः अधउपासनशब्दार्थः। यस्मात् प्रजापतिरेवं कृतवान् **तस्मात् स्त्रियमध उपासीत** कार्यस्य कारणानुकारित्वात्। अत्र वाजपेयसामान्यक्लृप्तिमाह—**स एतमिति**। **स एतमात्मनो ग्रावाणं** सोमाभिषवोपलस्थानीयं—काठिन्यसामान्यात्—**प्रजननेन्द्रियमुदपारयत्** स्त्रीव्यञ्जनं प्रति पूरितवान्। **तेन एनां स्त्रियमभ्यसृजत** अभिसंसर्गं कृतवान् ॥ २ ॥

अधोपहासे वाजपेयदृष्टिः तत्फलं च

तस्या वेदिरुपस्थो लोमानि बर्हिश्चर्माधिषवणे समिद्धो मध्यतस्तौ मुष्कौ स यावान् ह वै वाजपेयेन यजमानस्य लोको भवति तावानस्य लोको भवति य एवं विद्वानधोपहासं चरति आसाꣳ स्त्रीणाꣳ सुकृतं वृङ्क्ते अथ य इदमविद्वान् अधोपहासं चरति अस्य स्त्रियः सुकृतं वृञ्जते ॥ ३ ॥

तस्या इति। **तस्या वेदिरित्यादि** सर्वं सामान्यम्। प्रसिद्धमेतत् लोके स्त्रीव्यञ्जनस्य मध्येऽग्निरिति। **तौ मुष्कौ** अधिषवणफलके इति व्यवहितेन संबध्यते। वाजपेययाजिनो **यावान्** लोकः प्रसिद्धः **तावान्** विदुषो मैथुनकर्मणः फलमिति स्तूयते। तस्मात् बीभत्सा न कार्येति। **य एवं विद्वान् अधोपहासं चरति आसां स्त्रीणां सुकृतं वृङ्क्ते** आवर्जयति। **अथ** पुनर्यो वाजपेयसंपत्तिं न जानाति सोऽविद्वान् रेतसो रेतस्त्वं **चरति**। **अस्य स्त्री सुकृतमावृङ्क्ते** ॥ ३ ॥

अविदुषामेतत् गर्हितमित्यनेकाचार्यसंमतिः

एतत् ह स्म वै तद्विद्वानुद्दालक आरुणिराह एतद्ध स्म वै तद्विद्वान्नाको मौद्गल्य आह एतद्ध स्म वै तद्विद्वान् कुमारहारित आह बहवो मर्या ब्राह्मणायना निरिन्द्रिया विसुकृतोऽस्माल्लोकात् प्रयन्ति य इदमविद्वाꣳसोऽधोपहासं चरन्तीति बहु वा इदꣳ सुप्तस्य वा जाग्रतो वा रेतः स्कन्दति ॥ ४ ॥

एतद्ध स्म वै इति । एतत् ह स्म वै तद्विद्वान् उद्दालक आरुणिराह । किमिति? अधोपहासाख्यं मैथुनं कर्म वाजपेयसंपन्नं विद्वानिति । अथ नाको मौद्गल्यः कुमारहारितश्च । किञ्च बहवो मर्या मरणधर्मिणो मनुष्या ब्राह्मणायना निरिन्द्रिया विनष्टेन्द्रिया विगतसुकृतकर्माणोऽविद्वांसो मिथुनकर्मण्यासक्ता भवेयुः । एवमस्मात् जाग्रल्लोकात् प्रेत्य इदमविद्वांसो वा उपहासं चरन्ति तेषां बहु वा इदं रेतः सुप्तस्य वा जाग्रतो वा स्कन्दति ॥ ४ ॥

रेतोऽभिमन्त्रणं गर्भधारणोपायाश्च

तदभिमृशेत् अनु वा मन्त्रयेत—यन्मेऽद्य रेतः पृथिवीमस्कान्त्सीत् यदोषधीरप्यसरत् यदप इदमहं तद्रेत आददे पुनर्मामैत्विन्द्रियं पुनस्तेजः पुनर्भगः पुनरग्निर्धिष्ण्या यथास्थानं कल्पन्ताम्—इत्यनामिकाङ्गुष्ठाभ्यामादाय अन्तरेण स्तनौ वा भ्रुवौ वा निमृज्यात् ॥ ५ ॥ अथ यद्युदके आत्मानं पश्येत् तदभिमन्त्रयेत—मयि तेज इन्द्रियं यशो द्रविणꣳ सुकृतमिति—श्रीर्ह वा एषां स्त्रीणां यन्मलोद्वासाः तस्मान्मलोद्वाससं यशस्विनीमभिक्रम्य उपमन्त्रयेत ॥ ६ ॥ सा चेदस्मै न दद्यात् काममेनाम-

वक्रीणीयात् सा चेदस्मै नैव दद्यात् काममेनां यष्ट्या वा पाणिना वा उपहत्य अतिक्रामेत्—इन्द्रियेण ते यशसा यश आदद इति—अयशा एव भवति ॥ ७ ॥ सा चेदस्मै दद्यात्—इन्द्रियेण ते यशसा यश आदधामीति—यशस्विनावेव भवतः ॥ ८ ॥ स यामिच्छेत् कामयेत मेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधाय उपस्थमस्या अभिमृश्य जपेत्—अङ्गादङ्गात् संभवसि हृदयादधि जायसे । स त्वमङ्गकषायोऽसि दिग्धविद्धामिव मादय इमाममूं मयि इति ॥ ९ ॥ अथ यामिच्छेत् न गर्भं दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायाभिप्राण्यापान्यात्—इन्द्रियेण ते रेतसा रेत आदद इति । अरेता एव भवति ॥१०॥ अथ यामिच्छेत् दधीतेति तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधायापान्याभिप्राण्यात्—इन्द्रियेण ते रेतसा रेत आदधामीति । गर्भिण्येव भवति ॥ ११ ॥

वक्ष्यमाणमन्त्रतः तदभिमन्त्र्य भ्रूमध्ये स्तनान्तरे वा निमृज्यादित्याह—तदिति । अथ पुत्रार्थी निरिन्द्रियोऽपि यशस्विनीमुपमन्त्र्य स यामिच्छेत् न गर्भं दधीत पश्चात् भूयोऽन्यामिन्द्रियेण ते रेतसा रेत आदद इति अनेन मन्त्रेण । गर्भिणी न भवति । अथ यामिच्छेत् गर्भं दधीतेति पूर्वविपर्ययेण अपान्याभिप्राण्यादिन्द्रियेण ते रेतसा रेत आदधामीति । गर्भिण्येव भवति ॥ ९–११ ॥

जायाजाराभिचारः

अथ यस्य जायायै जारः स्यात् तं चेत् द्विष्यादामपात्रेऽग्निमुपसमाधाय प्रतिलोमꣳ शरबर्हिस्तीर्त्वा तस्मिन्नेताः शरभृष्टीः

प्रतिलोमाः सर्पिषाक्ता जुहुयात्—मम समिद्धेऽहौषीः प्राणापानौ त आददेऽसाविति मम समिद्धेऽहौषीः पुत्रपशूꣳस्त आददेऽसाविति मम समिद्धेऽहौषीरिष्टासुकृते त आददेऽसाविति मम समिद्धेऽहौषी-राशापराकाशौ त आददेऽसाविति। स वा एष निरिन्द्रियो विसुकृत् अस्माल्लोकात् प्रैति यमेवं विद्वान् ब्राह्मणः शपति तस्मा-देवंवित् श्रोत्रियस्य दारेण नोपहासमिच्छेत् उत ह्येवंवित् परो भवति ॥ १२ ॥

अथ पुनः यस्य जायायै जारः उपपतिः स्यात् तं चेत् द्विष्यात् अभिचरिष्याम्येनमिति मन्येत तस्येदं—आमपात्रे अग्निमुपसमाधाय सर्वं प्रतिलोमं कुर्यात्। प्रतिलोमाः सर्पिषाक्ता जुहुयात् शरभृष्टीः शरेषीकाः। मम समिद्धेऽहौषीः इत्याद्याहुतीः अन्ते सर्वासामसाविति नाम ग्राह्यं प्रत्येकम्। स एवंवित् यं ब्राह्मणः शपति स हि विसुकृत् विगतपुण्यकर्मा प्रैति। तस्मात् एवंवित् श्रोत्रियस्य दारैः सह नोपहासमिच्छेत्। लीलया प्रीत्यर्थं, किमुत अधोपहासम्? एवंविदपि तावत् परो भवति शत्रुः भवतीत्यर्थः ॥१२॥

जायाया रजस्वलाकरणम्

अथ यस्य जायामार्तवं विन्देत् त्र्यहं कꣳसेन पिबेत् अहतवासा नैनां वृषलो न वृषली उपहन्यात्त्रिरात्रान्ते आप्लुत्य व्रीहीनवघातयेत् ॥ १३ ॥

अथ यस्य जायां आर्तवं विन्देत् ऋतुभावं प्राप्नुयात् इत्येवमादिग्रन्थः पूर्वोऽत्र द्रष्टव्यः। त्र्यहं कंसेन पिबेत् अहतवासाश्च स्यात्। तां स्नातां वृषलो वृषली वा नोपहन्यात् न स्पृशेत्। त्रिरात्रान्ते समाप्तौ ततो व्रीहीनवघातयेत् तत्कर्मणि नियुञ्ज्यात् ॥ १३ ॥

शुक्लपुत्रादिजननोपायाः

स य इच्छेत् पुत्रो मे शुक्लो जायेत वेदमनुब्रुवीत सर्वमायुरियादिति क्षीरौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १४ ॥ अथ य इच्छेत् पुत्रो मे कपिलः पिङ्गलो जायेत द्वौ वेदावनुब्रुवीत सर्वमायुरियादिति दध्योदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १५ ॥ अथ य इच्छेत् पुत्रो मे श्यामो लोहिताक्षो जायेत त्रीन् वेदाननुब्रुवीत सर्वमायुरियादित्युदौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥ १६ ॥ अथ य इच्छेत् दुहिता मे पण्डिता जायेत सर्वमायुरियादिति तिलौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै ॥१७॥ अथ य इच्छेत् पुत्रो मे पण्डितो विगीतः समितिंगमः शुश्रूषितां वाचं भाषिता जायेत सर्वान् वेदाननुब्रुवीत सर्वमायुरियादिति माꣳसौदनं पाचयित्वा सर्पिष्मन्तमश्नीयातामीश्वरौ जनयितवै औक्षेण वार्षभेण वा ॥१८॥ अथाभिप्रातरेव स्थालीपाकावृता आज्यं चेष्टित्वा स्थालीपाकस्य उपघातं जुहोति—अग्नये स्वाहानुमतये स्वाहा देवाय सवित्रे सत्यप्रसवाय स्वाहेति। हुत्वा उद्धृत्य प्राश्नाति प्राश्य इतरस्याः प्रयच्छति प्रक्षाल्य पाणी उदपात्रं पूरयित्वा तेनैनां त्रिरभ्युक्षति—उत्तिष्ठातो विश्वावसोऽन्यामिच्छ प्रपूर्व्यां सं जायां पत्या सहेति ॥ १९ ॥ अथैनामभिपद्यते—अमोऽहमस्मि सा त्वꣳ सा त्वमसि अमोऽहं सामाहमस्मि ऋक् त्वं द्यौरहं पृथिवी त्वं तावेहि सꣳरभावहै सह रेतो दधावहै पुꣳसे पुत्राय वित्तये—इति ॥ २० ॥ अथास्या ऊरू विहापयति—विजिहीथां द्यावा-

पृथिवी इति । तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधाय त्रिरेनामनु-
लोमामनुमार्ष्टि—विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु ।
आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं
धेहि पृथुष्टुके । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २१ ॥
हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ । तं ते गर्भं हवामहे
दशमे मासि सूतये । यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी ।
वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति ॥ २२ ॥

स य इच्छेत् पुत्रो मे वर्णतः शुक्लो जायेत वेदमेकमनुब्रुवीत सर्वमायुर्वर्षशतमियात्, क्षीरमन्नं पाचयित्वा सर्पिष्मन्तमश्नीयाताम् । ईश्वरौ समर्थौ । जनयितवै । द्यावापृथिवी इत्यनेन मन्त्रेण । तस्यामर्थमित्यादि पूर्ववत् । त्रिरेनां शिरःप्रभृत्यनुलोमां अनुमार्ष्टि—विष्णुर्योनिं इत्यादि । नाम गृह्णाति अस्याः ॥ १४–२२ ॥

सुखप्रसवोपायः

सोष्यन्तीमद्भिरभ्युक्षति—यथा वायुः पुष्करिणीꣳ समिङ्गयति
सर्वतः । एवा ते गर्भ एजतु सहावैतु जरायुणा इन्द्रस्यायं व्रजः कृतः
सार्गलः सपरिश्रयः । तमिन्द्र ! निर्जहि गर्भेण सावराꣳ सहेति ॥२३॥

सोष्यन्तीं अद्भिरभ्युक्षति प्रसवकाले सुखप्रसवार्थमनेन मन्त्रेण—एवा ते गर्भ एजतु इत्यादिना ॥ २३ ॥

जातकर्मकथनम्

जातेऽग्निमुपसमाधाय अङ्क आधाय कꣳसे पृषदाज्यꣳ
संनीय पृषदाज्यस्य उपघातं जुहोति—अस्मिन् सहस्रं पुष्यासमेध-

मानः स्वे गृहे। अस्योपसन्द्यां मा च्छैत्सीत् प्रजया च पशुभिश्च स्वाहा। मयि प्राणाꣳस्त्वयि मनसा जुहोमि स्वाहा। यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निः तत् स्विष्टकृत् विद्वान्स्विष्टꣳसुहुतं करोतु नः स्वाहेति ॥ २४ ॥ अथास्य दक्षिणं कर्णमभिनिधाय––वाग्वागिति त्रिः। अथ दधि मधु घृतꣳ संनीय अनन्तर्हितेन जातरूपेण प्राशयति––भूस्ते दधामि भुवस्ते दधामि स्वस्ते दधामि भूर्भुवः स्वः सर्वं त्वयि दधामीति ॥ २५ ॥

अथ जातकर्म। जातेऽग्निमुपसमाधाय अङ्क आधाय पुत्रं कंसे पृषदाज्यं सन्नियमनं संयोज्य दधिघृते पृषदाज्यस्य उपघातं जुहोति––अस्मिन् सहस्रमित्याद्यावापस्थाने। कर्णमभिनिधाय स्वमुखं वागादिगीतीः त्रिर्जपेत्। अथ दधि मधु घृतं सन्निधाय अनन्तर्हितेन अव्यवहितेन जातरूपेण हिरण्येन प्राशयति एभिर्मन्त्रैः ॥ २४, २५ ॥

नामकरणम्

अथास्य नाम करोति––वेदोऽसीति। तदस्य तत् गुह्यमेव नाम भवति ॥ २६ ॥

अथास्य नाम करोति—वेदोऽसीति। तदस्य तत् गुह्यं नाम भवति ॥

पुत्रस्य मात्रे प्रदानं स्तनप्रदापनमन्त्रश्च

अथैनं मात्रे प्रदाय स्तनं प्रयच्छति––यस्ते स्तनः शशयो यो मयोभूर्यो रत्नधा वसुविद्यः सुदत्रः। येन विश्वा पुष्यसि वार्याणि सरस्वति! तमिह धातवेऽकरिति ॥ २७ ॥

अथैनं मात्रे प्रदाय यस्ते स्तनः इत्यादिमन्त्रेण स्तनं प्रयच्छति ॥२७॥

मात्रभिमन्त्रणं सुपितापुत्रस्तुतिश्च

अथास्य मातरमभिमन्त्रयते—इलासि मैत्रावरुणी वीरे वीरमजीजनत्। सा त्वं वीरवती भव यास्मान् वीरवतोऽकरदिति। तं वा एतमाहुः अतिपिता बत अभूरतिपितामहो बत अभूः परमां बत काष्ठां प्रापत् श्रिया यशसा ब्रह्मवर्चसेन य एवंविदो ब्राह्मणस्य पुत्रो जायत इति ॥ २८ ॥

इलासि इत्यनेन **अथास्य मातरमभिमन्त्रयते**। अनेन विधिना जातः पितरं पितामहं चातिशेते। **श्रिया यशसा ब्रह्मवर्चसेन परमां काष्ठां प्रापत्** इत्येवं स्तुतो भवति। **एवंविदः सुपुत्रो जायते** इति ॥ २८ ॥

इति चतुर्थं ब्राह्मणम्

पञ्चमं ब्राह्मणम्

वंशब्राह्मणम्

अथ वꣳशः पौतिमाषीपुत्रः कात्यायनीपुत्रात् कात्यायनीपुत्रो गौतमीपुत्रात् गौतमीपुत्रो भारद्वाजीपुत्रात् भारद्वाजीपुत्रः पाराशरीपुत्रात् पाराशरीपुत्र औपस्वस्तीपुत्रात् औपस्वस्तीपुत्रः पाराशरीपुत्रात् पाराशरीपुत्रः कात्यायनीपुत्रात् कात्यायनीपुत्रः कौशिकीपुत्रात् कौशिकीपुत्र आलम्बीपुत्राच्च वैयाघ्रपदीपुत्राच्च वैयाघ्रपदीपुत्रः काण्वीपुत्राच्च कापीपुत्राच्च कापीपुत्रः ॥ १ ॥

आत्रेयीपुत्रात् आत्रेयीपुत्रो गौतमीपुत्रात् गौतमीपुत्रो भारद्वाजी-
पुत्रात् भारद्वाजीपुत्रः पाराशरीपुत्रात् पाराशरीपुत्रो वात्सीपुत्रात्
वात्सीपुत्रः पाराशरीपुत्रात् पाराशरीपुत्रो वार्कारुणीपुत्रात् वार्का-
रुणीपुत्रो वार्कारुणीपुत्रात् वार्कारुणीपुत्र आर्तभागीपुत्रात् आर्त-
भागीपुत्रः शौङ्गीपुत्रात शौङ्गीपुत्रः सांकृतीपुत्रात् सांकृतीपुत्र
आलम्बायनीपुत्रात् आलम्बायनीपुत्र आलम्बीपुत्रात् आलम्बीपुत्रो
जायन्तीपुत्रात् जायन्तीपुत्रो माण्डूकायनीपुत्रात् माण्डूकायनीपुत्रो
माण्डूकीपुत्रात् माण्डूकीपुत्रः शाण्डिलीपुत्रात् शाण्डिलीपुत्रो
राथीतरीपुत्रात् राथीतरीपुत्रो भालुकीपुत्रात् भालुकीपुत्रः क्रौञ्चिकी-
पुत्राभ्यां क्रौञ्चिकीपुत्रौ वैदभृतीपुत्रात् वैदभृतीपुत्रः कार्शकेयीपुत्रात्
कार्शकेयीपुत्रः प्राचीनयोगीपुत्रात् प्राचीनयोगीपुत्रः सांजीवीपुत्रात्
सांजीवीपुत्रः प्राश्नीपुत्रात् आसुरिवासिनः प्राश्नीपुत्र आसुरायणा-
दासुरायण आसुरेरासुरिः ॥ २ ॥ याज्ञवल्क्यात् याज्ञवल्क्य
उद्दालकात् उद्दालकोऽरुणादरुण उपवेशेरुपवेशिः कुश्रेः कुश्रिर्वाज-
श्रवसो वाजश्रवा जिह्वावतो बाध्योगात् जिह्वावान् बाध्योगोऽसिता-
द्वार्षगणात् असितो वार्षगणो हरितात् कश्यपात् हरितः कश्यपः
शिल्पात् कश्यपात् शिल्पः कश्यपः कश्यपात् नैध्रुवेः कश्यपो
नैध्रुविर्वाचो वाक् अम्भिण्या अम्भिणी आदित्यात् आदित्यानी-
मानि शुक्लानि यजूंषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते ॥३॥
समानं आ सांजीवीपुत्रात् सांजीवीपुत्रो माण्डूकायनेः माण्डूकाय-
निर्माण्डव्यात् माण्डव्यः कौत्सात् कौत्सो माहित्थेर्माहित्थिर्वामक-

क्षायणात् वामकक्षायणः शाण्डिल्यात् शाण्डिल्यो वात्स्यात् वात्स्यः कुश्रेः कुश्रिर्यज्ञवचसो राजस्तम्बायनात् यज्ञवचा राजस्तम्बायनः तुरात् कावषेयात् तुरः कावषेयः प्रजापतेः प्रजापतिर्ब्रह्मणो ब्रह्म स्वयंभु ब्रह्मणे नमः ॥ ४ ॥

अथ वंशब्राह्मणमारभ्यते—अथेति। अथेदानीं समस्तप्रवचनवंशः स्त्री-प्राधान्यात्। गुणवान् पुत्रो भवतीति प्रस्तुतम्। अतः स्त्रीविशेषणेन पुत्रविशेषणेन च। तानीमानि शुक्लानि यजूंषि। प्रजापतिमारभ्य यावत्पौतिमाषीपुत्रः तावदधोनीताचार्यपूर्वक्रमोऽयं वंशब्राह्मणः। यत्र एतस्मिन् अखिलं विकल्पितं तद्धि स्वयंभु स्वविकल्पितहेयांशापाये यत् स्वमात्रमवशिष्यते तद्धि ब्रह्म। तस्मै नमो नम इत्यर्थः ॥ १-४ ॥

इति पञ्चमं ब्राह्मणम्

इति षष्ठोऽध्यायः

श्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगिना।
लिखितं स्याद्विवरणं बृहदारण्यकस्य हि ॥
बृहदारण्यकव्याख्याग्रन्थसंख्या निगद्यते।
त्रिशताधिकयुक्पञ्चसहस्रं परिकीर्तिता ॥
ईशादिबृहदारण्यावधि व्याख्यानविस्तरः।
सप्तविंशाधिकशतत्रयोदशसहस्रकम् ॥

इति श्रीमदीशाद्यष्टोत्तरशतोपनिषच्छास्त्रविवरणे दशसंख्यापूरकं बृहदारण्यकोपनिषद्विवरणं संपूर्णम्

श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुरामचन्द्रार्पणमस्तु

नामधेयपदसूची

यत्र पुटसंख्यानन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या।

विशेषपदसूची

यत्र पुटसंख्यानन्तरं तिर्यग्रेखायाः परं संख्या वर्तते तत्र तावती पदावृत्तिः बोध्या।

पदम्	पुटसंख्या

पदम्	पुटसंख्या

पृथिवी इति । तस्यामर्थं निष्ठाय मुखेन मुखꣳ संधाय त्रिरेनामनु-लोमामनुमार्ष्टि—विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिꣳशतु । आसिंचतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि पृथुष्टुके । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥ २१ ॥ हिरण्मयी अरणी याभ्यां निर्मन्थतामश्विनौ । तं ते गर्भं हवामहे दशमे मासि सूतये । यथाग्निगर्भा पृथिवी यथा द्यौरिन्द्रेण गर्भिणी । वायुर्दिशां यथा गर्भ एवं गर्भं दधामि तेऽसाविति ॥ २२ ॥

स य इच्छेत् पुत्रो मे वर्णतः शुक्लो जायेत वेदमेकमनुब्रुवीत सर्वमायुर्वर्षशतमियात्, क्षीरमन्नं पाचयित्वा सर्पिष्मन्तमश्नीयाताम् । ईश्वरौ समर्थौ । जनयितवै । द्यावापृथिवी इत्यनेन मन्त्रेण । तस्यामर्थमित्यादि पूर्ववत् । त्रिरेनां शिरःप्रभृत्यनुलोमां अनुमार्ष्टि—विष्णुर्योनिं इत्यादि । नाम गृह्णाति अस्याः ॥ १४–२२ ॥

सुखप्रसवोपायः

सोष्यन्तीमद्भिरभ्युक्षति—यथा वायुः पुष्करिणीꣳ समिङ्गयति सर्वतः । एवा ते गर्भ एजतु सहावैतु जरायुणा इन्द्रस्यायं व्रजः कृतः सार्गलः सपरिश्रयः । तमिन्द्र ! निर्जहि गर्भेण सावराꣳ सहेति ॥२३॥

सोष्यन्तीं अद्भिरभ्युक्षति प्रसवकाले सुखप्रसवार्थमनेन मन्त्रेण—एवा ते गर्भ एजतु इत्यादिना ॥ २३ ॥

जातकर्मकथनम्

जातेऽग्निमुपसमाधाय अङ्क आधाय कꣳसे पृषदाज्यꣳ संनीय पृषदाज्यस्य उपघातं जुहोति—अस्मिन् सहस्रं पुष्यासमेध-